श्रुतज्ञानप्रकाशनमाला– पुष्पं प्रथमम्

णमो ऽत्थु णं समणस्स भगवओ महावीरस्स ।

कलिकालसर्वज्ञ - आचार्यमुकुटमणि - श्रीमद् हेमचन्द्रसूरिभ्यो नमः ।

सुविशुद्धमार्गप्ररूपक-सुगृहीतनामधेय-आचार्यशिरोरत्न-श्रीमद्विजयरामचन्द्रसूरिभ्यो नमः ।

कलिकालसर्वज्ञ–आचार्यशिरोमणि-

श्रीमद् हेमचन्द्रसूरीश्वरविरचितम्

# त्रिषष्टिशलाकापुरुषचरितम् महाकाव्यम्

[ तत्र च इदम् ]

## दशमं पर्व

( पाठान्तर- टिप्पण्यादिना अलङ्कृतम् )

संशोधकः संपादकश्च **सुबोधचन्द्र नानालाल शाह** इत्याख्यः

प्रकाशकम् :-

**श्रीमती गंगाबाई जैन चेरिटेबल ट्रस्ट, विलेपारले, मुंबई–५६**

# प्रकाशकीय निवेदन

अनन्त करुणाना महासागर, देवाधिदेव, चरमतीर्थपति, भगवान श्री वर्धमानस्वामीनी तथा मारा धर्मदाता, सुविशुद्ध जिनमार्गना प्ररूपणथी तिलमात्र पण चलित न थनार, आ दुःषमकालमां पण जिनधर्मनी अद्‌भुत प्रभावना करवा द्वारा प्राचीन आचार्य भगवंतोनी स्मृतिने ताजी करावता, अनेक जीवोने बोधिबीज प्राप्त करावनार, व्याख्यानवाचस्पति, सुविशाल मुनिगणना अधिपति, आचार्यशिरोमणि, प्रातःस्मरणीय, श्री श्री श्री श्रीमद् विजय रामचन्द्रसूरीश्वरजीमहाराजनी अचिन्त्य कृपाना योगे श्रुतज्ञानप्रकाशनमालाना प्रथम पुष्प रूप आ श्री त्रिषष्टिशलाकापुरुषचरित दशम पर्व ग्रन्थ ते परमात्मा श्रमणभगवान श्री वर्धमानस्वामी प्रति अनन्यभक्तिभाव धरनारा एवा आ ग्रन्थना अधिकारी महानुभावो समक्ष मूकवानी तक मळ्या बदल अनुपम आनंद अनुभवुं छुं

मारा परमतारक गुरुदेव, आचार्यशिरोमणि, श्रीमद् विजयरामचन्द्रसूरीश्वरजी महाराज, पोतानी धर्मदेशनामां, पुण्यना योगे प्राप्त थयेला धननो सात क्षेत्रोमां व्यय करी लेवानो उपदेश निरंतर आपता ज रह्या छे. ते पैकी जिनागमनी भक्ति ए पण एक महत्त्वनुं क्षेत्र छे ते हुं सांभळतो हतो. बीजी तरफ त्रिषष्टिशलाकापुरुषचरित ग्रन्थनुं दशमुं पर्व छेल्लां केटलांय वर्षोथी अप्राप्य नहीं तो दुष्प्राप्य बनी गयुं हतुं अने एनुं पुनर्मुद्रण कराववानी अति जरूरत छे एवुं पण अवारनवार सांभळवा मळतुं हतुं. परन्तु, एनुं मुद्रण कोइ विशिष्ट कोटिए थाय तो ठीक एम पण केटलाक महानुभावोनुं मानवुं हतुं.

अमारा ट्रस्टे निर्णय कर्यो के आ पावन कार्यनो लाभ अमारे लेवो, परन्तु संपादन केम करवुं ? जूनी हस्त प्रतो उपरथी पाठान्तरो केवी रीते लेवा ? टिप्पणो शेरे कटको राखवां अने क्यां राखवां ? ते सर्व विषयोमां अमे अजाण हता अने तेथी कोइ एवी व्यक्तिने शोधता हता के जे आ सर्व कार्योने सुचारुरूपे संभाळी शके.

छेवटे मारा धर्ममित्र, भाई श्री सुबोधचन्द्रभाईने आ कार्य माटे में विनंति करी के 'आ कार्य तमे सुंदर रीते करी आपो ' तेमणे पण केटलांक सूचनो करवा पूर्वक मारी विनंति स्वीकारी. तेमनां सर्व सूचनो अमे स्वीकार्यां जे पैकी मुख्य सूचन ए हतुं के आज पूर्वे श्री जैनधर्मप्रसारकसभा-भावनगर तरफथी जे दशम पर्व छपायुं छे तेना परथी ज मुद्रण न करावतां जूनी हस्तप्रतो परथी ज मुद्रण कराववुं.

आ रीते मुद्रण कराववानो निर्णय थतां ज जूनी हस्तप्रतो मेळववानी अमे कोशिश करी अने परम-पूज्य, आचार्यभगवंत, श्रीमद् विजय रामचन्द्रसूरीश्वरजी महाराजना विद्वान् शिष्यरत्न, पूज्यपाद आचार्य श्री विजयकनकचन्द्रसूरीश्वरजी महाराजनी कृपाथी अमे खंभातना नीतिविजयशास्त्रसंग्रहनी, विक्रमनी चौदमी शताब्दीमां लखायेली प्रति मेळववा भाग्यशाळी बन्या.

ते पछी परमपूज्य, आचार्यभगवंत, श्रीमद् विजयरामचन्द्रसूरीश्वरजी महाराजना विनयी शिष्यरत्न, पूज्यपाद आचार्य श्रीविजयमहोदयसूरीश्वरजी महाराजनी कृपाथी डभोईना आर्यजंबूस्वामीमुक्ताबाईजैन ज्ञानमंदिरनी विक्रमनी सत्तरमी शताब्दीमां लखायेली प्रति मेळववा अमे भाग्यशाळी बन्या.

अने त्यारबाद, मारा कल्याणमित्र श्री हर्षदभाई मणिलाल संघवीना सौजन्यथी, अमदावादना लालभाई दलपतभाई भारतीय विद्यामंदिरनी विक्रमनी सत्तरमी शताब्दीमां लखायेली प्रति मेळववा अमे भाग्यशाळी बन्या.

उपरोक्त त्रणेय प्रतो श्री सुबोधचन्द्रभाईने आपी अने तेना परथी पाठांतरो वगेरे लेवानी अने सुयोग्य संपादन करवानी अमे तेमने विनंति करी अने ते कार्य तेमणे संपूर्ण कर्युं.

सुंदर अने टकाउ कागळो, सुघड अने अतिशुद्ध मुद्रण आ बधी अमारी अभिलाषाओ पूर्ण करवानी अमे बनती कोशिष करी छे छतां अमे तेमां केटला सफल बन्या छीए तेनो निर्णय आ ग्रन्थना पाठको स्वयमेव ज करी ले.

आ ग्रन्थ छपातां ज तेना अगाउथी ग्राहक थवा माटे जे जे संघो तथा ट्रस्टोए पोताना हस्तकना ज्ञानखाताओनी रकमो अमने आपवा द्वारा सहाय करी छे ते ते संघोना तथा ट्रस्टोना अने आवी प्रेरणा आपनार पूज्य गुरु भगवंतोना अमे अत्यंत उपकृत छीए.

आ ग्रन्थ पूज्य साधु साध्वीजी महाराजोने विनामूल्ये आपी शकाय ते माटेज ज्ञानखाताओनी रकमोनो अमे स्वीकार कर्यो छे अन्यथा आवी रकमोनो स्वीकार करवो अमारा माटे दोषपात्र हतो एटलो खूलासो करी लेवो आवश्यक समजुं छुं.

आ संपादन पाछळ रात दिवस जोया विना ते सुंदरमां सुंदर केम बने तेवो निरंतर प्रयास करनार अने आने पोतानुंज कार्य समजी व्यवस्थित रीते पूर्ण करनार मारा धर्ममित्र भाई श्री सुबोधचन्द्र नानालाल शाहना अमे अत्यंत ऋणी छीए.

साईनाथ टाईपोग्राफी प्रेसना सौजन्यभर्या व्यवहारथीज अमे मात्र पांच मासना टुंका गाळामां आ ३५ फरमानो ग्रंथ प्रकाशित करी शक्या छीए ते बदल तेमना पण अमे आभारी छीए.

अन्ते—

आ शुभ अने आत्मकल्याणकर कार्य द्वारा अमे, अने आ ग्रन्थना अध्ययन द्वारा आ ग्रन्थना अधिकारी पाठक महानुभावो पोताना दुस्तर संसारने टुंको करी एज एक अभिलाषा साथे विरमुं छुं.

वि. सं. २०२३, माघ शुक्ल पूर्णिमा
शुक्रवार ता. ४--२--१९६७

प्राणलाल सुंदरजी कापडिया
व्यवस्थापक, श्री गं. जै. चे ट्रस्ट



# विषयानुक्रमः


| | |
|---|---|
| प्रथमः सर्गः | १-२३ |
| नयसारभववर्णनम् | १-२ |
| मरीचिभववर्णनम् | ३-७ |
| मध्यवर्तिनो भवाः | ७-८ |
| विश्वभूतिभववर्णनम्, | ८-१० |
| त्रिपृष्ठभववर्णनम्, मध्यवर्तिनो भवाश्च | १०-१५ |
| प्रियमित्रचक्रिभववर्णनम् | १६-१८ |
| नन्दनराजभववर्णनम् | १८-२२ |
| अन्तिमदेवभववर्णनम् | २२-२३ |
| द्वितीयः सर्गः | २४-४० |
| देवानन्दाकुक्षौ प्रभोः अवतरणम् | २४- |
| त्रिशलाकुक्षौ गर्भसंहरणम् | २५-२६ |
| गर्भावस्थावर्णनम्, प्रभोः अभिग्रहश्च | २६-२७ |
| प्रभोः जन्म, जन्माभिषेकः, | |
| सिद्धार्थनृपतिकृत उत्सवश्च | २८-३१ |
| नामस्थापनम्, आमलकीक्रीडा, लेखशालानयनं च | ३२-३३ |
| प्रभोः पाणिग्रहणम्, मातापित्रोः देवलोकगमनं च | ३४-३५ |
| दीक्षार्थं नन्दिवर्धनानुज्ञा, | |
| वार्षिकदानम्, प्रव्रज्याग्रहणं च | ३६-४० |
| तृतीयः सर्गः | ४१-९० |
| द्विजाय अर्धवस्त्रदानम् | ४१-४२ |
| गोपेन कृतः प्रथम उपसर्गः | ४२-४३ |
| दूइज्जंततापसाश्रमे गमनं ततः विहारश्च | ४५-४७ |
| शूलपाणियक्षप्रसंगः | ४७-५४ |

अच्छंदकवर्णनम् ५४–५८
चण्डकौशिकवृत्तान्तः ५८–६३
सुदंष्ट्रासुरकृत उपसर्गः ६४–६८
पुष्पसामुद्रिकवृत्तान्तः ६९–७०
गोशालस्य मिलनम् ७१
विविधोपसर्गवर्णनम् ७२–९०
चतुर्थः सर्गः ९१–१४१
संगमकस्य घोरा उपसर्गाः १०४–११५
अन्ये अन्ये उपसर्गाः ११५–१२०
चमरोत्पातवर्णनम् १२०–१२६
चन्दनावृत्तान्तः १२७–१३६
कर्णयोः कीलकक्षेपणम् कर्षणं च १३८–१४०
प्रभोः तपःगणना १४१–
पंचमः सर्गः १४२–१५६
प्रभोः कवलोत्पत्तिः, इन्द्रभूतेः शंका,तन्निरासः १४२–१४८
अन्येषां अग्निभूत्यादीनां शंकानिरसनम् १४९–१५४
चतुर्विधसंघस्थापनम् १५४–१५६
षष्ठः सर्गः १५७–१९०
श्रेणिकजन्म १५७–१६०
सुलसावृत्तान्तः १६१–१६४
श्रेणिकचरित्रम् १६४–१७२
चेल्लणाअपहरणम् १७२–१७७
कूणिकस्य जन्म १७८–१८०
सेचनकवृत्तान्तः १८१–१८४
मेघकुमारचरित्रम् १८५–१८७
नन्दिषेणचरित्रम् १८८–१९०
सप्तमः सर्गः १९१–२१९
चेल्लणार्थं एकस्तंभप्रासादनिर्माणवर्णनम् १९१–१९६
आम्रफलस्तेनस्य वृत्तान्तः १९६–२००
दुर्गन्धावृत्तान्तः २०१–२०४

| | |
|---|---|
| आर्द्रकुमारचरित्रम् | २०४-२१८ |
| **अष्टमः सर्गः** | २१९-२६१ |
| देवानन्दा ऋषभदत्तयोः प्रव्रज्या | २१९-२२० |
| जमालिवृत्तान्तः | २२१-२२६ |
| सुरप्रिययक्ष-चित्रकृत्-- | |
| शतानीकचित्रसभानां वृत्तान्तः | २२७-२३० |
| चण्डप्रद्योतस्य शतानीकोपरि | |
| आक्रमणम् मृगावत्याः कौशलं च | २३१-२३२ |
| या या सा सा वृत्तान्तः | २३३-२३५ |
| मृगावत्याः दीक्षा | २३६ |
| भगवतो महावीरस्य दशानां | |
| श्रावकाणां चरित्राणि | २३७-२४४ |
| चन्द्रसूर्ययोः मूलविमानेन | |
| अवतरणम् | २४४-२४५ |
| श्री महावीरोपरि गोशालकमुक्त | |
| तेजोलेश्यावर्णनम् | २४५-२५२ |
| गोशालकस्य पश्चात्तापः, मृत्युः, | |
| आगामिभवाश्च | २५३-२५७ |
| गोशालकस्य पूर्वभवाः | २५८-२६१ |
| **नवमः सर्गः** | २६२-२८६ |
| हालिकवृत्तान्तः | २६२-२६३ |
| प्रसन्नचन्द्रचरित्रम् | २६४-२६६ |
| दर्दुरांकदेवचरित्रम् | २६६-२७२ |
| श्रेणिकभावितीर्थंकरत्ववर्णनम् | २७३-२७४ |
| पुण्डरीककंडरीकचरित्रम् | |
| पञ्चदशशततापसानां प्रतिबोधश्च | २७४-२८० |
| सुलसासम्यक्त्वपरीक्षा | २८१-२८६ |
| **दशमः सर्गः** | २८७-३०० |
| दशार्णभद्रचरित्रम् | २८१-२९० |
| शालिभद्रधन्ययोः चरित्रम् | २९१-३०० |
| **एकादशः सर्गः** | ३०१-३३८ |
| रौहिणेयचरित्रम् | ३०१-३०९ |

| | |
|---|---|
| चण्डप्रद्योतस्य श्रेणिकोपरि आक्रमणम्, पलायनं च | ३१०–३११ |
| अभयकुमारस्य अपहरणम् | ३१२–३१३ |
| अभयकुमारस्य बुद्धिः मुक्तिश्च | ३१४–३२२ |
| चण्डप्रद्योतस्य अपहरणं मोचनं च | ३२३ |
| उदायननृपतिचरित्रम् | ३२४–३४८ |
| **द्वादशः सर्गः** | **३४९–३८२** |
| उदायननृपतिचरित्रं, भावि-कुमारपालदेवचरित्रं च | ३४९–३५५ |
| अभयकुमारस्य प्रव्रज्या | ३५६ |
| कुणिकेन कृतः श्रेणिकस्य कारागृहे रोधः | ३५७–३६० |
| श्रेणिकस्य मृत्युः, कुणिकस्य शोकश्च | ३६१–३६२ |
| चेटकेन सह कुणिकस्य युद्धं चेटकस्य पराजयश्च | ३६३–३७८ |
| कुणिकस्य मृत्युः | ३७९–३८० |
| प्रभोः परिवारवर्णनम् | ३८१–३८२ |
| **त्रयोदशः सर्गः** | **३८३–४०४** |
| भगवतः अन्तिमा देशना | ३८३–३८४ |
| पुण्यपालमण्डलेशस्य अष्टौ स्वप्नाः तेषां फले च | ३८५–३८८ |
| भगवता कथितानां भाविभावानां वर्णनम् | ३८८–३९८ |
| प्रभोः निर्वाणं, अन्तिमः संस्कारश्च | ३९९–४०२ |
| प्रभोः निर्वाणं श्रुत्वा गौतमस्य विलापः केवलं च | ४०३–४०४ |
| महाकाव्यस्य समाप्तिः | ४०४ |
| प्रशस्तिः | ४०५–४०९ |
| शुद्धिपत्रकम् | ४१०–४१४ |

# प्र - - - स्ता - - - व - - - ना

मोहक्षयादनुभवन्नपि नाथ ! मर्त्यो ।
नूनं गुणान् गणयितुं न तव क्षमेत ॥
कल्पान्तवान्तपयसः प्रकटोऽपि यस्मा- ।
न्मीयेत केन जलधेर्ननु रत्नराशिः ॥ १ ॥

(कल्याणमंदिर स्तोत्र)

निर्मल आकाशमां सहस्त्रकिरणोथी प्रकाशी रहेला सूर्यना पूर्ण प्रकाशनुं वर्णन करवानी शक्ति घूवडने कदी मळी नथी. कारण के, एनी आंखे प्रकाशने ओळखवानी लायकी केळवी नथी.

पूर्ण प्रकाशने ओळखवानी शक्ति जेने मळी छे, तेय पूर्ण प्रकाशने वर्णवी शकवा असमर्थ ज रहे छे, कारण के वर्णनना साधननी-शब्दोनी-शक्ति सीमित छे, ज्यारे वर्णन तो अनंतनुं करवुं छे अने आ मर्यादा कविने नडी रही छे.

आ रीते, घूवड अने कवि, आ बंनेनी पूर्ण प्रकाशने वर्णववानी अशक्ति होवा छतां वर्णन करवाना अधिकार अंगे बंनेनी योग्यता तद्दन विरुद्ध छे. पूर्ण प्रकाशनुं वर्णन करवा घूवड अनधिकारी छे, त्यारे कविनो अधिकार अबाधित रहे छे, कारण के घूवड प्रकाशनो शत्रु छे ज्यारे कवि प्रकाशनो अर्थी छे.

वीतराग श्री अरिहंत परमात्माना अनंत गुणवैभवनुं वर्णन, ए आवाज पूर्ण प्रकाशनुं गीत छे. प्रस्तावनाना आरंभे आपेला पद्यमां ए अनन्त गुणवैभवने वर्णनातीत गणावता कविवर्य, अत्यन्त काव्यात्मक शैलीथी शब्द साधननी मर्यादा समजावे छे. "दृष्टिनी आडे आवता सघळाय अंतरायोनो क्षय थवा छतां श्री केवली भगवंत पण वीतरागना गुणोनो ज्ञानात्मक अनुभव करी शके छे, परन्तु शब्दोमां ए गुणवैभवनी गणना आपवानुं तेमने माटेय अशक्य छे. कल्पान्तकाळे सघळांय जळने वमी चूकेला महासागरनो रत्नवैभव नजरे जोवा छतां मापी न शकाय एवी ए परिस्थिति छे." आ रीते गुणवैभवनी निःसीमता समजाववा छतां निर्मळ नेत्रवाळा 'श्री कल्याणमंदिर' ना रचयिता तथा अन्य पण अनेक अधिकारी कवीश्वरोए श्री वीतराग भगवंतना निःसीम एवा पण गुणवैभवनुं, सीमित एवा पण शब्दोना साधनथी, वर्णन कर्युं ज छे. गुणोना तीव्र अनुरागथी प्रेराईने शुद्धभावे थयेलो—अपूर्ण एवो पण—आ प्रयत्न आशातना नहि पण, आराधनानो ज प्रकार छे. कारणके, पूर्णने स्पर्श्या वगर अपूर्ण कदी पण पूर्ण बनी शकेज नहि. आ तो थई 'अधिकारी' एवा अशक्तोनी वात. परन्तु 'अनधिकारी' एवा अशक्तोनी वात जूदी ज छे. कारणके प्रकाशना शत्रु, पूर्ण प्रकाशनुं गीत गाय तोय ए गीत, गीत नथी पण, तेमनी विटंबणा छे. गुणानुवादने नामे एवा घूवडो पूर्ण प्रकाशनुं अपमान करता होय छे. दुर्भाग्ये आज काल आवा घूवडो अने तेमना प्रशंसकोनो एक वर्ग ज उभो थयो छे.

'सर्वज्ञ'मां ज शंका धरावनाराओ सर्वज्ञोनां चरित्रोनी समालोचनाओ के प्रस्तावनाओ लखी शकता होय छे, संसारना रसथी रोमे-रोम भींजायेला, श्री वीतरागभगवंतोने ओळखाववानुं साहस खेडता होय छे, पग-माथा विनाना तर्को उभा करीने पूर्वाचार्योनी रचनाओ अंगे पोताना किंमती (?) अभिप्रायोनी प्रसादी

आपवानी जाणे के फेशन थई पडी छे अने आवा बनी बेठेला विद्वानोना एमनुं आंधळुं अनुयायीपणुं करनाराओ 'दार्शनिक' नी पदवी आपता होय छे.

प्रस्तुत ग्रन्थ, श्री महावीर परमात्माना आत्मिक विकासनी तद्दन प्राथमिक भूमिकाथी आरंभी पूर्ण-*विकास सुधीना तमाम तबक्काओनुं प्रमाणभूत अने आदर्शरूप निरूपण छे. भगवान श्री महावीर परमात्मानां* चरित्रोनी अनेक अधिकारी विद्वानोए करेली रचनाओमां, आ रचना, एना अनेक वैशिष्ट्योने कारणे अलग तरी आवे एवी छे. अने खास नोंधनी वात छे के आ रचनाने अने अन्य पण रचनाओने अनुलक्षीने केटलाक अर्वाचीन विद्वानोए करेलां विधानो अने पोतानी (कु) मति कल्पनाना उन्मादमां भगवान श्री महावीरदेवना जीवन प्रसंगोनी करेली रजूआत, मानी न शकाय एटली हदे परमात्मानी घोर आशातना करनारी छे. अने एवी वकरेली विद्वत्ताना संदर्भमांज प्रस्तावनाने प्रारंभे घूवड अने कविनी दृष्टि वच्चेनो भेद चर्च्यो छे.

खरेखर श्री वीतराग परमात्मानी स्तवना माटेनुं पूर्ण सामर्थ्य कोईनुं य नथी, परन्तु एमनी ए वीतराग-ताने पामवानी तालावेली धरावती व्यक्ति गमे तेटली अज्ञान होय तोय, वीतरागने स्तववानो एनो अधिकार अबाधितज रहे छे. ज्यारे जेने वीतरागनी वीतरागता तरफ लेश पण आदर न होय, श्री तीर्थंकर परमात्माओना दिव्य जीवननी ठेकडी उडावतां जेमनी जीभ के कलम अचकाई न होय, एवाओने-मूर्खाओ गमे तेटला पंडित गणता होय तोय--श्रीवीतराग परमात्माओना पावन जीवन अंगे एक शब्द पण लखवा--बोलवानो अधिकार नथी. कारणके ए घूवडोनी दृष्टि सत्यना प्रकाशने जीरवी शकती नथी. साचुं समजवानी पात्रता केळववाने

बदले, पोताने समजाय ते अने तेटलुं ज साचुं मानवानी अहंकारी वृत्तिज सत्यदर्शननी आडेनो सहुथी मोटो अंतराय छे. एने दूर कर्या सिवाय पोताना विचारोने 'दर्शन' या 'चिन्तन' नुं रुजलुं नाम आपवाथी, ते विचारोनी किंमत तुक्काओथी विशेष वधती नथी. इतिहास अने विज्ञानने नामे चमत्कारोनी हांसी करनाराओए इतिहास अने विज्ञानना डगे डगे बदलाता अभिगमोनो चमत्कार भूलवो न जोईए.

खरेखर तो, कुतर्कोना कचरो खखेरीने, मनोभूमिने श्रद्धाथी शुद्ध बनाव्या सिवाय आवां चरित्रोनुं वाचन लाभने बदले नुकसान ज करे छे. अने माटे ज ते श्रद्धाने शिथिल करी नाखनारा बळोने ओळखाववा आटलो प्रतिकार प्रसंगोचित गण्यो छे.

अंतमां, अनन्तउपकारी श्री अरिहंत परमात्माओना पावन--शुद्ध स्वरूपने प्राप्त करवानी झंखना पूर्वक सहु कोइ आवां पवित्र चरित्रोनुं वाचन करे, ते वाचन द्वारा शुद्ध आत्मस्वरूपने पामवाना उपायोनुं ज्ञान मेळवे अने ते उपायोने सारी रीते सेवीने पोताना शुद्ध आत्मस्वरूपने पामवानी पोतानी झंखनाने सफळ बनावे एवी शुभकामना सेवुं छुं.

वि. सं. २०३३, माह सुद १३, बुध | मुनि चन्द्रगुप्तविजय
कल्याण ( जि. थाणा )

# प्रतिओनो परिचय अने संकेतसूचि

प्रस्तुत त्रिषष्टिशलाकापुरुषचरित दशम पर्वनुं संपादन त्रण हस्तलिखित प्रतिओ तथा एक मुद्रित ग्रन्थ एम चारने आंख सामे राखीने करवामां आव्युं छे.

जे प्रतिओने आंख सामे राखीने संपादन करायुं छे ते प्रतिओनो परिचय अने संकेत नीचे दर्शावाय छे.

C. **संज्ञक प्रति–**

आ प्रति, जैनशाला स्थापित श्रीनीतिविजयजी शास्त्रसंग्रह– स्थंभनतीर्थनी पोथी नं २२६, प्रति नं. १८७७, पत्र ८० प्रमाण छे. जेनुं प्रथम पृष्ठ कोरुं छे, अंतिम पृष्ठ पर मात्र एकज पंक्ति छे, जेमां "शुभं भवतु लेखक पाठकयो: || श्री–श्री–श्री–कल्याणं भुयात्" आटलो पाठ छे.

आ प्रतिनो अंतिम भाग खवाई जवाथी तेनो लेखनकाल स्पष्ट समजातो नथी. मात्र '१३' आटला अक्षरोज वंचाय छे जेथी प्रतिनो लेखनकाल चौदमी शताब्दिनो हशे तेम अनुमान थाय छे. प्रति अतिशय जीर्ण छे., ठेर ठेर जीवात द्वारा प्रति खवाई गई छे, लगभग कोइज पानुं अखंडित नथी. लिपि पडिमात्रामां छे. अशुद्धि पण प्रमाणथी वधु छे, क्यांक चालु पाठो वचमां छूटी गया छे जे २--३ पृष्ठ पछी लखवामां आव्या छे. आ बधुं जोता आ प्रति, लखाया बाद परिमार्जन थया विनानी देखाय छे.

प्रतिओनो
परिचय अ
संकेतसूचि

॥ सोल

दरेक पृष्ठमां लगभग १७ पंक्तिओ छे, दरेक पंक्तिमां ६० थी ६५ अक्षरो छे, दरेक पृष्ठमां लखाणना मध्य-भागमां थोडो भाग कोरो मूकी वावडीनो आकार आलेखायेलो छे.

दरेक पृष्ठनी बे तरफ काळी शाहीनी बब्बे लीटीओ बे वार आंकी (वच्चे थोडुं अंतर राखी) हांसिया पाडवामां आव्या छे हांसियामां डाबा हाथ तरफना उपरना भागमां 'त्रि. महावीर च.' लखी तेनी नीचे पृष्ठनो आंक लखायो छे. अने जमणी तरफ नीचेना भागमां पण पृष्ठनो आंक आलेखायो छे. ज्यारे बीजी बाजुना पृष्ठमां हांसियो कोरो रखायो छे.

ग्रन्थनो प्रारंभ "॥ ई० ॥ अर्हं ॥" लखीने करायो छे. प्रति कोणे लखावी ? कोणे लखी ? ते जाणवानुं कंइज साधन उपलब्ध नथी.

*L* **संज्ञक प्रति-**

लालभाई दलपतभाई भारतीय संस्कृति विद्यामन्दिर-अमदावादनी की-४८२,१०५१० संज्ञक, पत्र २ थी १७५ पर्यंतनी आ प्रति छे.

प्रथम पत्र नथी, १७५ मुं पत्र कोरुं छे. "लेखन संवत् १७ मी शताब्दि" एवो प्रतिना कवर पर उल्लेख छे, ज्यारे प्रति पर तेवो कोई उल्लेख नथी. १७४ मा पत्रना नीचेना भागमां कागळ चोडी देवायेल छे.

प्रति जीर्ण छे, दरेक पत्रमां १३ पंक्तिओ छे. दरेक पंक्तिमां ४० लगभग अक्षरो छे. प्रतिना दरेक पृष्ठोनी बंने तरफ काळी शाहीथी डब्बल हांसिया पाडेल छे. अने ते हांसियाओमां जरुरी नोंधो करायेली छे जे पाछळथी उमेरायेली लागे छे.

श्लोकोना अंको, लाल रंगथी दरेक पत्रना बीजा पृष्ठ पर अंकित करायेला छे. दरेक पत्रनो मध्यभाग कोरो राखी चतुष्कोण वावडीनो आकार अंकित करायो छे. प्रति पडिमात्रामां अने घणे स्थळे अशुद्ध छे. प्रतिना पत्र २ थी ११ शाही ढळवाथी खरडायेलां छे. प्रतिना पत्रो अखंडित छे. प्रतिना लेखक के लेखनकाळ अंगे जाणवानुं कोई ज साधन उपलब्ध नथी

*D* संज्ञक प्रति–

आ प्रति आर्य श्री जम्बूस्वामि जैन मुक्ताबाई आगममंदिर–डभोईनी डाभडा नं. ११६, क्रमांक नं. ३५३२ पत्रसंख्या १६२ संज्ञक छे.

आ प्रतिमां पत्र ७ तथा १५७ नथी. उपरांत पत्र १८ पछी पत्र १९ ने बदले पत्र २० लखवानी भूल पण करायेली छे जेने आगळ पण सुधारी लेवाई नथी जेथी प्रतिनां कुल पत्रो १६२ न होतां १५९ ज छे. प्रतिनो लेखनकाळ वि. सं. १६२१ श्रावण सुद १२ नो छे. प्रति पूर्णिमापक्षना श्रीपूज्य भ· श्री अमरतिलक-सूरिए लखी छे एम प्रतिना अन्तभागे करायेला उल्लेखथी जणाय छे· पत्र १ नो आगळनो भाग तथा पत्र १६२ नो पाछळनो भाग कोरो छे. प्रतिनी बंने बाजु काळी अने लाल शाहीथी हांसिया पडायेला छे. प्रतिना दरेक पृष्ठनो वचलो भाग कोरो रखायेल छे. प्रति पडिमात्रामां लखायेल छे. दरेक पृष्ठमां १५ पंक्तिओ छे. दरेक पंक्तिमां ३० लगभग अक्षरो छे. प्रतिना हांसियामां बीजा बीजा ग्रन्थोना उद्धरणो पण टांकवामां आव्यां छे· प्रति घणी शुद्ध अने सारी स्थितिमां छे.

*M* संज्ञक मुद्रित ग्रन्थ–

आ ग्रन्थ श्री जैन धर्म प्रसारक सभा-- भावनगर तरफथी विक्रमसंवत १९६५ मां मुद्रित थयेल छे जे पत्राकारे अने १८३ पत्र प्रमाण छे. आमां स्थळे स्थळे कठिन शब्दोना अर्थो पादनोंधमां अपाया छे, परन्तु कोइज पाठभेदो आपवामां आव्या नथी तेमज कयी हस्तलिखित प्रति परथी आ ग्रन्थ छपायो तेनो पण उल्लेख सांपडतो नथी. एकंदर आ ग्रन्थ घणो शुद्ध छपायेलो छ तेम कह्या विना चाले तेम नथी.

## संपादकीय

निःसीम उपकारी, प्रभुभक्तिना रंगे ओतप्रोत थयेला, कलिकालसर्वज्ञ, आचार्यमुकुटमणि, परमपूज्य, आचार्य-भगवान् श्रीमद् **हेमचन्द्रसूरीश्वरजीए** विक्रमनी तेरमी शताब्दिमां परमार्हत **श्री कुमारपालभूपालनी** भक्ति-भावभरी प्रार्थनाथी रचेल **श्री त्रिषष्टिशलाकापुरुषचरित महाकाव्य** दस पर्वोमां वहेंचायेलुं छे.

उपरोक्त दसेय पर्वोनुं भावपूर्वक वाचन, आपणने असंख्य वर्षोथी आज सुधीनो ते इतिहास पूरो पाडे छे. के जे वांचतां श्रद्धालु आत्मा भावविभोर थया सिवाय तो न रहे एटलुं ज नहि पण आवा महाग्रन्थना रचयिता प्रत्ये नतमस्तक थया विना पण न रहे.

आ दसेय पर्वोनुं मुद्रण अनेक वर्षो पूर्वे जैनधर्मप्रसारकसभा-- भावनगर तरफथी करावायुं हतुं परंतु तेना अभ्यासी वाचकोनी संख्या दिन प्रतिदिन वधतां ते दसेय पर्वो सुगमताथी प्राप्त थवा दुर्लभ बनी गयां हतां.

छेल्लां केटलांक वर्षो पूर्वे आ दुर्लभता आंख सामे राखीने जैन आत्मानंद सभा—भावनगर तरफथी प्रस्तुत ग्रन्थराजना १ थी ६ पर्वो पाठान्तरो आदिथी परिमार्जित करी प्रकाशित करायां छे.

प्रस्तुत ग्रन्थराजनुं दसमुं पर्व तो वषा वीतवा छतांय पुनः मुद्रित थयेल न हतुं अने आ न्यूनता तरफ

अनेक मुनि भगवंतो तथा महानुभाव श्रमणोपासको द्वारा वारंवार अंगुलिनिर्देश थता न हतो.

**मुद्रणना विचारनुं उत्थान–**

मारा गतजन्मना पुण्यानुबंधी पुण्योना परिपाकना योगे प्रस्तुत त्रिषष्टिशलाकापुरुषचरित–दशमपर्वनुं पाठांतरो आदिथी परिमार्जन करी संपादन अने पुनर्मुद्रण कराववानो निर्णय मारा कल्याणमित्र अने तेथी उपकारी एवा सुश्रावक श्रीयुत प्राणलाल सुंदरजी कापडियाए कर्यो अने तेनी सर्व जोखमदारी मारा पर मूकी.

तेमणे एक वार मने कह्युं के– "आपणा परमगुरुदेव के जमणे आपणने श्री जिनेन्द्रभगवंतो ओळ–खाव्या, धर्मनो मर्म समजावी सम्यग्दर्शन यथास्थित रूपे ओळखाव्युं अने भवनो भय पेदा कर्यो ते–आचार्य-देव श्रीमद् विजयरामचन्द्रसूरीश्वरजी महाराज पोतानी धर्मदेशनामां, सतत धननो सात क्षेत्रमां व्यय करी तेने सफल करवानुं फरमावे छे अने तेथी मारे पण पुण्यथी प्राप्त थयेल धननो शक्य तेटलो व्यय ते ते क्षेत्रमां करवो छे. जिनमंदिर अने जिनबिम्ब आ बंने क्षेत्रोमां यत्किंचित् धनव्यय में कर्यो छे, त्रीजा क्षेत्र जिनागममां मारी इच्छा, जे ग्रन्थराज आजे सुलभ नथी अने जेमां आपणा परमतारक परमेश्वरनुं विगतपूर्ण जीवन–चरित्र छे ते श्री त्रिषष्टिशलाकापुरुषचरित–दशम पर्वनुं पुनमुद्रण करावी ते ग्रन्थना अधिकारी पाठको माटे ते ग्रन्थ सुलभ थाय तेम करवानी छे." एटले आ ग्रन्थ आजे वाचकोना करकमलो सुधी पहोंची शक्यो होय तो ते यश, परमगुरुदेव, वर्तमान कालमां अजोड धर्मप्रभावक, सुविशुद्ध जिनमार्गना यथास्थितप्ररूपक

व्याख्यानवाचस्पति, आचार्यशिरोमणि, श्रीमद् विजयरामचन्द्रसूरीश्वरजी महाराजना धर्मोपदेशनेज छे.

**प्रस्तुत ग्रन्थराजनी महत्ता–**

अनन्त करुणाना महासागर, त्रणेय लोकमां जेमना समान कोई उत्तम नथी एवा महालोकोत्तम, महापुरुष, महाभट्टारक, चरमतीर्थपति, श्रमणभगवान श्री वर्धमानस्वामिनुं आ ग्रन्थराजमां आलेखायेलुं साद्यन्त जीवन, अन्यान्य ग्रन्थकारो द्वारा आलेखायेला ते महाप्रभुना जीवनचरित्रो करतां अनेक प्रकारनी विशिष्टता धरावनारुं छे.

जो के ग्रन्थकारश्रीना खूदना कहेवा अनुसार ज- "ते परमेश्वरनुं संपूर्ण जीवन आलेखवा कोइज समर्थ नथी. तो पण, जेनुं उंडाण मपाय तेम नथी एवा प्रवचनरूपी महासागरमांथी कंईक नानकडो अंश लईने आ चरित्र में गूंथ्युं छे" –आ चरित्र पण एक नानकडो अंश ज छे तो पछी ए परमतारकनुं संपूर्ण जीवन केवुं य, महानथीय महान हशे ए विचार पण आनंदविभोर बनावी दे छे.

**संपादन अंगे–**

प्रस्तुत ग्रन्थना संपादननी सर्व व्यवस्था, ज्यारे श्रीयुत सुश्रावक प्राणलालभाईना आग्रहथी मारे स्वीकारवी पडी त्यारे आ क्षेत्रमां हुं लगभग नवा जेवो हतो. छतांय, आ कार्य अपूर्व कर्मनिर्जरानुं छे एम समजी में एनो स्वीकार कर्यो अने गुरुकृपाना बळे हुं आ कार्य पूरुं करी शकीश एवा विश्वासथी आ कार्य हाथ धर्युं.

आ संपादन करवा माटे जेटली प्राचीन हस्तलिखित प्रतिओ अमने मळी शकी, ते अमे मेळवी अने तेना परथी सर्व प्रथम पाठभेदोनो संग्रह कर्यो. जैनधर्मप्रसारकसभा द्वारा प्रकाशित दशम पर्वना जे जे पाठो

अशुद्ध लाग्या तेमज हस्तलिखित प्रतिओना पण जे जे पाठो व्याकरण आदिनी दृष्टिए अशुद्ध लाग्या ते ते पाठोनी पाठभेदोमां अमे नोंध लीधी नथी. केटलाक पाठो अशुद्ध जेवा लागवा छतांय विचारणीय हता ते ते पाठभेदोमां संगृहीत कर्या छे. पाठभेदो माटे कयी कयी प्रतिओनो उपयोग करायो छे, तेनो नामोल्लेख तथा परिचय अन्यत्र आपेल छे तेथी तेनो पुनरुक्ति करवी आवश्यक नथी.

आ रीते पाठभेदो संगृहीत कर्या पछी ज्यां ज्यां कठिनतम शब्दो हता तेनाज अर्थ टांक्या छे परन्तु सर्व शब्दोना अर्थो लखवानुं अमे उचित मान्युं नथी.

आ ग्रन्थराज सर्वांगशुद्ध छपाय ते माटे में माराथी बनती पूरी चीवट राखी छे अने ते माटे मुद्रणालयना व्यवस्थापकोने पण सूचनाओ आपी छे, प्रुफो वारंवार तपासीने सुधारी आप्यां छे, छतांय शुद्धिपत्रक मूकवुंज पडयुं छे ए मारी पोतानी क्षति समजी पाठको मने क्षमा करशे एवी आशा राखुं छुं.

प्रस्तुत ग्रन्थराजमां आचार्यभगवंत श्री हेमचन्द्रसूरीश्वरजीए पोते पोता तरफथी जे सुभाषितो टांक्यां छे तेने अलग बतावबा माटे ते ते सुभाषितो नीचे पातळी लीटी मूकी जुदा तारवबानो अमे प्रयास कर्यो छे. परन्तु कथामां आवतां पात्रो द्वारा प्रसंगे प्रसंगे उच्चारायेलां सुभाषितो माटे तेम करायुं नथी ते खास ध्यानमां राखवा योग्य छे.

व्यवस्थित संपादनना अभावे या हस्तप्रतोनी प्राप्तिना अभावे अत्यार पूर्वे मुद्रित थयेला प्रस्तुत चरित्रमां केवी क्षतिओ थई छे तेनुं मात्र एकज दृष्टान्त अहीं रजू करवुं पर्याप्त थशे. प्रस्तुत ग्रन्थराजना

त्रीजा सर्गनो ५९२ मो श्लोक नीचे मुजब छे.

जिघांसौ सेवके चापि निर्विशेषस्य ते ननु ।
सेवां को नाम कुर्वीत न योऽहमिव मूढधीः ॥ ५९२ ॥

अहीं संपादके कुर्वीत पछी न यो शब्दनो अर्थ न समजातां एक 'न' उमेरी तनयोऽहमिव मूढधीः एवो पाठ मूकी छापी दीधुं. पण आम करवाथी मात्रामेळ तूटी गयो तेनो ख्याल तो न कर्यो पण 'तनयो' लखवाथी अर्थ पण बदलाई गयो तेनो य विचार न कर्यो. अने आना परथी भाषांतर करनारे पण 'तनयो' नो अर्थ 'पुत्र' करी 'पुत्रनी जेम कोण सेवा करे !' एवो ज अर्थ छाप्यो. आ संपादनमां आ अने आवी क्षतिओनुं यथा-शक्य परिमार्जन करवामां आव्युं छे.

परमनिस्तारक, श्रमणभगवान, वर्धमानस्वामी परनी अनन्य श्रद्धा अने भक्तिथी ग्रन्थकारे आ चरित्र लख्युं छे एनां दर्शन तो वाचकने डगले ने पगले थाय छे एटले ए दृष्टिए जोतां आ ग्रन्थ मात्र जीवनचरित्र न रहेतां स्तुतिपूर्ण जीवनचरित्र बनी जाय छे ए वस्तु खास नोंधपात्र छे.

उपसंहार-

आ ग्रन्थनुं अक्षरशः वाचन करी शुद्धिपत्रक तैयार करवानुं कार्य पूज्य आचार्य श्री विजयमृगांक-सूरीश्वरजी महाराजना विद्वान् शिष्य मुनिराज श्री हेमभूषणविजयजी महाराजे कर्युं छे तथा आ ग्रन्थनी

प्रस्तावना, पूज्य मुनिराज श्री अमरगुप्तविजयमहाराजना शिष्य, न्यायव्याकरणनिपुण मुनि श्री चन्द्रगुप्त विजयजी महाराज लखी आपी छे ते बदल हुं ने उभय श्रमण भगवंतोनो उपकार मानुं छुं.

आ संपादनमां जे कोई क्षतिओ रही गई होय ते अंगे विद्वानोने विनंति छे के– तेवी क्षतिओ तरफ ध्यान दोरे के जेथी भविष्यमां तेवुं थवा न पामे.

आ संपादनमां जे कंई जिनाज्ञाविरुद्ध थवा पाम्युं होय तेनो त्रिविधे मिच्छामिदुक्कडं आपी, आ ग्रन्थराजना वाचनथी सम्यग्दृष्टि आत्माओ पोताना बोधिबीजने निर्मल करो एवी भावना साथे विरमुं छुं.

वि. सं. २०३३
माघ शुक्ल तृतीया, शनि
विलेपारले–मुंबई.

सुबोधचन्द्र नानालाल शाह



## श्री श्रमणस्य भगवतो महावीरस्य स्तुतिः

हत्थीसु एरावणमाहु णाते, सीहो मिगाणं सलिलाण गंगा ।
पक्खीसु आ गरुले वेणुदेवे, णेव्वाणवादीणिह णातपुत्ते ॥ १॥

दाणाण सेट्ठं अभयप्पदाणं, सच्चेसु आ अणवज्जं वदंति ।
तवेसु आ उत्तम बंभचेरं लोगुत्तमे भगवं णातपुत्ते ॥ २ ॥

ठितीण सिट्ठा लवसत्तमा वा, सभा सुधम्मा व सभाण सेट्ठा ।
णेव्वाणसिट्ठा जध सव्वधम्मा, ण णायपुत्ता परमत्थि णाणी ॥ ३ ॥

[सूत्रकृतांग सूत्र निर्युक्ति–]

कलिकालसर्वज्ञ-श्रीहेमचन्द्राचार्यविरचितं

# ॥ श्रीत्रिषष्टिशलाकापुरुषचरितम् महाकाव्यम् ॥

## ॥ दशमं पर्व ॥

### ॥ श्रीमहावीरचरितम् ॥

### ॥ प्रथमः सर्गः ॥

नमो दुर्वाररागादिवैरिवारनिवारिणे । अर्हते योगिनाथाय महावीराय तायिने ॥१॥
अथास्य देवदेवस्य देवासुरनरार्चितम् । चरितं कीर्तयिष्यामः पुण्यवारिसरोवरम् ॥२॥
अस्यैव जम्बूद्वीपस्य प्रत्यग्विदेहभूषणे । विजयेऽस्ति महावप्रे जयन्ती नामतः पुरी ॥३॥
दोर्वीर्येण समुत्पन्न इव नव्यो जनार्दनः । महासमृद्धिस्तत्रासीन्नृपतिः शत्रुमर्दनः ॥४॥
तस्य ग्रामे तु पृथिवीप्रतिष्ठानाभिधेऽभवत् । स्वामिभक्तो नयसाराभिधानो ग्रामचिन्तकः ॥५॥

साधुसम्बन्धबाह्योऽपि सोऽकृत्येभ्यः पराङ्मुखः। दोषान्वेषणविमुखो गुणग्रहणतत्परः ॥६॥
सोऽन्यदा वरदारुभ्यः पृथिवीपतिशासनात्। सपाथेयो महाटव्यामादाय शकटानगात् ॥७॥
तस्य च्छेदयतो वृक्षान्मध्यन्दिनमुपाययौ। जठरेऽग्निरिव व्योम्नि दिदीपे तपनोऽधिकम् ॥८॥
भृतकैर्नयसारस्य सारा रसवती तदा। समयज्ञैरुपनिन्ये मंडपाभतरोरधः ॥९॥
क्षुधितस्तृषितो वापि यदि स्यादतिथिर्मम। तं भोजयामीति नयसारोऽपश्यदितस्ततः ॥१०॥
क्षुधितास्तृषिताः श्रान्ताः सार्थान्वेषणतत्पराः। घर्माम्भःप्लुतसर्वांगाः साधवश्चाययुस्तदा ॥११॥
साध्वमी साधवो मेऽत्रातिथयः समुपस्थिताः। चिन्तयन्निति नत्वा तान् सोऽब्रवीद् ग्रामचिन्तकः ॥१२॥
भगवन्तो भवन्तोऽस्यामटव्यां कथमागताः। एकाकिनः शस्त्रिणोऽपि पर्यटन्ति न खल्विह ॥१३॥
तेऽप्यभ्यधुर्वयं स्थानात् सार्थेन प्रस्थिताः पुरा। ग्रामे प्रविष्टा भिक्षार्थं ययौ सार्थस्तदैव हि ॥१४॥
अनात्तभिक्षाश्चलिताः सार्थस्यानुपदं वयम्। आगच्छन्तो महाटव्यामस्यां निपतितास्ततः ॥१५॥
नयसारोऽब्रवीदेवमहो ! सार्थोऽतिनिष्कृपः। अहो पापादप्यभीरुरहो विश्वस्तघातकः ॥१६॥
यत्सह प्रस्थितान् साधून् सार्थप्रत्याशया स्थितान्। ★अनागमय्य प्रययौ निजकार्यैकनिष्ठुरः ॥१७॥

---

पा. भे.–१ सर्वस्त° C ॥

टि.–★ अप्रतीक्ष्य।

मत्पुण्यैर्यूयमायाता वनेऽत्रातिथयो मम । इत्युक्त्वा भोजनस्थानं स निन्ये तान्महामुनीन् ॥१८॥
स्वार्थोपनीतैः पानान्नैः स मुनीन् प्रत्यलाभयत् । अन्यत्र गत्वा विधिना तेऽप्यभुञ्जत साधवः ॥१९॥
ग्रामायुक्तोऽपि हि भुक्त्वा गत्वा नत्वाऽवदन्मुनीन् । चलन्तु भगवन्तोऽद्य पुर्मार्गं दर्शयामि वः ॥२०॥
ते तेन सह चेलुश्च प्रापुश्च नगरीपथम् । तरोरधश्चोपविश्य धर्मं तस्याचचक्षिरे ॥२१॥
स प्रत्यपादि सम्यक्त्वं धन्यंमन्यः प्रणम्य तान् । वलित्वा दारूणि राज्ञे प्रैषीद् ग्रामे स्वयं त्वगात् ॥२२॥
अथाभ्यस्यन् सदा धर्मं सप्ततत्त्वानि चिन्तयन् । सम्यक्त्वं पालयन् कालमनैषीत् स महामनाः ॥२३॥
विहिताराधनः सोऽन्ते स्मृतपञ्चनमस्कृतिः । मृत्वा बभूव सौधर्मे सुरः पल्योपमस्थितिः ॥२४॥
इतश्चात्रैव भरते विनीतेत्यस्ति पूर्वरा । पुरा युगादिनाथस्य कृते सुरवरैः कृता ॥२५॥
तत्र श्रीऋषभस्वामिसूनुर्नवनिधीश्वरः । चतुर्दशरत्नपतिर्भरतश्चक्रवर्त्यभूत् ॥२६॥
ग्रामचिन्तकजीवः स च्युत्वाऽभूत्तस्य नन्दनः । मरीचीन् विकिरंस्तेन मरीचिरिति विश्रुतः ॥२७॥
आद्ये समवसरणे ऋषभस्वामिनः प्रभोः । पितृभ्रात्रादिभिः सार्धं मरीचिः श्रियो ययौ ॥२८॥
महिमानं प्रभोः प्रेक्ष्य क्रियमाणं स नाकिभिः । धर्मं चाकर्ण्य सम्यक्त्वलब्धधीर्व्रतमाददे ॥२९॥

---

१ °प्यगात् L ॥

सम्यग्ज्ञातयतिधर्मः स्वशरीरेऽपि निःस्पृहः । त्रिगुप्तः पञ्चसमितिर्निष्कषायो महाव्रती ॥३०॥
स्थविराणां पुरोऽङ्गानि पठन्नेकादशापि हि । ऋषभस्वामिना सार्धं मरीचिर्व्यहरच्चिरम् ॥३१॥ (युग्मम्)
सोऽपरेद्यु ग्रीष्मऋतावुष्णांशुकरदारुणे । प्रतिमार्गं पान्थपादनखंपचरजश्चये ॥३२॥
स्वेदार्द्रीभूतसर्वाङ्गमललिप्तांशुकद्वयः । तृष्णार्तोऽचिन्तयदिति चारित्रावरणोदयात् ॥३३॥ (युग्मम्)
न श्रामण्यगुणान्मेरुसमभारान् दुरुद्वहान् । निर्गुणोऽहं भवाकाङ्क्षी वोढुं प्रभुरतः परम् ॥३४॥
किं त्यजामि व्रतं लोके तत्त्यागे लज्ज्यते खलु । लब्धो वाऽयं मयोपायो व्रतं येन क्लमो न च ॥३५॥
श्रमणा भगवन्तोऽमी त्रिदण्डविरताः सदा । अस्तु दण्डैर्निर्जितस्य त्रिदण्डी मम लांछनम् ॥३६॥
केशलोचादमी मुण्डाः क्षुरमुण्डः शिखी त्वहम् । महाव्रतधराश्चामी स्यामणुव्रतभृत्त्वहम् ॥३७॥
निष्किञ्चना मुनयोऽमी भूयान्मे मुद्रिकादि तु । अमी विमोहा मोहेन च्छन्नस्य छत्रमस्तु मे ॥३८॥
उपानद्रहिताश्चामी सञ्चरन्ति महर्षयः । पादत्राणनिमित्तं मे भवतामप्युपानहौ ॥३९॥
सुगन्धयोऽमी शीलेन दुर्गन्धः शीलतस्त्वहम् । सौगन्ध्यहेतोर्भवतु श्रीखण्डतिलकादि मे ॥४०॥
अमी शुक्लजरद्वस्त्रा निष्कषाया महर्षयः । भवन्तु मे तु वासांसि *काषायाणि कषायिणः ॥४१॥

---

१ °गुप्तिः *M.* ॥

टि.– *कषायवर्णरक्तानि ।

त्यजन्त्यमी जलारम्भं बहुजीवोपमर्दकम् । स्नानं पानं च पयसा मितेन भवताच्च मे ॥४२॥
एवं विकल्प्य स्वधिया लिङ्गनिर्वाहहेतवे । पारिव्राज्यं प्रत्यपादि मरीचिः क्लेशकातरः ॥४३॥
तादृग्वेषं च तं दृष्ट्वाऽपृच्छद्धर्मं जनोऽखिलः । साधुधर्मं समाचख्यौ सोऽपि तेषां जिनोदितम् ॥४४॥
किं त्वं स्वयं नाचरसीत्य*नुयुक्तः पुनर्जनैः । मेरुभारं न तं वोढुमीशोऽस्मीति शशंस सः ॥४५॥
धर्माख्यानप्रतिबुद्धान् स तु भव्यानुपस्थितान् । शिष्यान् समर्पयामास स्वामिने नाभिसूनवे ॥४६॥
इत्याचारो विजहार मरीचिः स्वामिना सह । स्वामी च समवासार्षीद्विनीतायां पुनः पुरि ॥४७॥
तत्र प्रभुर्नमस्कृत्य पृष्टो भरतचक्रिणा । भाविणोऽर्हच्चक्रिविष्णुप्रतिविष्णुबलाङ्गगो ॥४८॥
पुनः पप्रच्छ भरतः किं कश्चिदिह पर्षदि । भाव्यत्र भरतक्षेत्रे नाथ ! त्वामिव तीर्थकृत् ॥४९॥
मरीचिं दर्शयन्नाख्यत् स्वामी सूनुरयं तव । †पश्चिमस्तीर्थकृद्वीरो नाम्ना भावीह भारते ॥५०॥
भाव्याद्योऽत्र त्रिपृष्ठाख्यः शार्ङ्गभृत्पोतने पुरे । मूकापुर्यां विदेहेषु प्रियमित्रश्च चक्रभृत् ॥५१॥
तच्छ्रुत्वा नाथमापृच्छ्य मरीचिं भरतो ययौ । त्रिश्च प्रदक्षिणीकृत्य वन्दित्वैवमवोचत ॥५२॥
स्वामिनोक्तं चरमस्त्वं भाव्यर्हन्निह भारते । आदिश्च वासुदेवस्त्वं त्रिपृष्ठः पोतनेश्वरः ॥५३॥

टि.- *पृष्टः । † चरमः ।

१ आद्यश्च C ॥

चक्री विदेहमूकायां प्रियमित्रोऽभिधानतः। पारिव्राज्यं न ते वन्द्यं भाव्यर्हन्निति वन्द्यसे ॥५४॥
तमित्युक्त्वा चक्रवर्ती प्रणम्य स्वामिनं पुनः। विनीतात्मा प्रविवेश विनीतां मुदितः पुरीम् ॥५५॥
तदाकर्ण्य मरीचिस्त्रिरास्फोट्य त्रिपदीं मुदा। इत्युवाचोच्चकैर्विष्णुर्भविष्यामि यदादिमः ॥५६॥
मूकानगर्यां मे चक्रवर्तित्वं च भविष्यति। भाव्यहं चरमश्चार्हन् पर्याप्तमपरेण मे ॥५७॥
आद्योऽहं वासुदेवानां पिता मे चक्रवर्तिनाम्। पितामहस्तीर्थकृतामहो मे कुलमुत्तमम् ॥५८॥
एवं जातिमदं कुर्वन् भुजावास्फोटयन्मुहुः। नीचगोत्राभिधं कर्म मरीचिः समुपार्जयत् ॥५९॥
ऋषभस्वामिनिर्वाणादूर्ध्वं* सार्धं स साधुभिः। विहरन् प्रबोध्य भव्यान् प्राहिणोत् साधुसन्निधौ ॥६०॥
व्याधि[1]भिश्चान्यदा ग्रस्तोऽसंयमीति स साधुभिः। अपाल्यमानो ग्लानः सन्मनस्येवं व्यचिन्तयत् ॥६१॥
अहो अमी साधवो धिङ्निर्दाक्षिण्याः कृपोज्झिताः। स्वार्थमात्रोद्यता लोकव्यवहारपराङ्मुखाः ॥६२॥
यन्मां परिचितं स्निग्धमप्येकगुरुदीक्षितम्। विनीतमपि नेक्षन्ते दूरेऽस्तु मम पालनम् ॥६३॥
यद्वा दुश्चिन्तितं मेऽदो यदमी स्वतनोरपि। परिचर्यां न कुर्वन्ति भ्रष्टस्य तु कथं मम ॥६४॥
अनेन व्याधिना मुक्तस्तत् स्वस्य प्रतिचारकम्। कञ्चिच्छिष्यं करिष्यामि स्वलिङ्गेनामुनैव हि ॥६५॥

---

टि.– *पश्चात्

१ °भिः सोऽन्य° /.॥

एवं ध्यायन् विविधशान्मरीचिरभवत् पटुः। अन्यदा मिलितश्चास्य कपिलः कुलपुत्रकः ॥६६॥
धर्मार्थी ज्ञापितस्तेन कपिलो धर्ममार्हतम्। किं स्वयं न करोषीति सोऽपृच्छि कपिलेन च ॥६७॥
मरीचिरवदद्धर्मं नैनं कर्तुमहं क्षमः। कपिलोऽप्यब्रवीत् किं त्वन्मार्गे धर्मो न विद्यते? ॥६८॥
जिनधर्मालसं ज्ञात्वा शिष्यमिच्छन् स तं जगौ। मार्गे जैनेऽपि धर्मोऽस्ति मम मार्गेऽपि विद्यते ॥६९॥
तच्छिष्यः कपिलोऽथाभून्मिथ्याधर्मोपदेशनात्। मरीचिरप्यब्धिकोटिकोटीसंसारमार्जयत् ॥७०॥
मरीचिस्तदनालोच्य विहितानशनो मृतः। ब्रह्मलोके दशोदन्वत्प्रमितायुः सुरोऽभवत् ॥७१॥
शिष्यान् विधायासूर्यादीन् स्वाचारानुपदिश्य च। विपद्य च ब्रह्मलोके कपिलोऽप्यमरोऽभवत् ॥७२॥
स प्राग्जन्मावधेर्ज्ञात्वा मोहादभ्येत्य भूतले। स्वयं कृतं सांख्यमतमासूर्यादीनबोधयत् ॥७३॥
तदाम्नायादत्र सांख्यं प्रावर्तत च दर्शनम्। सुखसाध्ये ह्यनुष्ठाने प्रायो लोकः प्रवर्तते ॥७४॥
च्युत्वा मरीचिजीवोऽपि कोल्लाके सन्निवेशने। कौशिकाख्यः पूर्वलक्षाशीत्यायुर्ब्राह्मणोऽभवत् ॥७५॥
स सदा विषयासक्तो द्रव्योपार्जनतत्परः। हिंसादिषु च निःशङ्कः कालं भूयांसमत्यगात् ॥७६॥

सोऽन्ते त्रिदण्डी भूत्वा च मृत्वा भ्रान्त्वा बहून् भवान्।
स्थूणाख्ये सन्निवेशेऽभूत् पुष्पमित्राभिधो द्विजः ॥७७॥

१ °चारमुप° C L ॥

॥१॥

मृत्वा त्रिदण्डिकः पूर्वलक्षद्वासप्ततिप्रमम्। अतीत्यायुः स सौधर्मे सुरोऽभून्मध्यमस्थितिः ॥७८॥
च्युत्वा चैत्ये सन्निवेशेऽग्न्युद्योतः स द्विजोऽभवत्। पूर्वलक्षचतुःषष्ट्यायुष्कः प्राग्वत्त्रिदण्ड्यभूत् ॥७९॥
मृत्वैशाने मध्यमायुः सोऽभूद्देवस्ततश्च्युतः। मन्दिरे सन्निवेशेऽभूदग्निभूतिरिति द्विजः ॥८०॥
षट्पञ्चाशत्पूर्वलक्षायुष्कः सोऽपि त्रिदण्ड्यभूत्। मृत्वा सनत्कुमारे च मध्यमायुः सुरोऽभवत् ॥८१॥
च्युत्वा च श्वेतवीपुर्यां भारद्वाजोऽभवद् द्विजः। चतुश्चत्वारिंशत्पूर्वलक्षायुः स त्रिदण्ड्यभूत् ॥८२॥
मृत्वा माहेन्द्रकल्पेऽभूत् स सुरो मध्यमस्थितिः। च्युत्वा भ्रान्त्वा भवं राजगृहेऽभूत्स्थावरो द्विजः ॥८३॥
चतुस्त्रिंशत्पूर्वलक्षायुष्कः सोऽपि त्रिदण्ड्यभूत्। विपद्य च ब्रह्मलोके मध्यमायुः सुरोऽभवत् ॥८४॥
ब्रह्मलोकात्परिच्युत्य स बभ्राम बहून् भवान्। भवो ह्यनन्तीभवति स्वकर्मपरिणामतः ॥८५॥
इतश्चाभूद्राजगृहे विश्वनन्दी महीपतिः। पत्न्यां प्रियंगौ विशाखनन्दी तस्याभवत्सुतः ॥८६॥
विशाखभूतिर्युवराड् राज्ञस्तस्यानुजोऽभवत्। युवराजस्य तस्याभूद्धारिणी नामतः प्रिया ॥८७॥
मरीचिजीवः प्राग्जन्मोपार्जितैः शुभकर्मभिः। विशाखभूतेर्धारिण्यां विश्वभूतिः सुतोऽभवत् ॥८८॥
उद्यौवनो विश्वभूतिर्वने पुष्पकरण्डके। रेमे सान्तःपुरो देवकुमार इव नन्दने ॥८९॥
विशाखनन्दी क्रीडेच्छू राट्पुत्रोऽस्थात्तु तद्बहिः। पुष्पाद्यर्थं गता दास्यो ददृशुस्तौ तथास्थितौ[1] ॥९०॥

१ तथादृशौ C ॥

ताभ्यो ज्ञात्वा प्रियंगुस्तत् कोपौकः कुपिता ययौ । तदीप्सितार्थं राजापि साऽऽह्वनैषीमवादयत् ॥९१॥
*उद्धूतः पुरुषसिंहः सामन्तसञ्जयाय तत् । यास्यामीति सभामध्ये मायया चावदन्नृपः ॥९२॥
तच्च श्रुत्वा विश्वभूतिर्मञ्जुरेत्य वनात्ततः । भक्त्या निवार्य राजानं प्रयाणमकरोत् स्वयम् ॥९३॥
गतश्च पुरुषसिंहं दृष्ट्वाऽऽज्ञावर्तिनं पुनः । ववले तत्र च ययौ वने पुष्पकरण्डके ॥९४॥
विशाखनन्दी मध्येऽस्तीत्युक्तो द्वाःस्थेन तत्र सः । अचिन्तयन्मायथाऽहं कृष्टः पुष्पकरण्डकात् ॥९५॥
क्रुद्धः कपित्थं मुष्ट्याहंस्तत्फलैः पतितैर्भुवम् । छादितां दर्शयन् सोऽथ जगाद द्वारपालकम् ॥९६॥
पातयामि शिरांस्येवं सर्वेषां भवतां पुनः । [2]ज्यायसि ज्यायसी ताते न चेद्भक्तिर्भवेन्मम ॥९७॥
भोगैरीदृग्भञ्जनार्थैर्ममालमिति स ब्रुवन् । सं[3]भूतमुनिपादान्ते गत्वा व्रतमुपाददे ॥९८॥
तं च प्रव्रजितं श्रुत्वा राजा सावरजो[4]ऽभ्यगात् । नत्वा च क्षमयित्वा च राज्यायार्थयते स्म च ॥९९॥
विश्वभूतिमनिच्छन्तं ज्ञात्वा [5]भूपोऽगमद् गृहम् । ततो व्यहार्षीदन्यत्र स पुनर्गुरुणा सह ॥१००॥
स गुर्वनुज्ञयैकाकिविहारेण तपःकृशः । विहरन्नेकदागच्छन्नगरीं मथुराभिधाम् ॥१०१॥
तदा विशाखनन्द्यागादुद्वोढुं तन्नृपात्मजाम् । विश्वभूतिश्च मासान्ते पारणायाविशत्पुरीम् ॥१०२॥

* टि.– उद्धतः ।

१ अपि *C* ॥ २ यदि च *D* ॥ ३ °भूतिमु °*D*, *M* ॥ ४ °ऽभ्यगात् *C* ॥ ५ भूयो *C* ॥

विशाखनन्दिनः सोऽथ शिबिराभ्यर्णमागतः । विश्वभूतिः कुमारोऽसावित्यदर्श्यत पूरुषैः ॥१०३॥
विशाखनन्दी तं सद्यः प्रेक्ष्य द्विषमिवाकुपत् । गवैकया विश्वभूतिः पर्यस्तश्च तदाऽपतत् ॥१०४॥
कपित्थपातनं स्थाम क्व ते चेत्यहसच्च सः । धृत्वा गां शृङ्गयोर्विश्वभूतिश्चाभ्रमयत्क्रुधा ॥१०५॥
भूयिष्ठवीर्यो भूयासं मृत्यवेऽस्य भवान्तरे । अनेन तपसोग्रेण निदानमिति सोऽकरोत् ॥१०६॥
संपूर्य कोटिवर्षायुरनालोच्य च तन्मृतः । विश्वभूतिर्महाशुक्रे प्रकृष्टायुः सुरोऽभवत् ॥१०७॥
इतश्चात्रैव भरते नगरे पोतनाभिधे । अभूद्रिपुप्रतिशत्रुर्नाम राजा महाभुजः ॥ १०८ ॥
तस्य भद्रेति पत्न्यासीत्तस्यां सूनुरजायत । चतुर्भिः सूचितः स्वप्नैर्बलभद्रोऽचलाभिधः ॥ १०९ ॥
मृगावतीति नाम्नाऽभूत् पुत्री च मृगलोचना । सा यौवना रूपवती प्रणन्तुं पितरं ययौ ॥ ११० ॥
जातानुरागस्तां प्रेक्ष्य निजोत्संगे न्यवेशयत् सः । तत्पाणिग्रहणोपायं विचिन्त्य व्यसृजच्च ताम् ॥ १११ ॥
पौरवृद्धानथाहूय पप्रच्छेदं महीपतिः । यदत्र जायते रत्नं तत्कस्य ब्रूत निर्णयम् ? ॥ ११२ ॥
तवेति ते समाचख्युस्त्रिरुपादाय तद्वचः । मृगावतीं परिणेतुं तत्र चानाययन्नृपः ॥ ११३ ॥
जग्मुस्ते लज्जिताः सर्वे पार्थिवोऽपि मृगावतीम् । गान्धर्वेण विवाहेन स्वयमेव ह्युपायत ॥ ११४ ॥
लज्जाक्रोधाकुला भद्रा देवी मुक्त्वा महीपतिम् । सहाचलेन निर्गत्य प्रययौ दक्षिणापथे ॥ ११५ ॥
पुरीं माहेश्वरीं तत्र विरचय्याचलो नवाम् । मातरं तत्र संस्थाप्य जगाम पितुरन्तिके ॥ ११६ ॥

तत्पितापि स्वप्रजायाः पतित्वेनाखिलैर्जनैः । प्रजापतिरिति प्रोचे बलीयः कर्म नाम हि ॥ ११७ ॥
विश्वभूतिश्च्युतः शुक्रान्मृगावत्या अथोदरे । सप्तस्वप्नसमाख्यातविष्णुभावः समागमत् ॥ ११८ ॥
तया च काले सुषुवे सूनुः प्रथमशार्ङ्गभृत् । त्रिकरंडकपृष्ठत्वात् त्रिपृष्ठ इति संज्ञितः ॥ ११९ ॥
अशीतिधनुरुत्तुंगो रममाणोऽचलेन सः । अधीतसकलकलः क्रमेण प्राप यौवनम् ॥ १२० ॥
विशाखनन्दिजीवोऽथ भवं भ्रान्त्वा मृगाधिपः । जातस्तुंगगिरौ शंख[1]पुरदेशमुपाद्रवत् ॥ १२१ ॥
तदानीमश्वग्रीवेण भूभुजा प्रतिविष्णुना । मम मृत्युः कुत इति पृष्टो नैमित्तिकोऽवदत् ॥ १२२ ॥
हन्ता स ते चंडवेगं यो दूतं धर्षयिष्यति । मारयिष्यति यस्तुंगगिरिसिंहं च हेलया ॥ १२३ ॥
अश्वग्रीवस्ततः शंखपुरे शालीनवापयत् । तद्रक्षार्थं चादिदेश वारकेण महीपतीन् ॥ १२४ ॥
सोऽश्रौषीच्च महावीर्यौ पुत्रौ राज्ञः प्रजापतेः । तस्मै दूतं चंडवेगं प्रैषीत् [2]चार्थेन केनचित् ॥ १२५ ॥
प्रजापतेः कारयतः संगीतं निजपर्षदि । अकस्मात्प्राविशच्चंडवेगः स्वामिबलोन्मदः ॥ १२६ ॥
आगमाध्ययनस्येवाकालविद्युत्समुद्गमः । स विघ्नभूतो गीतस्याभ्युत्तस्थे तेन भूभुजा ॥ १२७ ॥
मंत्रिणश्च कुमाराभ्यां पृष्टा आख्यन् पुमानयम् । प्रधानभूतोऽश्वग्रीवमहाराजस्य दोष्मतः ॥ १२८ ॥
यदा व्रजत्ययं दूतो ज्ञापनीयस्तदा हि नौ । इति स्वकीयानचलत्रिपृष्ठावूचतुर्नरान् ॥ १२९ ॥

---

१ °पुरे दे° C ॥ २ स्वार्थे° D, M ॥

स प्रजापतिनान्येद्युर्विसृष्टोऽभ्यर्च्य गौरवात् । ययौ कुमारयोराशु ज्ञापितश्च निजैर्नरैः ॥१३०॥
गत्वा कुमारौ मार्गार्धे तमकुट्टयतां भटैः । पलायांचक्रिरे सद्यस्तत्सहायास्तु काकवत् ॥१३१॥
तत्प्रजापतिना ज्ञात्वा भीतेनानायितो गृहे । सत्कृत्य चाधिकं चंडवेग एवमभाष्यत ॥१३२॥
कुमारयोर्दुर्विनयं मा स्माख्यः स्वामिनः खलु । अज्ञानजाद् दुर्विनयान्न कुप्यन्ति महाशयाः ॥१३३॥
ओमित्युक्त्वा ययौ दूत†स्तत्पौरुषाच्चाग्रतो गतात् । विदांचकाराश्वग्रीवस्तद्धर्षणमशेषतः ॥१३४॥
तद्विदं च हयग्रीवं ज्ञात्वा दूतो यथातथम् । स्वधर्षणं तदाचख्यावलीकाख्यानकातरः ॥१३५॥
अश्वग्रीवेण शिष्टोऽन्यः प्रहितो ना प्रजापतिम् । गत्वावोचद्रक्ष सिंहाच्छालीनाज्ञा प्रभोरियम् ॥१३६॥
प्रजापतिः सुतावूचे युवाभ्यां कोपितः प्रभुः । प्रददौ यदवारेऽपि शासनं सिंहरक्षणे ॥१३७॥
इत्युक्त्वा प्रस्थितं भूपं कुमारौ प्रतिषिध्य तौ । प्रजग्मतुः शंखपुरं सिंहयुद्धसकौतुकौ ॥१३८॥
अन्येऽरक्षन्नृपाः सिंहं कथंकारं कियच्चिरम् । इति पृष्टस्त्रिपृष्ठेन शशंसुः शालिगोपकाः ॥१३९॥
चतुरंगचमूवप्रं कृत्वाऽरक्षन् क्षमाभुजः । आ शालिग्रहणमहो वर्षवारक्रमागताः ॥१४०॥
ऊचे त्रिपृष्ठस्तानेवं स्थास्यतीयच्चिरं हि कः । तद्दर्शयत मे सिंहं यथैकाकी निहन्मि तम् ॥१४१॥
ततस्तेऽदर्शयन् सिंहं तुंगाचलगुहागतम् । जग्मतुश्च रथारूढौ तां गुहां रामशार्ङ्गिणौ ॥ १४२ ॥

टि.– † तस्य चंडवेगस्य पुरुषसमूहात्

चक्रुः कलकलं चोच्चैस्तद्गुहापार्श्वयोर्जनाः । तं श्रुत्वा निर्ययौ जृम्भादीर्घवक्त्रः स केसरी ॥ १४३ ॥
रथिकोऽहमसौ पत्तिरित्याजिर्न समाऽऽवयोः । इति त्रिपृष्ठः फलकासिधरोऽवातरद्रथात् ॥ १४४ ॥
दंष्ट्राकरजशस्त्रोऽयं फलकासिधरस्त्वहम् । नैतदप्युचितमिति चर्मासी व्यमुचद्धरिः ॥ १४५ ॥
तत्प्रेक्ष्य केसरी जातजातिस्मृतिरचिन्तयत् । एकं धाष्ट्र्यमहो एको यदागान्मद्गुहामसौ ॥ १४६ ॥
अन्यद्रथादुत्तरणं तृतीयं शस्त्रमोचनम् । दुर्मदं तन्निहन्म्येष मदान्धमिव सिन्धुरम् ॥ १४७ ॥
विचिन्त्यैवं क्षणं व्यात्ताननः पञ्चाननाग्रणीः । दत्त्वा फालामुत्पपातोपत्रिपृष्ठं पपात च ॥ १४८ ॥
एकेन पाणिनोर्ध्वोष्ठमपरेणाधरं पुनः । धृत्वा त्रिपृष्ठस्तं सिंहं जीर्णवस्त्रमिवादृणात् ॥ १४९ ॥
पुष्पाभरणवस्त्राणि ववृषुर्देवता हरौ । लोकाश्च विस्मयस्मेराः साधु साध्विति तुष्टुवुः ॥ १५० ॥
अहो कथमनेनाहं कुमारेणाद्य मारितः । इत्यमर्षात् स्फुरंस्तस्थौ द्विधाभूतोऽपि केसरी ॥ १५१ ॥
गणभृद्गौतमजीवोऽन्त्यार्हज्जीवस्य शार्ङ्गिणः । तदानीं सारथिः सिंहं तं स्फुरन्तमदोऽवदत् ॥ १५२ ॥
नृष्वेष सिंहः पशुषु त्वं तु तन्मारितोऽमुना । मुधाऽपमानं किं धत्से न हीनेन हतोऽसि यत् ॥ १५३ ॥
सुधयेव तया वाचा प्रीतो मृत्वा स केसरी । चतुर्थ्यां नरकावन्यां नारकः समजायत ॥ १५४ ॥
तच्चर्मादाय कुमारौ चलितौ स्वपुरं प्रति । ग्राम्यानित्यूचतुर्वाजिग्रीवस्यैतद्धि कथ्यताम् ॥ १५५ ॥
शालीन् खाद यथेष्टं त्वं विश्वस्तस्तिष्ठ संप्रति । असौ हृदयशल्यं ते केसरी यन्निपातितः ॥ १५६ ॥

इत्युक्त्वा पोतनपुरे तौ कुमारावुपेयतुः । ग्रामीणास्तेऽपि गत्वाऽऽख्यन् हयग्रीवस्य तत्तथा ॥ १५७ ॥
हयग्रीवोऽपि साशंको जिघांसुर्माययापि तौ । अनुशिष्यादिशद् दूतं प्रजापतिनृप प्रति ॥ १५८ ॥
गत्वा स दूतस्तं स्माहोपस्वामि प्रेषयात्मजौ । राज्यं यदनयोः स्वामी प्रदास्यति पृथक् पृथक् ॥ १५९ ॥
प्रजापतिर्बभाषेऽहं यास्यामि स्वामिनं स्वयम् । कृतं मम कुमाराभ्यां गताभ्यां तत्र सुन्दर ! ॥ १६० ॥
दूतो भूयोऽवदत्पुत्रौ न चेत्त्वं प्रेषयिष्यसि । तत्सज्जीभव युद्धाय मा वादीः कथितं न यत् ॥ १६१ ॥
इत्युक्तवन्तं तं दूतं तौ कुमारावमर्षणौ । धर्षयित्वा निजपुरान्निरवासयतां क्षणात् ॥ १६२ ॥
दूतो गत्वा तदाचख्यौ हयग्रीवाय धर्षणम् । हयग्रीवोऽपि कोपेन हुताशन इवाज्वलत् ॥ १६३ ॥
हयग्रीवः ससैन्योऽपि त्रिपृष्ठश्चाचलोऽपि च । युयुत्सवः समभ्येयू रथावर्तमहागिरौ ॥ १६४ ॥
मिथो युयुधिरे सैन्याः पक्षयोरुभयोरपि । सांवर्तिका इवाम्भोदा आस्फलन्तः परस्परम् ॥ १६५ ॥
क्षीणक्षीणेषु सैन्येषु सैन्ययुद्धं निषिध्य तौ । अश्वग्रीवस्त्रिपृष्ठश्चायुध्येतां रथिनौ स्वयम् ॥ १६६ ॥
मोघीकृतास्त्रोऽश्वग्रीवोऽरिग्रीवोच्छेदलम्पटम् । त्रिपृष्ठायामुचच्चक्रं हाहाकारिजनेक्षितम् ॥ १६७ ॥
त्रिपृष्ठोरःस्थले चक्रं तुम्बेन निपपात तत् । शरभो रभसोद्भ्रान्त इव पर्वतसानुनि ॥ १६८ ॥
वीरमष्ठस्त्रिपृष्ठोऽथ तेन चक्रेण लीलया । चकर्त हयकंठस्य कंठमंभोजनालवत् ॥ १६९ ॥
अचलश्च त्रिपृष्ठश्च प्रथमौ हलिशार्ङ्गिणौ । इत्याघोषि सुरैर्व्योम्नि पुष्पवृष्टिपुरस्सरम् ॥ १७० ॥

तयोः सर्वेऽपि राजानः सद्योऽपि प्रणतिं ययुः । ताभ्यां चासाधि भरतक्षेत्रत्रयार्धमोजसा ॥ १७१ ॥
शिलां कोटिशिलां दोष्णोत्पाट्य मूर्ध्न्यातपत्रवत् । प्रथमः पुंडरीकाक्षो धारयामास लीलया ॥ १७२ ॥
त्रिक्रमाक्रान्तभूचक्रः स पोतनपुरं ययौ । अभिषिक्तश्चार्धचक्रिपदे देवैर्नृपैरपि ॥ १७३ ॥
यद्यद्रत्नं दूरतोऽपि त्रिपृष्ठं तत्तदाश्रयत् । रक्तीभूता गायनेषु तमेयुः केऽपि सुस्वराः ॥ १७४ ॥
एकदा तेषु गायत्सु शय्यापालं हरिर्निशि । ऊचे मयि शयानेऽमी विस्रष्टव्यास्त्वया खलु ॥ १७५ ॥
आमेत्यूचे तल्पपाल आगान्निद्रा च शार्ङ्गिणः । तद्गीतलुब्धो व्यस्राक्षीद्गायनान् सोऽपि तान्न हि ॥ १७६ ॥
तेषु गायत्सु चोत्तस्थौ विष्णुरूचे च ताल्पिकम् । त्वया विसृष्टाः किं नामी सोऽप्यूचे गीतलोभतः ॥ १७७ ॥
तच्छ्रुत्वा कुपितो विष्णुः प्रभाते तस्य कर्णयोः । अक्षेपयत्त्रपु तप्तं शय्यापालो मृतश्च सः ॥ १७८ ॥
त्रिपृष्ठः कर्मणा तेन वेद्यं कर्म न्यकाचयत् । प्रभुत्वादन्यदप्युग्रं कर्माऽबध्नाद् दुरायति ॥ १७९ ॥
अहिंसादिष्वविरतो महारम्भपरिग्रहः । चतुरशीत्यब्दलक्षीं प्राजापत्योऽत्यवाहयत् ॥ १८० ॥
मृत्वा च सप्तमावन्यामुदपद्यत नारकः । तद्वियोगात्प्रव्रजितोऽचलो मृत्वा शिवं ययौ ॥ १८१ ॥
त्रिपृष्ठजीवो नरकादुद्धृत्याऽजनि केसरी । केसर्यपि विपन्नः संश्चतुर्थं नरकं ययौ ॥ १८२ ॥
सोऽथ तिर्यङ्मनुष्यादिभवान् बभ्राम भूरिशः । लब्ध्वा च मानुषं जन्म शुभं कर्मैकदाऽऽर्जयत् ॥ १८३ ॥
ततोऽपरविदेहेषु मूकायां पुरि भूपतेः । धनंजयस्य धारिण्याः पत्न्याः कुक्षाववातरत् ॥ १८४ ॥

चतुर्दशमहास्वप्नाख्यातचक्रधरर्द्धिकः । काले तया च सुषुवे सूनुः संपूर्णलक्षणः ॥ १८५ ॥
प्रियमित्र इति नाम पितरौ तस्य चक्रतुः । पित्रोर्मनोरथैः सार्धं क्रमेण ववृधे च सः ॥ १८६ ॥
अथ संसारनिर्विण्णो धनञ्जयमहीपतिः । प्रियमित्रं सुतं राज्ये निधाय व्रतमाददे ॥ १८७ ॥
प्रियामिव भुवं पातुः प्रियमित्रस्य भूपतेः । चतुर्दश महारत्नान्युदपद्यन्त च क्रमात् ॥ १८८ ॥
षट्खंडं विजयं जेतुं चक्रमार्गानुगोऽचलत् । गत्वा च पूर्वाभिमुखं मागधं तीर्थमासदत् ॥ १८९ ॥
कृत्वाऽष्टमतपस्तत्र चतुरङ्गचमूवृतः । चतुर्थान्ते रथारूढः किञ्चिद्गत्वाऽग्रहीद्धनुः ॥ १९० ॥
मागधतीर्थकुमारं समुद्दिश्य महाभुजः । कंकपत्रं स्वनामांकं गरुत्मन्तमिवाक्षिपत् ॥ १९१ ॥
योजनानि द्वादशेषुः स लंघित्वा विहायसा । पुरो मागधदेवस्य पपातोत्पातवज्रवत् ॥ १९२ ॥
बाणो मुमूर्षुणा केन क्षिप्त इत्यभिचिन्तयन् । मागधेशो रुषोत्थाय तं जग्राह शिलीमुखम् ॥ १९३ ॥
चक्रिनामाक्षरश्रेणीं वीक्ष्य शान्तीभवन् क्षणात् । उपायनान्युपादाय प्रियमित्रं स आययौ ॥ १९४ ॥
आज्ञाधरस्तवास्मीति जल्पन् व्योमस्थितो नृपम् । पूजयामास विविधोपायनैः स उपायवित् ॥ १९५ ॥
तं सत्कृत्य विसृज्याथ वलित्वा पारणं व्यधात् । चक्री मागधदेवस्य चक्रे चाष्टाह्निकोत्सवम् ॥ १९६ ॥
ततो जगाम याम्यायां कर्कस्थित इवार्यमा । वरदामानममरं नृपः प्रागवदसाधयत् ॥ १९७ ॥
गत्वा प्रतीच्यां प्रभासतीर्थेशमपि चक्रभृत् । विधिना साधयामास प्रति सिन्धुं जगाम च ॥ १९८ ॥

कृताष्टमस्य प्रत्यक्षीभूय सिन्धुर्महीपतेः। रत्नभद्रासने दिव्ये प्रददौ भूषणानि च ॥ १९९ ॥
तां विसृज्य स वैताढ्यं चक्ररत्नानुगो ययौ। वैताढ्याद्रिकुमारं चासाधयद्विहिताष्टमः ॥ २०० ॥
गतस्याभितमिस्रं चाष्टमस्थस्य महीपतेः। कृतमालः स्त्रीरत्नार्हमन्यच्चाभरणं ददौ ॥ २०१ ॥
उत्तीर्य चर्मणा सिन्धुं सेनानीश्चक्रिशासनात्। लीलया साधयामास सिन्धोः प्रथमनिष्कुटम् ॥ २०२ ॥
भूयोऽप्यभ्येत्य सेनानीः प्रियमित्रस्य शासनात्। कृताष्टमो दंडघातात्तमिस्रामुदघाटयत् ॥ २०३ ॥
चक्रयारूढो गजरत्नं तत्कुंभे न्यस्य दक्षिणे। मणिरत्नं प्रकाशाय तमिस्रां प्राविशद् गुहाम् ॥ २०४ ॥
काकिण्या मंडलान्यर्कमंडलाभानि पार्श्वयोः। लिखन् गुहायां द्योताय चक्री चक्रानुगो ययौ ॥ २०५ ॥
पद्ययोन्मग्नानिमग्ने नद्यौ तीर्त्वा महीपतिः। स्वयमुद्घटितेनोदग्द्वारेण निरगाद्गिरेः ॥ २०६ ॥
आपातनाम्नः किरातानजैषीत्तत्र चक्रभृत्। असाधयच्च सेनान्या द्वितीयं सिंधुनिष्कुटम् ॥ २०७ ॥
चक्रानुगो निवृत्याथ भूपो वैताढ्यमभ्यगात्। वशीचक्रे द्वयोः श्रेण्योस्तत्र विद्याधरांश्च सः ॥ २०८ ॥
साधयित्वा स सेनान्या गांगं प्रथमनिष्कुटम्। स्वयमष्टमभक्तेन गंगादेवीमसाधयत् ॥ २०९ ॥
खंडप्रपातया सेनान्युद्घाटितकपाटया। वैताढ्याद्रेर्निर्जगाम ससैन्योऽपि महीपतिः ॥ २१० ॥
अथाष्टमतपःस्थस्य प्रियमित्रस्य चक्रिणः। नवापि निधयोऽभूवन्नैसर्पाद्या वशंवदाः ॥ २११ ॥

१ °रगा° C ॥ २ भूयो C ॥

सेनान्या साधयित्वा च द्वितीयं गाङ्गनिष्कुटम् । जितषट्खंडविजयश्चक्री मूकां पुरीं ययौ ॥ २१२ ॥
चक्रभृत्त्वाभिषेकोऽस्य चक्रे द्वादशवार्षिकः । अमरैर्नृवरैश्चापि महोत्सवपुरःसरम् ॥ २१३ ॥
नीत्या पालयतस्तस्य पृथिवीं पृथिवीपतेः । एकदा पोट्टिलाचार्य उद्याने समवासरत् ॥ २१४ ॥
धर्मं तदन्तिके श्रुत्वा राज्ये न्यस्य स्वमात्मजम् । स प्रवव्राज तेपे च वर्षकोटीं तपः परम् ॥ २१५ ॥
पूर्वलक्षचतुरशीत्यायुः संन्यासपूर्वकम् । मृत्वा शुक्रे स सर्वार्थविमाने त्रिदशोऽभवत् ॥ २१६ ॥
च्युत्वेह भरते छत्रायां पुर्यां जितशत्रुतः । भद्रादेव्यां सोऽजनिष्ट नन्दनो नाम नन्दनः ॥ २१७ ॥
तं न्यस्योद्यौवनं राज्ये जितशत्रुर्महीपतिः । संसारवासनिर्विण्णः परिव्रज्यामुपाददे ॥ २१८ ॥
लोकानां हृदयानन्दो नन्दनोऽपि वसुन्धराम् । यथाविधि शशासैनां पाकशासनशासनः ॥ २१९ ॥
चतुर्विंशत्यब्दलक्षीं जन्मतोऽतीत्य नन्दनः । विरक्तः पोट्टिलाचार्यसमीपे व्रतमाददे ॥ २२० ॥
मासोपवासैः सततैः श्रामण्यं स प्रकर्षयन् । व्यहार्षीद् गुरुणा सार्धं ग्रामाकरपुरादिषु ॥ २२१ ॥
उभाभ्यामपध्यानाभ्यां बन्धनाभ्यां च वर्जितः । त्रिभिर्दण्डैर्गौरवैश्च शल्यैश्च रहितः सदा ॥ २२२ ॥
प्रक्षीणचतुष्कषायश्चतुःसंज्ञाविवर्जितः । चतुर्विकथारहितश्चतुर्धर्मपरायणः ॥ २२३ ॥
चतुर्विधैरुपसर्गैरपरिस्खलितोद्यमः । व्रतेषु पञ्चसूद्युक्तो द्वेषी कामेषु पञ्चसु ॥ २२४ ॥
पञ्चप्रकारस्वाध्यायप्रसक्तः प्रतिवासरम् । बिभ्राणः समितीः पञ्च जेता पञ्चेन्द्रियाणि च ॥ २२५ ॥

षड्जीवनिकायत्राता सप्तभीस्थानवर्जितः । विमुक्ताष्टमदस्थानः स नवब्रह्मगुप्तिकः ॥ २२६ ॥
दधद्दशविधं धर्मं सम्यगेकादशाङ्गभृत् । तपो द्वादशधा कुर्वन् द्वादशप्रतिमारुचिः ॥ २२७ ॥
दुःसहामपि सहिष्णुः परीषहपरंपराम् । निरीहो नन्दनमुनिर्वर्षलक्षं तपोऽकरोत् ॥ २२८ ॥

॥ सप्तभिः कुलकम् ॥

अर्हद्भक्त्यादिभिः स्थानैर्विंशत्यापि महातपाः । दुरर्जमर्जयामास तीर्थकृन्नामकर्म सः ॥ २२९ ॥
स निष्कलंकं श्रामण्यं चरित्वा मूलतोऽपि हि । आयुःपर्यन्तसमये व्यधादाराधनामिति ॥ २३० ॥
ज्ञानाचारोऽष्टधा प्रोक्तो यः कालविनयादिकः । तत्र मे कोऽप्यतीचारो योऽभूत्तन्निन्दामि तं त्रिधा ॥२३१॥
यः प्रोक्तो दर्शनाचारोऽष्टधा निःशंकितादिकः । तत्र मे योऽतिचारोऽभूत्त्रिधापि व्युत्सृजामि तम् ॥२३२॥
या कृता प्राणिनां हिंसा सूक्ष्मा वा बादरापि वा । मोहाद्वा लोभतो वापि व्युत्सृजामि त्रिधापि ताम् २३३
हास्यभीलोभक्रोधाद्यैर्यन्मृषा भाषितं मया । तत्सर्वमपि निन्दामि प्रायश्चित्तं चरामि च ॥ २३४ ॥
अल्पं भूरि च यत्क्वापि परद्रव्यमदत्तकम् । आत्तं रागादथ द्वेषात्तत्सर्वं व्युत्सृजाम्यहम् ॥ २३५ ॥
तैरश्चं मानुषं दिव्यं मैथुनं मयका पुरा । यत्कृतं त्रिविधेनापि त्रिविधं व्युत्सृजामि तत् ॥ २३६ ॥
बहुधा यो धनधान्यपश्वादीनां परिग्रहः । लोभदोषान्मयाऽकारि व्युत्सृजामि त्रिधापि तम् ॥ २३७ ॥

पुत्रे कलत्रे मित्रे च बन्धौ धान्ये धने गृहे । अन्येष्वपि ममत्वं यत्तत्सर्वं व्युत्सृजाम्यहम् ॥ २३८ ॥
इन्द्रियैरभिभूतेन य आहारश्चतुर्विधः । मया रात्रावुपाभोजि निन्दामि तमपि त्रिधा ॥ २३९ ॥
क्रोधो मानो माया लोभो रागो द्वेषः कलिस्तथा । पैशून्यं परनिर्वादोऽभ्याख्यानमपरं च यत् ॥ २४० ॥
रत्यरत्यो[illegible] मया । तदहं त्रिविधेनापि व्युत्सृजामि समन्ततः ॥ २४१ ॥
यस्तपःस्वतिचारोऽभूद्बाह्येष्वाभ्यन्तरेषु च । त्रिविधं त्रिविधेनापि निन्दामि तमहं खलु ॥ २४२ ॥
धर्मानुष्ठानविषये यद्वीर्यं गोपितं मया । वीर्याचारातिचारं च निन्दामि तमपि त्रिधा ॥ २४३ ॥
हतो दुरुक्तश्च मया यो यस्याऽहारि किञ्चन । यस्याऽपाकारि किंचिद्वा मम क्षाम्यतु सोऽखिलः ॥ २४४ ॥
यश्च मित्रममित्रो वा स्वजनोऽरिजनोऽपि वा । सर्वः क्षम्यतु मे सर्वं सर्वेष्वपि समोऽस्म्यहम् ॥ २४५ ॥
तिर्यक्त्वे सति तिर्यञ्चो नारकत्वे च नारकाः । अमरा अमरत्वे च मानुषत्वे च मानुषाः ॥ २४६ ॥
ये मया स्थापिता दुःखे सर्वे क्षाम्यन्तु ते मम । क्षाम्याम्यहमपि तेषां मैत्री सर्वेषु मे खलु ॥ २४७ ॥
जीवितं यौवनं लक्ष्मीः रूपं प्रियसमागमः । चलं सर्वमिदं वात्यानर्तिताब्धितरंगवत् ॥ २४८ ॥
व्याधिजन्मजरामृत्युग्रस्तानां प्राणिनामिह । विना जिनोदितं धर्मं शरणं कोऽपि नापरः ॥ २४९ ॥
सर्वेऽपि जीवाः स्वजना जाताः परजनाश्च ते । विदधीत प्रतिबन्धं तेषु को हि मनागपि ॥ २५० ॥
एक उत्पद्यते जन्तुरेक एव विपद्यते । सुखान्यनुभवत्येको दुःखान्यपि स एव हि ॥ २५१ ॥

अन्यद्वपुरिदं तावदन्यद्धान्यधनादिकम् । बन्धवोऽन्येऽन्यश्च जीवो वृथा मुह्यति बालिशः ॥ २५२ ॥
वसारुधिरमांसास्थियकृद्विण्मूत्रपूरिते । वपुष्यशुचिनिलये मूर्च्छां कुर्वीत कः सुधीः ॥ २५३ ॥
अवक्रयात्तवेश्मेव मोक्तव्यमचिरादपि । लालितं पालितं वाऽपि विनश्वरमिदं वपुः ॥ २५४ ॥
धीरेण कातरेणापि मर्तव्यं खलु देहिना । तन्म्रियेत तथा धीमान्न म्रियेत यथा पुनः ॥ २५५ ॥
अर्हन्तो मम शरणं शरणं सिद्धसाधवः । उदीरितः केवलिभिर्धर्मः शरणमुच्चकैः ॥ २५६ ॥
जिनधर्मो मम माता गुरुस्तातोऽथ सोदराः । साधवः साधर्मिकाश्च बन्धवोऽन्यत्तु जालवत् ॥ २५७ ॥
ऋषभादींस्तीर्थकरान्नमस्याम्यखिलानपि । भरतैरावतविदेहार्हतोऽपि नमाम्यहम् ॥ २५८ ॥
तीर्थकृद्भ्यो नमस्कारो देहभाजां भवच्छिदे । भवति क्रियमाणः स बोधिलाभाय चोच्चकैः ॥ २५९ ॥
सिद्धेभ्यश्च नमस्कारं भगवद्भ्यः करोम्यहम् । कर्मैधोऽदाहि यैर्ध्यानाग्निना भवसहस्रजम् ॥ २६० ॥
आचार्येभ्यः पञ्चविधाचारेभ्यश्च नमो नमः । यैर्धार्यते प्रवचनं भवच्छेदे सदोद्यतैः ॥ २६१ ॥
श्रुतं बिभ्रति ये सर्वं शिष्येभ्यो व्याहरन्ति च । नमस्तेभ्यो महात्मभ्य उपाध्यायेभ्य उच्चकैः ॥ २६२ ॥
शीलव्रतसनाथेभ्यः साधुभ्यश्च नमो नमः । भवलक्षसन्निबद्धं पापं निर्नाशयन्ति ये ॥ २६३ ॥
सावद्यं योगमुपधिं बाह्यमाभ्यन्तरं तथा । यावज्जीवं त्रिविधेन त्रिविधं व्युत्सृजाम्यहम् ॥ २६४ ॥

[1]चतुर्विधाहारमपि यावज्जीवं त्यजाम्यहम् । उच्छ्वासे चरमे देहमपि हि व्युत्सृजाम्यहम् ॥ २६५ ॥
दुष्कर्मगर्हणां जन्तुक्षमणां भावनापि । चतुःशरणं च नमस्कारं चानशनं तथा ॥ २६६ ॥
एवमाराधनां षोढा स कृत्वा नन्दनो मुनिः । धर्माचार्यानक्षमयत् साधून् साध्वीश्च सर्वतः ॥ २६७ ॥
षष्टिं दिनान्यनशनं पालयित्वा समाहितः । पञ्चविंशत्यब्दलक्षपूर्णायुः सोऽममो मृतः ॥ २६८ ॥
अथाधिप्राणतं पुष्पोत्तरनामनि विस्तृते । विमाने स उपपेदे शय्यायामुदपद्यत ॥ २६९ ॥
अन्तर्मुहूर्तान्निष्पन्नः स तु देवो महर्द्धिकः । अपनीय देवदूष्यमुपविष्टो व्यलोकयत् ॥ २७० ॥
विमानं देवसंपातं देवर्द्धिं च विलोक्य ताम् । दध्यौ स विस्मितः प्राप्तं केनेदं तपसा मया ॥ २७१ ॥
सोऽपश्यच्चावधेः पूर्वभवं तच्च [1]व्रतावनम् । अहो प्रभावोऽर्हद्धर्मस्येति चेतस्यचिन्तयत् ॥ २७२ ॥
अत्रान्तरे सुराः सर्वे तमुत्पन्नं सुरोत्तमम् । संभूय बद्धाञ्जलयो जगदुर्मुदिता इति ॥ २७३ ॥
स्वामिञ्जय जगन्नंद जगद्भद्र चिरं जय । त्वं नः स्वामी जितं त्रायस्वाजितं विजयस्व च ॥ २७४ ॥
इदं विमानं भवतो वयमाज्ञाकराः सुराः । अमून्युपवनान्युच्चैरमूर्मज्जनवापयः ॥ २७५ ॥
इदं च सिद्धायतनं सुधर्मेयं महासभा । मज्जनौकोऽलंकुरुष्वाभिषेकं कुर्महे यथा ॥ २७६ ॥

---

१ नास्ति C प्रतौ अयं श्लोकः ॥

टि.– [1]व्रतपालनम् ।

एवं तैरमरैरुक्तः स गत्वा मज्जनौकसि । सिंहासने सांघ्रिपीठे निषसादामराग्रणीः ॥ २७७ ॥
दिव्येन पयसा तत्राभिषिक्तः कुंभपाणिभिः । निन्ये च किंकरसुरैः सोऽलंकारनिकेतनम् ॥ २७८ ॥
देवदूष्ये न्यधादंगे वाससी स च सोऽमरः । अंगरागं भूषणानि किरीटप्रभृतीनि च ॥ २७९ ॥
व्यवसायसभां गत्वाऽवाचयत्पुस्तकं च सः । पुष्पादिपूजामादाय सिद्धालयमियाय च ॥ २८० ॥
अष्टोत्तरार्हत्प्रतिमाशतं स्नपयति स्म सः । आनर्च च ववन्दे च तुष्टाव च समाहितः ॥ २८१ ॥
गत्वा सुधर्मामास्थानीं संगीतकमकारयत् । विमाने तत्र भोगांश्च भुञ्जानोऽस्थाद्यथारुचि ॥ २८२ ॥
कल्याणकेष्वर्हतां स विदेहादिषु भूमिषु । अगाज्जिनान् ववन्दे च सम्यक्त्वगुणभूषणः ॥ २८३ ॥
आयुर्विंशतिसागरोपममितं सोऽपूरि देवाग्रणीः, पर्यन्तेऽपि विशेषतः प्रतिकलं देदीप्यमानः श्रिया ।
मुह्यन्ति ह्यपरे त्रिविष्टपसदः षण्मासशेषायुषः, काप्युच्चैर्न तु तीर्थकृद्विविषदोऽत्यासन्नपुण्योदयाः ॥२८४॥

इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये दशमे पर्वणि श्रीमहा[1]वीरपूर्वभववर्णनो नाम
प्रथमः सर्गः ॥

१ °वीरचरिते पू° D, M ॥

## ॥ अथ द्वितीयः सर्गः ॥

इतश्च जंबूद्वीपेऽस्मिन् क्षेत्रेऽस्ति भरताभिधे । ब्राह्मणकुंडग्रामाख्यसंनिवेशो द्विजन्मनाम् ॥ १ ॥
तत्र चर्षभदत्तोऽभूत् कौडालसकुलो द्विजः । देवानन्दा च तद्भार्या जालन्धरकुलोद्भवा ॥ २ ॥
च्युत्वा च नन्दनो हस्तोत्तरर्क्षस्थे निशाकरे । आषाढस्य श्वेतषष्ठ्यां तस्याः कुक्षाववातरत् ॥ ३ ॥
देवानन्दा सुखसुप्ता महास्वप्नांश्चतुर्दश । ददर्श प्रातराख्यच्च पत्ये सोऽपि व्यचारयत् ॥ ४ ॥
चतुर्णां छन्दसां पारदृश्वा परमनैष्ठिकः । सूनुर्भवत्या भविता स्वप्नैरेभिर्न संशयः ॥ ५ ॥
देवानन्दागर्भगते प्रभौ तस्य द्विजन्मनः । बभूव महती ऋद्धिः कल्पद्रुम इवागते ॥ ६ ॥
तस्या गर्भस्थिते नाथे द्व्यशीतिदिवसात्यये । सौधर्मकल्पाधिपतेः सिंहासनमकंपत ॥ ७ ॥
ज्ञात्वा चावधिना देवानन्दागर्भगतं प्रभुम् । सिंहासनात् समुत्थाय शक्रो नत्वेत्यचिन्तयत् ॥ ८ ॥
त्रिजगद्गुरवोऽर्हन्तो नोत्पद्यन्ते कदाचन । तुच्छकुले रोरकुले भिक्षावृत्तिकुलेऽपि वा ॥ ९ ॥

१ °स्य: *C, D* ॥ २ कोडा° *C, D* ॥

इक्ष्वाकुवंशप्रभृतिक्षत्रवंशेषु किं त्वमी । जायन्ते पुरुषसिंहा मुक्ताः शुक्त्यादिकेष्विव ॥ १० ॥
तदसंगतमापन्नं जन्म नीचकुले प्रभोः । प्राच्यं कर्मान्यथा कर्तुं यन्नार्हन्तोऽपि नेशते ॥ ११ ॥
मरीचिजन्मनि कुलमदं नाथेन कुर्वता । अर्जितं नीचकैर्गोत्रकर्माद्यापि ह्युपस्थितम् ॥ १२ ॥
कर्मवशान्नीचकुलेषूत्पन्नानर्हतोऽन्यतः । क्षेप्तुं महाकुलेऽस्माकमधिकारोऽस्ति सर्वदा ॥ १३ ॥
कोऽधुनास्ति महावंश्यो राजा राज्ञी च भारते । यत्र संचार्यते स्वामी कुन्दाद् भृंग इवांबुजे ॥ १४ ॥
ज्ञातमस्तीह भरते महीमंडलमंडनम् । क्षत्रियकुंडग्रामाख्यं पुरं मत्पुरसोदरम् ॥ १५ ॥
स्थानं विविधचैत्यानां धर्मस्यैकं निबन्धनम् । अन्यायैरपरिस्पृष्टं पवित्रं तच्च साधुभिः ॥ १६ ॥
मृगयामद्यपानादिव्यसनाऽस्पृष्टनागरम् । तदेव भरतक्षेत्रपावनं तीर्थवद् भुवः ॥ १७ ॥
तत्रैक्ष्वाको ज्ञातवंश्यः सिद्धार्थोऽस्ति महीपतिः । धर्मेणैव हि सिद्धार्थं सदाऽऽत्मानममंस्त यः ॥ १८ ॥
जीवाजीवादितत्त्वज्ञो न्यायवर्त्ममहाध्वगः । प्रजाः पथि स्थापयिता हितकामी पितेव सः ॥ १९ ॥
दीनानाथादिलोकानां समुद्धरणबान्धवः । शरण्यः शरणेच्छूनां स क्षत्रियशिरोमणिः ॥ २० ॥
तस्यास्ति त्रिशला नाम सतीजनमतल्लिका । पुण्यभूरग्रमहिषी महनीयगुणाकृतिः ॥ २१ ॥
निसर्गतो निर्मलया तत्तद्गुणतरंगया । तया पवित्र्यते धात्री मन्दाकिन्येव संप्रति ॥ २२ ॥

१ °र्न्यं *M*. ॥

मायया स्त्रीजन्मसहचारिण्याप्यकलंकिता । सा निसर्गर्जुर्देवी सुगृहीताभिधा भुवि ॥ २३ ॥
सा चास्ति सांप्रतं गुर्वी कार्यः संचारणाद् द्रुतम् । तस्या देवानन्दायाश्च गर्भयोर्व्यत्ययो मया ॥ २४ ॥
विमृश्यैवं शतमखः समाहूय झगित्यपि । आदिदेश तथा कर्तुं सेनान्यं नैगमेषिणम् ॥ २५ ॥
विदधे नैगमेषी च तथैव स्वामिशासनम् । देवानन्दात्रिशलयोर्गर्भव्यत्ययलक्षणम् ॥ २६ ॥
देवानन्दा ब्राह्मणी सा शयिता पूर्ववीक्षितान् । मुखान्निःसरतोऽद्राक्षीन्महास्वप्नांश्चतुर्दश ॥ २७ ॥
उत्थाय वक्ष आघ्नाना निःश्वासा ज्वरजर्जरा । केनापि जह्रे मे गर्भ इति चुक्रोश सा चिरम् ॥ २८ ॥
कृष्णाश्विनत्रयोदश्यां चन्द्रे हस्तोत्तरास्थिते । स देवस्त्रिशलागर्भे स्वामिनं निभृतं न्यधात् ॥ २९ ॥
गजो वृषो हरिः साभिषेकश्रीः स्रक् शशी रविः । महाध्वजः पूर्णकुंभः पद्मसरः सरित्पतिः ॥ ३० ॥
विमानं रत्नपुंजश्च निर्धूमोऽग्निरिति क्रमात् । ददर्श स्वामिनी स्वप्नान्मुखे प्रविशतस्तदा ॥ ३१ ॥
इन्द्रैः पत्या च तज्ज्ञैश्च तीर्थकृज्जन्मलक्षणे । उदीरिते स्वप्नफले त्रिशला देव्यमोदत ॥ ३२ ॥
दधार त्रिशलादेवी मुदिता गर्भमद्भुतम् । अप्रमत्तं विहरन्ती लीलासदनभूष्वपि ॥ ३३ ॥
गर्भस्थेऽथ प्रभौ शक्राऽऽज्ञया जृंभकनाकिनः । भूयो भूयो निधानानि न्यधुः सिद्धार्थवेश्मनि ॥ ३४ ॥
सर्वं ज्ञातकुलं भूरिधनधान्यादिकर्द्धिभिः । गर्भावतीर्णभगवत्प्रभावाद्वृधेतराम् ॥ ३५ ॥

१–२ नेग° C । २ व्य° C ॥

सिद्धार्थस्यापि नृपतेर्दर्पोद्धरपणताः पुरा । प्रणेमुर्भूभुजोऽभ्येत्य स्वयं प्राभृतपाणयः ॥ ३६ ॥
मयि स्पन्दमानेऽम्ब मातुर्मा वेदना स्म भूत् । इत्यस्थान्निभृतः स्वामी गर्भवासेऽपि योगिवत् ॥ ३७ ॥
स्वामी संवृतसर्वांगव्यापारोऽस्थात्तथोदरे । नालक्ष्यत यथा मात्राप्यन्तस्तिष्ठति वा न वा ॥ ३८ ॥
तदा च त्रिशला दध्यौ किं गर्भो गलितो मम । केनाप्यपहृतः किं वा विनष्टस्तंभितोऽथवा ? ॥ ३९ ॥
यद्येतदपि सञ्जातं तदलं जीवितेन मे । सह्यं हि मृत्युजं दुःखं गर्भभ्रंशभवं न तु ॥ ४० ॥
इत्यार्त्तध्यानभाग्देवी रुदती लुलितालका । त्यक्तांगरागा हस्ताब्जविन्यस्तमुखपंकजा ॥ ४१ ॥
त्यक्ताभरणसंभारा निःश्वासविधुराधरा । सखीष्वपि हि तूष्णीका नाशेत बुभुजे न च ॥ ४२ ॥
तत्तु विज्ञाय सिद्धार्थमहीपतिरखिद्यत् । तत्पुत्रभांडे च नन्दिवर्धनोऽथ सुदर्शना ॥ ४३ ॥
पित्रोर्विज्ञाय तद् दुःखं ज्ञानत्रयधरः प्रभुः । अंगुलिं चालयामास गर्भज्ञापनहेतवे ॥ ४४ ॥
मद्गर्भोऽक्षत एवेति ज्ञात्वा स्वामिन्यमोदत । अमोदयच्च सिद्धार्थं गर्भस्पन्दनशंसनात् ॥ ४५ ॥
अचिन्तयच्च भगवान्मय्यदृष्टेऽपि कोऽप्यहो । मातापित्रोर्महान् स्नेहो जीवतोरनयोर्यदि ॥ ४६ ॥
प्रव्रजिष्याम्यहं स्नेहमोहादेतौ तदा ध्रुवम् । आर्तध्यानगतौ कर्माशुभं बह्वर्जयिष्यतः ॥ ४७ ॥ (युग्मम्)
अथैवं सप्तमे मासि जग्राहाभिग्रहं प्रभुः । उपादास्ये परिव्रज्यां न पित्रोर्जीवतोरहम् ॥ ४८ ॥

अथ दिक्षु प्रसन्नासु स्वोच्चस्थेषु ग्रहेषु च । प्रदक्षिणेऽनुकूले च भूमिसर्पिणि मारुते ॥ ४९ ॥
प्रमोदपूर्णे जगति शकुनेषु जयिष्वलम् । अर्धाष्टमदिनाग्रेषु मासेषु नवसूच्चकैः ॥ ५० ॥
शुक्लचैत्रत्रयोदश्यां चन्द्रे हस्तोत्तरागते । सिंहांकं काञ्चनरुचिं स्वामिनी सुषुवे सुतम् ॥ ५१ ॥
॥ त्रिभिर्विशेषकम् ॥
षट्पञ्चाशद्दिक्कुमार्योऽभ्येत्य भोगंकरादयः । स्वामिनः स्वामिमातुश्च सूतिकर्माणि चक्रिरे ॥ ५२ ॥
शक्रोऽप्यासनकंपेन तत्कालं सपरिच्छदः । विज्ञाय स्वामिनो जन्म सूतिकागृहमाययौ ॥ ५३ ॥
अर्हन्तमर्हदम्बां च दूरतोऽपि प्रणम्य सः । उपसृत्यागतो देव्यांश्चावस्वापनिकां ददौ ॥ ५४ ॥
देव्याः पार्श्वे च भगवत्प्रतिरूपं निधाय सः । विचक्रे पञ्चधाऽऽत्मानमतृप्तो भक्तिकर्मणि ॥ ५५ ॥
एकः शक्रः स्वपाणिभ्यां भगवन्तमुपाददे । उपरि स्वामिनश्छत्रं द्वैतीयीकस्त्वधारयत् ॥ ५६ ॥
स्वामिनः पार्श्वयोर्द्वौ तु बिभ्रतुश्चारुचामरे । वज्रमुल्लालयन्नन्यो नृत्यंश्च पुरतो ययौ ॥ ५७ ॥
गत्वा मेरावतिपांडुकंबलामासदच्छिलाम् । तत्र सिंहासनं भेजे शक्रोऽङ्कारोपितप्रभुः ॥ ५८ ॥
तदा स्नपयितुं नाथं त्रिषष्टिरपरेऽपि हि । एयुरिन्द्रा आभियोग्यैस्तीर्थाऽऽनायितवारयः ॥ ५९ ॥
इयन्तं वारिसंभारं कथं स्वामी सहिष्यते । इत्याशशंके शक्रेण भक्तिकोमलचेतसा ॥ ६० ॥

१ °प्रतो C, D । २ °श्चापस्वा° C, D ।

तदाशङ्कानिरासाय लीलया परमेश्वरः । मेरुशैलं वामपादाऽङ्गुष्ठाग्रेण न्यपीडयत् ॥ ६१ ॥
शिरांसि मेरोरनमन्नमस्कर्तुमिव प्रभुम् । तदन्तिकमिवायातुमचलंश्च कुलाचलाः ॥ ६२ ॥
अतुच्छमुच्छलन्ति स्म सार्द्धं [illegible]र्णवाः । चिचेपे सत्वरं तत्र नर्तनाभिमुखेव भूः ॥ ६३ ॥
किमेतदिति संचिन्त्यावधिज्ञानप्रयोगतः । लीलायितं भगवतो विदाञ्चक्रे बिडौजसा ॥ ६४ ॥
स्वामिन्ननन्यसामान्यं सामान्यो मादृशो जनः । विदांकरोतु माहात्म्यं कथंकारं नवेदृशम् ॥ ६५ ॥
तन्मिथ्यादुष्कृतं भूयाच्चिन्तितं यन्मयान्यथा । इतीन्द्रेण ब्रुवाणेन प्रणेमे परमेश्वरः ॥ ६६ ॥
सानन्दं वादितातोद्यं चक्रे भर्तुः सुरेश्वरैः । तीर्थगन्धोदकैः पुण्यैरभिषेकमहोत्सवः ॥ ६७ ॥
अभिषेकजलं तत्तु सुरासुरनरोरगाः । ववन्दिरे मुहुः सर्वांगीणं च परिचिक्षिपुः ॥ ६८ ॥
प्रभुस्नात्रजलालीढा वन्दनीया मृदप्यभूत् । गुरूणां किल संसर्गाद्गौरवं स्याल्लघोरपि ॥ ६९ ॥
निवेश्येशानानाथांके सौधर्मेन्द्रोऽप्यथ प्रभुम् । स्नपयित्वार्चयित्वाथ कृत्वाऽऽरात्रिकमस्तवीत् ॥ ७० ॥
नमोऽर्हते भगवते स्वयंबुद्धाय वेधसे । तीर्थंकरायादिकृते पुरुषोत्तमाय ते ॥ ७१ ॥
नमो लोकप्रदीपाय लोकप्रद्योतकारिणे । लोकोत्तमाय लोकाधीशाय लोकहिताय ते ॥ ७२ ॥
नमस्ते पुरुषवरपुंडरीकाय शंभवे । पुरुषसिंहाय पुरुषैकगन्धद्विपाय ते ॥ ७३ ॥
चक्षुर्दायाभयदाय बोधिदायाध्वदायिने । धर्मदाय धर्मदेष्ट्रे नमः शरणदायिने ॥ ७४ ॥

धर्मसारथये धर्मनेत्रे धर्मैकचक्रिणे । व्यावृत्तछद्मने सम्यग्ज्ञानदर्शनधारिणे ॥ ७५ ॥
जिनाय ते जापकाय तीर्णाय तारकाय च । विमुक्ताय मोचकाय नमो बुद्धाय बोधिने ॥ ७६ ॥
सर्वज्ञाय नमस्तुभ्यं स्वामिने सर्वदर्शिने । सर्वातिशयपात्राय कर्माष्टकनिसूदिने ॥ ७७ ॥
तुभ्यं क्षेत्राय पात्राय तीर्थाय परमात्मने । स्याद्वादवादिने वीतरागाय मुनये नमः ॥ ७८ ॥
पूज्यानामपि पूज्याय महद्भ्योऽपि महीयसे । आचार्याणामाचार्याय ज्येष्ठानां ज्यायसे नमः ॥ ७९ ॥
नमो विश्वंभुवे तुभ्यं योगिनाथाय योगिने । पावनाय पवित्रायानुत्तरायोत्तराय च ॥ ८० ॥
संप्रक्षालनाय योगाचार्याय प्रवराय च । अग्राय वाचस्पतये [1]मंगल्याय नमोऽस्तुते ॥ ८१ ॥
नमः परस्तादुदितायैकवीराय भास्वते । ॐभूर्भुवःस्वरितिवाक्स्तवनीयाय ते नमः ॥ ८२ ॥
नमः सर्वजनीनाय सर्वार्थायामृताय च । उदितब्रह्मचर्यायाप्ताय [2]पारगताय ते ॥ ८३ ॥
नमस्ते दक्षिणीयाय निर्विकाराय तायिने । वज्रर्षभनाराचवपुषे तत्त्वदृश्वने ॥ ८४ ॥
नमः कालत्रयज्ञाय जिनेन्द्राय स्वयंभुवे । ज्ञानबलवीर्यतेजःशक्त्यैश्वर्यमयाय ते ॥ ८५ ॥
आदिपुंसे नमस्तुभ्यं नमस्ते परमेष्ठिने । नमस्तुभ्यं महेशाय ज्योतिस्तत्त्वाय ते नमः ॥ ८६ ॥
तुभ्यं सिद्धार्थराजेन्द्रकुलक्षीरोदधीन्दवे । महावीराय धीराय त्रिजगत्स्वामिने नमः ॥ ८७ ॥

१ मांग° *M* ॥ २ पारंग° *M* ॥

इति स्तुत्वा गृहीत्वेशं मातुः पार्श्वे निधाय च । संहृत्य तत्प्रतिच्छदमवस्वापनिकामपि ॥ ८८ ॥
निधायोच्छीर्षके क्षौमं कुंडले चोपरि प्रभोः । श्रीदामगंडकं शक्रः कृत्वा चागात्स्वमाश्रयम् ॥ ८९ ॥
( युग्मम् )
तदेन्द्रादिष्टधनदप्रेरिता जृम्भकामराः । ववृषुः स्वर्णमाणिक्यवसुधारा नृपौकसि ॥ ९० ॥
काराभ्योऽमोचयज्जन्तून् सूनोर्जन्मोत्सवे नृपः । अर्हज्जन्म हि मोक्षाय भवभाजां भवादपि ॥ ९१ ॥
तृतीये दिवसे सूनोश्चंद्रमार्तंडबिंबयोः । दर्शनं पितरौ प्रीतौ कारयामासतुः स्वयम् ॥ ९२ ॥
षष्ठेऽह्न्यविधवाभिः कलमंगलगीतिभिः । सकुंकुमांगरागाभिरनल्पाकल्पचारुभिः ॥ ९३ ॥
कंठालंबितमाल्याभिः कुलस्त्रीभिरनेकशः । राजा राज्ञी चाकृषातां रात्रिजागरणोत्सवम् ॥ ९४ ॥
(युग्मम्)
सिद्धार्थत्रिशलादेव्यौ प्राप्त एकादशे दिने । निवर्तयामासतुश्च जातकर्ममहोत्सवम् ॥ ९५ ॥
दिने तु द्वादशे राजा सिद्धार्थः सिद्धवांछितः । आजूहवत्समस्तान्स्वाञ्ज्ञातिसंबन्धिबान्धवान् ॥ ९६ ॥
[1]मंगलोपायनकरान् सचक्रे तान्महीपतिः । यथोचितप्रतिदानव्यवहारपरो हि सः ॥ ९७ ॥
सिद्धार्थस्तानुवाचैवं गर्भस्थेऽस्मिन् सुते मम । गृहे पुरे मंडले च व्यवर्धिष्ट धनादिकम् ॥ ९८ ॥

१ मांगल्यो° M. ॥

वर्धमान इत्यभिख्या सूनोरस्य तदस्तु भोः । प्रत्यभाषि प्रमुदितैरेवमस्त्विति तैरपि ॥ ९९ ॥ (युग्मम्)
महोपसर्गैरप्येष न कम्प्य इति वज्रिणा । महावीर इत्यपरं नाम चक्रे जगत्पतेः ॥ १०० ॥
सोऽहंपूर्विकया भक्तैः सेव्यमानः सुरासुरैः । दृशा पीयूषवर्षिण्या सिञ्चन्निव वसुन्धराम् ॥ १०१ ॥
अष्टोत्तरसहस्रेण लक्षणैरुपलक्षितः । निसर्गेण गुणैर्वृद्धो वयसा ववृधे क्रमात् ॥ १०२ ॥
राजपुत्रैः सवयोभिः समं न्यूनाष्टवत्सरः । वयोऽनुरूपक्रीडाभिः सोऽन्यदा क्रीडितुं ययौ ॥ १०३ ॥
तदा ज्ञात्वाऽवधिज्ञानान्मध्येसुरसभं हरिः । धीरा अनु महावीरमिति वीरमवर्णयत् ॥ १०४ ॥
क्षोभयिष्यामि तं वीरमेषोऽहमिति मत्सरी । आजगामामरः कोऽपि यत्र क्रीडन्नभूद्विभुः ॥ १०५ ॥
कुर्वत्यामलकीं क्रीडां राजपुत्रैः सह प्रभौ । सोऽधस्तस्थौ विटपिनो भुजगीभूय मायया ॥ १०६ ॥
तत्कालं राजपुत्रेषु वित्रस्तेषु दिशो दिशि । स्मित्वा रज्जुमिवोत्क्षिप्य तं चिक्षेप क्षितौ विभुः ॥ १०७ ॥
सव्रीडाः क्रीडितुं तत्र कुमाराः पुनराययुः । कुमारीभूय सोऽप्यागात् सर्वेऽप्यारुरुहुस्तरुम् ॥ १०८ ॥
पादपाग्रं कुमारेभ्यः प्राप प्रथमतः प्रभुः । यद्वा कियदिदं तस्य यो लोकाग्रं गमिष्यति ॥ १०९ ॥
शुशुभे भगवांस्तत्र मेरुशृंग इवार्यमा । लम्बमाना बभुः शाखास्वन्ये शाखामृगा इव ॥ ११० ॥
जिग्ये भगवता तत्र कृतश्चासीदयं पणः । जयेद्य इह स स्वन्यान् पृष्ठमारुह्य वाहयेत् ॥ १११ ॥
आरुह्यावाहयद्वाहानिव वीरः कुमारकान् । आरुरोह सुरस्यापि पृष्ठं षष्ठो महौजसाम् ॥ ११२ ॥

ततः करालं वेतालरूपमाधाय दुष्टधीः । भूधरानप्यधरयन् प्रारब्धो वर्धितुं सुरः ॥ ११३ ॥
पातालकल्पे तस्यास्ये जिह्वा तक्षकाधिपवत् । पिंगैस्तुंगे शिरःशैले केशैर्दावानलायितम् ॥ ११४ ॥
तस्यातिदारुणे दंष्ट्रे अभूतां क्रकचाकृती । जाज्वल्यमाने अङ्गारशकट्याविव लोचने ॥ ११५ ॥
घोणारंध्रे महाघोरे महीधरगुहे इव । भ्रुकुटीभंगुरे भीमे महोरग्याविव भ्रुवौ ॥ ११६ ॥
स व्यरंसीद्वर्धनान्न यावत्तावन्महौजसा । आहत्य मुष्टिना पृष्ठे स्वामिना वामनीकृतः ॥ ११७ ॥
एवं च भगवद्धैर्यं साक्षात्कृत्येन्द्रवर्णितम् । प्रभुं नत्वाऽऽत्मरूपेण निजं धाम जगाम सः ॥ ११८ ॥
पित्रा साग्राष्टवर्षस्यारब्धेऽध्यापने प्रभोः । सिंहासनं क्षणेनापि कम्पते स्म बिडौजसः ॥ ११९ ॥
अवधिज्ञानतो ज्ञात्वा पित्रोरार्जवमद्भुतम् । आः सर्वज्ञस्य शिष्यत्वमितीन्द्रस्तमुपास्थितः ॥ १२० ॥
उपाध्यायासने तस्मिन् वासवेनोपवेशितः । प्रणम्य प्रार्थितः स्वामी शब्दपारायणं जगौ ॥ १२१ ॥
इदं भगवतेन्द्राय प्रोक्तं शब्दानुशासनम् । उपाध्यायेन तच्छ्रुत्वा लोकेष्वैन्द्रमितीरितम् ॥ १२२ ॥
सप्तहस्तोच्छ्रितवपुः क्रमात्प्राप च यौवनम् । वनद्विप इव स्वामी लीलागमनभूषणः ॥ १२३ ॥
रूपं जगत्त्रयोत्कृष्टं प्रभुत्वं त्रिजगत्यपि । यौवनं च नवं भर्तुर्विकारोऽभूत्तथापि न ॥ १२४ ॥
राजा समरवीरोऽथ यशोदां कन्यकां निजाम् । प्रदातुं वर्धमानाय प्राहिणोन्मंत्रिभिः सह ॥ १२५ ॥

१ °स्थित M ॥

ते मंत्रिणोऽथ सिद्धार्थं नत्वोचुर्नः क्षमापतिः । प्रदातुं वर्धमानाय यशोदां प्राहिणोत्सुताम् ॥ १२६ ॥
अग्रेऽपि भवतो भृत्योऽस्मत्स्वामी स विशेषतः । सम्बन्धेनामुना भूयात् प्रसीदानुगृहाण नः ॥ १२७ ॥
ऊचे सिद्धार्थराजोऽपि त्रिशलाया ममापि च । मनोरथो भृशमस्ति कुमारोद्वाहलक्षणः ॥ १२८ ॥
परं कुमारः संसारविरक्तो जन्मतोऽपि हि । न शक्यते वक्तुमपि विवाहादिप्रयोजने ॥ १२९ ॥
तथापि ह्युपरोधाद्वस्तत्तद्वचनभंगिभिः । ब्रूमस्तन्मित्रमुखेन विवाहायाद्य नन्दनम् ॥ १३० ॥
इत्युक्त्वा त्रिशलादेवीमापृच्छ्य च महीपतिः । प्रैषीदुपवर्धमानं तद्वयस्यान् महामतीन् ॥ १३१ ॥
तेऽपि गत्वा सविनयं नमस्कृत्याचचक्षिरे । वर्धमानकुमाराय सिद्धार्थनृपशासनम् ॥ १३२ ॥
भगवानप्युवाचैवं यूयं मदनुगा अपि । मम भावं न जानीथ गृहवासपराङ्मुखम् ॥ १३३ ॥
तेऽप्यूचुस्त्वां भवोद्विग्नं मन्महे सर्वदापि हि । आज्ञा पित्रोरलंघ्या ते विघ्नः परमदोऽपि च ॥ १३४ ॥
किं च नः प्रणययाञ्चां कदाचिन्नावमन्यसे । कथमेकपदे सर्वानस्मानद्यावमन्यसे ॥ १३५ ॥
अथो बभाषे भगवान्मूढाः को वोऽयमादरः । परिग्रहो हि दारादेर्भवभ्रमणकारणम् ॥ १३६ ॥
मा स्म भूज्जीवतोर्दुःखं मत्पित्रोर्मद्वियोगजम् । इति हेतोर्नाधुनैव प्रव्रजाम्युत्सुकोऽपि हि ॥ १३७ ॥
एवं प्रभौ भाषमाणे विवाहाय नृपाज्ञया । स्वामिनी त्रिशलादेवी स्वयं तत्र समाययौ ॥ १३८ ॥

१ इति *D. M.* ॥ २ तु *D. M.* ॥

अभ्युत्तस्थौ जगन्नाथो गौरवेण स्वमातरम् । रत्नसिंहासने चोच्चैरासयित्वेत्युवाच च ॥ १३९ ॥
दिष्ट्या मातस्त्वमायासीः किमागमनकारणम् ? । आहूतोऽप्यहमायामि सद्यो युष्माकमाज्ञया ॥ १४० ॥
उवाच त्रिशलादेवी सदने नस्त्वमागमः । अस्मत्पुण्यैर्न खल्वल्पैरनल्पोदयकारणम् ॥ १४१ ॥
भवन्तं वीक्षमाणानां न तृप्तिर्जगतामपि । त्वद्दर्शनमहाद्रव्यलब्धानां किमङ्ग नः ॥ १४२ ॥
जानीमश्च सदैवेदमस्माकमनुकम्पया । भववासविरक्तोऽपि गृहवासेऽत्र तिष्ठसि ॥ १४३ ॥
अकार्षीर्दुष्करमिदं स्वमनोवृत्तिबाधया । एतावता न तृप्यामो वयं ते विनयालय ! ॥ १४४ ॥
वधूयुक्तं यथाद्य त्वां पश्यामस्त्वं तथा कुरु । राजपुत्रीं यशोदाख्यां समायातां समुद्वह ॥ १४५ ॥
उत्कंठितस्ते पितापि त्वद्विवाहोत्सवेक्षणे । कुरुष्व दुष्करमदोऽप्यावयोरुपरोधतः ॥ १४६ ॥
भगवानप्यथो दध्यौ किमापतितमद्य मे । सांप्रतं यमितो माता भवभ्रमणभीरितः ॥ १४७ ॥
गर्भेऽपि संवृताङ्गोऽस्थां मातृदुःखाभिशंकया । स्थास्यामि गृहवासेऽपि तन्मनोवृत्तिबाधया ॥ १४८ ॥
कर्म भोगफलं चास्ति मान्यौ च पितरौ मम । एवं विचिन्त्य भगवांस्तन्मेने मातृशासनम् ॥ १४९ ॥
गत्वा च त्रिशलादेवी स्वयं सिद्धार्थभूभुजे । विवाहानुमतिं सूनोराचचक्षे प्रमोदभाक् ॥ १५० ॥
पुण्येऽहनि महीनाथो जन्मोत्सवसमोत्सवम् । विवाहं कारयामास महावीरयशोदयोः ॥ १५१ ॥

१ स्वम° *C.* ॥ २ °वृत्त्यबा° *D* ॥

त्रिशलासिद्धार्थराजौ तत्पश्यन्तौ वधूवरम् । धन्यंमन्यौ मुमुदाते पीतामृतरसाविव ॥ १५२ ॥
समं यशोदया देव्या स्वामी वैषयिकं सुखम् । अनासक्तोऽनुबभूव पित्रोर्नेत्रनिशाकरः ॥ १५३ ॥
कालेन गच्छता भर्तुर्यशोदायामजायत । नामतो रूपतश्चापि दुहिता प्रियदर्शना ॥ १५४ ॥
महाकुलो राजपुत्रो महर्द्धिर्नवयौवनः । जमालिः परिणिनायोद्यौवनां प्रियदर्शनाम् ॥ १५५ ॥
अष्टाविंशे जन्मतोऽब्दे स्वामिनः पितरावथ । विहितानशनौ मृत्वा जग्मतुः कल्पमच्युतम् ॥ १५६ ॥
सिद्धार्थराजत्रिशलाजीवावच्युतमच्युतौ । षष्ठेऽपरविदेहाख्ये यास्यतः पदमव्ययम् ॥ १५७ ॥
पित्रोः कृतेऽङ्गसंस्कारे तत्रातीते च वासरे । सान्तःपुरं शोकमग्नं[1] स्वाम्यूचे नन्दिवर्धनम् ॥ १५८ ॥
सदा सन्निहितो मृत्युर्जीवितं नश्वरं सदा । उपस्थिते [2]वास्तवेऽस्मिन्न हि शोकः प्रतिक्रिया ॥ १५९ ॥
धैर्यालंबनपूर्वं च धर्मानुष्ठानमेव हि । युज्यते न तु शोकादि भ्रातः ! कापुरुषोचितम् ॥ १६० ॥
स्वामिना बोधितश्चैवं स्वस्थोऽभून्नन्दिवर्धनः । पित्र्यं राज्यमलंकर्तुं सोऽभ्यर्थयत च प्रभुम् ॥ १६१ ॥
पित्र्यं राज्यं यदा वीरो भवोद्विग्नो न शिश्रिये । राजा चक्रे तदाऽमात्यैः साग्रहैर्नन्दिवर्धनः ॥ १६२ ॥
चिरेप्सितपरिव्रज्याग्रहणायाथ सादरः । आपप्रच्छे महावीरो भ्रातरं नन्दिवर्धनम् ॥ १६३ ॥
शोकस्खलितवाग्नन्दिवर्धनोऽप्यभ्यधादिति । अद्यापि पितरौ भ्रातर्गच्छतो विस्मृतिं न हि ॥ १६४ ॥

१ °मग्नं *D* ॥ २ वासरे *M* ॥

सर्वोऽप्यहमिवाद्यापि स्वजनः शोकपूरितः । क्षते क्षारं निक्षिपसि स्ववियोगेन किं मयि ॥ १६५ ॥
एवं च ज्यायसो भ्रातुः सशोकस्योपरोधतः । जगत्पतिर्भावयतिरलंकारैरलंकृतः ॥ १६६ ॥
कायोत्सर्गधरो नित्यं ब्रह्मचर्यपरायणः । स्नानांगरागरहितो विशुद्धध्यानतत्परः ॥ १६७ ॥
एषणीयप्रासुकान्नप्राणवृत्तिर्महामनाः । वर्षमेकं कथमपि गृहवासेऽत्यवाहयत् ॥ १६८ ॥
तीर्थं प्रवर्तयेत्युक्तस्ततो लोकान्तिकामरैः । यथाकामितमर्थिभ्यो दानं स्वाम्याब्दिकं ददौ ॥ १६९ ॥
देवैः शक्रादिभिर्नन्दिवर्धनाद्यैश्च पार्थिवैः । दीक्षाभिषेको विदधे श्रीवीरस्य यथाविधि ॥ १७० ॥
भ्रातुर्विरहदुःखेन राहुणेन्दुरिवाकुलः । स्वानादिदेशेति तदा कथंचिन्नन्दिवर्धनः ॥ १७१ ॥
सुवर्णवेदिकास्तंभां सुसदास्थानिकामिव । संतारकामिव दिवं मुक्तास्वस्तिकलाञ्छिताम् ॥ १७२ ॥
स्वर्णसिंहासनगर्भां सार्कां मेरुतटीमिव । प्रक्वणत्किंकिणीमालां पालकस्यानुजामिव ॥ १७३ ॥
समुच्छलद्ध्वजपटां गंगामिव महोर्मिकाम् । पञ्चाशद्धनुरायामां षट्त्रिंशद्धनुरुन्नताम् ॥ १७४ ॥
पञ्चाग्रविंशतिधनुर्विस्तृतां शिबिकोत्तमाम् । चन्द्रप्रभाख्यां कुर्वन्तु श्रीवीरस्यासनोचिताम् ॥ १७५ ॥
॥ चतुर्भिः कलापकम् ॥
त्वरितं कारयामासुः शिबिकां तां तथैव ते । राज्ञां हि वचसाऽर्थः स्यान्मनसा सुसदामिव ॥ १७६ ॥

१ °कामीनम्° *C* ॥ २ सतारि° *L, M* ॥

तादृशीमेव शिबिकां तदा शक्रोऽप्यकारयत् । युग्मजाते इवाऽभातां यथोभे तुल्यया श्रिया ॥ १७७ ॥
प्रथमायां शिबिकायां द्वितीयशिबिका तदा । देवशक्त्यान्तर्बभूव नद्यामिव नदी क्षणात् ॥ १७८ ॥
ततः प्रदक्षिणीकृत्य शिबिकामधिरुह्य च । सिंहासनमलंचक्रे सांह्रिपीठं जगत्प्रभुः ॥ १७९ ॥
मंगल्यश्वेतवसनः सचन्द्रिक इवोडुपः । विभुर्बभौ भूषणैश्च कल्पद्रुम इवापरः ॥ १८० ॥
प्रभौ प्राङ्मुखमासीने शुचीभूताः सुवाससः । विचित्ररत्नालंकाराः सर्वा दक्षिणपार्श्वगाः ॥ १८१ ॥
प्रालंबैः शालिन इव शोभिता हस्तशाटकैः । निषेदुरेकमनसस्तदा कुलमहत्तराः ॥ १८२ ॥ (युग्मम्)
बभार मुक्तालंकारा विमलांशुकभृद्विभोः । मूर्धन्येकाङ्गना छत्रं ज्योत्स्नेव रजनीकरम् ॥ १८३ ॥
धारयामासतुर्द्वे तु पार्श्वयोश्चारुचामरौ । सर्वांगहेमाभरणे मेरुतट्याविवोडुपौ ॥ १८४ ॥
तस्थौ वायव्यदिश्येका रूप्यभृंगारपाणिका । दिशि दक्षिणपूर्वस्यां तालवृन्तधराऽपरा ॥ १८५ ॥
पृष्ठे वैडूर्यदंडानि पांडुच्छत्राण्यधारयन् । अष्टाग्रसहस्रस्वर्णशलाकान्यमरेश्वराः ॥ १८६ ॥
पार्श्वयोः शिबिकायास्तु सौधर्मेशानवासवौ । तोरणस्तंभसदृशौ तस्थतुर्धुतचामरौ ॥ १८७ ॥
सहस्रवाह्यामुदक्षुः शिबिकामादितो नराः । ततः शक्रेशानबलिचमराद्या दिवौकसः ॥ १८८ ॥
दक्षिणेनोपरिष्टात्तु शिबिकां शक्र आददे । उपरिष्टादुत्तरेण त्वीशानाधिपतिः स्वयम् ॥ १८९ ॥

१ ते तुल्ये तु° *M* ॥ २ ज्योत्स्नीव *C*, *L* ॥ ३ भरणै *L* ॥ ४ °तट्याविवो° *C*, *L* ॥

दधतुश्चमरवली दक्षिणोत्तरयोरधः। अन्ये भुवनपत्याद्या दध्रिरे तु यथोचितम् ॥ १९० ॥
तदानीं गच्छदागच्छद्दैवैरजनि संकुलम्। दिनान्ते पक्षिभिरिवान्तरिक्षमधिकत्वरैः ॥ १९१ ॥
तया शिबिकया स्वामी त्रिदशैरुह्यमानया। ज्ञातखंडवनं नाम ययावुपवनोत्तमम् ॥ १९२ ॥
प्रियस्येव हिमर्तोरागमे कोरकच्छलात्। रोमाञ्चिताङ्गीभिरिव लवलीभिर्मनोरमम् ॥ १९३ ॥
कुसुंभरक्तवासोभिरिव न्यस्तैर्वनश्रिया। नागरङ्गवनैः पक्वफलमालिभिरंकितम् ॥ १९४ ॥
कृष्णेक्षूणां मिथः पत्राश्लेषसांराविणैः सदा। पथिकानाह्वयदिव तदुद्यानं विवेश सः ॥ १९५ ॥

॥ त्रिभिर्विशेषकम् ॥

शिबिकायाः समुत्तीर्य भूषणान्यत्यजत्प्रभुः। देवदूष्यं देवराजः स्कन्धे च निदधे प्रभोः ॥ १९६ ॥
मुष्टिभिः पञ्चभिः केशानुद्दध्रे त्रिजगद्गुरुः। प्रतीक्ष्य दूष्ये तान् शक्रश्चिक्षेप क्षीरनीरधौ ॥ १९७ ॥
तेनागत्य निषिद्धेऽथ तुमुले त्रिजगत्प्रभुः। कृत्वा सिद्धनमस्कारं चारित्रं प्रत्यपद्यत ॥ १९८ ॥

---

१ प्रतीष्य *L* ॥

वर्षांस्त्रिंशति जन्मतोऽथ समतीतायां सहे मासि च ।
श्यामायां दशमीतिथौ हिमकरे हस्तोत्तरासु स्थिते ॥
यामेऽह्नश्चरमे तु षष्ठतपसः साक्षात्त्रिलोक्याः प्रभो ।
श्चारित्रेण समं तदा समभवज्ज्ञानं मनःपर्ययम् ॥ १९९ ॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये दशमपर्वणि श्रीमहावीरजन्मप्रव्रज्यावर्णनो नाम द्वितीयः सर्गः ॥



## ॥ अथ तृतीयः सर्गः ॥

* * *

ततश्च त्रिजगन्नाथः सोदर्यं नन्दिवर्धनम् । आपप्रच्छेऽन्यतो गन्तुं ज्ञातवंश्यान् परानपि ॥ १ ॥
चारित्ररथमारूढं विहारप्रस्थितं प्रभुम् । वृद्धः पितृसुहृद्विप्रः सोमो नत्वेत्यभाषत ॥ २ ॥
स्वामिन् ! संवत्सरदानमदाः स्वान्यानपेक्षया । अदरिद्रं जगज्जज्ञे विना मां मन्दभाग्यकम् ॥ ३ ॥
अहं हि जन्मतो नाथ ! महादारिद्र्यविद्रुतः । परान् प्रार्थयितुं ग्रामाद् ग्रामं भ्राम्याम्यहर्निशम् ॥ ४ ॥
सहे निर्भर्त्सनं क्वापि ग्रीवायां ग्रहणं क्वचित् । क्वचिदप्युत्तरादानं मुखमोटनकं क्वचित् ॥ ५ ॥
धनाशया तदाप्युच्चैर्बहिर्भ्रमत एव मे । अजानतो वात्सरिकं त्वद्दानं निष्फलं गतम् ॥ ६ ॥
संप्रत्यपि कृपां कुर्वन् जगन्नाथ ! प्रयच्छ मे । निर्भर्त्स्य प्रेषितः पत्न्या स्वामिन्नस्मि त्वदन्तिके ॥ ७ ॥
स्वाम्यप्युवाच कारुण्यात्त्यक्तसंगोऽस्मि संप्रति । तथाप्यंसस्थितस्यास्य वाससोऽर्धं गृहाण भोः ! ॥ ८ ॥
सोऽपि वासोऽर्धमादाय हृष्टो निजगृहं ययौ । दशाबन्धकृते तुन्नवायस्यादर्शयच्च तत् ॥ ९ ॥

१ "इतश्च L. ॥

त्वया क्वेदं प्राप्तमिति तुन्नवायेन भाषितः । शशंस श्रीमहावीरादवाप्तमिति स द्विजः ॥ १० ॥
सभाषे तुन्नवायस्तं द्वितीयमपि वाससः । अस्यार्धमानय मुनेस्तस्यानुपदमभ्यद ॥ ११ ॥
मुनेः पर्यटनस्तस्य लगित्वा कंटकादिषु । तत्पतिष्यति वासोऽर्धं सोऽमीहो न ग्रहीष्यति ॥ १२ ॥
तदादायाऽऽनयेस्त्वं योजयित्वा दले उभे । अहं पूर्णीकरिष्यामि शुक्लपक्ष इवोडुपम् ॥ १३ ॥
दीनारलक्षं मूल्येऽस्य भविष्यति विभज्य तत् । अर्धमर्धं ग्रहीष्यावो भ्रातरौ सोदराविव ॥ १४ ॥
आमेत्युक्त्वा प्रभुमगात् स द्विजः प्रभुरप्यथ । ईर्यासमितिमान् सायं कूर्मारग्राममासदत् ॥ १५ ॥
नासाग्रन्यस्तनयनः प्रलम्बितभुजद्वयः । प्रभुः †प्रतिमया तत्र तस्थौ स्थाणुरिव स्थिरः ॥ १६ ॥
तदा च गोपः कोऽप्येको वाहयित्वा दिनं वृषान् । ग्रामसीमन्युपस्वामि प्राप्त एवमचिन्तयत् ॥ १७ ॥
अत्रैव मे चरन्त्वेते वृषभा ग्रामसीमनि । अहं करिष्ये ग्रामान्तर्गत्वा दोहं पुनर्गवाम् ॥ १८ ॥
ध्यात्वैवं सोऽविशद् ग्रामं चरन्तस्तद्वृषाः पुनः । अटवीं विविशुर्गोपं विना तिष्ठन्ति ते न हि ॥ १९ ॥
स ग्रामात्त्वागतो गोपो मम क्व वृषभा इति । पप्रच्छ स्वामिनं स्वाम्यप्यवोचन्न हि किंचन ॥ २० ॥
तूष्णीके तु प्रभो नैष किंचिद्वेत्तीति चिन्तयन् । उक्ष्णो मृगयमाणः स्वान् गोपोऽतीयाय तां निशाम् । २१

टि.– † कायोत्सर्गेण ।

तृतीयः सर्गः

॥४२॥

भ्रान्त्वा तेऽपि बलीवर्दाः पुनरेयुरुपप्रभु । निषद्य तस्थू रोमन्थायमानाः स्वस्थचेतसः ॥ २२ ॥
भ्रान्त्वा सोऽप्यागतो गोपो वृषान् दृष्ट्वेत्यचिन्तयत् । प्रभाते नेतुकामेन नूनं गावोऽमुना हृताः ॥ २३ ॥
एवं विचिन्त्य रभसा समुत्पाट्य च दामनीम् । प्रभुं हन्तुमधाविष्ट सकोपो गोपपांसनः ॥ २४ ॥
तदा चाचिन्तयच्छक्रः किं स्वामी प्रथमेऽहनि । विदधातीत्यथाऽपश्यत्तं गोपं हन्तुमुद्यतम् ॥ २५ ॥
स्तम्भयित्वाथ तं शक्र[illegible]जयत् । किं नाथं वेत्सि रे पाप ! सिद्धार्थनृपनन्दनम् ॥ २६ ॥
ततः प्रदक्षिणीकृत्य त्रिर्मूर्ध्ना प्रणिपत्य च । इति विज्ञपयाञ्चक्रे प्रभुः प्राचीनबर्हिषा ॥ २७ ॥
भविष्यति द्वादशाब्दान्युपसर्गपरंपरा । तां निषेधितुमिच्छामि भूत्वाऽहं पारिपार्श्वकः ॥ २८ ॥
*समाधिं पारयित्वेन्द्रं भगवानूचिवानिति । नापेक्षांचक्रिरेऽर्हन्तः परसाहाय्यकं क्वचित् ॥ २९ ॥
नैतद् भूतं भवति वा भविष्यति च जातुचित् । यदर्हन्तोऽन्यसाहाय्यादर्जयन्ति हि केवलम् ॥ ३० ॥
केवलं केवलज्ञानं प्राप्नुवन्ति स्ववीर्यतः । स्ववीर्येणैव गच्छन्ति जिनेन्द्राः परमं पदम् ॥ ३१ ॥
बालेन तपसोत्पन्नं व्यन्तरेषु तदामरम् । नाथस्य मातृष्वस्त्रीयं सिद्धार्थं मघवाऽऽदिशत् ॥ ३२ ॥
विदधात्युपसर्गं यः स्वामिनो मारणान्तिकम् । प्रतिषेध्यः स भवता स्वामिनः पार्श्ववर्तिना ॥ ३३ ॥

१ सुस्थचे° *C, L* ॥ २ °शयिकं *D, M* ॥ ३ °णात्मकम् *D, M* ॥

टि.—*कायोत्सर्गम् ।

इत्युक्त्वाऽगाद्धरिस्तस्थौ सिद्धार्थः प्रतिपद्य तत् । स्वामी षष्ठपारणाय कोल्लाकेऽगान्निवेशने ॥ ३४ ॥ 
तत्र द्विजातेर्बहुलाभिधस्य सदने प्रभुः । चक्रे [illegible]मिश्रेण परमान्नेन पारणम् ॥ ३५ ॥
वसुधाराप्रभृतीनि द्विजातेस्तस्य सद्मनि । पञ्च दिव्यान्याविरासन् कृतानि दिविषद्गणैः ॥ ३६ ॥
ततो जगद्गुरुः शीतलेश्यः शीतमयूखवत् । तपस्तेजोदुरालोकोऽधिपतिस्तेजसामिव ॥ ३७ ॥
शौण्डीर्यवान् गज इव सुमेरुरिव निश्चलः । सर्वस्पर्शसहिष्णुश्च यथैव हि वसुन्धरा ॥ ३८ ॥
अम्भोधिरिव गंभीरो मृगेन्द्र इव निर्भयः । मिथ्यादृशां दुरालोकः सुहुतो हव्यवाडिव ॥ ३९ ॥
खड्गिशृंगमिवैकाकी जातस्थामा महोक्षवत् । गुप्तेन्द्रियः कूर्म इवाहिरिवैकान्तदत्तदृक् ॥ ४० ॥
निरञ्जनः शंख इव जातरूपः सुवर्णवत् । विप्रमुक्तः खग इव जीव इवास्खलद्गतिः ॥ ४१ ॥
[2]भारंड इवाप्रमत्तो व्योमेव च निराश्रयः । अंभोजिनीदलमिवोपलेपपरिवर्जितः ॥ ४२ ॥
शत्रौ मित्रे तृणे *स्त्रैणे स्वर्णेऽश्मनि मणौ मृदि । इहाऽमुत्र सुखे दुःखे भवे मोक्षे समाशयः ॥ ४३ ॥
निष्कारणैककारुण्यपरायणमनस्तथा । मज्जद्भवोदधौ मुग्धमुद्दिधीर्षुरिदं जगत् ॥ ४४ ॥
प्रभुः प्रभञ्जन इवाऽप्रतिबद्धोऽब्धिमेखलाम् । नानाग्रामपुरारण्यां विजहार वसुन्धराम् ॥ ४५ ॥

॥ नवभिः कुलकम् ॥

१ °तादिमि L, M ॥ २ भारुण्ड C ॥

टि.- *स्त्रीसमूहे ।

दीक्षाक्षणे च यच्चक्रे विभोर्देवैर्विलेपनम् । भृंगास्तत्सौरभाकृष्टास्तमागत्योपदुद्रुवुः ॥ ४६ ॥
गन्धयुक्तिमयाचन्त ग्रामीणतरुणाः प्रभुम् । अंगसंगं तरुण्यस्तु स्मरज्वरभरौषधम् ॥ ४७ ॥
दीक्षादिनात् प्रभृत्येवं साग्रं मासचतुष्टयम् । उपसर्गाञ्जगन्नाथः सेहे गिरिरिव स्थिरः ॥ ४८
अन्यदा विहरन् स्वामी मोराके सन्निवेशने । ययौ दूइज्जन्तका[1]ख्यतापसव्रातसंकुले ॥ ४९ ॥
पितुर्मित्रं कुलपतिस्तत्र नाथमुपा[2]स्थितः । पूर्वाभ्यासात् स्वामिनाऽपि तस्मिन् बाहुः प्रसारितः ॥ ५० ॥
प्रार्थितः कुलपतिना तत्रैकामवसन्निशाम् । प्रतिमयैकरात्रिक्या श्रीमान् सिद्धार्थनन्दनः ॥ ५१ ॥
विजिहीर्षुं भगवन्तमूचे कुलपतिः प्रगे । वर्षाकालस्त्वया कार्यो विविक्तवसताविह ॥ ५२ ॥
नीरागोऽपि वचस्तस्य ‡प्रतिश्रुत्योपरोधतः । निरञ्जनः शंख इव प्रययौ प्रभुरन्यतः ॥ ५३ ॥
वायुरिवाप्रतिबद्धो निर्लेपः पद्मपत्रवत् । सर्वत्र विहरन् ग्रीष्मकालं स्वाम्यत्यवाहयत् ॥ ५४ ॥
सिद्धार्थसुहृदस्तस्य स्मरन् कुलपतेर्वचः । स्वामी प्रावृषमत्येतुं मोराकं पुनरभ्यगात् ॥ ५५ ॥
वर्षत्युद्गर्जितं मेघे स्थूलधारागृहोपमे । स्वस्वस्थानाय गच्छत्सु पथिकेष्वपि हंसवत् ॥ ५६ ॥
प्रभोर्भ्रातृव्यनास्नेहसम्बन्धमधुराशयः । गृहमेकं कुलपतिस्तृणाच्छादितमार्पयत् ॥ ५७ ॥ (युग्मम्)

१ °न्ते M ॥ २ °पास्थित C ॥ °परिस्थितः D ॥ ३ उत्लंबा° M ॥

टि.— ‡ अंगीकृत्य ॥

आजानुलम्बितभुजो जटावानिव पादपः । नियंत्रितमनास्तत्र तस्थौ प्रतिमया प्रभुः ॥ ५८ ॥
भीष्मग्रीष्मर्तुमाहात्म्यान्निःशेषिततृणे वने । अनुच्छूनतृणे नवत्वात्प्रावृषोऽपि च ॥ ५९ ॥
अधावन् खादितुं गावस्तापसानां तृणोटजान् । निर्दयास्तापसास्ते[1] गास्ता यष्टिभिरताडयन् ॥ ६० ॥
( युग्मम् )
तैस्ताड्यमाना गावस्तास्तृणौकः स्वाम्यधिष्ठितम् । चखादुः स्तंभनिभृते प्रभौ तासां कुतो हि भीः ॥६१॥
तापसा अपि तत्प्रेक्ष्याऽक्रुध्यन्नेवं प्रभुं प्रति । रक्षामो वयमुटजान् स्वं न रक्षत्यसौ पुनः ॥ ६२ ॥
अहो कुलपतेः कोऽयमतिथिर्यस्य पश्यतः । चखादुर्गाव उटजमहो स्वार्थैकनिष्ठता ॥ ६३ ॥
किं कुर्महे स्व आत्मेव प्रियः कुलपतेरयम् । तद्भयादेव परुषं न वक्तुमिह शक्यते ॥ ६४ ॥
तापसास्तेऽन्यदा नाथ प्ररूढप्रौढमत्सराः । गत्वा कुलपतेः पार्श्वे सोपालंभमदोऽवदन् ॥ ६५ ॥
आश्रमे श्रमणः कोऽयमानीतो निर्ममस्त्वया । उटजस्यापि नाशोऽभूद्यदस्मिन्निह तस्थुषि ॥ ६६ ॥
अकृतज्ञ उदासीनो निर्दाक्षिण्योऽलसश्च सः । गोभ्योऽपि रक्षति न यः खाद्यमानं स्वमाश्रमम् ॥ ६७ ॥
मुनिंमन्योऽथवा नैष गा रक्षति समत्वभृत् । गुरुदेवार्चकास्तत्किं वयं न मुनयो मुने ! ॥ ६८ ॥
ततः कुलपतिरगात्तदुपनाथं ददर्श च । कृत्तपक्षं खगमिव छदिवर्जितमाश्रमम् ॥ ६९ ॥

१ °स्तेऽपि स्ता य° L ॥

निर्मत्सराः सत्यगिरस्तापसा इति चिन्तयन् । स नाथमूचे किं तात ! त्रातोऽयं नोटजस्त्वया ? ॥ ७० ॥
त्वत्पित्रा रक्षिताः सर्वे यावज्जीवं किलाश्रमाः । दुष्टशासनरूपं हि तवापि व्रतमर्हति ॥ ७१ ॥
आत्मानमिव रक्षन्ति स्वनीडं नीडजा अपि । विवेकिना त्वया हन्त किमाश्रम उपेक्षितः ? ॥ ७२ ॥
स्वविवेकोचितां शिक्षां स दत्त्वा जीर्णतापसः । स्वमाश्रमं ययौ भूयः स्मरन् सिद्धार्थसौहृदम् ॥ ७३ ॥
दध्यौ चैवं विभुरेषामप्रीतिर्मन्निबन्धना । तदत्र स्थातुमुचितं न मे सर्वहितैषिणः ॥ ७४ ॥
एवं च चिन्तयन् स्वामी वैराग्यमधिकं दधत् । अभिग्रहानिमान् पञ्च जग्राह करुणानिधिः ॥ ७५ ॥
नैवाऽप्रीतिमतो गेहे वसनीयं कदाचन । स्थातव्यं च शरीरेण कायोत्सर्गजुषा सदा ॥ ७६ ॥
स्थेयं मौनेन च प्रायो भोक्तव्यं पाणिभाजने । गृहस्थस्य च विनयो न कार्य इति पञ्च ते ॥ ७७ ॥
अभिग्रहान् गृहीत्वामूनर्धमासादनन्तरम् । ग्रामं नाम्नाऽस्थिकग्रामं ययौ प्रावृष्यपि प्रभुः ॥ ७८ ॥
तत्र चैकस्य यक्षस्य शूलपाणेर्निकेतने । अधिवस्तुं जगन्नाथो ग्रामीणानन्वजिज्ञपत् ॥ ७९ ॥
ऊचुर्ग्राम्या न यक्षोऽयं वस्तुं दत्तेऽत्र कस्यचित् । यक्षस्यामुष्य हि कथा महती सा निशम्यताम् ॥ ८० ॥
ग्रामोऽयमभवत्पूर्वं वर्धमानोऽभिधानतः । नद्यस्ति वेगवत्यत्र पंकिलोभयकूलभूः ॥ ८१ ॥
तत्र भाण्डभृतैरागादनसां पञ्चभिः शतैः । धनदेवो वणिक् तस्य चाभूदेको महावृषः ॥ ८२ ॥
तं महोक्षं धुरि कृत्वा सर्वाणि शकटानि सः । नद्या उत्तारयामास विषमाया अपि क्षणात् ॥ ८३ ॥ ॥४७॥

अतिभाराकर्षणेन मुखेन रुधिरं वमन् । स महोक्षः पपातोर्व्यां नेजवाजीव सात्त्विकः ॥ ८४ ।
संभाष्य च वणिग्ग्राम्यानुवाच वृषसाक्षिकम् । पाल्योऽयं वृषभो न्यासीकृतजीवितवन्मम ॥ ८५ ॥
वृषस्य तृणपानीयनिमित्तं च धनं बहु । ग्रामलोकस्यार्पयामास स्वामिधर्मो ह्ययं खलु ॥ ८६ ॥
ततो वणिक् स्वयमपि चारिपानीयढौकनात् । *प्रियाकृत्य महोक्षाय सास्रदृक् परतो ययौ ॥ ८७ ॥
धनमादाय ते ग्राम्यास्तृणवार्यादिना वृषम् । प्रतिचक्रुर्न तं पापाः कुवैद्या इव रोगिणम् ॥ ८८ ॥
संजातहृदयत्रोटः क्षुत्पिपासाकदर्थितः । चर्मकीकसमात्रांगः स गौरेवमचिन्तयत् ॥ ८९ ॥
अहो ! निष्करुणो ग्रामः पापिष्ठो निष्ठुराशयः । चांडालनिर्विशेषोऽयमशेषोऽप्यतिवञ्चकः ॥ ९० ॥
दूरे स्वयं करुणया दीनस्य मम पालनम् । मत्स्वामिदत्तमप्येभिर्जग्धं चार्यादिवेतनम् ॥ ९१ ॥
क्रुद्धोऽकामनिर्जरावान् स गौर्मृत्वोदपद्यत । व्यन्तरः शूलपाण्याख्यो ग्रामेऽत्रैव पुरोवने ॥ ९२ ॥
सोऽथाज्ञासीद्विभंगेन पूर्वजन्मकथां निजाम् । ददर्श गोवपुस्तच्च ग्रामायास्मै चुकोप च ॥ ९३ ॥
व्यकार्षीद्दुर्धरो मारिं स मारेरिव दैवतम् । मार्यमाणैरमी ग्राम्यैरभूवन्नस्थिसंचयाः ॥ ९४ ॥
अपृच्छंश्चातुरा ग्राम्या मुहुर्ज्योतिर्विदादिकान् । चक्रुः शान्त्यै तदाज्ञां च वैद्याज्ञामिव रोगिणः ॥ ९५ ॥

१ संभूष्य *L*, *D*, *M* ॥ २ पुरावने *D* पुरातने *M* ॥ ३ 'द्यानामि' *D* ॥
टि.— * प्रियं कृत्वा ।

विदधुर्गृहदेवीनां स्नानपूजादिकं मुहुः । नोपशान्तिरभून्मारेस्तथापि हि मनागपि ॥ ९६ ॥
ग्रामान्तराण्ययुर्ग्राम्या व्यन्तरः स तु को[1]पनः । युवराजो यमस्येवामारयत्तांस्तथापि हि ॥ ९७ ॥
ग्राम्या व्यचिन्तयंश्चैवं कोऽप्यस्माभिर्वि[2]रोधितः । देवो दैत्योऽथवा यक्षः क्षेत्रपालोऽपरोऽपि वा ॥ ९८ ॥
ग्रामस्तथैव तद्ग्रामे तत्प्रसादनहेतवे । एवं विमृश्य ते भूयः संभूयेह समाययुः ॥ ९९ ॥
ते स्नाताः श्वेतवसना उत्तरासंगधारिणः । मुक्तकेशाश्चत्वरेषु त्रिकेषूद्यानभूमिषु ॥ १०० ॥
भूतगेहेष्वथान्यत्र क्षिपन्तः परितो बलिम् । ऊर्ध्वाननाः प्राञ्जलयो दीनास्या एवमूचिरे ॥ १०१ ॥ (युग्मम्)
भोः ! सुरा असुरा यक्षरक्षःकिंपुरुषादयः । यत्प्रमादान्मदाद्वागस्तन्नः क्षाम्यन्तु सर्वथा ॥ १०२ ॥
कोपः प्रणामावधिको महतां हि महानपि । तत्प्रसीदतु यः कश्चिदस्त्यस्माभिर्वि[3]रोधितः ॥ १०३ ॥
व्यन्तरः सोऽन्तरिक्षस्थोऽथाब्रवीद्रे दुराशयाः ! । लुब्धा लुब्धकसंकाशाः ! क्षमणं कुरुताधुना ॥ १०४ ॥
तदानीं वृषभस्य क्षुत्तृषाक्रान्तस्य तस्य तु । वणिग्दत्तधनेनापि दत्तं नाम्भस्तृणादि यत् ॥ १०५ ॥
स मृत्वा वृषभोऽभूवं शूलपाणिरहं सुरः । तेन वैरेण वः सर्वान्मारयामि स्मरन्तु तत् ॥ १०६ ॥
तच्छ्रुत्वा ते पुनस्तस्मै धूपोत्क्षेपणतत्पराः । लुठन्तो भूतले दीना भूयोऽप्येवं बभाषिरे ॥ १०७ ॥
अपराद्धमदोऽस्माभिस्तथापि क्षाम्य शाम्य च । शरणं त्वां प्रपन्नाः स्मो ह्यनन्यशरणा वयम् ॥ १०८ ॥

१ °पतः *D* ॥ २ °राधि° *L*, *C* ॥ ३ °राधि° *L* ॥

तद्भाषा व्यन्तरः किञ्चिदुपशान्तोऽब्रवीदिति । अमूनि मानुषास्थीनि पुञ्जीकुरुत संप्रति ॥ १०९ ॥
तस्योपरि कुरुध्वं चायतनं तस्य चान्तरे । ममोक्षरूपानुगतां मूर्तिं स्थापयतोच्चकैः ॥ ११० ॥
एवं कृते प्राणितं वः प्रदास्ये नान्यथा पुनः । तथैव तद्व्यधुस्तेऽपि ग्राम्या विधुराकुलाः ॥ १११ ॥
पूजाकरं शूलपाणेरिन्द्रशर्माणमाख्यया । ग्रामः समादिशत्तस्मै कल्पितानल्पवेतनः ॥ ११२ ॥
अत्रास्थिसंचयोऽस्तीति ग्रामोऽसावस्थिकाह्वयः । तदाप्रभृति लोकेऽभूद्वर्धमानाभिधोऽपि सन् ॥ ११३ ॥
श्रान्ताः कार्पटिका रात्रौ वसन्त्यायतनेऽत्र ये । तद्रात्रावेव तान् हन्ति शूलपाणिः कृतान्तवत् ॥ ११४ ॥
स्थित्वा लोको दिनं ह्यत्रेन्द्रशर्मा च तदर्चकः । सायं स्वसदने याति तद्रस्तु तेऽत्र नोषितम् ॥ ११५ ॥
इत्युक्त्वा ते पृथगपि स्वामिने वसतिं ददुः । प्रतीयेष न तु स्वामी यक्षौकस्तत्त्वयाचत ॥ ११६ ॥
अथ ग्राम्यैरनुज्ञातो बोधार्हं व्यन्तरं विदन् । तदायतनैककोणे तस्थौ प्रतिमया प्रभुः ॥ ११७ ॥
सायं कृत्वा धूपवेलामिन्द्रशर्मा तदर्चकः । निःसार्य पथिकान् सर्वान् भगवन्तमदोऽवदत् ॥ ११८ ॥
अयि देवार्य[1] ! निर्याहि त्वमप्यायतनादि[2]तः । अयं हि व्यन्तरः क्रूरो भावी ते निशि मृत्यवे ॥ ११९ ॥
तस्थौ च स्वामी तूष्णीको व्यन्तरः सोऽप्यचिन्तयत् । अहो मुमूर्षुः कोऽप्येष ममायतनमागमत् ॥ १२० ॥
ग्रामेण वार्यमाणोऽपि मुहुर्मत्पूजकेन च । दृप्तः कोऽयमिहावात्सीद्दर्पमस्य हरामि तत् ॥ १२१ ॥

१ हि C ॥ २ °ति° D, L, M ॥

देवार्यके ततो यातेऽस्तमिते च दिवाकरे। कायोत्सर्गस्थिते नाथेऽट्टहासं व्यन्तरोऽकरोत् ॥ १२२ ॥
पुस्फोटेव नभोभाण्डं तुत्रोटेवोडुमंडलम्। तेनाट्टहासशब्देनातिरौद्रेण प्रसर्पता ॥ १२३ ॥
ग्रामलोकोऽपि तं शब्दं श्रुत्वाऽवोचत्परस्परम्। नूनं देवार्यकः सोऽद्य व्यन्तरेण निहन्यते ॥ १२४ ॥
नाम्ना तत्रोत्पलः पार्श्वतीर्थसाधुचरस्तदा। परिव्राडष्टांगमहानिमित्तज्ञानपण्डितः ॥ १२५ ॥
लोकाद्देवार्यवृत्तान्तं श्रुत्वाऽधादधृतिं हृदि। अपश्चिमस्तीर्थकरो मा स्म भूदिति शंकया ॥ १२६ ॥ (युग्मम्)
अट्टहासस्वरेणापि न चुक्षोभ यदा प्रभुः। हस्तिरूपं तदाघोरं व्यन्तरो विचकार सः ॥ १२७ ॥
स्वामिना हस्तिरूपे चावज्ञाते सति निर्ममे। पिशाचरूपं सोऽप्युच्चै रोदसीमानदण्डवत् ॥ १२८ ॥
तेनाप्यक्षुभिते नाथे सर्परूपं भयंकरम्। विचकार स दुष्टात्मा यमपाशायुधोपमम् ॥ १२९ ॥
प्रभुं स सर्पो दर्पान्धो भोगेनावेष्टयद् दृढम्। ददंश दशनैर्गाढममोघविषनिर्झरः ॥ १३० ॥
चक्रे सर्पे मुधाभूते भूतराट् सप्त वेदनाः। शिरोनेत्रश्रवोनासादन्तपृष्ठनखे प्रभोः ॥ १३१ ॥
एकापि वेदना मृत्युकारणं प्राकृते नरे। अधिसेहे तु ताः स्वामी सप्तापि युगपद्व्यथाः ॥ १३२ ॥
कृत्वा कृत्वेत्युपसर्गान्निर्विण्णो व्यन्तरः स तु। नत्वा विज्ञपयामास प्रभुमेवं कृताञ्जलिः ॥ १३३ ॥
मया दुरात्मना नाथ! तव शक्तिमजानता। नितान्तमपराद्धं यत्तत्क्षमस्व दयानिधे! ॥ १३४ ॥ ॥५१॥

१ °सर्विणा *M* ॥ २ महाघो° *D, M* ॥ ३ सुधा° *C, M* ॥

तदा च सिद्धार्थसुरः स्वकार्यव्यग्रमानसः । स्वामिसान्निध्यविषयमस्मार्षीच्छक्रशासनम् ॥ १३५ ॥
साटोपमेत्य चेत्यूचे शूलपाणे ! सुराधम ! । अप्रार्थितप्रार्थक ! भोः ! किमेतद्भवता कृतम् ॥ १३६ ॥
तीर्थंकरं भगवन्तं सिद्धार्थनृपनन्दनम् । जगत्त्रयस्यापि पूज्यं किं न जानासि दुर्मते ! ॥ १३७ ॥
यदि त्वचरितं शक्रः स्वामिभक्तोऽस्य वेत्स्यति । तदा तत्कुलिशधाराक्षोदपात्रीभविष्यसि ॥ १३८ ॥
शूलपाणिस्ततो भीत्या पश्चात्तापेन चाकुलः । पुनरक्षमयत्नाथं नान्यदौपयिकं तदा ॥ १३९ ॥
तं प्रशान्तं च सिद्धार्थः सानुकंपोऽभ्यधादिदम् । अहो तत्त्वानभिज्ञोऽसि शृणु तत्त्वं यथातथम् ॥ १४० ॥
वीतरागे देवबुद्धिर्गुरुबुद्धिश्च साधुषु । धर्मं जिनोदिते धर्मबुद्धिरित्यात्मसात् कुरु ॥ १४१ ॥
प्राणिष्वतः परं पीडां मा कार्षीरात्मनीव भोः ! । निन्देर्गर्हेश्च सर्वाणि पूर्वदुश्चरितानि च ॥ १४२ ॥
अप्येकदाऽऽचरितस्य हन्त तीव्रस्य कर्मणः । कोटीकोटिगुणं दुःखविपाकं जन्तुरश्नुते ॥ १४३ ॥
शूलपाणिस्तदाकर्ण्याऽनेकप्राणिक्षयं कृतम् । स्मरन्मुहुर्निनिन्द स्वं पश्चात्तापाधिवासितः ॥ १४४ ॥
सम्यक्त्वभूद्भवोद्विग्नः सोऽर्चित्वा चरणौ प्रभोः । आगोमलक्षालनाम्भः संगीतमुपचक्रमे ॥ १४५ ॥
तद्गीतशब्दमाकर्ण्य ग्राम्या एवमचिन्तयन् । मन्ये व्यापाद्य देवार्यं देवः क्रीडति संप्रति ॥ १४६ ॥
नाथोऽपि चतुरो यामान् किञ्चिदूनान् कदर्थितः । श्रमान्निद्रामधिगतोऽपश्यत् स्वप्नानमून् दश ॥ १४७ ॥

तृतीयः सर्गः

१ कोटि° *L* । कोटा° *M*. ॥

वर्धिष्णुस्तालपिशाचः स्वयं न्यपादितः किल । कोकिलौ श्वेतचित्रौ च सेवमानौ स्वसन्निधौ ॥ १४८ ॥
दामद्वयं च गन्धाढ्यं गोवर्गः सेवनोद्यतः । पद्माचितं पद्मसरो दोर्भ्यां तीर्णश्च सागरः ॥ १४९ ॥
उद्रश्मिकं चार्कबिम्बमथाद्रिर्मानुषोत्तरः । निजान्त्रैर्वेष्टितः स्वेनारूढं मेरुशिरोऽपि च ॥ १५० ॥
एवं प्रेक्ष्य दश स्वप्नान् प्राबुद्ध त्रिजगद्गुरुः । उदियाय च मार्तण्डो विवन्दिषुरिव प्रभुम् ॥ १५१ ॥
तदा चागाज्जनः सर्व इन्द्रशर्मोत्पलोऽपि च । अक्षतांगं पूजितं च प्रभुं प्रेक्ष्य मुदं ययौ ॥ १५२ ॥
साश्चर्याः प्रभुमभ्यर्च्य पुष्पप्रभृतिभिश्च ते । सिंहनादं विदधिरे धीरा इव जिताहवाः ॥ १५३ ॥
सिंहनादमुखास्ते तु परस्परमदोऽवदन् । देवार्येणाधुना दिष्ट्योपाशामि व्यन्तरश्चिरात् ॥ १५४ ॥
उत्पलोऽपि परिज्ञाय भगवन्तमवन्दत । निषसाद च तत्पादपद्मान्ते शिष्यलेशवत् ॥ १५५ ॥
कायोत्सर्गावसाने च प्रभुं नत्वोत्पलः पुनः । ज्ञानसामर्थ्यतो ज्ञातप्रभुस्वप्नोऽब्रवीदिदम् ॥ १५६ ॥
स्वामिंस्त्रियामान्ते युष्माभिः सुस्वप्नाः प्रेक्षिता दश । तत्फलानि स्वयं वेत्सि भक्त्याख्यामि तथाप्यहम् ॥१५७॥
हतस्तालपिशाचो यत्तन्मोहं निहनिष्यसि । यच्छ्वेतः कोकिलः शुक्लध्यानमारोक्ष्यसीश ! तत् ॥१५८॥
यच्चित्रः कोकिलस्तद् द्वादशांगीं प्रथयिष्यसि । गोवर्गो यत्तु तद्भावी संघस्तव चतुर्विधः ॥ १५९ ॥
यत्तु पद्मसरो देवनिकायः सेवकस्ततः । यत्तु सागरमुत्तीर्णं उत्तरिष्यसि तद्भवम् ॥ १६० ॥

१ वीरा *M* ॥ २ तु *D, M* ॥

यच्चार्कः केवलज्ञानं तत्समुत्पत्स्यते तव । यच्चाब्धिर्वेष्टितोऽद्रिस्तत्सप्रतापं यशस्तव ॥ १६१ ॥
यन्मेरुशृंगमारूढस्त्वं तत्सिंहासनस्थितः । धर्मं देक्ष्यसि यद्दाम्नी तयोर्वेद्मि फलं न हि ॥ १६२ ॥
अथाचचक्षे भगवान् दामद्वयफलं त्वदः । गृहस्थानां यतीनां च वक्ष्ये धर्मं द्विधापि हि ॥ १६३ ॥
अथ नत्वा जगन्नाथं ययौ स्वस्थानमुत्पलः । विस्मयप्रमदोन्मुद्रमनसोऽथापरेऽप्ययुः ॥ १६४ ॥
तत्रार्धमासक्षपणैश्चतुर्मासीमतीत्य ताम् । निरगादस्थिकग्रामाद्विहर्तुं प्रभुरन्यतः ॥ १६५ ॥
अनुगच्छन् शूलपाणिः प्रभुं नत्वाऽभ्यधादिदम् । स्वसौख्यनिरपेक्षस्त्वमिहागा मेऽनुकम्पया ॥ १६६ ॥
न पापो मत्समः कोऽपि यस्त्वय्यप्यपकारकृत् । न [1]सार्वस्त्वत्समः कोऽपि यो मय्यप्युपकारकृत् ॥१६७॥
अथ यावदार्जयिष्यं कामहं नरकावनिम् । नाबोधयिष्यस्त्वं चेन्मां विश्वोपकृतिकर्मठ ! ॥ १६८ ॥
इत्युदित्वा भक्तिगर्भो भगवन्तं प्रणम्य च । शूलपाणिर्निववृते शान्तो द्विप इवामदः ॥ १६९ ॥
दीक्षादिनाद्व्यतीतेऽब्दे मोराकं सन्निवेशनम् । गत्वा तद्बहिरुद्याने स्वाम्यस्थात् प्रतिमाधरः ॥ १७० ॥
तस्मिन्नच्छन्दको नाम पाखंडी सन्निवेशने । ज्योतिष्कमंत्रतंत्रादिकरणेन स्म जीवति ॥ १७१ ॥
तस्यासहिष्णुर्माहात्म्यं स्वाम्यर्चां चाभिलाषुकः । सिद्धार्थव्यन्तरः कृत्वा संक्रमं स्वामिवर्ष्मणि ॥ १७२॥

१ साधुस्व° *D*, स्वार्यस्व° *M* ॥ २ °गर्भं *L* ॥ ३ °ण्डी *C*, *D*, *L* ॥
टि.– [1]सर्वेभ्यो हितः ।

यान्तमाहूय गोपालमूचे भो ! भुक्तवानसि । कंगुकूरं ससौवीरं वृषांस्त्रातुं च गच्छसि ॥ १७३ ॥
आगच्छंश्चाहिमद्राक्षीः स्वप्नेऽरोदीश्च निर्भरम् । नदेतत्संवदति किं सत्यमाख्याहि गोपक ! ॥ १७४ ॥
सत्यमेवेति तेनोक्ते सिद्धार्थस्तस्य भूरिशः । भूयस्तत्तत्समाचख्यौ प्रत्ययोत्पत्तिकारणम् ॥ १७५ ॥
गोपः सविस्मयो ग्रामे गत्वाऽऽख्यद्बहिर्वने । देवार्योऽस्ति त्रिकालज्ञः सोऽपूरि प्रत्ययान्मम ॥ १७६ ॥
तच्छ्रुत्वा कौतुकापूर्णस्तूर्णं ग्रामजनोऽखिलः । पुष्पाक्षतादिपूजाभृदाययौ स्वामिसन्निधौ ॥ १७७ ॥
सिद्धार्थः स्वामिसंक्रान्तो ग्रामीणानब्रवीदिदम् । द्रष्टुं मेऽतिशयं यूयं सर्वे स्थ किमिहागताः ? ॥ १७८ ॥
ग्राम्यैरामेत्यभिहिते यत्तैर्दृष्टं कृतं श्रुतम् । उक्तं च प्राक् तदानीं च सिद्धार्थस्तदचीकथत् ॥ १७९ ॥
सिद्धार्थो भावि चाचख्यौ श्रुत्वा लोकस्ततोऽकरोत् । प्रभोः पूजां वन्दनां च महामहिमपूर्वकम् ॥ १८० ॥
एवं च प्रत्यहं लोकेष्वायतत्सु यतत्सु च । सिद्धार्थव्यन्तरस्याभून्मनःप्रीतिर्गरीयसी ॥ १८१ ॥
ऊचुस्तत्रान्यदा ग्राम्याः स्वामिन्नच्छन्दकाभिधः । ग्रामे परिवसत्यस्मिन् सोऽपि वेत्ति भवानिव ॥ १८२ ॥
सिद्धार्थस्तानभाषिष्ट न स जानाति किञ्चन । ऋजून् प्रतार्य भवतः करोत्युदरपूरणम् ॥ १८३ ॥
ते गत्वाऽच्छन्दकं स्माहुर्न त्वं जानासि किञ्चन । सर्वं जानाति देवार्यो भावि भूतं भवच्च यत् ॥१८४॥
स्वप्रतिष्ठाभ्रंशभीरुर्बभाषेऽच्छन्दकोऽप्यदः । स यः पुरो येत्ति परं परमार्थमजानताम् ॥ १८५ ॥

१ तु *C* । स्थः *D* । स्व *E* ॥

पुरो मम यदि ज्ञाता मन्ये ज्ञाता तदा हि सः। गत्वा तस्याऽज्ञतामाविष्करोम्येषोऽद्य पश्यत ॥ १८६ ॥
इत्युक्त्वाऽच्छन्दकः क्रुद्धो वृतो ग्राम्यैः सकौतुकैः। कायोत्सर्गस्थितं नाथं द्रुतं द्रुतमुपाययौ ॥ १८७ ॥
करांगुलीभिः स तृणं गृहीत्वोभयपार्श्वगोः। ऊचे नाथं तृणमिदं किं मया छेत्स्यते न वा ? ॥ १८८ ॥
भावस्तस्याभवच्चायं वेधार्यो यद्वदिष्यति। तत्प्रतीपं करिष्यामि स्यादयथाऽनृतवागसौ ॥ १८९ ॥
आचचक्षे च सिद्धार्थो न छेत्स्यत इदं तृणम्। अच्छन्दकोऽपि तच्छेत्तुमारेभे सज्जितांगुलिः ॥ १९० ॥
दध्यौ शक्रस्तदा स्वामी विहरत्यधुना कथम्। दत्तोपयोगश्चापश्यत्तदच्छन्दकचेष्टितम् ॥ १९१ ॥
मा भूत्स्वामिमुखोद्गीर्णा गीरसत्येति वज्रभृत्। वज्रेण चिच्छेद दशाप्यच्छन्दककरांगुलीः ॥ १९२ ॥
वीक्षापन्नस्तृणाच्छेदाद्धस्यमानोऽखिलैर्जनैः। अच्छन्दकोऽन्यतोऽगच्छदुन्मत्त इव मूढधीः ॥ १९३ ॥
सिद्धार्थोऽथावदद् ग्राम्यांस्तस्करोऽच्छन्दको ह्ययम्। ग्राम्याः प्रत्यूचिरे स्वामिन् ! किं कस्यानेन चोरितम् १९४
सिद्धार्थोऽप्यब्रवीदत्र वीरघोषोऽस्ति कर्मकृत्। तच्छ्रुत्वा वीरघोषोऽपि प्रणम्य स्वमदर्शयत् ॥ १९५ ॥
आदिशेति च तेनोक्ते सिद्धार्थः पुनरभ्यधात्। भाजनं ते दशपलं नष्टपूर्वं निकेतनात् ? ॥ १९६ ॥
आमेत्युक्ते च घोषेण सिद्धार्थः स्माह तत्खलु। हृतं पाखण्डिनानेन प्रत्ययोऽत्र निरीक्ष्यताम् ॥ १९७ ॥

---

१ त्रिकालज्ञस्तदा । ॥

पश्चाग्निजौकसः प्राच्यां दिशि †शिग्रुमहीरुहः । हस्तमात्रमधः क्षिप्तमस्ति गत्वा गृहाण तत् ॥ १९८ ॥
उत्कौतुकैरमुना लोकैर्वरघोषस्तदालयं । भाजनं तत्तथाख्यातं गृहीत्वा पुनराययौ ॥ १९९ ॥
ग्राम्यानुत्तुमुलान् भूयः सिद्धार्थः प्रोचिवानिति । भूयोऽपि श्रूयतामिन्द्रशर्मेत्यत्रास्ति किं गृही ॥ २०० ॥
अस्तीत्यभिदधे लोक इन्द्रशर्माप्युपस्थितः । आज्ञापयायमस्मीति वदन् प्राञ्जलिरग्रतः ॥ २०१ ॥
सिद्धार्थोऽभिदधे भद्र नष्टः किं ते पुरा *हुडुः ? । एवमेतदित्यवोचदिन्द्रशर्मा सविस्मयः ॥ २०२ ॥
सिद्धार्थः स्माह हत्वा स भक्षितो भिक्षुणामुना । बदर्या दक्षिणे पार्श्वेऽवकरेऽस्थीनि तस्य तु ॥ २०३ ॥
लोकाश्च कौतुकाद्गत्वा तदस्थीनि व्यलोकयन् । सन्तीत्यभिदधानास्तु भूयस्तत्र समाययुः ॥ २०४ ॥
सिद्धार्थः पुनरप्यूचे तृतीयमपि चेष्टितम् । अस्यास्ति तदस्तु परं कथयिष्यामि न ह्यहम् ॥ २०५ ॥
आख्याहि सर्वथा तन्नः प्रसीदेति पुनः पुनः । ग्राम्यास्तमब्रुवन् रम्या स्यादर्धकथिता कथा ॥ २०६ ॥
अथाभाषिष्ट सिद्धार्थो नाख्यास्यामि तथाप्यहम् । कौतूहलं चेत्तद्भार्यां गत्वा पृच्छत तद्गृहे ॥ २०७ ॥
तद्वेश्मनि ययौ लोकः स्वभार्या तेन तद्दिने । कुट्टितामर्षवत्येवं सास्रदृक् चिन्तयन्त्यभूत् ॥ २०८ ॥
सुष्ठु जातं यदेतस्य कराङ्गुल्यो निकर्तिताः । न्यक्कृतश्चाखिलैर्लोकैर्लोकः संप्रत्युपैति चेत् ॥ २०९ ॥
अस्य दुश्चरितं सर्वं तदा प्रकटयाम्यहम् । यथैष लभते पापो मत्कुट्टनभवं फलम् ॥ २१० ॥

टी.– † शिग्रुः–'सरगवो' इति गुर्जरभाषायाम् । * अजः ।

अथाययौ ग्रामजनोऽपृच्छत्तच्चेष्टितं च ताम् । साऽप्योचत् कोऽस्य नामापि गृह्णीयात् पापकारिणः ॥२११॥
यदसावात्मनः स्वस्रा समं वैषयिकं सुखम् । भुंक्ते धिक्कर्मचंडालो न मामिच्छति जातुचित् ॥ २१२ ॥
एवं श्रुत्वा कलकलं कुर्वाणा ग्रामवासिनः । ययुर्निजनिजं गेहमच्छन्दकविगर्हिणः ॥ २१३ ॥
सर्वत्र पाप पापेति भर्त्स्यमानः स भिक्षुकः । भिक्षामप्याप न क्वापि धिक् प्रतिष्ठाच्युतं नरम् ॥ २१४ ॥
श्रीवीरं विजने गत्वा नत्वा दीनो जगाद सः । भगवन्नन्यतो याहि पूज्यः सर्वत्र पूज्यते ॥ २१५ ॥
अत्रैवार्च्योऽस्मि नान्यत्र नामापि ज्ञायते मम । स्वदर्यामेव शौर्यं हि गोमायोर्न पुनर्बहिः ॥ २१६ ॥
अजानता दुर्विनयो यो मयाऽकारि नाथ ! ते । संप्राप्तं तत्फलं संप्रत्यनुकम्पस्व मामतः ॥ २१७ ॥
अप्रीतिमत्परीहाराभिग्रही भगवानथ । चचालोत्तरवाचालं सन्निवेशं प्रति प्रभुः ॥ २१८ ॥
दक्षिणश्चोत्तरश्चेति वाचालौ द्वौ तदन्तरे । सुवर्णवालुका रूप्यवालुका चेति निम्नगे ॥ २१९ ॥
दक्षिणादुत्तरे यान्वाचालेऽथालगत्प्रभोः । कंटके देवदूष्यार्धं सुवर्णवालुकातटे ॥ २२० ॥
किञ्चिद्गत्वा प्रभुर्मा भूद्दृष्टमस्थंडिले त्वदः । इति तद्वीक्ष्य वस्त्रार्धं गन्तुं प्रववृते ततः[1] ॥ २२१ ॥
पृष्ठलग्नस्त्रयोदशमास्यन्ते ब्राह्मणस्तु सः । तद्वस्त्रार्धमुपादाय वन्दित्वा च प्रभुं ययौ ॥ २२२ ॥

१ मां ततः *M* ॥

तुन्नवायस्य तस्यैव हृष्टो विप्रस्तदार्पयत् । सोऽपि ते देवदूष्यार्धे अयोजयदसंधिवत् ॥ २२३ ॥
दीनारलक्षं तन्मूल्यं बन्धू इव विभज्य तौ । अर्धमर्धं जगृहतुस्तुन्नवायो द्विजश्च सः ॥ २२४ ॥
इतश्च भगवान् वीरः समीरण इवास्खलन् । श्वेतव्यभिमुखं गच्छन्नित्यूचे गोपदारकैः ॥ २२५ ॥
देवार्यायमृजुः पन्थाः श्वेतवीमुपतिष्ठते । किं त्वन्तरेऽस्य कनकखलाख्यतापसाश्रमः ॥ २२६ ॥
स हि दृग्विषसर्पेणाधिष्ठितो वर्ततेऽधुना । वायुमात्रैकसञ्चारोऽप्रचारः पक्षिणामपि ॥ २२७ ॥
विहाय तदमुं मार्गं वक्रेणाप्यमुना व्रज । सुवर्णनापि किं तेन कर्णच्छेदो भवेद्यतः ॥ २२८ ॥
तं चाहिं प्रभुरज्ञासीद्यदसौ पूर्वजन्मनि । क्षपकः पारणकार्थं विहर्तुं वसतेरगात् ॥ २२९ ॥
गच्छता तेन मंडूकी पादपाताद्विराधिता । आलोचनार्थमेतस्य दर्शिता क्षुल्लकेन सा ॥ २३० ॥
सोऽथ प्रत्युत मंडूकीर्दर्शयन् लोकमारिताः । ऊचे क्षुल्लं मया क्षुद्र ! किमेता अपि मारिताः ? ॥ २३१ ॥
तूष्णीकोऽभूत्ततः क्षुल्लोऽमंस्त चैवं विशुद्धधीः । महानुभावो यदसौ सायमालोचयिष्यति ॥ २३२ ॥
आवश्यकेऽप्यनालोच्य यावदेष निषेदिवान् । क्षुल्लकोऽचिन्तयत्तावद्विस्मृताऽस्य विराधना ॥ २३३ ॥
अस्मारयच्च तां भेकीमालोचयसि किं न हि । क्षपकोऽपि क्रुधोत्थाय क्षुल्लं हन्मीति धावितः ॥ २३४ ॥
कोपान्धश्च ततः स्तंभे प्रतिफल्य व्यपद्यत । विराधितश्रामण्योऽसौ ज्योतिष्केषूपपद्यत ॥ २३५ ॥

---

१ °स्फल्य M ॥

स च्युत्वा कनकखले सहस्रार्धतपस्विनाम् । पत्युः कुलपतेः पत्न्याः पुत्रोऽभूत् कौशिकाह्वयः ॥ २३६ ॥
तत्र कौशिकगोत्रत्वादासन्नन्येऽपि कौशिकाः । अत्यन्तकोपनत्वाच्च स ख्यातश्चंडकौशिकः ॥ २३७ ॥
श्राद्धदेवातिथित्वं च तस्मिन् कुलपतौ गते । असौ कुलपतिस्तत्र तापसानामजायत ॥ २३८ ॥
मूर्च्छया वनखंडस्य सोऽन्तर्भ्राम्यदहर्निशम् । अदात्कस्यापि नादात्तु पुष्पं मूलं फलं दलम् ॥ २३९ ॥
विशीर्णमपि योऽगृह्णाद्वने तत्र फलादिकम् । उत्पाट्य परशुं यष्टिं लोष्टुं वा तं जघान सः ॥ २४० ॥
फलाद्यलभमानास्तु सीदन्तस्ते तपस्विनः । पतिते लगुडे काका इव जग्मुर्दिशो दिशम् ॥ २४१ ॥
अन्येद्युर्वाटिकाहेतोः कौशिके बहिरीयुषि । अभांक्षुर्मंक्षु राजन्याः श्वेतव्या एत्य तद्वनम् ॥ २४२ ॥
अथ व्यावर्तमानस्य गोपास्तस्य न्यवीविदन् । पश्य पश्य वनं कैश्चिद्भुज्यते भज्यते तव ॥ २४३ ॥
जाज्वल्यमानः क्रोधेन हविषेव हुताशनः । अकुंठधारमुद्यम्य कुठारं सोऽभ्यधावत ॥ २४४ ॥
राजपुत्रास्ततो नेशुः श्येनादिव शकुन्तयः । स्खलित्वा च पपाताग्रे यमवक्त्र इवावटे ॥ २४५ ॥
पततः पतितस्तस्य संमुखः परशुः शितः । शिरो द्विधा कृतं तेन ही विपाकः कुकर्मणाम् ॥ २४६ ॥
स विपद्य वनेऽत्रैव चंडोऽहिर्दृग्विषोऽभवत् । क्रोधस्तीव्रानुबन्धो हि सह याति भवान्तरे ॥ २४७ ॥
अवश्यं चैष बोधार्ह इति बुद्ध्या जगद्गुरुः । आत्मपीडामगणयन्नृजुनैव पथा ययौ ॥ २४८ ॥

१ °शुः कंरि° C, L ॥

अभवत्पदसञ्चारसुषमीभूतवालुकम् । *उदपानावहत्कुल्यं शुष्कजर्जरपादपम् ॥ २४९ ॥
जीर्णपर्णचयास्तीर्णं कीर्णं वल्मीकपर्वतैः । स्थलीभूतोटजं जीर्णारण्यं न्यविशत प्रभुः ॥ २५० ॥ (युग्मम् )
तत्र नाथः प्रविश्यैको यक्षमण्डपिकाऽन्तरे । तस्थौ प्रतिमया नासाप्रान्तविश्रान्तलोचनः ॥ २५१ ॥
ततो दृष्टिविषः सर्पः सदर्पो भ्रमितुं बहिः । बिलान्निरसरज्जिह्वा कालरात्रिमुखादिव ॥ २५२ ॥
भ्रमन् सोऽनुवनं रेणुसंक्रामद्भोगलेखया । स्वाऽऽज्ञालेखामिव लिखन्नीक्षाञ्चक्रे जगद्गुरुम् ॥ २५३ ॥
अत्र मां किमविज्ञाय किमवज्ञाय कोऽप्यसौ । आः प्रविष्टो निराशंकं निष्कंपः शंकुवत्स्थितः ॥ २५४ ॥
तदेनं भस्मसात्सद्यः करोमीति विचिन्तयन् । आध्मायमानः कोपेन फटाटोपं चकार सः ॥ २५५ ॥
ज्वालामालामुद्वमन्त्या निर्दहन्त्या लताद्रुमान् । भगवन्तं दृशाऽपश्यत् स्फारफूत्कारदारुणः ॥ २५६ ॥
दृष्टिज्वालास्ततस्तस्य ज्वलन्त्यो भगवत्तनौ । विनिपेतुर्दुरालोका उल्का इव दिवो गिरौ ॥ २५७ ॥
प्रभोर्महाप्रभावस्य प्रभवन्ति स्म नैव ताः । महानपि मरुन्मेरुं किं कम्पयितुमीश्वरः ? ॥ २५८ ॥
दारुदाहं न दग्धोऽसावद्यापीति क्रुधा ज्वलन् । दर्शं दर्शं दिनेशं [1]दृष्टीर्ज्वालाः सोऽमुचत्पुनः ॥ २५९ ॥

---

टि.— *'अवाडो' इति गुर्जरभाषायाम् ।

१ °ष्टि° *D* । °ष्टि ह° *M* ॥

संपन्नासु प्रभौ वारिधाराप्रायासु तास्वपि । ददंश दन्दशूकः स निःशूकः पादपंकजे ॥ २६० ॥
दष्ट्वा दष्ट्वापचक्राम स्वविषोद्रेकदुर्मदः । यत्पतन्मद्विषाक्रान्तो मृद्नीयादेष मामपि ॥ २६१ ॥
दशतोऽप्यसकृत्तस्य न विषं प्राभवत्प्रभौ । गोक्षीरधाराधवलं केवलं रक्तमक्षरत् ॥ २६२ ॥
ततश्च पुरतः स्थित्वा किमेतदिति चिन्तयन् । वीक्षांचक्रे जगन्नाथं वीक्षापन्नः स पन्नगः ॥ २६३ ॥
ततो निरूप्य रूपं तदसरूपं जगद्गुरोः । कान्तसौम्यतया मंक्षु विध्याते तद्विलोचने ॥ २६४ ॥
*उपसन्नं च तं ज्ञात्वा बभाषे भगवानिति । चंडकौशिक ! बुध्यस्व बुध्यस्व ननु मा मुहः ॥ २६५ ॥
श्रुत्वा तद्भगवद्वाक्यमूहापोहं वितन्वतः । पन्नगस्य समुत्पेदे स्मरणं पूर्वजन्मनाम् ॥ २६६ ॥
ततः प्रदक्षिणीकृत्य स त्रिस्त्रिभुवनेश्वरम् । निष्कषायः स्वमनसाऽनशनं प्रत्यपद्यत ॥ २६७ ॥
कृतानशनकर्माणं निष्कर्माणं महोरगम् । प्रशमापन्नमज्ञासीदन्वज्ञासीच्च तं प्रभुः ॥ २६८ ॥
कुत्राप्यन्यत्र मा यासीद् दृष्टिर्मे विषभीषणा । इति तुण्डं बिले क्षिप्त्वा पपौ स समताऽमृतम् ॥२६९॥
तस्थौ तथैव तत्रैव स्वामी तदनुकंपया । परेषामुपकाराय महतां हि प्रवृत्तयः ॥ २७० ॥
भगवन्तं तथा दृष्ट्वा विस्मेयस्मरलोचनाः । गोपाला वत्सपालाश्च तत्रोपसस्रुपुर्द्रुतम् ॥ २७१ ॥
वृक्षान्तरे तिरोभूय यथेष्टं ग्रावलेष्टुभिः । प्रणिजघ्नुरनिघ्नास्ते पन्नगस्य महात्मनः ॥ २७२ ॥

टि.-*शान्तम् ।

तथाप्यविचलं ते तं वीक्ष्य विश्रम्भभाजिनः । यष्टिभिर्घट्टयामासुर्निकटीभूय तत्तनुम् ॥ २७३ ॥
आख्यज्जनानां तद्गोपास्ततस्तत्रागमञ्जनाः । ववन्दिरे महावीरममहंश्च महोरगम् ॥ २७४ ॥
घृतविक्रयकारिण्यो गच्छन्त्यस्तेन वर्त्मना । नागं हैयंगवीनेनाम्रक्षयन् पस्पृशुश्च तम् ॥ २७५ ॥
आगत्य घृतगन्धेन तीक्ष्णतुण्डाः पिपीलिकाः । चक्रिरे *तितउप्रायमहेस्तस्य कलेवरम् ॥ २७६ ॥
मत्कर्मणां कियदेतदित्यात्मानं निबोधयन् । वेदनामधिसेहे तां दुस्सहां सोऽहिपुंगवः ॥ २७७ ॥
वराक्यो मा स्म पील्यन्त स्वल्पसाराः पिपीलिकाः । इत्यचीचलदंगं न मनागपि महोरगः ॥ २७८ ॥
सिक्तः कृपासुधावृष्ट्या दृष्ट्या भगवतोरगः । पक्षान्ते पंचतां प्राप्य सहस्रारदिवं ययौ ॥ २७९ ॥
एवं कौशिकनागायोपकृत्य निरगाद्वनात् । प्राप चोत्तरवाचालसन्निवेशं जगद्गुरुः ॥ २८० ॥
पक्षान्ते पारणार्थं च भ्रमन् गोचरचर्यया । गृहिणो नागसेनस्य सदने प्रययौ प्रभुः ॥ २८१ ॥
तत्राहनि द्वादशाब्द्या गृहिणस्तस्य नन्दनः । अचिन्तितस्तदाऽभ्यागाद्धर्षदोऽनभ्रवृष्टिवत् ॥ २८२ ॥
उत्सवो नागसेनेन तेनाकारि स्ववेश्मनि । भोजितः स्वजनोऽशेषः स्वाम्यायातश्च वीक्षितः ॥ २८३ ॥
दूरात्स्वामिनमालोक्य प्रमोदमधिकं वहन् । नागसेनोऽपि पयसा भक्तिमान् प्रत्यलाभयत् ॥ २८४ ॥
तत्रामरैरहो दानं सुदानमिति भाषिभिः । वसुधाराप्रभृतीनि पंच दिव्यानि चक्रिरे ॥ २८५ ॥

टि.- *'चाळणी' इति गुर्जरभाषायाम् ।

पारयित्वा प्रभुरपि श्वेतवीं नगरीं ययौ । प्रदेशिना नरेन्द्रेण जिनभक्तेन भूषिताम् ॥ २८६ ॥
पौराऽमात्यचमूपाद्यैः प्रदेशी परिवारितः । मघवेवापरोऽभ्येत्य जगन्नाथमवन्दत ॥ २८७ ॥
प्रदेशी स्वपुरेऽथागात् स्वामी च विहरन् क्रमात् । नगरं सुरभिपुरं तपःसुरभिरभ्यगात् ॥ २८८ ॥
मेदिन्या इव *संव्यानं प्रतिमानमिवाम्बुधेः । गंगां तरंगिणीमुच्चतरंगामासदत् प्रभुः ॥ २८९ ॥
तां तितीर्षुः सिद्धदत्तनाविकप्रगुणीकृताम् । आरोहद्भगवान्नावं पथिका अपरेऽपि हि ॥ २९० ॥
दण्डाभ्यां चाल्यमानाभ्यां पक्षाभ्यामिव पक्षिणी । त्वरितं गन्तुमारेभे नौरभ्युद्यतनाविका ॥ २९१ ॥
वाशितं कौशिकेनोच्चैस्तदानीं तटवर्तिना । क्षेमिलाख्यः शाकुनज्ञोऽवोचत्क्षेमं न खल्विह ॥ २९२ ॥
प्राप्तव्यमचिरात् सर्वैर्व्यसनं मरणान्तिकम् । महर्षेरस्य महिम्ना तस्मान्मोक्ष्यामहे परम् ॥ २९३ ॥
ब्रुवाण एव तत्रैवं नौरगाधं जलं ययौ । सुदाढो नागकुमारस्तत्रस्थं चैक्षत प्रभुम् ॥ २९४ ॥
स्मृत्वा प्राग्जन्मवैरं स क्रुध्यन्नेवमचिन्तयत् । सोऽयं येन त्रिपृष्ठत्वे सिंहोऽहं निहतस्तदा ॥ २९५ ॥
एतद्देशानतिदूरस्थे गिरौ निवसता मया । नापराद्धं तदा किंचित्त्रिपृष्ठस्य सतोऽस्य हि ॥ २९६ ॥
निजदोर्वीर्यदर्पेण कुतूहलचिकीर्षया । गुहामध्ये निलीनोऽहं तदानीं निहतोऽमुना ॥ २९७ ॥

टि.–*वस्त्रम् ॥

१ °दन्त° *D*, *M* ॥

दिष्ट्यैष गो[1]चरे दृष्टो वैरं स्वं साधयाम्यहम् । वैरं हि ऋणवत्पुंसां जन्मान्तरशतानुगम् ॥ २९८ ॥
आसन्नमप्यवसानं मम खेदाय नाधुना । प्राग्वैरसाधनादद्य कृतार्थीकृतजन्मनः ॥ २९९ ॥
एवं विचिन्त्य सामर्षः सुदाढो विकटेक्षणः । एत्योपवीरं व्योमस्थश्चक्रे किलकिलारवम् ॥ ३०० ॥
अरे रे ! कुत्र यासीति विब्रुवन् विचकार सः । संवर्तकमहावातं संवर्तानिलभीषणम् ॥ ३०१ ॥
निपेतुस्तरवस्तेन पर्वताश्च चकम्पिरे । गांगमुच्छलति स्मोच्चैर्जलमभ्रंलिहोर्मिकम् ॥ ३०२ ॥
सा च गांगैस्तरंगैर्नौः समुत्पातिनिपातिभिः । उदच्यते न्यच्यते स्म द्विरदोपात्तरूपवत् ॥ ३०३ ॥
निर्भग्नः कूपकस्तम्भः शीर्णः सितपटोऽपि च । आत्मेव नावो मूढोऽभूत् कर्णधारो भयातुरः ॥ ३०४ ॥
आरेभे देवताः स्मर्तुं मर्तुकामः समाकुलः । यमजिह्वाप्रवर्तीव नौवर्ती सकलो जनः ॥ ३०५ ॥
इतश्च मथुरापुर्यां जिनदासो वणिक् पुरा । श्रावकोऽभूत्तस्य भार्या साधुदासीति विश्रुता ॥ ३०६ ॥
प्रत्याख्यातां धार्मिकौ तौ चतुष्पदपरिग्रहम् । दध्यादिकं चिक्रियतुश्चाभीरीपार्श्वतोऽन्वहम् ॥ ३०७ ॥
आभीरी काचिदन्येद्युरानिन्ये प्रवरं दधि । क्रीत्वा च साधुदासी[3]ति तामुवाच प्रसन्नवाक् ॥ ३०८ ॥
त्वया नान्यत्र नेतव्यं दुग्धदध्यादिकं निजम् । अहमेव ग्रहीष्यामि मूल्यं दास्ये तवेप्सितम् ॥ ३०९ ॥

१ °चरो दृष्ट्वाः स्वं वैरं *M* ॥ २ च *L* ॥ ३ तदित्युवाच *C* । तामित्युवाच *L* ॥

तथैव प्रत्यहं चक्रे साभीरी प्रीतमानसा। तां *वेषवारदानेन सच्चक्रे साधुदास्यपि ॥ ३१० ॥
द्वयोः प्रववृते[1] स्नेहः स्वस्रोरिव[2] तयोर्महान्। आभीर्याः समये तस्याः विवाहोऽभवदन्यदा ॥ ३११ ॥
निमन्त्रितौ तयोद्वाहे श्रेष्ठिनावेवमूचतुः। आवामक्षणिकौ भद्रे! नागन्तुं तत्र शक्नुवः ॥ ३१२ ॥
यत्तु वस्तु विवाहार्हं तद् गृह्णाणास्मदालयात्। इत्युक्त्वा ददतुर्वस्त्रधान्यालंकरणादिकम् ॥ ३१३ ॥
तद्दत्तैर्वस्तुभिस्तस्या विवाहः शोभनोऽभवत्। सर्वस्वजनगोपानामेकं शृंगारकारणम् ॥ ३१४ ॥
गोपाः प्रीता रूपवन्तौ द्वावुक्षाणौ त्रिहायणौ। नाम्ना कंबलशबलौ श्रेष्ठ्यर्थमुपनिन्यिरे ॥ ३१५ ॥
श्रेष्ठिनोऽनाददानस्याप्युक्षाणौ ते बलादपि। द्वारे बद्ध्वा ययुर्गोपा गोपानां स्नेह ईदृशः ॥ ३१६ ॥
अथ दध्यौ जिनदासो मुच्येते यद्यमू वृषौ। हलादौ योजयिष्येते तदा हि प्राकृतैर्नरैः ॥ ३१७ ॥
इह चानुपकारित्वाद् दुष्पालौ किं करोमि हा। कीदृशे पातितोऽस्म्येष मूर्खैः स्नेहेन संकटे ॥ ३१८ ॥
इति ध्यात्वा कृपापूर्णः श्रेष्ठी तावपुषद् वृषौ। तृणादिना प्रासुकेन पयसा गलितेन च ॥ ३१९ ॥
श्रेष्ठ्यष्टम्यां चतुर्दश्यामुपवासात्तपौषधः। अवाचयद्धर्मशास्त्रपुस्तकं शृण्वतोस्तयोः ॥ ३२० ॥
जज्ञाते भद्रकौ तौ च धर्माकर्णनतोऽन्वहम्। श्रेष्ठी यत्राह्नि नाभुंक्त नाभुञ्जातां च तत्र तौ ॥ ३२१ ॥

टि.– *वस्त्रादिदानेन ॥

१ °वर्तते *L* ॥ २ °स्वस्रो° *D, L, M* ॥

तृणादिकं दीयमानमपि तत्र दिने यदा । न वृषौ बुभुजाते तौ तदा श्रेष्ठीत्यचिन्तयत् ॥ ३२२ ॥
मयानुकम्पया पुष्टावियत्कालं वृषाविमौ । अतः परं पोषणीयौ बन्धू साधर्मिकाविति ॥ ३२३ ॥
तयोर्वृषभयोरेवं बहुमानं विशेषतः । चक्रे दिने दिने श्रेष्ठी न हि तौ तद्विधा पशू ॥ ३२४ ॥
भंडीरवणयक्षस्य जज्ञे यात्रोत्सवोऽन्यदा । वाहनानां वाह्केली प्रारेभे ग्रामदारकैः ॥ ३२५ ॥
वयस्यो जिनदासस्य कौतुकी तौ वृषावुभौ । अनापृच्छ्य गृहीत्वाऽगात् स्नेहे छद्मैनमानिता ॥ ३२६ ॥
कुक्कुटाण्डाविव श्वेतौ सदृक्षौ युग्मजाविव । कन्दुकाविव वृत्तांगौ चामरोपमवालधी ॥ ३२७ ॥
उत्पतिष्णू इवोद्धुर्यौ वेगाद्वायोरिवात्मजौ । शकट्यां योजयामास तौ वृषौ श्रेष्ठिनः सुहृत् ॥ ३२८ ॥

(युग्मम्)

तत्सौकुमार्यमविदन् प्राजनाराभिरीरयन् । चित्रीयमाणो लोकानां सोऽकूपस्तावबाहयत् ॥ ३२९ ॥
वाह्केलीकृतपणान् पौरान् सर्वाञ्जिगाय सः । ताभ्यामद्वैतरंहोभ्यां वृषभाभ्यां क्षणादपि ॥ ३३० ॥
आराच्छिद्रोच्छलद्रक्तप्लावितांगौ च तौ वृषौ । जातत्रोटौ श्रेष्ठिगृहे भूयो बद्ध्वा जगाम सः ॥ ३३१ ॥
भोजनावसरे श्रेष्ठी स्वयं यवसपूलभृत् । तयोर्वृषभयोः पार्श्वे ययौ तनययोरिव ॥ ३३२ ॥
व्यात्तास्यौ निःसहौ सास्रौ बहुश्वासौ सवेपथू । [1]आरक्षतक्षरद्रक्तौ प्रेक्ष्य ताविदयुवाच सः ॥ ३३३ ॥

१ आरा° D, L ॥

एतौ पापात्मनोक्षाणौ प्राणेभ्योऽपि प्रियौ मम । मामनापृच्छ्य नयता नीतौ केनेदृशीं दशाम् ॥ ३३४ ॥
श्रेष्ठिनो मित्रवृत्तान्तमाख्यत् परिजनोऽखिलम् । खेदं श्रेष्ठ्यपि सोदर्यविपदीवासदद् भृशम् ॥ ३३५ ॥
तौ वृषावप्यनशनं कर्तुकामौ विवेकिनौ । न मनागजघ्नतुरपि श्रेष्ठिदत्ते तृणाम्भसी ॥ ३३६ ॥
ततश्चाढौकयच्छ्रेष्ठी स्थालमाज्यान्नपूरितम् । संभावयामासतुस्तद् दृशापि हि न तौ वृषौ ॥ ३३७ ॥
भावं ज्ञात्वा तयोर्भक्तप्रत्याख्यानमदत्त सः । तावपि प्रतिपेदाते साभिलाषौ समाहितौ ॥ ३३८ ॥
तयोश्च कृपया श्रेष्ठी स्वयं त्यक्तान्यकर्मकः । नमस्कारान् ददत्तस्थौ बोधयंश्च भवस्थितिम् ॥ ३३९ ॥
शृण्वन्तौ तौ नमस्कारान् भावयन्तौ भवस्थितिम् । समाधिना मृतौ नागकुमारेषु बभूवतुः ॥ ३४० ॥
अथ कंबलशबलाववधेस्तावपश्यताम् । क्रियमाणं सुदाढेन स्वामिनस्तमुपद्रवम् ॥ ३४१ ॥
कृतमन्येन कृत्येन कृत्यमेतद्यदर्हतः । उपसर्गं निषेधावो ध्यात्वैवं तावुपेयतुः ॥ ३४२ ॥
एकः प्रववृते योद्धुं सुदाढेनाहिना सह । द्वितीयः पाणिनोत्पाट्य निन्ये नावं नदीतटे ॥ ३४३ ॥
महर्द्धिकोऽपि सुदाढ आयुःप्रान्ते गलद्बलः । ताभ्यां नूतनदेवत्ववैभवाभ्यामजीयत ॥ ३४४ ॥
नंष्ट्वा सुदंष्ट्रः प्रययौ तौ च नागकुमारकौ । नत्वा प्रभौ ववृषतुः पुष्पगन्धोदके मुदा ॥ ३४५ ॥
नद्या इवापदोऽमुष्या उत्तीर्णास्त्वत्प्रभावतः । इति ब्रुवाणा नौलोका भक्त्या वीरं ववन्दिरे ॥ ३४६ ॥
प्रभुं नत्वेयतुर्नागौ नद्या उत्तीर्य च प्रभुः । यथावदैर्यापथिकीं प्रतिक्रम्यान्यतोऽचलत् ॥ ३४७ ॥

सूक्ष्मार्द्रमृत्तिके गंगासैकते पदपद्धतिः । चक्रादिलाञ्छिता भर्तुरभूद् भूभूषणं स्फुटा ॥ ३४८ ॥
सामुद्रलक्षणाभिज्ञः पुष्पो नाम ददर्श ताम् । एवं च दध्यौ कोऽप्येष एकाकी चक्रवर्त्यगात् ॥ ३४९ ॥
अथाप्यप्राप्तराज्यो वा हृतो वा केनचिच्छलात् । मन्ये संप्रत्यसौ याति तं सेवे सेवकैषिणम् ॥ ३५० ॥
असावस्यामवस्थायां सेवितः फलदः खलु । सेव्यस्य सेवावसरः पुण्येनैव हि लभ्यते ॥ ३५१ ॥
ध्यात्वेत्यनुपदं सोऽगात् स्थूणाके सन्निवेशने । अधोऽशोकस्य चापश्यत्प्रभुं प्रतिमया स्थितम् ॥ ३५२ ॥
श्रीवत्सलाञ्छितं वक्षः *शिरोऽप्युष्णीषलाञ्छितम् । चक्रादिलाञ्छितौ पाणी भुजौ +भुजगराण्निभौ ॥३५३॥
दक्षिणावर्तगंभीरशुषिरं नाभिमंडलम् । लोकोत्तराणि लक्ष्माणि प्रभोरेवं ददर्श सः ॥ ३५४ ॥
एवं चाचिन्तयत् पुष्पो यथाऽयं पादलक्षणैः । लोकोत्तरस्तथान्यैरप्यसौ चक्रीति सूच्यते ॥ ३५५ ॥
अप्येभिर्लक्षणैरेष भिक्षुरित्यस्मि विस्मितः । धिङ् मे शास्त्रश्रमं धिङ् मामस्मिन्नाशाविधायिनम् ॥ ३५६ ॥
प्रतारणाय विश्वस्य स्वस्य कौतूहलाय वा । अनाप्तैरेव शास्त्राणि विहितानीति मन्यते ॥ ३५७ ॥
तेषां वाचा निबद्धाशो धावितोऽस्मि मुधैव हि । मृगतृष्णाजलायेव हरिणो मरुमंडले ॥ ३५८ ॥
एवं विमृश्य पुष्पोऽधाद्विषादमधिकं हृदि । तदा चाचिन्तयच्छक्रः कथं विहरति प्रभुः ॥ ३५९ ॥
अपश्यच्चावधिदृशा स्थूणाके स्वामिनं स्थितम् । तं च नैमित्तिकं पुष्पं विषादाच्छास्त्रदूषकम् ॥ ३६० ॥

टि.-*भगवतः मस्तकोपरि द्वादशांगुलः उच्चः प्रदेशः । + शेषनागः ॥

अथ द्रुतमुपेत्येन्द्रो जिनेन्द्रं प्रतिमास्थितम् । अवन्दत महाऋद्ध्या तस्य पुष्पस्य पश्यतः ॥ ३६१ ॥
शक्रः पुष्पं बभाषे च किं नु शास्त्राणि निन्दसि । तत्कारकांश्च किं तैर्हि न मृषा भाषितं किल ॥ ३६२ ॥
बाह्यान्येव हि जानासि लक्षणान्यान्तराणि तु । स्वामिनः क्षीरधवले अविस्रे मांसशोणिते ॥ ३६३ ॥
मुखपंकजनिःश्वासः पंकजामोदसोदरः । निरामयं मलस्वेदवर्जितं च प्रभोर्वपुः ॥ ३६४ ॥
अयं हि त्रिजगन्नाथो धर्मचक्री जगद्धितः । विश्वाभयप्रदः स्वामी वीरः सिद्धार्थनन्दनः ॥ ३६५ ॥
इन्द्राश्चतुःषष्टिरपि स्वामिनोऽस्य पदातयः । कियन्मात्रं चक्रिणस्ते येभ्यः फलमभीप्ससि ॥ ३६६ ॥
दत्त्वाऽसौ वार्षिकं दानं नितीर्षुर्भवसागरम् । त्यक्तराज्यः परिव्रज्य विहरत्येवमश्रमः ॥ ३६७ ॥
शास्त्राणि संवदन्त्येव मा विषीद मनागपि । ददाम्यभीप्सितं ते च न मुधा स्वामिदर्शनम् ॥ ३६८ ॥
इत्युक्त्वाऽभीप्सितं तस्मै दत्त्वा च त्रिदशेश्वरः । नमस्कृत्य जगन्नाथं यथास्थानं पुनर्ययौ ॥ ३६९ ॥
कायोत्सर्गं पारयित्वा विहरन् भगवानपि । पादन्यासैः पुनानः क्ष्मां प्राप राजगृहं पुरम् ॥ ३७० ॥
पुरस्यादूरतस्तस्य नालंदाया बहिर्भुवि । विशालां स्वाम्यगाच्छालां तन्तुवायस्य कस्यचित् ॥ ३७१ ॥
तन्तुवायमनुज्ञाप्य वर्षा वस्तुं जगद्गुरुः । शालाया एकदेशेऽस्थान्मासक्षपणमाश्रितः ॥ ३७२ ॥
*इतोऽभून्मंखलिर्मंखो भद्रा तस्य च गेहिनी । उभौ विजह्रतुः पृथ्वीं दधानौ चित्रपट्टिकाम् ॥ ३७३ ॥

---

टि.– *चित्रफलकेन यः स्वां आजीविकां करोति ।

ग्रामे शरवणग्रामे सुभद्राऽसूत चान्यदा। द्विजातेर्गोबहुलस्य गोशालायां तनूरुहम् ॥ ३७४ ॥
स गोशालाप्रसूतत्वाद्गोशाल इति संज्ञितः। क्रमादुद्यौवनो मंखशिल्पमभ्यस्तवान्निजम् ॥ ३७५ ॥
निसर्गतः कलिकरः पित्रोरप्यवशंवदः। निर्लक्षणो जन्मतोऽपि सोऽभूत्कूटविचक्षणः ॥ ३७६ ॥
पितृभ्यां कलहं कृत्वा गृहीत्वा चित्रपट्टिकाम्। भ्राम्यन् भिक्षां स एकाकी ययौ राजगृहेऽन्यदा ॥ ३७७ ॥
स्वामिनाऽलंकृते शालाकोणे तत्रानुमान्य तम्। गोशालोऽप्यवसत्सिंहसन्निधाविव जम्बुकः ॥ ३७८ ॥
नाथोऽपि मासक्षपणपारणस्य विधित्सया। विजयश्रेष्ठिनो वेश्म प्राविशत्पाणिभाजनः ॥ ३७९ ॥
भक्त्या महत्या विजयश्रेष्ठी श्रेष्ठमतिः स्वयम्। सम्यग्भोजनविधिना स्वामिनं प्रत्यलाभयत् ॥ ३८० ॥
अहो दानं सुदानं चेत्युच्चैराघोषिणोऽमराः। रत्नवृष्ट्यादिदिव्यानि तद्गृहे पञ्च चक्रिरे ॥ ३८१ ॥
आकर्ण्य तत्तु गोशालोऽचिन्तयद्यदयं मुनिः। न सामान्योऽस्यान्नदातुर्गृहे श्रीर्यदभूदियम् ॥ ३८२ ॥
विहाय चित्रफलकपाखण्डं तदमुं निजम्। अस्य शिष्यीभवाम्यश्च निःफलो नेदृशो गुरुः ॥ ३८३ ॥
तत्रैवं चिन्तयत्येव पारयित्वा जगद्गुरुः। एत्य तत्रैव शालायामस्थात्प्रतिमया प्रभुः ॥ ३८४ ॥
गोशालः स्वामिनं नत्वोवाच वाचंयमस्य ते। मया प्रभावो नाज्ञायि विज्ञेनापि प्रमादतः ॥ ३८५ ॥
शिष्यस्तेऽहं भविष्यामि त्वमेकं[१] शरणं मम। इत्युक्त्वा स तथा चक्रे तूष्णीकोऽस्थात्प्रभुः पुनः ॥ ३८६ ॥

१ मेकः C. D. M. ।

गोशालो भिक्षया प्राणवृत्तिं कुर्वन् दिवानिशम् । नामुञ्चत् स्वामिनः पार्श्वं स्वबुद्धया शिष्यतां गतः ॥ ३८७ ॥
द्वितीयमासक्षपणे स्वामी वेश्मन्युपागतः । आनन्देन गृहस्थेन *खाद्यकैः प्रत्यलाभ्यत ॥ ३८८ ॥
तृतीयमासक्षपणे सुनन्दगृहिणा प्रभुः । †सर्वकामगुणाख्येनाहारेण प्रत्यलाभ्यत ॥ ३८९ ॥
गोशालकोऽपि भैक्षेण कुक्षिपूरणतत्परः । भगवन्तं महावीरमसेवत दिवानिशम् ॥ ३९० ॥
प्राप्तायामूर्जराकायां‡गोशालो ह्यचिन्तयत् । ज्ञान्येष श्रूयत इति परीक्षे ज्ञानमस्य हि ॥ ३९१ ॥
जायमाने प्रतिगृहं वार्षिकेऽस्मिन् महोत्सवे । भिक्षायां किमहं लप्स्ये स्वामिन्नाख्याहि मेऽधुना ॥ ३९२ ॥
सिद्धार्थः स्वामिसंक्रान्तो बभाषे भद्र ! लप्स्यसे । धान्याम्लं कोद्रवकूरमेकं कूटं च रूपकम् ॥ ३९३ ॥
तदाकर्ण्य च गोशालो दिनाऽऽरम्भात्प्रभृत्यपि । विशिष्टभोजनाभ्यर्थी भ्रेवाभ्राम्यद् गृहे गृहे ॥ ३९४ ॥
तथापि कुत्रचित् किंचिन्न कथञ्चिदवाप सः । श्रान्तोऽपराह्णे केनापि निन्ये कर्मकृता गृहे ॥ ३९५ ॥
धान्याम्लकोद्रवकूरे दत्ते तेनापि सोऽपि ते । बुभुजेऽतिक्षुधा लेभे दक्षिणायां च रूपकम् ॥ ३९६ ॥
परीक्षिते रूपकेऽपि कूटे सति स लज्जितः । यद्भावि तद्भवतीति नियतिवादमग्रहीत् ॥ ३९७ ॥
दीक्षातः प्रावृषं स्वामी द्वितीयामतिगम्य ताम् । नालन्दाया निरीयाऽगात् कोल्लाके सन्निवेशने ॥ ३९८ ॥
तदा च बहुलो नाम विप्रो विप्रानभोजयत् । महादरेण स्वगृहे भिक्षार्थी चाययौ प्रभुः ॥ ३९९ ॥

---

टि.—* 'खाजा' इति गुर्जरभाषायाम् । † एतन्नामकेन आहारेण । ‡ कार्तिकस्य पूर्णिमास्याम् ।

सशर्कराज्यक्षैरेय्या स प्रभुं प्रत्यलाभयत् । चक्रुश्च पञ्च दिव्यानि तदोकसि दिवौकसः ॥ ४०० ॥
चतुर्थमासक्षपणपारणं व्यधित प्रभुः । संसारतारणं दातुः श्रद्धातुरपि जन्मिनः ॥ ४०१ ॥
इतश्च सायं गोशालः शालां ह्रीणोऽविशच्छनैः । अपश्यन् स्वामिनं लोकान् क्व स्वामीत्यन्वयुंक्त सः ॥४०२॥
स्वाम्युदन्तं न कोऽप्याख्यत् सोऽन्वेष्टुं स्वामिनं ततः । पर्यट सुचिरं दीनो नालन्दासन्निवेशने ॥ ४०३ ॥
भूयो वराक एकाकी जातोऽस्मीति विचिन्त्य सः । मुण्डयित्वा शिरस्त्यक्तवस्त्रो निरगमत्ततः ॥ ४०४ ॥
गतश्च कोल्लाकेऽश्रौषीद्धन्योऽयं बहुलो द्विजः । मुनौ दानाद्यस्य गृहे रत्नवृष्टिः सुरैः कृता ॥ ४०५ ॥
तच्छ्रुत्वाऽचिन्तयत् सोऽपि प्रभावस्तस्य हीदृशः । तद्गुरोरेव नान्यस्य नूनमत्र स तिष्ठति ॥ ४०६ ॥
एवं विमृश्य सोऽन्वेष्टुं भ्राम्यन्निपुणया दृशा । ऐक्षिष्ट स्थितमेकत्र कायोत्सर्गधरं प्रभुम् ॥ ४०७ ॥
स प्रणम्य प्रभुं स्माह नाहं दीक्षोचितः पुरा । वस्त्रादिसंगादभवं त्यक्तसंगोऽस्मि संप्रति ॥ ४०८ ॥
प्रतिपद्यस्व मां शिष्यं यावज्जीवं गुरुर्भव । त्वां विनेषदपि स्थातुं न क्षमः परमेश्वर ! ॥ ४०९ ॥
नीरागे त्वयि कः स्नेहो नैकहस्ता हि तालिका । स्वामिन्मन्मनः किं तु बलात्त्वामनुधावति ॥ ४१० ॥
त्वयाभ्युपगतं स्वं तु जानाम्येष तथापि हि । स्मेरारविन्दसश्रीकया दृशा मां यन्निरीक्षसे ॥ ४११ ॥
नीरागोऽपि भाव्यनर्थं तद्धवं च विदन्नपि । तद्वचः प्रत्यपादीशो महान्तः क्व न वत्सलाः ? ॥ ४१२ ॥
गोशालेन समं स्वर्णखलाख्यं सन्निवेशनम् । प्रत्यचालीत्प्रभुर्मार्गे युगमात्रप्रदत्तदृक् ॥ ४१३ ॥

मार्गे गोपैः राध्यमानं पायसं प्रेक्ष्य मंखसूः। ऊचेऽस्मि क्षुधितोऽस्म्येहि कुर्मः पायसभोजनम्॥ ४१४॥
सिद्धार्थः स्माह निष्पत्तिं नेदं यास्यति पायसम्। गोशालोऽप्येतत् गोपालान् दुष्टधीरित्यभाषत॥ ४१५॥
देवार्योऽयं त्रिकालज्ञ आख्याति यदसावुखा* । स्फुटिष्यत्यर्धनिष्पन्नपायसैवामभांडवत्॥ ४१६॥
भीता वंशदलैः स्थालीं बबन्धुस्तां च गोपकाः। भूयिष्ठैस्तंदुलैः क्षिप्तैर्विकसद्भिश्च साऽस्फुटत्॥ ४१७॥
आदाय कर्पराण्यादुर्गोपास्तदपि पायसम्। तदलाभे च गोशालोऽत्यन्तं नियतिमग्रहीत्॥ ४१८॥
स्वाम्यगाद् ब्राह्मणग्रामे द्वौ स्तस्तत्र च पाटकौ। तयोर्नन्दोपनन्दाख्यौ स्वामिनौ भ्रातरावुभौ॥ ४१९॥
षष्ठपारणके स्वामी प्राविशन्नन्दपाटके। स दध्युषितकूरेण नन्देन प्रत्यलाभि च॥ ४२०॥
गोशालः पाटकेऽन्यस्मिन् प्रविष्टः प्रेक्ष्य वेश्म च। उत्तुंगमुपनन्दस्य ययौ भिक्षार्थमातुरः॥ ४२१॥
उपनन्दाज्ञया दासी कूरं तस्योषितं ददौ। तच्चानिच्छन्नुपनन्दमाचुक्रोश स दुष्टधीः॥ ४२२॥
उपनन्दोऽवदद्भक्तं नैष गृह्णाति चेत्तदा। अस्य मूर्ध्नि क्षिप क्षिप्रं सापि चक्रे तथैव हि॥ ४२३॥
गोशालः कुपितोऽवोचन्मद्गुरोरस्ति चेत्तपः। तेजो वा तर्हि सद्योऽपि दह्यतामस्य मन्दिरम्॥ ४२४॥
मा स्वामिनामग्रहणाद्वन्ध्यः शापोऽपि भूदिति। तत्रस्थव्यन्तराः सद्माधाक्षुस्तत्तृणपुंजवत्॥ ४२५॥

टि.– * 'हांडली' इति गुर्जरभाषायाम्।
१ °राम° L। २ °पूल M।

स्वामी च प्रययौ चम्पां वर्षारात्रं तृतीयकम् । तत्र चाऽस्थात् प्रतिज्ञातद्विमासक्षपणद्वयः ॥ ४२६ ॥
कायोत्सर्गेणोत्कटिकादिभिस्तैस्तैरथासनैः । तस्थौ मुक्त इवेहापि स्वामी सम्यक्समाधिभृत् ॥ ४२७ ॥
बहिः पुर्यां द्वितीयं द्विमासक्षपणपारणम् । कृत्वा स्वामी सगोशालः कोल्लाकेऽगात्सन्निवेशने ॥ ४२८ ॥
नक्तं तत्र गृहे शून्ये तस्थौ प्रतिमया प्रभुः । तद्द्वारेऽस्थात्तु गोशालो लीत्वा कपिरिवाऽस्थिरः ॥ ४२९ ॥
तदा ग्रामेशतनयः सिंहोऽभिनवयौवनः । विद्युन्मत्या समं दास्या रिरंसुस्तत्र चाविशत् ॥ ४३० ॥
सोऽवोचदुच्चकैरेवं योऽत्रास्ति श्रमणो द्विजः । पान्थो वापि स आख्यातु यामो देशान्तरं वयम् ॥४३१॥
कायोत्सर्गप्रपन्नत्वात्तूष्णीकः स्वाम्यभूत्तदा । तत्तु श्रुत्वापि गोशालः कपटान्नोत्तरं ददौ ॥ ४३२ ॥
अलब्धप्रतिवाक् सिंहश्चिरं रेमे तया सह । क्षणं स्थित्वा च निर्गन्तुं प्रावर्तत ततो गृहात् ॥ ४३३ ॥
गोशालो द्वारदेशस्थः प्रकृत्या दुर्मतिश्चलः । विद्युन्मतीं विनिर्यान्तीं दासीं पस्पर्श पाणिना ॥ ४३४ ॥
स्वामिन् ! स्पृष्टास्मि केनापीत्युच्चकैर्व्याजहार सा । वलित्वा कुपितः सिंहो धृत्वा गोशालमब्रवीत् ॥४३५॥
अरे रे छद्मना छन्नः स्थित्वाऽनाचारमावयोः । पश्यन्नस्था भाषितोऽपि तदा नादास्त्वमुत्तरम् ॥ ४३६ ॥
इत्युक्त्वा कुट्टयित्वा तं सिंहः स्वस्थानमभ्यगात् । गोशालः स्वामिनं स्माह पश्यतां वो हतोऽस्म्यहम् ४३७
सिद्धार्थोऽथावदच्छीलमस्मद्वत्किं न रक्षसि । आचरंश्चापलं चैवं द्वारस्थः किं न कुट्यसे ? ॥ ४३८ ॥

१ °रे L, M ।

निष्क्रम्य स्वाम्यगाद् ग्रामे पत्रकालेऽभिधानतः । प्राग्वच्चास्थाच्छून्यगृहे निशायां प्रतिमाधरः ॥ ४३९ ॥
भयान्निलीय गोशालः कोणेऽस्थात्तत्र वेश्मनि । रन्तुं दन्तिलया दास्याऽऽगात् स्कन्दो ग्रामणीसुतः ॥ ४४० ॥
सिंहवद्व्याहरत् सोऽपि न च कोऽप्युत्तरं ददौ । क्रीडित्वा निर्ययौ स्कन्दो गोशालोऽहसदुच्चकैः ॥ ४४१ ॥
छन्नः पिशाचवत्स्थित्वा हसत्युच्चैस्तु को न्विति । अल्पैस्तं कुट्टयामास स्कन्दोऽगादथ वेश्मनि ॥ ४४२ ॥
गोशालोऽप्यब्रवीन्नाथं स्वामिधर्मः क्विरेह ते । निर्दोषं हन्यमानस्य त्राणं मे कुरुषे न यत् ? ॥ ४४३ ॥
सिद्धार्थः पुनरूचे तं भो मूर्खैवमनेकशः । अनर्थं मुखदोषेण त्वं तित्तिरिरिवाश्नुषे ॥ ४४४ ॥
कुमारसन्निवेशेऽगाद्भगवानथ तत्र च । चंपकरमणीयाख्योद्यानेऽभूत् प्रतिमाधरः ॥ ४४५ ॥
तत्र चासीद्धनधान्यसमृद्धः कूपनयाह्वयः । कुलालः प्रियमदिरो मदिराकीटवत्सदा ॥ ४४६ ॥
तच्छालायां पार्श्वनाथशिष्यः शिष्यगणावृतः । बहुश्रुतो मुनिचन्द्राचार्य आसीत्तदा स्थितः ॥ ४४७ ॥
शिष्यं गच्छे स्थापयित्वा स सूरिर्वर्धनाभिधम् । जिनकल्पप्रतिकर्म विदधेऽत्यन्तदुष्करम् ॥ ४४८ ॥
तपःसत्त्वसूत्रैकत्वबलानां तुलनाभिदाम् । भावयन् स्वं द्वितीयया सोऽन्यदाऽस्थात्समाहितः ॥ ४४९ ॥
इतश्चोवाच गोशालो नाथं मध्यन्दिनक्षणे । समयो वर्तते यामो भिक्षार्थं ग्राममध्यतः ॥ ४५० ॥
सिद्धार्थोऽथाब्रवीदद्य वर्तामह उपोषिताः । गोशालस्त्वविशद् ग्रामे भिक्षाहेतोर्बुभुक्षितः ॥ ४५१ ॥

सोऽपश्यत्पार्श्वशिष्यांस्तान् विचित्रवसनावृतान् । पात्रादिधारिणः के नु यूयमित्यन्वयुंक्त च ॥ ४५२ ॥
निर्ग्रन्थाः पार्श्वशिष्याः स्मो वयमित्यूचिरेऽथ ते । गोशालोऽपि हसन्नूचे धिग्वो मिथ्याभिभाषिणः ॥४५३॥
कथं नु यूयं निर्ग्रन्था वस्त्रादिग्रन्थधारिणः । केवलं जीविकाहेतोरियं पाखंडकल्पना ॥ ४५४ ॥
वस्त्रादिसंगरहितो निरपेक्षो वपुष्यपि । धर्माचार्यो हि यादृक्षो निर्ग्रन्थास्तादृशाः खलु ॥ ४५५ ॥
ते जिनेन्द्रमजानन्तः प्रत्यूचुर्यादृशो भवान् । धर्माचार्योऽपि ते तादृगात्तलिंगः स्वयं किमु ॥ ४५६ ॥
क्रुधा चुक्रोश गोशालो मम धर्मगुरोर्यदि । तपस्तेजोऽस्ति तदयं दह्यतां व उपाश्रयः ॥ ४५७ ॥
तेऽप्यब्रुवंस्त्वद्वचनान्न हि दह्यामहे वयम् । गोशालोऽपि विलक्षः सन् गत्वा स्वामिनमभ्यधात् ॥ ४५८ ॥
दृष्टा मयाऽद्य सग्रन्था निन्दन्तो वस्तपस्विनः । दह्यतामाश्रमोऽसावित्याक्रुष्टं च रुषा मया ॥ ४५९ ॥
तथापि नाश्रयस्तेषामदह्यत मनागपि । तत्र किं कारणं? स्वामिन्नाख्याहि परमार्थतः ॥ ४६० ॥
सिद्धार्थोऽप्यवदच्छिष्याः श्रीपार्श्वस्वामिनो हि ते । तेषामुपाश्रयो हन्त त्वद्गिरा दह्यते कथम्? ॥ ४६१ ॥
अत्रान्तरे निशा जज्ञे मुनिचन्द्राख्यसूरयः । उपाश्रयाद्बहिर्भूत्वा तस्थुः प्रतिमया तदा ॥ ४६२ ॥
स च कूपनयः श्रेणिभक्ते पीतसुरो बहिः । मत्तो घूर्णन् समागच्छन्नाचार्यांस्तानुदैक्षत ॥ ४६३ ॥
आचार्यांश्चौरबुद्ध्या तान् गृहीत्वा निर्दयं गले । निरुच्छ्वासीचकाराशु कुम्भकारो दुराशयः ॥ ४६४ ॥

१ सः D ||

शुभध्यानादचलिता वेदनां तां सहिष्णवः । सद्यो जातावधिज्ञाना मृत्वाऽऽचार्या दिवं ययुः ॥ ४६५ ॥
तेषामुपरि पुष्पाणि प्रत्यूषपवना इव । प्रवर्षन्तो महिमानमासन्नव्यन्तरा व्यधुः ॥ ४६६ ॥
इतोऽपि स च गोशालो विद्युन्मालामिवाम्बरे । तेजोरूपां देवपङ्क्तिं दृष्ट्वाऽऽचख्यौ इति प्रभोः ॥ ४६७ ॥
त्वद्विद्विषत्प्रत्यनीकानां दह्यते किं प्रतिश्रयः । ज्योत्स्ना ज्वालाकुलेनानुमीयतेऽदः प्रदीपनम् ॥ ४६८ ॥
सिद्धार्थोऽप्यभ्यधान्मैवम[1]भ्यधास्ते हि सूरयः । दिवं गताः शुभध्यानाच्छुभध्यानं हि कामधुक् ॥ ४६९ ॥
तेषां कर्तुं महिमानमेते तेजोमयाः सुराः । यैस्ते प्रदीपनभ्रान्तिरुत्पन्ना स्वल्पमेधसः ॥ ४७० ॥
तद् द्रष्टुं कौतुकात्तत्र गोशालः प्रययौ द्रुतम् । स्वस्थानं च ययुर्देवाः केदृशां देवदर्शनम् ॥ ४७१ ॥
पुष्पगन्धाम्बुवृष्टिं स तत्र दृष्ट्वा प्रमोदभाक् । गत्वा प्रतिश्रये सुप्तांस्तच्छिष्यानभ्यधादिति ॥ ४७२ ॥
किं भवन्तो दुष्टशिष्या मुण्डा भिक्षां यदृच्छया । भुक्त्वा दिने निशां सर्वां शेरतेऽजगरा इव ॥ ४७३ ॥
न हीदमपि जानीथ यत्सूरिः प्राप पञ्चताम् । गुरुषु प्रतिबन्धोऽयमहो वः कुलजन्मनाम् ॥ ४७४ ॥
उत्तस्थुस्तेऽपि तच्छब्दात् पिशाच इव को न्वसौ । एवं शब्दायते इति चिन्तयन्तो महर्षयः ॥ ४७५ ॥
तेऽथ जग्मुरुपाचार्यमाचार्यं प्रेक्ष्य तं तथा । चिरं निनिन्दुरात्मानं कुलीना इव नन्दनाः ॥ ४७६ ॥
तान् गोशालोऽपि निर्भर्त्स्य स्वेच्छालापविदूषकः । इयाय नाथं नाथोऽपि चोराकेऽगात्सन्निवेशने ॥ ४७७ ॥

१ °मिषा° C, M | L प्रतौ त्रुटितम् एतद् पद्यम् ॥

प्रतिचक्रभयात्तत्रारक्षैश्चौरगवेषिभिः । कायोत्सर्गस्थितः स्वामी सगोशालोऽप्यदृश्यत ॥ ४७८ ॥
ब्रूहि कोऽसीति तैः पृष्टः स मौनाभिग्रहः प्रभुः । न किञ्चिदभ्यधाद्धार्मिया हि बधिरा इव ॥ ४७९ ॥
कस्यापि हेरिको ह्येष नूनं यन्मौनभागसौ । स्वामिनं ते सगोशालं जगृहुः क्रूरबुद्धयः ॥ ४८० ॥
गोशालं शाकिनीवत्ते बद्ध्वा कूपे निचिक्षिपुः । मुहुर्घटीवद्विदधुन्यँचनोदंचनानि च ॥ ४८१ ॥
पार्श्वशिष्ये उत्पलस्य जामी सोमाजयन्तिके । साधुवर्यौ परिव्राजौ चोराकेऽवसतां तदा ॥ ४८२ ॥
ईदृग्रूपौ नरौ कौचित् क्षेपणोत्क्षेपणैर्जले । आरक्षैः पीड्यमानौ स्तस्ते इत्यशृणुतां जनात् ॥ ४८३ ॥
छद्मस्थश्चरमतीर्थंकरोऽसौ नु भवेदिति । उपेत्य ते क्षणान्नाथं तथावस्थमपश्यताम् ॥ ४८४ ॥
आरक्षानूचतुश्चैवं किं रे मूर्खा मुमूर्षवः ! । न जानीथ प्रभुममुं सिद्धार्थनृपनन्दनम् ॥ ४८५ ॥
ते भीताः स्वामिनं मुक्त्वा नत्वा चाक्षमयन्मुहुः । महान्तो हि न कुप्यन्ति क्षम्यन्ते त्वात्मशंकितैः ॥ ४८६ ॥
दिनानि कतिचित्तत्रातिवाह्य परमेश्वरः । तुर्यं प्रावृषमत्येतुं पृष्ठचम्पां पुरीं ययौ ॥ ४८७ ॥
चतुर्मासक्षपणकृद्विविधप्रतिमाधरः । चतुर्मासीं जगन्नाथस्तत्र तस्थावयस्थितः ॥ ४८८ ॥
चतुर्मास्यन्तदिवसे पारयित्वा बहिः क्वचित् । जगाम त्रिजगन्नाथो नगरं कृतमंगलम् ॥ ४८९ ॥
दरिद्रस्थविराभिख्याः सारम्भाः सपरिग्रहाः । सकलत्राः ससन्तानास्तत्र पाखण्डिनोऽवसन् ॥ ४९० ॥
मध्ये तत्पाटकस्यासीदेकं देवकुलं महत् । तेषां कुलक्रमायातदेवताप्रतिमांकितम् ॥ ४९१ ॥ ॥ ७९ ॥

तस्य देवकुलस्यैककोणे तस्थौ समाहितः । तत्स्तम्भ इव निष्कम्पः कायोत्सर्गधरः प्रभुः ॥ ४९२ ॥
माघमासे तदा रात्रौ शीतमासीत् सुदुस्सहम् । तेषां पाखण्डिनां देवकुले चाभून्महोत्सवः ॥ ४९३ ॥
ते पुत्रादिपरीवारास्तस्मिन्नायतने मुदा । तदा संभूय ननृतुर्जगुः परिजजागरुः ॥ ४९४ ॥
हसन्नूचेऽथ गोशालः पाखण्डाः केऽप्यमी बत । येषां पत्न्यो मद्यपानं गीतनृत्यादि चोच्चकैः ॥ ४९५ ॥
तच्छ्रुत्वा कुपितास्तेऽपि सारमेयमिवालयात् । कण्ठे गृहीत्वा गोशालं तत्कालं निरसारयन् ॥ ४९६ ॥
शीतसंकुचितांगोऽस्थाद्गोशालोऽथ हकारवत् । वादयन्दन्तपंक्तिं च वैणिको वल्लकीमिव ॥ ४९७ ॥
गोशालं सानुकम्पास्ते तत्र प्रावेशयन् पुनः । सोऽपशीतो मुहूर्तेन तथैव पुनरभ्यधात् ॥ ४९८ ॥
स तैर्निःसारितो भूयो भूयश्चापि प्रवेशितः । एवं कोपकृपाभ्यां ते तस्य त्रिरिति चक्रिरे ॥ ४९९ ॥
तुर्यवारेऽथ गोशालः प्रविष्टोऽप्यब्रवीदिति । सद्भूतार्थाभिधानेऽपि को वः कोपोऽल्पमेधसाम् ॥ ५०० ॥
निजाय दुश्चरित्राय पाखण्डाः किं न कुप्यथ ? । स्फुटार्थवादिनेऽमुष्मै मह्यं द्रुह्यथ किं मुहुः ॥ ५०१ ॥
उत्तिष्ठतोऽथ पाखण्डयूनस्तत्कुट्टनेच्छया । निवारयन्तस्तद्वृद्धा एवमभ्यधुरुच्चकैः ॥ ५०२ ॥
देवार्यस्य तपोराशेः कोऽप्यमुष्य महात्मनः । पीठधारश्छत्रधारोऽपरो वा स्यादुपासकः ॥ ५०३ ॥
अनेन भाषितेनाऽलं भाषतां स्वेच्छयाप्यसौ । श्रोतुं चेन्न क्षमास्तद्भोः कुरुध्वं वाद्यवादनम् ॥ ५०४ ॥
तथैव चक्रिरे तेऽपि जातेऽथ तपनोदये । श्रावस्तीं स्वाम्यगात्तस्थौ बहिश्च प्रतिमाधरः ॥ ५०५ ॥

भोजनावसरे प्राप्ते गोशालः प्रभुमभ्यधात् । भिक्षार्थं भगवन्नेहि जन्मसारं हि भोजनम् ॥ ५०६ ॥
सिद्धार्थः प्राग्वदित्यूचे हंहो वयमुपोषिताः । गोशालोऽपृच्छदथ स्यान्ममाहारोऽद्य कीदृशः ॥ ५०७ ॥
सिद्धार्थोऽप्याख्यदधुना नृमांसं भक्षयिष्यसि । गोशाल ऊचे तद्भोक्ष्ये मांसगन्धोऽपि यत्र न ॥ ५०८ ॥
एवं निश्चित्य भिक्षायै श्रावस्तीं सोऽविशत्पुरीम् । इतश्च तस्यां नगर्यां पितृदत्तोऽवसद् गृही ॥ ५०९ ॥
श्रीभद्रा तत्प्रिया *निन्दुर्नैमित्तं शिवदत्तकम् । अपत्यं मे कथं जीवेदित्यपृच्छत् कृतादरा ॥ ५१० ॥
सोऽप्याचख्यौ जातमृतं पिष्ट्वा सासृक्पलं शिशुम् । क्षीरेण पायसीकृत्य सर्पिर्मधुसमन्वितम् ॥ ५११ ॥
यच्छद्धूलितपादाय भोक्तुं दत्से सुभिक्षवे । तज्जीविष्यन्त्यपत्यानि नूनं नश्यत्प्रसूतिके ! ॥५१२॥ (युग्मम्)
भुक्त्वा तत्र गते गेहद्वारं कार्यं त्वयान्यथा । ज्ञात्वा तद्भोजनं क्रुद्धो मा धाक्षीत्स गृहं तव ॥ ५१३ ॥
मृतार्भं पायसीचक्रे स्वं तथैव सुतार्थिनी । गोशालायागतायाऽदात्तदानीं भक्तितश्च सा ॥ ५१४ ॥
भुक्त्वा च गत्वा स्वाम्यग्रेऽवोचच्चान्नश्चिरादसि । सिद्धार्थोऽप्याख्यदेतस्मै पायसं तत्तथा कृतम् ॥ ५१५ ॥
वबाम तत्तु गोशालो मुखे क्षिप्त्वा निजांगुलीम् । नखाद्यवयवांस्तत्र ददर्श च चुकोप च ॥ ५१६ ॥
ययौ तद्वेश्म चान्वेष्टुं तद्द्वारे त्वन्यथा कृते । नाज्ञासीत्तत्तु गोशालो गोपाल इव लक्षणम् ॥ ५१७ ॥
ततोऽप्युवाच गोशालस्तपस्तेजश्च मद्गुरोः । यदि तद्दह्यतामेष प्रदेशः सकलोऽपि हि ॥ ५१८ ॥

टि.– *निन्दुः मृतापत्यजननिस्त्री ।

माऽन्यथा जिनमाहात्म्यं भूदिति व्यन्तरामराः । तत्र सन्निहिताः सर्वं प्रदेशमदहंस्तकम् ॥ ५१९ ॥
किंचित् स्थित्वा प्रभुरगाद् ग्रामं नाम्ना हरिद्रुकम् । बहिर्हरिद्रुवृक्षस्य तलेऽस्थात् प्रतिमाधरः ॥ ५२० ॥
पत्रच्छायातपत्रस्य तले तस्यैव शाखिनः । तदाऽवात्सीन्महासार्थः श्रावस्तीं नगरीं गमी ॥ ५२१ ॥
स तु सार्थः शीतभीतो व्याघ्रभीत इवानलम् । नक्तमज्वालयत्प्रातरुत्थाय च ययौ पुरः ॥ ५२२ ॥
स प्रमादादशान्तोऽग्निर्व्याधिवत्प्रसरन् क्रमात् । आगादुपमहावीरं मध्यंभोधीव वाडवः ॥ ५२३ ॥
एत्येष वह्निर्भगवन्नश्य नश्येत्यथ ब्रुवन् । काकनाशं प्रणश्यागाद्गोशालः शीघ्रमन्यतः ॥ ५२४ ॥
श्रुत्वापि तद्वचः स्वामी ध्यानानलमिवानलम् । तं कर्मेन्धनदाहाय मन्वानोऽस्थादतिस्थिरः ॥ ५२५ ॥
चरणौ स्वामिनस्तेन वह्निना श्यामलीकृतौ । हैमनेन तुषारेण पद्मकोशाविवाधिकम् ॥ ५२६ ॥
शान्ते वह्नौ सगोशालो ग्रामेऽगाल्लांगलाभिधे । स्वाम्यस्थाच्च प्रतिमया वासुदेवनिकेतने ॥ ५२७ ॥
क्रीडायातान् ग्रामडिम्भान् गोशालस्तत्र कौतुकी । प्रेतवद्विकृतं रूपं कृत्वाऽभीषयताभितः ॥ ५२८ ॥
भयात् केऽपि पतत्त्रस्ताः स्फुटन्नासाश्च केचन । प्रस्खलद्गतयो नेशुर्ग्रामाभिमुखमर्भकाः ॥ ५२९ ॥
अभ्येत्य पितरस्तेषां गोशालं प्रेक्ष्य तादृशम् । अर्भान् किं त्रासयसीति जल्पन्तोऽकुट्टयन् भृशम् ॥५३०॥
तद्वृद्धाः स्वामिनं प्रेक्ष्य स्वानुचुर्मुच्यतामयम् । देवार्यस्यास्य संभाव्य एष शुश्रूषकः खलु ॥ ५३१ ॥

१° रं मध्यांभो° *M* । रं मध्येंभो° *L* ॥

तन्मुक्त ऊचे गोशालः स्वामिन्नद्यापि किं नु माम् । उपेक्षसे हन्यमानं वज्रवन्निष्ठुरोऽसि हा ॥ ५३२ ॥
सिद्धार्थस्तमभाषिष्ट सुष्ठ्वद्यापि निहन्यसे । व्याधिनेवाङ्गोत्थितेन स्वभावेनामुनैव हि ॥ ५३३ ॥
कायोत्सर्गं पारयित्वा ग्राम आवर्तनामनि । गत्वा स्वामी बलदेवौकस्यस्थात् प्रतिमाधरः ॥ ५३४ ॥
डिम्भांस्तत्रापि गोशालो भीषयामास दुर्ललन् । तत्पितृभिः कुट्यते स्म चक्रीवानिव दुर्मदः ॥ ५३५ ॥
गतेषु तत्पितृष्वर्भान् पुनर्भीषयते स्म सः । प्राणात्ययेऽपि जन्तूनां प्रकृतिः खलु दुस्त्यजा ॥ ५३६ ॥
क्रुद्धास्तत्पितरोऽभ्येत्य परस्परमदोऽवदन् । वराकं बालकुट्टाकं कुट्टयित्वालमेनकम् ॥ ५३७ ॥
स्वाम्यस्य कुट्यतामेष य एनं न निषेधति । भृत्यानामपराधे हि भर्तुर्दण्ड इति स्थितिः ॥ ५३८ ॥
हित्वागस्यपि गोशालं शालावृक्षमिवाथ ते । उदस्तदण्डाः श्रीवीरमभ्यढौकन्त दुर्धियः ॥ ५३९ ॥
तत्रस्थव्यन्तरेणार्हद्गृह्येणाधिष्ठिता रुषा । साक्षात्सीरीव सीरं चोत्सीरोदस्थाच्च तद्गृहे ॥ ५४० ॥
आशंकाविस्मयाकीर्णाः पतित्वा पादपद्मयोः । स्वामिनं क्षमयामासुस्ते ग्रामीणाः स्वनिन्दिनः ॥ ५४१ ॥
ततश्च प्रययौ स्वामी चोराके सन्निवेशने । तत्रैकत्र रहःस्थाने तस्थौ च प्रतिमाधरः ॥ ५४२ ॥
गोशालो नाथमित्यूचे गन्तव्यं चर्यया न वा ? । सिद्धार्थोऽभिदधेऽस्माकमुपवासोऽद्य वर्तते ॥ ५४३ ॥
गोशालः क्षुधितोऽविक्षद् ग्रामे भिक्षार्थमुत्सुकः । गोष्ठीभक्तं तदा तत्र राध्यमानं ददर्श च ॥ ५४४ ॥

१ दत्तेनाधि° ॥ M ॥

भिक्षाक्षणाऽभून्नचान लीनो गोशाल ऐक्षत । तत्र ग्रामे तदानीं चाऽभवच्चौरभयं महत् ॥ ५४५ ॥
चौरोऽयं चौरचारो वा निलीनो यदुदीक्षते । एवं वितर्क्य ते ग्राम्या गोशालकमकुट्टयन् ॥ ५४६ ॥
मम धर्मगुरोस्तेजस्तपो वा यदि तद् द्रुतम् । दह्यतां मण्डपोऽमीषामिति गोशालकोऽशपत् ॥ ५४७ ॥
व्यन्तरैर्भगवद्भक्तैरदह्यत स मंडपः । जगाम च जगन्नाथः सन्निवेशं कलम्बुकम् ॥ ५४८ ॥
तत्रोभौ भ्रातरौ मेघः कालहस्ती च सैन्यपौ । कालहस्ती तदा सैन्यैरधावच्चौरपृच्छनः ॥ ५४९ ॥
गोशालसहितं नाथमागच्छन्तं ददर्श सः । चौरावित्याशशंके च तादृशामीदृशी हि धीः ॥ ५५० ॥
कौ युवामिति सोऽपृच्छत् स्वामी मौनीत्युवाच न । केलिप्रियत्वाद्गोशालोऽप्यस्थान्मौनी प्लवंगवत् ॥ ५५१ ॥
गोशालं स्वामिनमपि स बद्ध्वा भ्रातुरार्पयत् । स्वामिनं दृष्टपूर्वी च मेघः सिद्धार्थसेवकः ॥ ५५२ ॥
क्षमयित्वाऽमुचन्मेघो नाथं नाथोऽपि चावधेः । ज्ञात्वाऽचिन्तयदद्यापि [1]निर्जार्यं बहु कर्म मे ॥ ५५३ ॥
कर्मासहायैस्तन्मन्ये न हि क्षय्यं झगित्यपि । जय्यं महद् द्विषच्चक्रं विना न खलु सैनिकैः ॥ ५५४ ॥
आर्यदेशे विहरता सहाया दुर्लभा मया । तस्मादनार्यदेशेषु विहरिष्यामि संप्रति ॥ ५५५ ॥
एवं विमृश्य भगवान्निसर्गक्रूरपूरुषम् । विवेश [1]लाढाविषयं यादोघोरमिवार्णवम् ॥ ५५६ ॥

---

१ निर्जार्यं *C*, निर्जीर्यं *D*, निर्जेयं *M* ॥
१ लाढा° *C*, *L* । लाट° *M* ॥

मुण्ड इत्यहनन् केऽपि *स्पश इत्यपरेऽधरन् । बबन्धुर्दस्युरित्येके श्रीवीरं तत्र पूरुषाः ॥ ५५७ ॥
भषणान्मुमुचुः केऽपि प्रतिस्वामि कुतूहलात् । प्रभुः स्वकृत्या निर्वाहकालेऽभ्याशे च किंकराः ॥ ५५८ ॥
अमोदतोपसर्गैस्तैः कर्मणां क्षपणात्प्रभुः । अत्युग्रैर्भैषजै रोगी रोगनिर्हरणादिव ॥ ५५९ ॥
गोशालोऽप्यनुलग्नः सन् सेहे विविधवेदनाः । बन्धनताडनाद्युत्था वनानीत इव द्विपः ॥ ५६० ॥
तत्रैवं भूरिशः कृत्वा कर्मनिर्जरणां प्रभुः । कृतकृत्य इवाचालीदार्यदेशस्य संमुखम् ॥ ५६१ ॥
यान्तं च स्वामिनं पूर्णकलशग्रामसन्निधौ । प्रवेष्टुकामौ लाढोर्व्यां तस्करौ द्वावपश्यताम् ॥ ५६२ ॥
तावसौ दुःशकुनमित्युद्यतासी जिघांसया । प्रति प्रभुं दधावाते प्रेतावुल्कार्त्रिकाविव ॥ ५६३ ॥
वर्ततेऽद्य कथं स्वामीत्युच्चिन्त्यो वज्रभृत्तदा । ददर्शावधिना नाथं जिघांसू तौ च तस्करौ ॥ ५६४ ॥
तौ वज्रेणावधीद्वज्री वज्रशैलक्षमौजसा । दन्तिक्षोदक्षमेणेव पाणिना हरिणौ हरिः ॥ ५६५ ॥
क्रमेण भद्दिलपुरे स्वाम्यगात्तत्र पंचमीम् । निन्ये वर्षाचतुर्मासीं चतुर्मासीमुपोषितः ॥ ५६६ ॥
पारयित्वा बहिः क्वापि विहरंश्च प्रभुः क्रमात् । ग्रामे जगाम कदलीसमागम इतीरिते ॥ ५६७ ॥
तत्राथास्तारिकाभक्तं† दीयमानं तदाऽर्थिनाम् । विलोक्योवाच गोशालो स्वामिन्नेह्यत्र भुज्यताम् ॥ ५६८ ॥
सिद्धार्थोऽभिदधेऽस्माकमुपवासोऽद्य वर्तते । भोक्ष्येऽहमेकोऽपीत्युक्त्वा तत्र गोशालको ययौ ॥ ५६९ ॥

१ लाढां' C L M ॥
टि.– *स्पशः गुप्तचरः । † सदाव्रतभोजनम् ॥

भुञ्जानस्तत्र गोशालः पिशाच इव नाऽतृपत् । प्राकथाः स्थालं महत् सर्वान्नपूर्णं तस्य चार्पयन् ॥ ५७० ॥
तद्भक्तमखिलं भोक्तुं गोशालो न ह्यभूत्क्षमः । आकंठमात्राहारो यदाचामेऽप्यलसायते ॥ ५७१ ॥
स्वाहारशक्तेरप्यज्ञः किं दुष्कालोऽसि मूर्तिमान् ? । इत्युक्त्वा चिक्षिपुर्भक्तस्थालं तन्मूर्ध्नि तज्जनाः ॥ ५७२॥
तुन्दं परामृशंस्तृप्त्या गोशालोऽगाद्यथागतम् । जम्बूखण्डाभिधं ग्रामं जगाम भगवानपि ॥ ५७३ ॥
प्रतिमास्थे प्रभौ तत्रास्तारिकाभक्तलिप्सया । गतो गोशालकः प्राग्वत्प्राप भोजनधर्षणे ॥ ५७४ ॥
क्रमेण प्रययौ स्वामी तुंबाके सन्निवेशने । बहिश्चास्थात्प्रतिमया गोशालो ग्राममभ्यगात् ॥ ५७५ ॥
तत्र पार्श्वशिष्याश्चन्दिषणान् वृद्धान् बहुश्रुतान् । परिवारभृतो मुक्त्वा गच्छचिन्तामशेषतः ॥ ५७६ ॥
जिनकल्पप्रतिकर्म प्रपन्नान्मुनिचन्द्रवत् । दृष्ट्वा जहास गोशालः स्वाम्यभ्यर्णमगात्पुनः ॥ ५७७ ॥ (युग्मम्)
नक्तं चतुष्के ते तस्थुर्नन्दिषेणमहर्षयः । कायोत्सर्गभृतो धर्मध्यानस्थाः स्थाणुवत्स्थिराः ॥ ५७८ ॥
आरक्षेण च दृष्टास्ते चौरभ्रान्त्या च जघ्निरे । सद्यो जातावधिज्ञाना मृत्वा दिवमुपासदन् ॥ ५७९ ॥
प्रेक्ष्य गोशालकस्तेषां महिमानं कृतं सुरैः । तच्छिष्याणामुपेत्याऽख्यनुच्चैर्भर्त्सनपूर्वकम् ॥ ५८० ॥
अथाऽगाद्विहरन् वीरः कूपिकां सन्निवेशनम् । तत्रारक्षैः सगोशालः स्पशभ्रान्त्या कदर्थितः ॥ ५८१ ॥
देवार्यो रूपवान् शान्तो युवारक्षैः स्पशभ्रमात् । निरागास्ताड्यमानोऽस्तीत्युल्लापोऽभूज्जनेऽखिले ॥ ५८२ ॥

---

१° माना° *M* ।

पार्श्वशिष्ये च प्रगल्भाविजये प्रोज्झितव्रते। निर्वाहाय परिव्राट्त्वं प्रपन्ने तत्र तिष्ठतः ॥ ५८३ ॥
वार्तामाकर्ण्य तां मा भूद्वीरोऽर्हन्निति शंकया। तत्रेयतुस्तथास्थं च भगवन्तमपश्यताम् ॥ ५८४ ॥ (युग्मम्)
ते स्वामिनं ववन्दाते आरक्षांश्चैवमूचतुः। रे मूर्खा! किं न जानीथ वीरं सिद्धार्थनन्दनम् ॥ ५८५ ॥
शीघ्रं मुञ्चत चेज्ज्ञाता शक्रो व्यलिकरं ह्यमुम्। पातयिष्यति वो मूर्ध्नि वज्रं प्राणहरं तदा ॥ ५८६ ॥
अथ तैश्चकितैर्मुक्तः क्षमितश्च प्रभुः पुरीम्। वैशालीं प्रति चचाल द्वौ मार्गौ स्तस्तदन्तरे ॥ ५८७ ॥
तत्रावोचत गोशालो नायास्यामि त्वया समम्। मां हन्यमानमपि यत्त्वं तटस्थ इवेक्षसे ॥ ५८८ ॥
अन्यत्तवोपसर्गैः स्युरुपसर्गा ममापि हि। यदग्निः शुष्कसंसर्गाद्दहत्यार्द्रमपि क्षणात् ॥ ५८९ ॥
अन्यच्च लोको मामादौ निहन्ति त्वां ततः खलु। क्लेशाद्वोऽनुवृत्तिश्च जायते वा न वा मम ॥ ५९० ॥
ग्रामखंडे च रथ्ये चारण्ये च नगरेऽपि च। आतपे मंडपे चापि वह्नौ च सलिलेऽपि च ॥ ५९१ ॥
जिघांसौ सेवके चापि निर्विशेषस्य ते ननु। सेवां को नाम कुर्वीत न योऽहमिव मूढधीः ॥५९२॥ (युग्मम्)
त्वत्सेवा तालसेवेव मया भ्रान्तेन या कृता। सा स्मर्तव्याऽतः परं तां करिष्यामि न खल्वहम् ॥५९३॥
सिद्धार्थोऽथावदत्तुभ्यं रोचते यत्कुरुष्व तत्। इयमेव हि नः शैली सा भवेज्जातु नान्यथा ॥ ५९४ ॥
ततो जगाम भगवान् वैशालीगामिनाध्वना। प्रचचाल च गोशाल एको राजगृहाध्वना ॥ ५९५ ॥
गोशालोऽयान्महारण्यं चौरपंचशतान्वितम्। विवेश मूषक इव सर्पाकीर्णं महाबिलम् ॥ ५९६ ॥

१ °संपर्काद्° M ॥

मूक्षारूढश्चौरपुमान् गृध्रवद् दूरतोऽपि तम् । ददर्शाख्यच्च चौराणां नग्नः कोऽप्येत्यकिंचनः ॥ ५९७ ॥
तेऽप्यूचिरे तथाप्येष न मोच्यः स्याच्चरोऽप्ययम् । किं चैष नः पराभूय यातीदमपि नोचितम् ॥ ५९८ ॥
एवं चाभ्यर्णमायातं गोशालं मातुलेहि भोः । वदन्तः पृथगिति तेऽध्यारुह्य तमवाहयन् ॥ ५९९ ॥
पृथक् पृथग्वाहयत्सु तेषां गोशालकोऽभवत् । ग्लानदोषवपुस्ते च चौराः प्रययुरन्यतः ॥ ६०० ॥
अचिन्तयच्च गोशालो विपत्प्रथमतोऽप्यसौ । शुनेव स्वामिहीनेन मया लब्धाऽद्य दुःसहा ॥ ६०१ ॥
भर्तुश्च विपदं घ्नन्ति देवाः शक्रादयोऽपि हि । तत्पादशरणस्थस्य ममापि विपदोऽत्यगुः ॥ ६०२ ॥
क्षमं स्वयमपि त्रातुमुदासीनं तु कारणात् । मन्दभाग्यो निधिमिव तं प्राप्स्यामि कथं पुनः ॥ ६०३ ॥
अन्वेष्यामि तमेवेति निश्चित्यातीत्य तद्वनम् । गोशालोऽश्रान्तमभ्राम्यत् प्रभुपाददिदृक्षया ॥ ६०४ ॥
स्वामी जगाम वैशाल्यां शालां कर्मारसंश्रिताम् । अनुज्ञाप्य जनांस्तत्स्थांस्तस्थौ च प्रतिमाधरः ॥ ६०५ ॥
कर्मारो रोगितश्चैकः षण्मास्या कल्यतां गतः । शुभेऽहनि स्वजनेन वृतः शालामियाय ताम् ॥ ६०६ ॥
तत्राग्रे स्वामिनं दृष्ट्वा सोऽचिन्तयदहो इदम् । प्रथमेऽप्यह्नि पाखण्डिदर्शनाशकुनं मम ॥ ६०७ ॥
इहैवामंगलमिदं पातयामीत्ययोघनम् । उत्पाट्य स्वामिनं हन्तुं सोऽधावत दुराशयः ॥ ६०८ ॥
क्व स्वामीति तदा ज्ञातुं प्रायुंक्त मघवाऽवधिं । जिघांसुं तं च कर्मारमपश्यच्चाजगाम च ॥ ६०९ ॥

२° तुलेव भोः *L* । °तुलो हि भोः *M* ।

तृतीयः सर्गः

तस्यैव तं घनं मूर्ध्नि स्वशक्त्याऽपातयद्धरिः । कथंचिद्रोगमुक्तोऽपि जगाम स यमालयम् ॥ ६१० ॥
प्रणम्य स्वामिनं शक्रः कल्पं सौधर्ममभ्यगात् । स्वामी च विहरन् प्राप ग्रामाकं सन्निवेशनम् ॥ ६११ ॥
बिभेलकाभिधानस्य तत्र यक्षस्य सद्मनि । बिभेलकोद्यानस्थेऽस्थात् कायोत्सर्गधरः प्रभुः ॥ ६१२ ॥
स यक्षः प्राग्भवस्पृष्टसम्यक्त्वोऽपूजयत्प्रभुम् । दिव्यैः पुष्पांगरागाद्यैरनुरागाधिवासितः ॥ ६१३ ॥
ग्रामेऽथ शालिशीर्षेऽगात्तत्र च त्रिजगत्प्रभुः । उद्यानेऽस्थात्प्रतिमया माघमासस्तदा त्वभूत् ॥ ६१४ ॥
वानमन्तरिका तत्र नामतः कटपूतना । त्रिपृष्ठजन्मनि विभोः पत्नी विजयवत्यभूत् ॥ ६१५ ॥
सम्यगप्रतिचरिता सामर्षैव सती मृता । भ्रान्त्वा भवान् सा मानुष्यं प्राप्य बालतपोऽकरोत् ॥ ६१६ ॥
सा तत्र व्यन्तरीभूता स्वामिनः पूर्ववैरतः । तेजोऽसहिष्णुर्व्यकरोत्तापसीरूपमग्रतः ॥ ६१७ ॥
जटाभृद्वल्कलधरा हिमशीतेन पाथसा । आर्द्रयित्वा वपुस्तस्थावुपरिष्टाज्जगत्प्रभोः ॥ ६१८ ॥
ततो वातं विकुर्व्याङ्गान्यधुनोच्छल्लकीव[*] सा । जिने पेतुः शलानीव[†] दुःसहाश्चाम्बुबिन्दवः ॥ ६१९ ॥
जटाग्राद्वल्कलाग्राच्च पतन्तस्तोयबिन्दवः । चिकिलशुर्नाथमन्यश्चेद्वज्रवन्नूनं स्फुटेत्तदा ॥ ६२० ॥
भर्तुः शीतोपसर्गं तं सहमानस्य तां निशाम् । विशेषात् कर्मक्षपणं धर्मध्यानमदीप्यत ॥ ६२१ ॥

१ °मर्षा च *M.* ॥ २ समानु° *C. D. L.* ॥

टि.- *'शाहुडी' इति भाषायाम् । † शल्लकीपिच्छानि ।

बभूव चावधिज्ञानं श्रीवीरस्वामिनोऽधिकम् । अनुत्तरस्थितस्येव सर्वलोकावलोकनम् ॥ ६२२ ॥
सहजं त्ववधिज्ञानं यावद्देवभवेऽभवत् । एकादशांगीसूत्रार्थभृत्त्वं च चरमार्हतः ॥ ६२३॥
शान्ता निशान्ते सा सानुतापा च कटपूतना । पूजयित्वा प्रभुं भक्त्या निजं स्थानमुपाययौ ॥ ६२४ ॥
अथ गत्वा भद्रिकायां पुर्यां तस्थौ तपःपरः । दीक्षायाः प्रावृषं षष्ठीमतिवाहयितुं प्रभुः ॥ ६२५ ॥
गोशालस्तत्र मिलितः षष्ठमासाज्जगद्गुरोः । सेवां कुर्वन् प्राग्वदस्थात् प्रत्यहं प्रीतमानसः ॥ ६२६ ॥
विविधाभिग्रहपूर्वकं चतुर्मासक्षपणं तत्र च प्रभुः । कृत्वा वर्षारात्रनिर्गमे विदधे पारणकं पुरो बहिः ॥६२७॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये दशमपर्वणि श्रीमहावीरप्रथमषड्वर्षछद्मस्थविहारवर्णनो नाम तृतीयः सर्गः ॥

## ॥ अथ चतुर्थः सर्गः ॥

* * *

अथ स्वामी महावीरो गोशालेनानुसेवितः । मासानष्टानुपसर्गं व्याहार्षीन्मगधावनौ ॥ १ ॥
पुरीमालभिकां गत्वा सप्तमीं प्रावृषं प्रभुः । चतुर्मासक्षपणकृत्तत्रैवाऽवाहयत् ॥ २ ॥
चतुर्मासावसाने च पारयित्वा बहिः प्रभुः । गोशालसंयुतोऽगच्छत् [1]कुंडके सन्निवेशने ॥ ३ ॥
तत्र स्वामी वासुदेवायतनस्यैककोणके । तस्थौ प्रतिमया रत्नप्रतिमेव निवेशिता ॥ ४ ॥
निर्ह्रीः प्रकृत्या गोशालश्चिरसंलीनताऽऽतुरः । न्यस्य विष्णुप्रतिमाऽऽस्येऽधिष्ठानं* समवास्थित ॥ ५ ॥
आयातश्चार्चको दृष्ट्वा तं तथास्थमचिन्तयत् । पिशाचः कोऽप्यसौ नूनं ग्रहात्तः कोऽपि वा भवेत् ॥ ६ ॥
एवं विचिन्त्यायतने प्रविष्टस्तं निरीक्ष्य सः । नग्नत्वाच्छ्रमणो मन्ये कोऽप्यसावित्यलक्षयत् ॥ ७ ॥
एवं च दध्यौ यद्येनं हनिष्यामि तदा जनः । वदिष्यत्यमुना दुष्टेनादोषो धार्मिको हतः ॥ ८ ॥
करोतु ग्राम एवास्योचितमाख्यामि तत्पुरः । इति गत्वा समानैषीद्ग्रामीणान्दर्शनाय सः ॥ ९ ॥ (युग्मम्)

१ कुंडाके C. L. । २ न्यांस्त M ॥

टि.– *पुरुषचिह्नम् ।

॥९१॥

चपेटाभिर्मुष्टिभिश्च स जघ्ने ग्राम्यदारकैः । हत्वाऽमुं ग्रहिलमल्लमिति वृद्धैरमोच्यत ॥ १० ॥
कर्मारिमर्दनः स्वामी मर्दनाख्ये निवेशने । गत्वा चाऽस्थात्प्रतिमया बलदेवनिकेतने ॥ ११ ॥
लिंगं बलमुखे दत्त्वा गोशालोऽस्थाच्च पूर्ववत् । पूर्ववत् कुट्टितो ग्राम्यैः पूर्ववच्च विमोचितः ॥ १२ ॥
ग्रामेऽगाद्बहुशालाख्ये तपःशाली जगद्गुरुः । तत्र शालवनोद्याने तस्थौ च प्रतिमाधरः ॥ १३ ॥
शालार्या[1] नामतस्तत्र व्यन्तरी कारणं विना । क्रुद्धोपसर्गानकरोत् स्वामिनः कर्मघातकान् ॥ १४ ॥
सा श्रान्ता नाथमानर्च नाथोऽपि विहरन् ययौ । पुरं लोहार्गलं राज्ञाऽधिष्ठितं जितशत्रुणा ॥ १५ ॥
तस्य राज्ञोऽन्येन राज्ञा विरोधः समभूत्तदा । आयान् स्वामी सगोशालस्तत्पुंभिश्च पर्यीक्षितः ॥ १६ ॥
नोचे किंचिद्यदा स्वामी पृष्टस्तै राजपूरुषैः । तदानीं हेरिक इति जितशत्रोः समर्पितः ॥ १७ ॥
पूर्वायातोऽस्थिकग्रामादुत्पलो नाथमैक्षत । ववन्दे च यथावस्थं जितशत्रोः शशंस च ॥ १८ ॥
राज्ञाऽपि वन्दितो भक्त्या विहरन् भगवान् ययौ । पुरे पुरिमतालाख्ये तत्र चेदं पुराऽभवत् ॥ १९ ॥
तत्रासीद्वागुरः श्रेष्ठी धनी भद्रा च तत्प्रिया । वन्ध्या श्रान्ता सुतकृते दत्तैर्दैवोपयाचितैः ॥ २० ॥
श्रेष्ठिनौ शकटमुखोद्याने तावन्यदा गतौ । चिरं चिक्रीडतुर्देवाविव पुष्पोच्चयादिना ॥ २१ ॥
भ्रमन्तौ क्रीडया तत्र जीर्णमायतनं महत् । दृष्ट्वा कौतूहलान्मध्येऽविशतां तावुभावपि ॥ २२ ॥

१ °र्यी *C. D.* ।

प्रतिमां मल्लिनाथस्य सुधावर्तिनिभां दृशोः। अपश्यतां दम्पती तौ श्रद्धापूर्वं च नेमतुः ॥ २३ ॥
तावूचतुर्देव ! यदि त्वत्प्रसादाद्भविष्यति । सुतः सुता वा तच्चैत्यमुद्धरिष्यावहे तव ॥ २४ ॥
त्वद्भक्तौ च भविष्यावस्ततः प्रभृति सर्वदा । इत्युदित्वा जग्मतुस्तौ श्रेष्ठिनौ निजमन्दिरम् ॥ २५ ॥
तत्रासन्नार्हतव्यन्तर्यनुभावेन चाऽभवत् । भद्राया उदरे गर्भः श्रेष्ठिनः प्रत्ययप्रदः ॥ २६ ॥
गर्भाहादपि चारभ्य प्रारेभे वागुरो मुदा । तद्देवकुलमुद्धर्तुमात्मानमिव दुर्गतेः ॥ २७ ॥
तत्र गत्वा स्वयं मल्लिप्रतिमामर्चयच्च वागुरः । त्रिसन्ध्यं विदधे पूजां गृहीताभिग्रहः सुधीः ॥ २८ ॥
तं ज्ञात्वा जिनभक्तं तु तद्वेश्मनि समाययुः । विहर्तुं साधवः साध्व्यः सोऽप्यानर्च सदैव तान् ॥ २९ ॥
साधूनां नित्यसंसर्गाच्छ्रेष्ठिनौ श्रेष्ठबुद्धिकौ । श्रावकत्वं प्रपेदाते विधिज्ञौ च बभूवतुः ॥ ३० ॥
इतश्च भगवान् वीरस्तस्थौ प्रतिमया स्थिरः । अन्तरे शकटमुखोद्यानस्य च पुरस्य च ॥ ३१ ॥
तत्र वन्दितुमायात ईशानेन्द्रो जिनेश्वरम् । ददर्श वागुरं यान्तं मल्लिबिम्बार्चनेच्छया ॥ ३२ ॥
ईशानो वागुरं चोचे किं प्रत्यक्षं जिनेश्वरम् । अतिक्रम्याग्रतो यासि तद्बिम्बार्चनहेतवे ? ॥ ३३ ॥
अयं हि भगवान् वीरश्चरमस्तीर्थकृत्स्वयम् । छद्मस्थो विहरन्नत्र वर्तते प्रतिमास्थितः ॥ ३४ ॥
मिथ्यादुष्कृतमित्युक्त्वा त्रिश्च कृत्वा प्रदक्षिणाम् । स ववन्दे विभुं भक्त्या कूर्मवत्संकुचत्तनुः ॥ ३५ ॥
ईशानो वागुरश्चेशं नत्वा द्वावपि जग्मतुः । उष्णाकं सन्निवेशं च प्रत्यगाद्भगवानपि ॥ ३६ ॥

गच्छतः स्वामिनोऽभूतां संमुखीनौ वधूवरौ। तत्कालजातवीवाहौ सर्वतो विकृताकृती ॥ ३७ ॥
प्रेक्ष्य गोशालकोऽवोचदहो द्वावपि तुन्दिलौ। दन्तुरौ दीर्घचिबुकग्रीवौ चिह्लौ कुनासिकौ ॥ ३८ ॥
अहो संयोजनौचित्यं विधातुर्यदिमावुभौ। कृतौ वधूवरत्वेन मन्ये सोऽपि कुतूहली ॥ ३९ ॥
एवमग्रे तयोर्भूत्वा भूयो भूयो जगाद सः। अट्टहासं च विदधे वैहासिक इवासकृत् ॥ ४० ॥
वधूवरनराः क्रुद्धास्तं तस्करमिव द्रुतम्। बद्ध्वा मयूरबन्धेन चिक्षिपुर्वंशगह्वरे ॥ ४१ ॥
गोशालोऽथोचत स्वामिन्! किं मां बद्धमुपेक्षसे। कृपालुस्त्वं परजनेऽप्यसि किं न हि सेवके ॥ ४२ ॥
तं बभाषे च सिद्धार्थो नित्यशिक्षा निपट्टि ते! निजदुश्चरितैरेव चपलस्य कपेरिव ॥ ४३ ॥
स्वाम्यप्यदूरे गत्वाऽस्थात्तत्प्रतीक्षणकाम्यया। वधूवरनरा नाथं प्रेक्ष्य चैवं व्यचिन्तयन् ॥ ४४ ॥
पीठभृच्छत्रभृद्वासौ यद्वान्योऽप्यस्य सेवकः। देवार्यस्य तपोराशेर्यदेषोऽमुं प्रतीक्षते ॥ ४५ ॥
एवं विचिन्त्य तेऽमुञ्चन् गोशालं स्वाम्यपेक्षया। समं तेन व्रजन् स्वामी क्रमाद्गोभूमिमासदत् ॥ ४६ ॥
गोशाल ऊचे गोपालान्म्लेच्छा बीभत्समूर्तयः। व्रजशूरा व्रजत्येष क्व पन्थाः कथयन्तु भोः ॥ ४७ ॥
प्रत्यूचिरे च गोपालाः किमस्मान् कारणं विना। आक्रोशस्येवमध्वन्य श्वशुर्यो नासि नः खलु ॥ ४८ ॥
गोशालोऽप्यब्रवीद् भूयो दासेराः पशुपुत्रकाः। सहिष्यध्वे न चेद्यूयमाक्रोक्ष्याम्यधिकं तदा ॥ ४९ ॥
स्वभावाख्यानमेतद्धो नाक्रोशोऽयं मया कृतः। किं यूयं म्लेच्छबीभत्सा इत्यलीकं मयोदितम्? ॥ ५० ॥

ते क्रुद्धाः कुट्टयित्वा तं बद्ध्वा वंशवनेऽक्षिपन्। अमोचयंश्च पथिकास्तमन्ये करुणापराः ॥ ५१ ॥
स्वामी राजगृहे गत्वा वर्षारात्रमथाष्टमम्। चतुर्मासक्षपणभृद्विविधाभिग्रहोऽकरोत् ॥ ५२ ॥
चतुर्मासावसाने तु स्वामी बहिरपारयत्। निर्जीर्यं कर्म मेऽद्यापि बह्वस्तीति व्यचिन्तयत् ॥ ५३ ॥
वज्रभूमिशुद्धभूमिलाढादिम्लेच्छभूमिषु। कर्मनिर्जरणायाऽगात् स्वामी गोशालकान्वितः ॥ ५४ ॥
स्वच्छन्दं तत्र च म्लेच्छाः परमाधार्मिकोपमाः। नानाविधैरुपसर्गैः श्रीवीरमुपदुद्रुवुः ॥ ५५ ॥
जगर्हुः स्वामिनं केऽपि जहसुः केचिदुच्चकैः। सारमेयादिभिर्दुष्टसत्त्वैः केचिदवेष्टयन् ॥ ५६ ॥
स्वामी कर्मध्वंसकृत्त्वादुपसर्गैर्जहर्ष तैः। शल्यार्दित इव च्छेदैः शल्योद्धरणहेतुभिः ॥ ५७ ॥
कर्मक्षयसहायांस्तान्म्लेच्छान् बन्धूनिव प्रभुः। मेने ततोऽधिकान् वापि कर्मरोगभिषक् स्वयम् ॥ ५८ ॥
कम्पे साचलो मेरुर्यत्पादांगुष्ठपीडनात्। कर्मभिः पीड्यमानः सोऽप्येवं वीरो व्यवर्तत ॥ ५९ ॥
शक्रेणापन्निषेधाय यः सिद्धार्थो न्ययुज्यत। गोशालोत्तरवेलायां जजृम्भे सोऽपि नान्यदा ॥ ६० ॥
यत्पादाग्रे किंकरन्ति लुठन्ति च मुहुर्मुहुः। सुरेन्द्रास्तेऽपि हा सर्वे तत्पीडायामुदासते ॥ ६१ ॥
यन्नाममंत्रमात्रेण द्रवन्ति गुरूपद्रवाः। सोऽप्युपद्रूयते क्षुद्रैः कस्य पूत्कुर्महे पुरः ॥ ६२ ॥
धिक् सुकृतानि जगतो यैः स्वामिप्रभवैरपि। कृतघ्नैर्विघ्ननिघ्नात्मा स्वामी त्रातो न दुर्विधैः ॥ ६३ ॥

१ °र्जीर्यं M° । °यार्ज्यं C ॥ २ लाटा° C. L. M. ॥

जगत्त्राणक्षमस्सहं न स्वौजोऽप्यादृत प्रभुः । स्वौजःफलं हि गृह्णन्ति संसारसुखगृध्नवः ॥ ६४ ॥
अनाप्नुवन् वसतिमप्युष्णशीतादिभाजनम् । धर्मजागरिकां जाग्रद् [illegible] [illegible]स्थितः ॥ ६५ ॥
नवमीं प्रावृषं तत्र धर्मध्यानपरायणः । शून्यागारे द्रुतले वा स्थितः स्वाम्यत्यवाहयत् ॥ ६६ ॥
सगोशालस्ततः स्वामी सिद्धार्थपुरमाययौ । ततोऽपि प्राचलद् ग्रामं कूर्मग्रामाभिधं प्रति ॥ ६७ ॥
मार्गे दृष्ट्वा तिलस्तम्बं गोशालः प्रभुमभ्यधात् । स्वामिन्नेष तिलस्तम्बः कच्चिन्निष्पत्स्यते न वा ? ॥ ६८ ॥
ततो भवितव्यताया वशेन भगवानपि । त्यक्त्वा मौनं स्वयमाख्यद् भद्र निष्पत्स्यते ह्यसौ ॥ ६९ ॥
सप्तापि पुष्पजीवास्तु परमस्मिन्नवस्थिताः । एकस्यामेव [1]शिम्बायां तावन्तो भाविनस्तिलाः ॥ ७० ॥
तद्वचोऽश्रद्दधानेन गोशालेनोदखानि सः । तिलस्तम्बः समृत्पिंडो मुमुचे चान्यतः क्वचित् ॥ ७१ ॥
असत्या स्वामिवाङ्मा भूदित्यासन्नसुरैस्तदा । वारिवृष्टिर्विनिर्ममे द्राक् तिलस्तम्बोऽप्युदश्वसत् ॥ ७२ ॥
तत्प्रदेशेन गच्छन्त्या गोराक्रान्तः खुरेण सः । प्रविष्टः क्लिन्नभूमध्ये सुप्रतिष्ठोऽभवत्ततः ॥ ७३ ॥
क्रमात्प्ररूढमूलोऽभूत् क्रमाच्चोज्झितकंदलः । प्रावर्तन्त तिलस्तम्बे तानि पुष्पाणि वर्धितुम् ॥ ७४ ॥
गोशालेनान्वीयमानो दुर्धिया भक्तमानिना । कूर्मग्रामाभिधे ग्रामे जगाम भगवानपि ॥ ७५ ॥
इतश्चास्ति धनापूर्णश्चम्पाराजगृहान्तरे । नामतो [2]गोबरग्रामो महीमण्डलमण्डनम् ॥ ७६ ॥

१ शम्बा° C. D. ॥ २ गोर्बर° C. D. । गोवर° L ॥

चतुर्थः सर्गः

कुडुंबी तत्र गोशंखी नामाभीराधिपोऽभवत् । वन्ध्या बन्धुमती नाम भार्या तस्यातिवल्लभा ॥ ७७ ॥
ग्रामस्य तस्य चासन्नो ग्रामः खेटकनामकः । हतो दस्युभिरभ्येत्य बन्दा जगृहिरेऽपि च ॥ ७८ ॥
तदा च वेशिका नाम तत्र स्त्री सुषुवे सुतम् । हते पत्यौ सुरूपेति दस्युभिश्चालिता च सा ॥ ७९ ॥
सा तु प्रसवरोगार्ता बालपाणिः शशाक न । गन्तुं तैर्वेगिभिश्चौरैर्गौर्दुर्दान्तवृषैरिव ॥ ८० ॥
अथ तामूचिरे चौरा यदि त्वं जीविताथिनी । तदेनं बालकं मुञ्च मूर्तं व्याधिमिवात्मनः ॥ ८१ ॥
साऽर्भं तरुतले मुक्त्वा भीताऽगाद्दस्युभिः समम् । सर्वस्यापि हि लोकस्य न प्राणेभ्योऽपरं प्रियम् ॥ ८२ ॥
प्रभाते सह गोरूपैर्गोशंखी तत्र चागतः । ईक्षाञ्चक्रे बालकं तं सुरूप इति चाऽग्रहीत् ॥ ८३ ॥
निजपत्न्याः सुतत्वेन स तं बालकमार्पयत् । अन्यपुत्रोऽप्यपुत्राणां भवत्यत्यन्तवल्लभः ॥ ८४ ॥
छागं निहत्य रक्तेन मिश्रं चक्रे स बालकम् । पत्न्या च सूतिनेपथ्यं ग्राहयामास बुद्धिमान् ॥ ८५ ॥
मद्भार्या गूढगर्भाऽऽसीत् सा सुतं सुषुवेऽधुना । प्रावादीदिति लोके स चकार च महोत्सवम् ॥ ८६ ॥
तन्माता वेशिका चौरैश्चम्पापुर्यां चतुष्पथे । अथास्थाप्यत विक्रेतुं क्रीता योग्येति वेश्यया ॥ ८७ ॥
गणिकाव्यवहारं सा शिक्षिता वेश्यया तया । प्रसिद्धगणिका जज्ञे रुपावगणिताप्सराः ॥ ८८ ॥
क्रमेण तरुणीभूतो गोशंखिकसुतोऽपि हि । विक्रेतुं घृतशाकटं चम्पायां ससुहृद्ययौ ॥ ८९ ॥
पौरान् विलसतस्तत्र विदग्धरमणीवृतान् । सोऽपि दृष्ट्वा रन्तुमिच्छुर्गणिकापाटकं ययौ ॥ ९० ॥ ॥९७॥

ददर्श देशिकां वेश्यामभ्यस्थां स स्वमातरम् । तामेवैच्छद्रमयितुमज्ञा हि पशुवज्जनाः ॥ ९१ ॥ चतुर्थः सर्गः
अदापयद् ग्रहणकं तस्या एष तदैव सः । निशि स्नातविलिप्तांगस्तद्गृहाय चचाल च ॥ ९२ ॥
पादः शकृति निर्मग्नो गच्छतस्तस्य वर्त्मनि । न सोऽज्ञासीत् क्वचिन्मग्न इति स्मरविमोहितः ॥ ९३ ॥
तं प्रबोधयितुं सद्यस्तदीया कुलदेवता । विकृत्य गां च वत्सं चाऽन्तरा तस्थौ तदध्वनः ॥ ९४ ॥
वत्से घर्षितुमारेभे यावत् सोऽङ्घ्रिं पुरीषिणम् । वत्सः स तावन्मानुष्या वाचा गामित्यवोचत ॥ ९५ ॥
मातः पश्यायमह्रीकः पुंस्पशुर्धर्मवर्जितः । शकृल्लिप्तं निजं पादं मयि घर्षति निर्घृणः ॥ ९६ ॥
गौरप्युवाच मा ताम्य नाकृत्यं किञ्चिदस्य हि । निजां यो जननीं रन्तुं त्वरते कामगर्दभः ॥ ९७ ॥
तच्छ्रुत्वाऽचिन्तयत्सोऽपि गावौ नरगिरा कथम् । वदन्त्यमुष्या वेश्यायाः सूनुरस्मि कथं नु वा ॥ ९८ ॥
[1]प्रक्ष्यामि वेश्यां तामेवेत्यालोच्याऽगात्तदोकसि । अभ्युत्थानादिना तस्य प्रतिपत्तिं व्यधाच्च सा ॥ ९९ ॥
निरुद्धकामव्यापारः साशंको गोगिराथ सः । स्थित्वा क्षणमवोचत्तां पारम्पर्यं निजं वद ॥ १०० ॥
साऽनाकर्णितकं कृत्वा हावभावानदर्शयत् । इदं हि पण्यनारीणां मुख्यं मन्मथशासनम् ॥ १०१ ॥
सोऽप्यवोचत दास्यापि जल्पितद्विगुणं धनम् । स्वकीयं ब्रूहि सद्भावं स्वपित्रोः शपथश्च ते ॥ १०२ ॥
एवं मुहुर्मुहुस्तेन पृष्टा साऽऽख्यद्यथातथम् । साशंकः सोऽपि चोत्थाय जगाम ग्राममात्मनः ॥ १०३ ॥

१ द्रक्ष्यामि *L*, प्रक्षामि *D*, प्रक्षामि, *M*. ॥

सोऽपृच्छत् पितरौ तत्र युवयोरंगजोऽस्मि किम्। लब्धः क्रीतोऽथवान्यो वा कथ्यतां मे यथातथम् ॥१०४॥
आवयोरंगजोऽसीति यदा तौ हि जजल्पतुः। तदा सोऽनशितस्तस्थावयथाख्यानपीडितः ॥ १०५ ॥
यथातथमथाऽऽख्यातां तत्प्रार्थिं पितरावपि। अज्ञासीद्वैशिकां वेदयां सोऽपि मातरमात्मनः ॥ १०६ ॥
गत्वा चम्पां वैशिकायाः स्ववृत्तान्तं शशंस सः। साऽपि तं स्वसुतं ज्ञात्वा रुरोद न्यग्मुखी ह्रिया ॥ १०७ ॥
अमोचयच्च कुट्टिन्या द्रव्यं दत्त्वा स्वमात्मजम्। ग्रामे नीत्वा निजेऽमुश्चद्धर्मे चास्थापयत् पथि ॥ १०८ ॥
वैशिकासूनुरित्यासीत्स नाम्ना वैशिकायनः। तदैव विषयोद्विग्नश्चाददे तापसव्रतम् ॥ १०९ ॥
स्वशास्त्राध्ययनपरः स्वधर्मकुशलः क्रमात्। कूर्मग्रामे स आगच्छच्छ्रीवीरागमनाग्रतः ॥ ११० ॥
तद्बहिश्चोर्ध्वदोर्दण्डः सूर्यमंडलदत्तदृक्। लम्बमानजटाभारो न्यग्रोधद्रुरिव स्थिरः ॥ १११ ॥
निसर्गतो विनीतात्मा दयादाक्षिण्यवान् शमी। आतापनां स मध्याह्ने धर्मध्यानस्थितोऽकरोत् ॥ ११२ ॥
आदित्यकरतापेन यूका निपतिता भुवि। ग्राहं ग्राहं स चिक्षेप भूयो मूर्ध्नि कृपानिधिः ॥ ११३ ॥
तं चावलोक्य गोशालः स्वामिपार्श्वादुपेत्य च। ऊचे जानासि किं तत्त्वं यूकाशय्यातरोऽसि वा? ॥११४॥
योषिद्वा पुरुषो वासि सम्यग्विज्ञायसे न हि। इत्युक्तोऽपि तपस्वी स क्षमी नोवाच किञ्चन ॥ ११५ ॥
भूयो भूयोऽपि गोशालस्तथैव तमभाषत। यन्त्रेऽपि बहुशः क्षिप्तं श्वपुच्छं न ऋजूभवेत् ॥ ११६ ॥

१ °घम्बा C।

तापसः स चुकोपाथ तेजोलेश्यां मुमोच च । अत्यन्तघृष्टाद्दहनश्चन्दनादपि जायते ॥ ११७ ॥
तस्या ज्वालाकरालाया भीतो गोशालको ययौ । अभि प्रभुं दवत्रस्तोऽभिनदीव वनद्विपः ॥ ११८ ॥
त्रातुं गोशालकं स्वामी शीतलेश्यामथाऽमुचत् । तेजोलेश्या तयाऽशामि वारिणेव हुताशनः ॥ ११९ ॥
तामृद्धिं स्वामिनः प्रेक्ष्य विस्मितो वैशिकायनः । समुपेत्य महावीरं सप्रश्रयमदोऽवदत् ॥ १२० ॥
न ज्ञातो भवतामेष भगवदंतिषज्जनः । तत्सहध्वमिहेदृक्षं प्रतीपाचरणं मम ॥ १२१ ॥
एवमुक्त्वा गते तस्मिन् प्रभुं गोशालकोऽवदत् । तेजोलेश्यालब्धिरियं जायते भगवन् कथम् ? ॥ १२२ ॥
स्वाम्याख्यत्सर्वदा षष्ठं विदध्याद्यश्च पारयेत् । यमी सनखकुल्माषमुष्ट्यम्बुचुलुकेन च ॥ १२३ ॥
तस्य षण्मासपर्यन्ते तेजोलेश्या गरीयसी । उत्पद्येतास्खलनीया प्रतिपक्षभयंकरा ॥ १२४ ॥
कूर्मग्रामाच्च गोशालेनान्वितः परमेश्वरः । प्रतस्थे प्रतिसिद्धार्थपुराख्यं नगरोत्तमम् ॥ १२५ ॥
संप्राप्ते तत्तिलस्तम्बदेशे गोशालकोऽवदत् । न निष्पन्नस्तिलस्तम्बो यः स्वामिभिरुदीरितः ॥ १२६ ॥
स्वाम्याचख्यौ तिलस्तम्बो निष्पन्नः सोऽत्र विद्यते । गोशालोऽश्रद्दधत्तत्र तिलशिम्बां[1] व्यदारयत् ॥१२७॥
तत्र सप्ततिलान्पश्यन्नेवं गोशालकोऽवदत् । जायन्तेऽङ्गे परावृत्य पुनस्तत्रैव जन्तवः ॥ १२८ ॥
तेजोलेश्यां स्वाम्याख्यातां स साधयितुमन्यदा । स्वामिपादान् परित्यज्य श्रावस्तीं नगरीं ययौ ॥ १२९॥

१ शम्बां C ॥

स कुंभकारशालायां स्थितः षण्मासिकं तपः। अन्वतिष्ठद्यथाख्यातं तेजोलेश्या सिषेध च ॥ १३० ॥
तेजोलेश्यापरीक्षार्थं स गत्वा कूपकंठके। स्वस्य कोपकृते दास्याः कर्करेणाऽभिनद् घटम् ॥ १३१ ॥
सा तमाक्रोष्टुमारेभे तेनापि मुमुचे क्रुधा। तेजोलेश्या तद्विदिष च्युना दासीं ददाह सा ॥ १३२ ॥
संजातप्रत्ययश्चैवं कौतुकालोकनप्रियः। गोशालको धूर्तो लोकैर्विंहर्तुमुपचक्रमे ॥ १३३ ॥
श्रीपार्श्वशिष्या अष्टांगनिमित्तज्ञानपण्डिताः। गोशालकस्य मिलिताः षडमी प्रोज्झितव्रताः ॥ १३४ ॥
नाम्ना शोणः कलिन्दोऽन्यः कर्णिकारोऽपरः पुनः। अच्छिद्रोऽथाग्निवेशानोऽथार्जुनः पञ्चमोत्तरः ॥ १३५ ॥
तेऽप्याख्युरष्टांगमहानिमित्तं तस्य सौहृदात्। पुंसां समानशीलानां सद्यो भवति सौहृदम् ॥ १३६ ॥
तेजोलेश्याऽष्टांगमहानिमित्तज्ञानगर्वितः। अर्हं जिनोऽस्मीति वदन् वसुधां विजहार सः ॥ १३७ ॥
नाथोऽपि सिद्धार्थपुराद्वैशालीं नगरीं ययौ। शंखः पितृसुहृत्तत्राभ्यानर्च गणराट् प्रभुम् ॥ १३८ ॥
ततः प्रतस्थे भगवान् ग्रामं वाणिजकं प्रति। मार्गे गंडकिकां नाम नदीं नावोत्ततार च ॥ १३९ ॥
उत्तीर्णमात्रो भगवान् सैकते तप्तवालुके। अधारि नाविकैर्नद्युत्तारणद्रविणार्थिभिः ॥ १४० ॥
तदा च शंखगणराड्जामेयश्चित्रनामकः। नौसैन्येनागतो दूतो निवृत्तः प्रभुमैक्षत ॥ १४१ ॥
भर्त्सयित्वा नाविकांस्तान् भगवन्तममोचयत्। भक्त्या चाभ्यर्च्य परया चित्रो निजपुरं ययौ ॥ १४२ ॥

१ क्षणात् *D*, *M* ॥ २ मंड° *L*, मंडि° *M* ॥ ३ दौत्ये *D* । दूत्ये *L* ॥

अथ वाणिजकग्रामं जगाम भगवानपि । बहिश्च धर्मध्यानस्थस्तत्राऽस्थात् प्रतिमाधरः ॥ १४३ ॥
तदा षष्ठतपास्तत्र नित्यमातापनापरः । आनन्दश्रावको जातावधिः प्रभुमवन्दत ॥ १४४ ॥
स प्राञ्जलिर्बभाषे च भगवन्नतिदुस्सहान् । परीषहानसहिष्ठा उपसर्गांश्च दारुणान् ॥ १४५ ॥
वज्रसारं शरीरं ते वज्रसारं च ते मनः । परीषहोपसर्गैरप्येभिर्यद्भज्यते न हि ॥ १४६ ॥
इदानीं केवलज्ञानमासन्नं वर्तते प्रभो ! । इत्युदित्वा प्रभुं भूयो नत्वाऽऽनन्दो ययौ गृहम् ॥ १४७ ॥
कायोत्सर्गं पारयित्वा श्रावस्त्यां पर्युपेत्य च । दीक्षातो दशमं वर्षाकालं स्वाम्यत्यवाहयत् ॥ १४८ ॥
पारयित्वा बहिस्तत्र ग्रामेऽगात्सानुयष्टिके । भद्रां च प्रतिमां तत्र भगवान् प्रत्यपद्यत ॥ १४९ ॥
तस्यां स्थानशितः पूर्वं पूर्वाशाभिमुखः प्रभुः । एकपुद्गलविन्यस्तदृक् तस्थौ सकलं दिनम् ॥ १५० ॥
दक्षिणाभिमुखो रात्रिं पश्चिमाभिमुखो दिनम् । उत्तराभिमुखो रात्रिं षष्ठेन प्रतिमां व्यधात् ॥ १५१ ॥
अपारितो महाभद्रां प्रतिमां शिश्रिये प्रभुः । तस्थौ चतुरहोरात्रीं तत्र पूर्वादिदिक्क्रमात् ॥ १५२ ॥
दशमेन महाभद्रां कृत्वैवं प्रतिमां प्रभुः । प्रपेदे सर्वतोभद्रां द्वाविंशतितमेन सः ॥ १५३ ॥
प्रत्येकमप्यहोरात्रं तस्थौ दिक्षु दशस्वपि । किं तु न्यध्यायदूर्ध्वाधोद्रव्याण्यूर्ध्वाधराशयोः ॥ १५४ ॥
तिस्रोऽपि प्रतिमाः कृत्वा पारणाय जगद्गुरुः । आनन्दनाम्नो गृहिणः प्रविवेश निकेतनम् ॥ १५५ ॥

भाण्डानि क्षालयन्त्यासीद्बहुली तत्र चेटिका । त्यक्तुकामोषितभक्तमपश्यत् प्रभुमागतम् ॥ १५६ ॥
किं तुभ्यं कल्पते ? इति सा स्वामिनमभाषत । पाणिं प्रासारयत् स्वामी भक्त्याऽन्नं सापि तद्ददौ ॥ १५७ ॥
स्वामिपारणकप्रीतैः पंचदिव्यानि नाकिभिः । चक्रिरे तत्र सदने मुमुदे च जनोऽखिलः ॥ १५८ ॥
तदैव बहुली राज्ञा दासीभावादमोच्यत । भवादपि हि मुच्यन्ते भव्याः स्वामिप्रसादतः ॥ १५९ ॥
पारयित्वा प्रभुस्तत्र विहरन् पृथिवीमिमाम् । दृढभूमिमनुप्राप बहुम्लेच्छकुलाऽऽकुलाम् ॥ १६० ॥
पेढालग्रामं निकषा पेढालाराममन्तरा । कृताष्टमतपःकर्मा पोलासं चैत्यमाविशत् ॥ १६१ ॥
जन्तूपरोधरहितमधिष्ठाय शिलातलम् । आजानुलंबितभुजो *दरावनतविग्रहः ॥ १६२ ॥
स्थिरचेता निर्निमेषो रूक्षैकद्रव्यदत्तदृक् । तस्थौ तत्रैकरात्रिक्या महाप्रतिमया प्रभुः ॥ १६३ ॥
तदा शक्रः सुधर्मायां सभायां परिवारितः । सहस्रैश्चतुरशीत्या सामानिकदिवौकसाम् ॥ १६४ ॥
त्रयस्त्रिंशत्त्रायस्त्रिंशैः पर्षद्भिस्तिसृभिस्तथा । चतुर्भिर्लोकपालैश्च संख्यातीतैः प्रकीर्णकैः ॥ १६५ ॥
प्रत्येकं चतुरशीत्या सहस्रैरंगरक्षकैः । वृढाबद्धपरिकरैः ककुप्सु चतसृष्वपि ॥ १६६ ॥
सेनाधिपतिभिः सेनापरिवीतैश्च सप्तभिः । देवदेवीगणैराभियोग्यैः किल्बिषिकादिभिः ॥ १६७ ॥

१ नाम D ॥ २ °श्चं C, L ॥ ३ °मावसत् D ॥
टि.—* किंचित् नतशरीरः ।

तूर्यत्रयादिभिः कालं विनोदैरतिवाहयन् । गोप्ता दक्षिणलोकार्धं शक्रसिंहासने स्थितः ॥ १६८ ॥
अवधिज्ञानतो ज्ञात्वा भगवन्तं तथा स्थितम् । उत्थाय पादुके त्यक्त्वोत्तरासंगं विधाय च ॥ १६९ ॥
जान्वसव्यं भुवि न्यस्य सव्यं च न्यंच्य किंचन । शक्रस्तवेनावन्दिष्ट भूतलन्यस्तमस्तकः ॥१७० ॥
समुत्थाय च सर्वांगोदञ्चद्रोमाञ्चकञ्चुकः । शचीपतिरुवाचेदमुद्दिश्य सकलां सभाम् ॥ १७१ ॥
भो भोः सर्वेऽपि सौधर्मवासिनस्त्रिदशोत्तमाः ! । शृणुत श्रीमहावीरस्वामिनो महिमाद्भुतम् ॥ १७२ ॥
दधानः पञ्चसमितीर्गुप्तित्रयपवित्रितः । क्रोधमानमायालोभानभिभूतो निराश्रवः ॥ १७३ ॥
द्रव्ये क्षेत्रे च काले च भावे चाऽप्रतिबद्धधीः । रूक्षैकपुद्गलन्यस्तनयनो ध्यानमास्थितः ॥ १७४ ॥
अमरैरसुरैर्यक्षैरक्षोभिरुरगैर्नरैः । त्रैलोक्येनापि शक्येत ध्यानाच्चालयितुं न हि ॥ १७५ ॥
इत्याकर्ण्य वचः शाक्रं शक्रसामानिकः सुरः । ललाटपट्टघटितभ्रुकुटीभंगभीषणः ॥ १७६ ॥
कंपमानाधरः कोपाल्लोहितायतलोचनः । अभव्यो गाढमिथ्यात्वसंगः संगमकोऽवदत् ॥ १७७ ॥
मर्त्यः श्रमणमात्रोऽयं यदेवं देव वर्ण्यते । स्वच्छन्दं सदसद्वादे प्रभुत्वं तत्र कारणम् ॥ १७८ ॥
देवैरपि न चाल्योऽयं ध्यानादित्युद्भटं प्रभो ! । कथं धार्येत हृदये धूतं वा प्रोच्यते कथम् ? ॥ १७९ ॥
रुद्धान्तरिक्षः शिखरैर्मूले रुद्धरसातलः । यैः किलोदस्यते दोष्णा सुमेरुर्लोष्टुलीलया ॥ १८० ॥

सकुलाचलमेदिन्याः प्लावनव्यक्तवैभवः । येषामेष सुगंडूषंकरश्च मकराकरः ॥ १८१ ॥
अप्येकभुजदंडेन प्रचण्डां छत्रलीलया । उद्धरन्ति सहानेकभूधरां ये वसुन्धराम् ॥ १८२ ॥
तेषामसमऋद्धीनां सुराणाममितौजसाम् । इच्छासंपन्नसिद्धीनां मर्त्यमात्रं कियानयम् ॥ १८३ ॥
एषोऽहं चालयिष्यामि तं ध्यानादित्युदीर्य सः । करेण भूमिमाहत्योदस्थादास्थानमण्डपात् ॥ १८४ ॥
अर्हन्तः परसाहाय्यात्तपः कुर्वन्त्यखंडितम् । मा ज्ञासीदिति दुर्बुद्धिः शक्रेण स उपेक्षितः ॥ १८५ ॥
ततो वेगानिलोत्पातपतापतघनाघनः । रौद्राकृतिदुरालोको भयापसरदप्सराः ॥ १८६ ॥
विकटोरःस्थलाघातपुञ्जितग्रहमण्डलः । स पापस्तत्र गतवान् यत्रासीत्परमेश्वरः ॥ १८७ ॥ (युग्मम्)
निष्कारणजगद्बन्धुं निराबाधं तथा स्थितम् । श्रीवीरं पश्यतस्तस्य मत्सरो ववृधेऽधिकम् ॥ १८८ ॥
गीर्वाणपांसनः पांसुवृष्टिं दुष्टोऽतनिष्ट सः । अकांडघटितारिष्टासुपरिष्टाज्जगत्प्रभोः ॥ १८९ ॥
विधुर्विधुन्तुदेनेव दुर्दिनेनेव भास्करः । पिदधे पांसुपूरेण सर्वांगीणं जगत्प्रभोः ॥ १९० ॥
समन्ततोऽपि पूर्णानि तथा श्रोतांसि पांसुभिः । यथा समभवत् स्वामी निःश्वासोच्छ्वासवर्जितः ॥१९१॥
तिलमात्रमपि ध्यानान्न चचाल जगद्गुरुः । कुलाचलश्चलति किं गजैः परिणतैरपि ॥ १९२ ॥
अपनीय ततः पांशुं वज्रतुण्डाः पिपीलिकाः । स समुत्पादयामास प्रभोः सर्वांगपीलिकाः॥ १९३ ॥

१ सर्ग° *D* । सगंडूकक° *L* ॥

राधिशश्चैकतोऽङ्गेषु स्वैरं निर्ययुरन्यतः । विध्यन्त्यस्तीक्ष्णतुण्डाग्रैः सूच्यो निवसनेष्विव ॥ १९४ ॥
निर्भाग्यस्येव वाञ्छासु मोघीभूतासु तास्वपि । स दंशान् रचयामास नाकृत्यान्तो दुरात्मनाम् ॥ १९५ ॥
नेषामेकप्रहारेण रक्तैर्गोक्षीरसोदरैः । क्षरद्भिरभवन्नाथः सनिर्झर इवाद्रिराट् ॥ १९६ ॥
नैरप्यक्षोभ्यमाणेऽथ जगन्नाथे स दुर्मतिः । चक्रे प्रचण्डतुण्डाग्रा दुर्निवारा घृतेलिकाः ॥ १९७ ॥
शरीरे परमेशस्य निमग्नमुखमण्डलाः । ततस्ताः समलक्ष्यन्त रोमालीव सहोत्थिता ॥ १९८ ॥
ततोऽप्यविचलश्चित्ते योगवित्ते जगद्गुरौ । स महावृश्चिकांश्चक्रे ध्यानभ्रंशनिश्चयी ॥ १९९ ॥
प्रलयाग्निस्फुलिंगाभास्तप्ततोमरदारुणैः । तेऽभिन्दन् भगवद्देहं लांगूलांकुरकण्टकैः ॥ २०० ॥
नैरप्यनाकुले नाथे कूटसंकल्पसंकुलः । सोऽनल्पान् कल्पयामास नकुलान् दशनाकुलान् ॥ २०१ ॥
खिखीति रसमानास्ते दंष्ट्राभिर्भगवत्तनुम् । खण्डखण्डैस्त्रोटयन्तो मांसखण्डान्यपातयन् ॥ २०२ ॥
नैरप्यकृतकृत्योऽसौ यमदोर्दण्डदारुणान् । अत्युत्कटफटाटोपान् कोपात्प्रायुंक्त पन्नगान् ॥ २०३ ॥
आशिरःपादमत्यर्थं महावीरं महोरगाः । अवेष्टन्त महावृक्षं कपिकच्छूलता इव ॥ २०४ ॥
प्रजघ्नुस्ते तथा तत्र स्फुटन्ति स्म फटा यथा । तथा दशन्ति स्म यथाऽभज्यन्त दशना अपि ॥ २०५ ॥
उद्वान्तगरलेष्वेषु लम्बमानेषु रज्जुवत् । स वज्रदशनानाखून् मूषिकानुदपीपदत् ॥ २०६ ॥
द्वाखयंगं खनकाश्चरणुर्नखैर्दन्तैर्मुखैः करैः । । मोमूत्र्यमाणास्तत्रैव क्षते क्षारं निचिक्षिपुः ॥ २०७ ॥ ॥१०६॥

ञ्चयत्किञ्चिद्भूतेषु भूतीभूत इव क्षुधा । उद्दण्डदन्तमुसलं हरिकर्णं ससर्ज सः ॥ २०८ ॥
ोऽधावत् पादपातेन मेदिनीं नमयन्निव । उद्धून्वदस्तहस्तेन नभस्तस्थोटयन्निव ॥ २०९ ॥
कराग्रेण गृहीत्वा च दुर्वारेण स वारणः । दूरमुल्लालयामास भगवन्तं नभस्तले ॥ २१० ॥
विशीर्य कणशो गच्छत्वसाविति दुराशयः । दन्तावुदस्य स व्योम्नः पतन्तं स्म प्रतीच्छति ॥ २११ ॥
नितं दन्तघातेन विध्यति स्म मुहुर्मुहुः । वक्षसो वज्रकठिनात्समुत्तस्थुः स्फुलिंगकाः ॥ २१२ ॥
न शशाक वराकोऽसौ कर्तुं किंचिदपि द्विपः । यावत्तावत्सुरश्चक्रे करिणीं वैरिणीमिव ॥ २१३ ॥
अखपट्टतुण्डदन्ताभ्यां भगवन्तं बिभेद सा । स्वैरं शरीरनीरेण विषेणेव सिषेच च ॥ २१४ ॥
करेणो रेणुसाद्भूते तस्याः सारे सुराधमः । पिशाचरूपमकरोन्मकरोत्कटदंष्ट्रकम् ॥ २१५ ॥
ज्वालाजालाकुलं व्यात्तव्यायतं वक्त्रकोटरम् । अभवद्भीषणं तस्य वह्निकुण्डमिव ज्वलत् ॥ २१६ ॥
घमौकस्तोरणस्तम्भाविव प्रोत्तंभितौ भुजौ । अभूच्च तस्य जंघोरु तुंगं तालद्रुमोपमम् ॥ २१७ ॥
स साट्टहासः फेत्कुर्वन् स्फूर्जत्किलिकिलारवः । कृत्तिवासाः कर्त्रिकाभृद्भगवन्तमुपाद्रवत् ॥ २१८ ॥
तस्मिन्नपि हि विध्याते क्षीणतैलप्रदीपवत् । व्याघ्ररूपं क्षुधा ध्मातः शीघ्रं चक्रे स निर्घृणः ॥ २१९ ॥
अथ पुच्छच्छटाच्छोटैः पाटयन्निव मेदिनीम् । बूत्कारप्रतिशब्दैश्च रोदसी रोदयन्निव ॥ २२० ॥

'मुंड' C, D । 'सुंड' L ॥ २ 'हासर्फ' C, L ॥

दंष्ट्राभिर्वज्रसाराभिर्नखैः शूलसोदरैः । अव्यग्रं व्यापिपर्ति स्म व्याघ्रो भुवनभर्तरि ॥ २२१ ॥ चतुर्थः सर्गः
तत्र विच्छायतां प्राप्ते दवदग्ध इव द्रुमे । सिद्धार्थराजरूपं स विचक्रे विबुधाधमः ॥ २२२ ॥
किमेतद्भवता तात प्रक्रान्तमतिदुष्करम् । प्रव्रज्यां मुञ्च माऽस्माकं प्रार्थनामवजीगणः ॥ २२३ ॥
वार्धके मामशरणं त्यक्त्वा नन्दिवर्धनः । विकृता त्रिशला चैवं विललाप मुहुर्मुहुः ॥ २२४ ॥ (युग्मम्)
ततस्तयोर्विलापैरप्यलिप्तमनसि प्रभौ । आवासितं दुराचारः स्कन्धावारमकल्पयत् ॥ २२५ ॥
तत्रानासाद्य दृषदं सूदः सादर ओदने । चुल्लीपदे प्रभोः पादौ कृत्वा स्थालीं न्यवेदयत् ॥ २२६ ॥
तत्कालं ज्वालितस्तेन जज्वाल ज्वलनोऽधिकम् । पादमूले जगद्भर्तुर्गिरेरिव दवानलः ॥ २२७ ॥
तस्यापि प्रभोः स्वर्णस्येव न श्रीरहीयत । ततः सुराधमश्चक्रे पक्कणं दारुणक्कणम् ॥ २२८ ॥
पक्कणोऽपि प्रभोः कण्ठे कर्णयोर्भुजदण्डयोः । जंघयोश्च क्षुद्रपक्षिपंजराणि व्यलंबयत् ॥ २२९ ॥
खगैश्चंचुनखाघातैस्तथा दद्रे प्रभोस्तनुः । यथा छिद्रशताकीर्णा तत्पञ्जरनिभाभवत् ॥ २३० ॥
तत्राप्यसारतां प्राप्ते पक्कणे पक्कपत्रवत् । उत्पादितमहोत्पातं खरवातमजीजनत् ॥ २३१ ॥
अन्तरिक्षे महावृक्षांस्तृणोत्क्षेपं समुत्क्षिपन् । विक्षिपन् पांशुविक्षेपं दिक्षु च ग्रावकर्करान् ॥ २३२ ॥
सर्वतो रोदसीगर्भं भस्त्रापूरं च पूरयन् । उत्पाट्योत्पाट्य वातोऽसौ भगवन्तमपातयत् ॥ २३३ ॥ (युग्मम्)

१ तावत् *L* ॥ २ °क्का *D*, *M* ॥

तेनापि खरवातेनाऽपूर्णकामो विनिर्ममे । शुसत्कुलकलंकोऽसौ द्राक् कलंकलिकाऽनिलम् ॥ २३४ ॥
भूभृतोऽपि भ्रमयितुमलंकर्मीणविक्रमः । भ्रमयामास चक्रस्थमृत्पिंडमिव स प्रभुम् ॥ २३५ ॥
भ्रम्यमाणोऽर्णवावर्तेनेव तेन नभस्वता । तदेकतानो न ध्यानं मनागपि जहौ प्रभुः ॥ २३६ ॥
वज्रसारमनस्कोऽयं बहुधापि कदर्थितः । न क्षुभ्यति कथमहं भग्नागूर्यामि तां सभाम् ॥ २३७ ॥
तदस्य प्राणनाशेन ध्यानं नश्यति नान्यथा । चिन्तयित्वेति चक्रे स कालचक्रं सुराधमः ॥ २३८ ॥
अहाय तदयोभारसहस्रघटितं ततः । उद्दधार सुरः शैलं कैलासमिव रावणः ॥ २३९ ॥
पृथिवीं संपुटीकर्तुं कृतं मन्ये पुटान्तरम् । [1]उत्पत्य कालचक्रं स प्रचिक्षेपोपरि प्रभोः ॥ २४० ॥
ज्वालाजालैरुच्छलद्भिर्दिशः सर्वाः करालयत् । तत्पपात जगद्भर्तर्यौर्वानल इवार्णवे ॥ २४१ ॥
कुलक्षितिधरक्षोदक्षमस्यास्य प्रहारतः । ममज्जाऽऽजानु भगवानन्तर्वसुमतीतलम् ॥ २४२ ॥
एवं भूतेपि भगवानशोचदिदमस्य यत् । तितारयिषवो विश्वं वयं संसारकारणम् ॥ २४३ ॥
कालचक्रहतोऽप्येष प्रपेदे पंचतां न यत् । अगोचरस्तदस्याणामुपायः क इहापरः ॥ २४४ ॥
अनुकूलैरुपसर्गैः क्षुभ्येद्यदि कथंचन । इति बुद्ध्या [2]विमानस्थः स पुरोऽस्थादुवाच च ॥ २४५ ॥
†[3]सैन्यः प्रकाशमानाशं कोशत्स्वगकुलाकुलम् । प्रातःकालमकालेऽपि दर्शयामास दुष्टधीः ॥ २४६ ॥

१ °त्पाद्य *D. M.* ॥ २ सुरश्चक्रे तानाशु त्रिजगद्गुरोः *L. M.* ॥ ३ †† एतच्चिह्नान्तर्गताः त्रयः श्लोकाः न सन्ति *C D* प्रत्योः ॥

तां च दैवीमसौ मायां मन्यमानो महामनाः । न मुमोच निजध्यानमभिग्रहकृताग्रहः ॥ २४७ ॥
ताडंकहारकेयूरकिरीटद्योतिताम्बरः । तत्संहृत्य विमानस्थः स पुरोऽस्यादुवाच च[1] ॥ २४८ ॥
महर्षे ! तव तुष्टोऽस्मि सत्त्वेन तपसौजसा । प्राणानपेक्षभावेनारब्धनिर्वहणेन च ॥ २४९ ॥
पर्याप्तं तपसाऽनेन शरीरक्लेशकारिणा । ब्रूहि याचस्व मा कार्षीः शंकां यच्छामि किं तव ? ॥ २५० ॥
इच्छामात्रेण पूर्यन्ते यत्र नित्यं मनोरथाः । किमनेनैव देहेन त्वां स्वर्गं प्रापयामि तम् ? ॥ २५१ ॥
अनादिभवसंरूढकर्मनिर्मोक्षलक्षणम् । एकान्तपरमानन्दं मोक्षं वा त्वां नयामि किम् ? ॥ २५२ ॥
अशेषमंडलाधीशमौलिलालितशासनम् । अथवाऽत्रैव यच्छामि साम्राज्यं प्राज्यमृद्धिभिः ? ॥ २५३ ॥
इत्थं प्रलोभनावाक्यैरक्षोभ्यमनसि प्रभौ । अप्राप्तप्रतिवाक् पापः पुनरेवमचिन्तयत् ॥ २५४ ॥
मोघीकृतमनेनैतन्मम शक्तिविजृम्भितम् । तदिदानीममोघं स्याद्यथैकं कामशासनम् ॥ २५५ ॥
यतः कामास्त्रभूताभिः कामिनीभिः कटाक्षिताः । दृष्टा महापुमांसोऽपि लुम्पन्तः पुरुषव्रतम् ॥ २५६ ॥
इति निश्चित्य चित्तेन निर्दिदेश सुरांगनाः । तद्विभ्रमसहायान् षट् प्रायुंक्त स ऋतूनपि ॥ २५७ ॥
कृतप्रस्तावना मत्तकोकिलाकलकूजितैः । कंदर्पनाटकनटी वसन्तश्रीरशोभत ॥ २५८ ॥
मुखवासं सज्जयन्ती विकसन्नीपरेणुभिः । सैरन्ध्रीव दिग्वधूनां ग्रीष्मलक्ष्मीरजृम्भत ॥ २५९ ॥

१ °वाक्योऽस्यं पु° C, L ॥

राज्याभिषेककामस्य मंगल्यतिलकानिव । सर्वांगं केतकव्याजात् कुर्वती प्रावृडाबभौ ॥ २६० ॥
सहस्रनयनीभूय नवनीलोत्पलच्छलात् । स्वसंपदमिवोद्दामां पश्यन्ती शुशुभे शरद् ॥ २६१ ॥
जयप्रशस्तिं कामस्य श्वेताक्षरसहोदरैः । हेमन्तश्रीर्लिलेखेव प्रत्यग्रैः कुन्दकुड्मलैः ॥ २६२ ॥
गणिकेवोपजीवन्ती हेमन्तसुरभीसमम् । कुन्दैश्च सिन्दुवारैश्च शिशिरश्रीरचीयत ॥ २६३ ॥
एवमुज्जृम्भमाणेषु सममेवर्तुषु क्षणात् । मीनध्वजपताकिन्यः प्रादुरासन् सुरांगनाः ॥ २६४ ॥
संगीतमविगीतांग्यः पुरो भगवतस्ततः । ताः प्रचक्रमिरे जैत्रं मंत्रास्त्रमिव मान्मथम् ॥ २६५ ॥
तत्राविसूत्रितलयं गान्धारग्रामबन्धुरम् । काभिश्चिदुदगीयन्त जातयः शुद्धवेसराः ॥ २६६ ॥
क्रमव्युत्क्रमगैस्तानैर्व्यस्तैर्व्यंजनधातुभिः । प्रवीणाऽवादयद्वीणां काचित् सकलनिष्कलाम् ॥ २६७ ॥
स्फुटत्तकारधोंकारप्रकारैर्मेघनिस्वनान् । काश्चिच्च वादयामासुर्मृदंगांस्त्रिविधानपि ॥ २६८ ॥
नभोभूगतचारीकं विचित्रकरणोद्भटम् । दृष्टिभावैर्नवनवैः काश्चिदप्यनरीनृतुः ॥ २६९ ॥
दृढांगहाराभिनयैः सद्यस्त्रुटितकंचुका । बध्नन्ती श्लथधम्मिल्लं दोर्मूलं काऽप्यदीदृशत् ॥ २७० ॥
दंडपादाभिनयनच्छलात् काऽपि मुहुर्मुहुः । चारुगोरोचनागौरमूरुमूलमदर्शयत् ॥ २७१ ॥
श्लथचंडातकग्रन्थिदृढीकरणलीलया । काऽपि प्राकाशयद्वापीसनाभि नाभिमंडलम् ॥ २७२ ॥

१ °द्धचेतसः *D, M* ॥

व्यपदिश्येभदन्ताऽऽव्यहस्तकाभिनयं मुहुः। गाढमंगपरिष्वंगसंज्ञां काचिच्च निर्ममे ॥ २७३ ॥
संचारयन्त्यन्तरीयं नीवीनिबिडनच्छलात्। नितम्बबिंबफलकं काचिदाविरभावयत् ॥ २७४ ॥
अंगभंगापदेशेन वक्षः पीनोन्नतस्तनम्। सुचिरं रोचयामास काचिद्रुचिरलोचना ॥ २७५ ॥
यदि त्वं वीतरागोऽसि रागं तन्नस्तनोषि किम्?। शरीरनिरपेक्षश्चेत्त्रसे वक्षोऽपि किं न नः? ॥ २७६ ॥
दयालुर्यदि चाऽसि त्वं तदानीं विषमायुधात्। अकाण्डाकृष्टकोदण्डादस्मान्न त्रायसे कथम्? ॥ २७७ ॥
उपेक्षसे कौतुकेन यदि नः प्रेमलालसाः। किंचिन्मात्रं हि तद्युक्तं मरणान्तं न युज्यते ॥ २७८ ॥
स्वामिन्! कठिनतां मुंच पूरयास्मन्मनोरथान्। प्रार्थनाविमुखो मा भूः काश्चिदित्यूचिरे चिरम् ॥ २७९ ॥
एवं गीतातोद्यनृत्तैर्विकारैरांगिकैरपि। चाटुभिश्च सुरस्त्रीणां न चुक्षोभ जगद्गुरुः ॥ २८० ॥
एवं विंशत्युपसर्गी तत्र रात्रौ सुराधमः। चक्रे संगमकः कायोत्सर्गस्थस्य जगद्गुरोः ॥ २८१ ॥
प्रातः संगमकश्चैवमचिन्तयदहो अयम्। नैषदप्यचलद्ध्यानान्मर्यादाया इवार्णवः ॥ २८२ ॥
तत्किं यामि दिवं भ्रष्टप्रतिज्ञो यामि वा कथम्। क्षोभयिष्याम्युपसर्गैः स्थित्वाऽहं चिरमप्यमुम् ॥ २८३ ॥
पथि सूर्यकरस्पृष्टे युगमात्रप्रदत्तदृक्। भगवान् वालुकाऽभिख्यं ग्रामं प्रत्यचलत्ततः ॥ २८४ ॥
सुराधमः संगमकः पंचचौरशतीं पथि। विचक्रे वालुकां चोच्चैर्वालुकार्णवसन्निभाम् ॥ २८५ ॥

२ °चे° *D*, *M* ॥ ३ °त्युसरी° *D*, *M* ॥

मातुल ! मातुलेत्युच्चैर्जल्पन्तो दस्यवः प्रभुम् । तथा सस्वजिरे गाढं यथा गिरिरपि स्फुटेत् ॥ २८६ ॥
जगाम वालुकाग्रामं प्रशमामृतसागरः । जानुदघ्न्यां[1] वालुकायां मज्जत्पादो जगद्गुरुः ॥ २८७ ॥
निसर्गक्रूरधीरित्थमुपसर्गान् सुराधमः । पुरे ग्रामे वनेऽन्यत्राप्यनुगच्छन् प्रभोर्व्यधात् ॥ २८८ ॥
उपसर्गकृतो जग्मुर्मासाः संगमकस्य षट् । अथाऽगाद्गोकुले स्वामी तदाऽऽसीत्तत्र चोत्सवः ॥ २८९ ॥
षडप्युपोषितो मासान् भगवानतिलंघ्य तान् । कर्तुकामः पारणकं भिक्षार्थं गोकुलेऽविशत् ॥ २९० ॥
यत्र यत्र गृहे स्वामी प्रययौ तत्र तत्र च । अनेषणां प्रविदधे पापधीः स सुराधमः ॥ २९१ ॥
दत्तोपयोगो ज्ञात्वा तमनिवृत्तं सुराधमम् । स्वामी निवृत्त्य भिक्षायास्तस्थौ प्रतिमया बहिः ॥ २९२ ॥
किं भग्नपरिणामोऽयमिति सोऽप्यवधेः सुरः । यावदैक्षिष्ट तावच्चापश्यदक्षुभितं प्रभुम् ॥ २९३ ॥
स सुरोऽचिन्तयच्चैवं षण्मासीं सन्ततैः कृतैः । नोपसर्गैः कम्पितोऽसौ सह्योऽर्णवजलैरिव ॥ २९४ ॥
दीर्घेणाप्येष कालेन ध्यानान्न हि चलिष्यति । वृथा मे प्रक्रमोऽत्राभूद्गजस्येवाद्रिभेदने ॥ २९५ ॥
स्वर्विलाससुखं हित्वा शापभ्रष्ट इवावनिम् । कियच्चिरं ह हाऽभ्राम्यं निजदुर्बुद्धिवञ्चितः ॥ २९६ ॥
एवं विचिन्त्य स सुरः प्रणम्य च जगद्गुरुम् । कृताञ्जलिर्म्लानमुखो ह्रीणश्चैवमभाषत ॥ २९७ ॥
यथा सभायां शक्रेण कीर्तितोऽसि तथा ह्यसि । तद्वचोऽश्रद्दधानेन मयाऽस्येवमुपद्रुतः ॥ २९८ ॥

१ °दघ्न्यं *C* । °दघ्न° *D* । °दघ्नं° *M* ॥

सत्यप्रतिज्ञस्त्वं भ्रष्टप्रतिज्ञोऽहमसौ पुनः । न व्यधायि मया साधु तत्क्षमस्व क्षमानिधे ! ॥ २९९ ॥
यां यास्याम्युपसन्नोऽहमुपसर्गपराङ्मुखः । व्रज त्वमपि निःशंको ग्रामाकरपुरादिषु ॥ ३०० ॥
ग्रामेषु विश भिक्षार्थं भुंक्ष्वाहारमदूषितम् । भिक्षादोषा अपि पुरा विहितास्ते मयैव हि ॥ ३०१ ॥
स्वाम्यवोचत नश्चिन्तां मुञ्च संगमकामर ! । कस्याप्यधीना न वयं विहरामो निजेच्छया ॥ ३०२ ॥
इत्युक्तवन्तं श्रीवीरं प्रणम्य स सुराधमः । सानुतापः प्रचचाल पुरुहूतपुरीं प्रति ॥ ३०३ ॥
इतश्च कालं तावन्तं सुराः सौधर्मवासिनः । निरानन्दा निरुत्साहा उद्विग्नाश्चावतस्थिरे ॥ ३०४ ॥
शक्रोऽपि मुक्तनेपथ्यांगरागोऽत्यन्तदुःखितः । संगीतकादिविमुखो मनस्येवमचिन्तयत् ॥ ३०५ ॥
इयतामुपसर्गाणां निमित्तमभवं ह्यहम् । मया स्वामिप्रशंसायां कृतायां सोऽकुपत्सुरः ॥ ३०६ ॥
अत्रान्तरे संगमकः पापपंकमलीमसः । प्रणष्टकान्तिप्राग्भारोऽम्भःस्पृष्ट इव दर्पणः ॥ ३०७ ॥
भ्रष्टप्रतिज्ञो *मन्दाक्षमन्दीभूताक्षिपंकजः । देवराजाधिष्ठितां तां सुधर्मामाययौ सभाम् ॥३०८॥ (युग्मम्)
शक्रः संगमकं दृष्ट्वा सद्यो भूत्वा पराङ्मुखः । इत्यूचे भोः सुराः ! सर्वेऽप्याकर्णयत मद्वचः ॥ ३०९ ॥

---

१ °तत्स्यपं °L ।

टि.– मन्दाक्षः लज्जा

अयं हि कर्मचण्डालः पापः संगमकामरः । दृश्यमानोऽपि पापाय तद् द्रष्टुं नैष युज्यते ॥ ३१० ॥
बहुलेकापराद्धं हि अत्स्वामी नः गतदर्शितः । नास्मभ्यमपि किं भीतो भयाद्भीतो न यद्ययम् ॥ ३११ ॥
अर्हन्तो नान्यसाहाय्यात्तप्यन्ते तप इत्यहम् । तथोपसर्गकालेऽपि नामुं पापमशिक्षयम् ॥ ३१२ ॥
अतः परमिह निःशङ्कस्माकमपि पाप्मने । निर्वासनीयस्तदसौ कल्पादस्मात्सुराधमः ॥ ३१३ ॥
इत्युदित्वा वज्रपाणिर्वज्रेणेव शिलोच्चयम् । जघान वामपादेन सुराधममर्मर्षणः ॥ ३१४ ॥
पर्यस्यमानो विविधायुधैर्मोघवैर्भटैः । आकृश्यमानस्त्रिदिवस्त्रीभिर्मोटितपाणिभिः ॥ ३१५ ॥
सामानिकैर्हस्यमानो यानकाख्यविमानगः । स शिष्टैकार्णवायुष्को मेरुचूलां सुरो ययौ ॥ ३१६ ॥
( युग्मम् )
महिष्यः संगमकस्य शक्रमेवं व्यजिज्ञपन् । स्वनाथमनुगच्छामस्त्वदादेशो भवेद्यदि ॥ ३१७ ॥
अनुगन्तुं संगमकं दीनास्या अन्वमंस्त ताः । अवारयत्परीवारमशेषमपि वासवः ॥ ३१८ ॥
द्वैतीयिकेऽथ दिवसे तत्र गोचरचर्यया । प्राविशद्गोकुलवरे पारणेच्छुर्जगद्गुरुः ॥ ३१९ ॥
तत्रैका भक्तितो वत्सपालकस्थविरा प्रभुम् । कल्पेन परमान्नेनोषितेन प्रत्यलाभयत् ॥ ३२० ॥
चिरान्नानेन भगवत्पारणेन प्रमोदिनः । चक्रिरे पञ्च दिव्यानि तत्र सन्निहिताः सुराः ॥ ३२१ ॥
ततश्च विहरन् स्वामी पुरीमालभिकां ययौ । तस्थौ प्रतिमया तत्रालेख्यस्थ इव सुस्थिरः ॥ ३२२ ॥

तत्र विद्युत्कुमारेन्द्रो नाम्ना हरिरिति प्रभुम् । एत्य प्रदक्षिणीकृत्य प्रणम्यैवमवोचत ॥ ३२३ ॥
उपसर्गास्त्वया नाथ ! ते सोढा यैः श्रुतैरपि । अस्मादृशा विदीर्यन्ते वज्रादप्यतिरिच्यसे ॥ ३२४ ॥
स्तोकेनाप्युपसर्गेण घातिकर्मचतुष्टयम् । हनिष्यस्यचिरादेव केवलं चार्जयिष्यसि ॥ ३२५ ॥
इत्युदित्वा भगवन्तं नमस्कृत्य च भक्तितः । हरिर्विद्युत्कुमारेन्द्रो ययौ निजनिकेतनम् ॥ ३२६ ॥
भगवानपि निर्गत्य नगरीं श्वेतवीं ययौ । विद्युदिन्द्रो हरिसहश्चैत्याऽवन्दत प्रभुम् ॥ ३२७ ॥
आख्याय सोऽपि हरिवज्जगाम निजमाश्रयम् । नाथोऽपि गत्वा श्रावस्त्यां तस्थौ प्रतिमया स्थिरः ॥ ३२८ ॥
तस्यां पुर्यां दिने तस्मिन्महाविच्छर्दपूर्वकम् । प्रारब्धोऽभूज्जनैः स्कन्दरथयात्रामहोत्सवः ॥ ३२९ ॥
प्रतिमास्थमतिक्रम्य भगवन्तं पुरीजनाः । स्कन्दं प्रति ययुश्चैत्यपूजापटलिकाभृतः ॥ ३३० ॥
स्नपयित्वा पूजयित्वा स्कन्दस्य प्रतिमां जनाः । रथमध्यारोपयितुमसज्जन्त यथाविधि ॥ ३३१ ॥
तदा चाचिन्तयच्छक्रः कथं विहरति प्रभुः । ददर्श चावधेर्वीरं तथास्थं तांश्च नागरान् ॥ ३३२ ॥
कथं नाथमतिक्रम्य निर्विवेको जनो ह्ययम् । स्कन्दपूजां करोतीति सेर्ष्यस्तत्राययौ हरिः ॥ ३३३ ॥
शक्रेणाधिष्ठिता स्कन्दप्रतिमा प्रतिमास्थितम् । भगवन्तं प्रत्यचालीद्यन्त्रपांचालिकेव सा ॥ ३३४ ॥
अहो स्कन्दकुमारोऽयं रथमारोक्ष्यति स्वयम् । इत्यूचुर्नागरा यावत्तावत् सा स्वामिनं ययौ ॥ ३३५ ॥
सा त्रिः प्रदक्षिणीकृत्य भगवन्तं ननाम च । उपासितुं च प्रारेभे निषण्णा पृथिवीतले ॥ ३३६ ॥

अधमस्यापि देवस्य पूज्यः कोऽपीति सर्वथा । चक्रे न युक्तमस्माभिर्यदस्याऽतिक्रमः कृतः ॥ ३३७ ॥
इति ब्रुवाणास्ते पौरा विस्मयाऽऽनन्दधारिणः । महिमानं प्रभोश्चक्रुः कौशाम्बीं च ययौ प्रभुः ॥ ३३८ ॥
तत्राऽर्केन्दू सविमानौ जिनेन्द्रं प्रतिमास्थितम् । भक्त्याऽभ्येत्य ववन्दाते सुयात्राप्रश्नपूर्वकम् ॥ ३३९ ॥
क्रमाच्च विहरन् स्वामी ययौ वाराणसीं पुरीम् । अभ्येत्य तत्र शक्रेण ववन्दे मुदितात्मना ॥ ३४० ॥
ततो राजगृहे गत्वा स्थितं प्रतिमया प्रभुम् । ईशानेन्द्रोऽनमद्भक्त्या सुयात्राप्रश्नपूर्वकम् ॥ ३४१ ॥
गतोऽथ मिथिलापुर्यां स्वामी जनकभूभुजा । धरणेन्द्रेण चाऽपूजि प्रियप्रश्नविधायिना ॥ ३४२ ॥
ततो विहरमाणोऽगाद्वैशालीं नगरीं प्रभुः । तत्र चैकादशो वर्षाकालो व्रतदिनादभूत् ॥ ३४३ ॥
तस्यां च समरोद्याने बलदेवनिकेतने । चतुर्मासक्षपणभृत्तस्थौ प्रतिमया प्रभुः ॥ ३४४ ॥
भूतानन्दो नागराजस्तत्रैत्याऽवन्दत प्रभुम् । आसन्नं केवलज्ञानं समाख्याय जगाम च ॥ ३४५ ॥
परमश्रावकस्तत्र जिनदत्ताभिधोऽवसत् । दयावान् विश्रुतो जीर्णश्रेष्ठीति विभवक्षयात् ॥ ३४६ ॥
तत्रोद्याने बलदेवायतने स गतस्तदा । जिनदत्तो जिनपतिं ददर्श प्रतिमास्थितम् ॥ ३४७ ॥
छद्मस्थ एष सर्वज्ञोऽस्तीति निश्चित्य स प्रभुम् । भक्त्या ववन्दे परया चित्ते चैवमचिन्तयत् ॥ ३४८ ॥
उपोषितोऽसौ भगवानद्यास्ति प्रतिमाधरः । श्वः कर्ता पारणं चेन्मे मन्दिरे सुन्दरं तदा ॥ ३४९ ॥

नित्यमित्याशया नाथं चतुर्मासीमसेवत । तदन्त्याह्ने निमन्त्र्येशं स ययौ निजवेश्मनि ॥ ३५० ॥
पूर्वंसंसाधितान्यात्मनिमित्तं स महामनाः । प्रासुकान्येषणीयानि वरभोज्यान्यचिन्तयत् ॥ ३५१ ॥
जिनदत्तो जिनमार्गदत्तदृक् प्रांगणे स्थितः । दध्यावेतानि भोज्यानि दास्यामि स्वामिने खलु ॥ ३५२ ॥
धन्योऽस्मि खलु यस्यैकस्यार्हन् स्वयमिहैष्यति । करिष्यति पारणं च संसारार्णवतारणम् ॥ ३५३ ॥
आगच्छतश्च नाथस्य गमिष्याम्यथ संमुखम् । त्रिश्च प्रदक्षिणीकृत्य वन्दिष्ये तत्पदाम्बुजे ॥ ३५४ ॥
अपुनर्जन्मने जन्म मम चेदं भविष्यति । मोक्षाय दर्शनमपि किं पुनः पारणं प्रभोः ॥ ३५५ ॥
एवं च चिन्तयन् यावत्स तस्थौ शुचिमानसः । तावज्जगामाऽभिनवश्रेष्ठिनो धामनि प्रभुः ॥ ३५६ ॥
स श्रेष्ठी श्रीमदोद्ग्रीवश्चेटीं मिथ्यादृगादिशत् । दत्त्वा भिक्षामसौ भिक्षुर्मंक्षु भद्रे ! विसृज्यताम् ॥३५७॥
दारुहस्तकहस्ता सा कुल्माषान् समुपानयत् । चिक्षेप च जग[2]द्भर्तुः[1] पाणिपात्रे प्रसारिते ॥ ३५८ ॥
ताडितो दुन्दुभिर्देवैश्चैलोत्क्षेपश्च निर्ममे । वसुधारा पुष्पगन्धाम्भसां वृष्टिश्च तत्क्षणात् ॥ ३५९ ॥
लोकैश्च पृष्टोऽभिनवश्रेष्ठी मायैवमब्रवीत् । स्वयं मया पायसेन पारणं कारितः प्रभुः ॥ ३६० ॥
अहो दानं सुदानं चेत्याकर्ण्य दिविषद्ध्वनिम् । लोको राजा चाभिनवश्रेष्ठिनं तुष्टुवुर्मुहुः ॥ ३६१ ॥
स्वाम्यागमनचिन्तावाञ्जीर्णश्रेष्ठी तथा स्थितः । दिविषद्दुन्दुभिध्वानमाकर्ण्यैवं व्यचिन्तयत् ॥ ३६२ ॥

¹दन्ताहृ C L ॥ ² °द्भर्त्रे C ॥

चतुर्थः सर्गः

धिगहो मन्दभाग्योऽस्मि मुधा मम मनोरथः । यदनिष्क्रम्य मद्गेहमाऽन्यत्र प्रभुरपारयत् ॥ ३६३ ॥
पारयित्वा प्रभुरपि विहरन्नन्यतो ययौ । तत्रोद्याने पार्श्वशिष्यः केवल्यथ समाययौ ॥ ३६४ ॥
राजा लोकश्च तं गत्वा पप्रच्छ भगवन्निह । नगर्यां को महापुण्यसंभारोपार्जको जनः? ॥ ३६५ ॥
जीर्णश्रेष्ठीति सोऽप्याख्यल्लोकोऽप्यूचे कथं ह्यसौ । न स्वामी पारितोऽनेनाऽभिनवेन हि पारितः ॥ ३६६ ॥
वसुधाराप्यभिनवश्रेष्ठिनो मन्दिरेऽपतत् । स कथं न महापुण्यसंभारोपार्जकः प्रभो ! ॥ ३६७ ॥
केवल्याख्यद्भावतोऽर्हञ्जिनदत्तेन पारितः । तथोपार्ज्यच्युते कल्पे जन्मानेन भवादितः ॥ ३६८ ॥
तादृग्भावस्तदाऽयं चेन्नाश्रोष्यद् दुन्दुभिध्वनिम् । तदा ध्यानान्तरगतः प्राप्स्यत्केवलमुज्ज्वलम् ॥ ३६९ ॥
शुद्धभावविहीनेनाऽभिनवश्रेष्ठिना पुनः । प्राप्तमर्हत्पारणस्य वसुधारैहिकं फलम् ॥ ३७० ॥
भक्तपभक्तिविहीनं तदर्हत्पारणजं फलम् । आकर्ण्य विस्मितो लोकः स्थानं निजनिजं ययौ ॥ ३७१ ॥
इतश्च नगरग्रामाकरद्रोणमुखादिषु । विहरन् भगवान् वीरः सुंसुमारपुरं ययौ ॥ ३७२ ॥
तत्रोद्यानेऽशोकखंडेऽधोऽशोकद्रोः शिलातले । कृताष्टमप्रभुर्भेजे प्रतिमामेकरात्रिकीम् ॥ ३७३ ॥
इतश्चात्रैव भरते विन्ध्यपादतलस्थिते । [1]विभेले सन्निवेशेऽभूद्धनवान् पूरणो गृही ॥ ३७४ ॥
निशीथे सोऽन्यदा दध्यौ नूनं पूर्वभवे मया । कृतं महत्तपो येन श्रीरियं मान्यता च मे ॥ ३७५ ॥

१ बेभेले *C L* ॥

फलं प्राक्कर्मणामत्र प्राप्यते हि शुभाशुभम् । सेव्यसेवकभावेन सज्जनेष्वनुमीयते ॥ ३७६ ॥
गृहवासं परित्यज्य स्वजनान्प्रतिबोध्य च । एष्यद्भवे फलप्राप्त्यै चरिष्यामि तपो यतः ॥ ३७७ ॥
मासैरष्टभिरह्ना च पूर्वेण वयसाऽऽयुषा । तत्कर्तव्यं मनुष्येण येनान्ते सुखमेधते ॥ ३७८ ॥
एवं विचिन्त्य स प्रातर्भोजयित्वा स्वकाञ्जनान् । आपृच्छ्य च व्रतकृते स्वपदे तनयं न्यधात् ॥ ३७९ ॥
स्वयं च नाम्ना प्राणामं तापसव्रतमाददे । चतुःपुटं दारुमयं भिक्षापात्रमथाग्रहीत् ॥ ३८० ॥
आरभ्य तद्दिनादेव सदा षष्ठानि सोऽकरोत् । आत्मानमातापनया कृशयामास चाऽन्वहम् ॥ ३८१ ॥
प्राप्ते च पारणदिने भाजनं तच्चतुःपुटम् । गृहीत्वा प्रययौ भिक्षाकृते मध्यंदिनक्षणे ॥ ३८२ ॥
क्षिप्तामाद्ये पुटे भिक्षां पान्थादीनामदत्त सः । द्वितीयपुटभिक्षां च काकादिभ्यः पुनर्ददौ ॥ ३८३ ॥
मत्स्यादिजलचारिभ्यस्तृतीयपुटगामदात् । रागद्वेषौ विनाऽभुंक्त चतुर्थपुटगां स्वयम् ॥ ३८४ ॥
एवं द्वादशवर्षाणि कृत्वा बालतपः स तु । बिभेलसन्निवेशस्यैशान्यामनशनं ललौ ॥ ३८५ ॥
मासं सोऽनशनं कृत्वा मृत्वा बालतपोवशात् । अभूच्चमरचंचायां चमरेन्द्रोऽर्णवस्थितिः ॥ ३८६ ॥
उत्पन्नमात्रो भुवनान्तराण्यवधिचक्षुषा । द्राक् पश्यन्नूर्ध्वमपि हि सौधर्मेन्द्रं ददर्श सः ॥ ३८७ ॥
स्थितं विमाने सौधर्मावतंसे वज्रधारिणम् । शक्रं महर्द्धिं स प्रेक्ष्य क्रुद्धोऽवोचदिति स्वकान् ॥ ३८८ ॥

१ तु *D, M* ॥

अप्रार्थितप्रार्थकोऽयं को नु मे शिरसि स्थितः । दुरात्मा विलसत्येवं निर्लज्जः सुरपांसनः ॥ ३८९ ॥
सामानिकाद्यास्ते मूर्ध्नि निबद्धाञ्जलयोऽवदन् । अयं सौधर्मकल्पेन्द्रो महौजाश्चण्डशासनः ॥ ३९० ॥
तच्छ्रुत्वाऽभ्यधिकं क्रुद्धो भ्रुकुटीभीषणाननः । नासासूत्कारपर्यस्तचामरश्चमरोऽवदत् ॥ ३९१ ॥
मद्विक्रमानभिज्ञाः स्थ तद्यूयं तं प्रशंसथ । एष वो दर्शयिष्यामि स्वबलं तस्य पातनात् ॥ ३९२ ॥
उच्चस्थानस्थितो दैवात् प्रभुर्नैतावताऽप्ययम् । गजशारीनिविष्टः किं काकोलो रथिकीभवेत् ? ॥ ३९३ ॥
यत् स्थितस्तत् स्थितोऽसौ भो मयि क्रुद्धे त्वतः परम् । न स्थास्यत्युदिते ह्यर्के न तेजांसि तमांसि च ३९४
अथ सामानिकाः प्रोचुरयं पूर्वभवार्जितैः । पुण्यैर्दिविषदीशोऽभूदधिकर्द्धिपराक्रमः ॥ ३९५ ॥
त्वं स्वपुण्यानुमानेन प्रभुरस्मादृशामभूः । पुण्याधीनो हि विभवस्तदीर्ष्यामिह मा कृथाः ॥ ३९६ ॥
विक्रमोपक्रमो ह्यस्मिन् क्रियमाणस्त्वया भवेत् । उपहासाय पाताय शरभस्याम्बुदेष्विव ॥ ३९७ ॥
तत्प्रशाम्य सुखं तिष्ठ भुंक्ष्व भोगान् यथासुखम् । विनोदान् पश्य विविधान् सेव्यमानोऽस्मदादिभिः ३९८
अथ तांश्चमरोऽवोचद्यूयं तद्भीरवो यदि । ननु तत्तिष्ठतात्रैव यास्याम्येकोऽपि तज्जुषि ॥ ३९९ ॥
सुराणामसुराणां च स्यादिन्द्रः सोऽथवाऽप्यहम् । प्रत्याकारे यदेकस्मिन् युगपन्न ह्यसिद्वयम् ॥ ४०० ॥
इत्यूर्जितं स गर्जित्वा समुत्पिपतिषुर्दिवि । किंचिज्ज्ञातविवेकः सन् भूयोऽप्येवमचिन्तयत् ॥ ४०१ ॥

१ च° *D*, *M* ॥ २ °धे *D*, *M* ॥

अमी सामानिकाः शक्रं शक्तमाचक्षते यथा । भविष्यति तथा किंचिन्न खल्वेते ममाहिताः ॥ ४०२ ॥
कार्यगतिर्विषमा च दैवाच्चेन्मे पराजयः । तदा कं शरणं यास्याम्यमुष्मादधिकौजसः ॥ ४०३ ॥
एवं विचिन्त्य प्रायुंक्तावधिं सोऽथ ददर्श च । सुंसुमारपुरे वीरस्वामिनं प्रतिमास्थितम् ॥ ४०४ ॥
निश्चित्य शरणीकार्यं श्रीवीरं चमरासुरः । उत्थायाऽगात् प्रहरणशालां तुंबालयाह्वयाम् ॥ ४०५ ॥
जग्राह तत्र परिघं मृत्योर्भुजमिवापरम् । द्विस्त्रिश्च चालयामास तिर्यगूर्ध्वं च स द्रुतम् ॥ ४०६ ॥
वीर इत्यसुरस्त्रीभिर्वीक्ष्यमाणः सकामनम् । उत्साह्यमानो भुवनपतिभिः कौतुकार्थिभिः ॥ ४०७ ॥
उपेक्ष्यमाणोऽज्ञ इति निजैः सामानिकासुरैः । पुर्याश्चमरचंचायाः निर्ययौ चमरासुरः ॥ ४०८ ॥ ( युग्मम् )
क्षणाच्छ्रीवीरमासाद्य मुक्त्वा परिघमायुधम् । स त्रिः प्रदक्षिणीकृत्य नत्वा चैवं व्यजिज्ञपत् ॥ ४०९ ॥
भगवंस्त्वत्प्रभावेण शक्रं जेष्यामि दुर्जयम् । सोऽत्यन्तं बाधते मां हि मन्मूर्ध्नः उपरि स्थितः ॥ ४१० ॥
इत्युक्त्वाऽऽदाय परिघमैशान्यामुपसृत्य च । सद्यो विचक्रे स्वं रूपं प्रमाणे लक्षयोजनम् ॥ ४११ ॥
मूर्तीभूतमिव व्योम श्यामच्छविमहातनुः । नन्दीश्वरमहाद्वीपाञ्जनाद्रिरिव जंगमः ॥ ४१२ ॥
दंष्ट्राक्रकचभीमास्यो विलोलश्यामकुन्तलः । वक्त्रकुंडोच्छलज्ज्वालाजालपल्लविताम्बरः ॥ ४१३ ॥
पृथुवक्षःस्थलाभोगस्थगितादित्यमंडलः । दोर्दंडप्रेंखणभ्रश्यद्ग्रहनक्षत्रतारकः ॥ ४१४ ॥

---

१ तुंपाल° C । तुंपाल° L ॥ २ °तनु L ॥

नाभीमंडलसंलीनफणिफूत्कारदारुणः । शैलचूलाग्रसंलग्नजानूज्जनितविस्मयः ॥ ४१५ ॥
पादावष्टंभविधुरीकृतभूमंडलोऽथ सः । समुत्पपात दर्पान्धः सौधर्माधिपतिं प्रति ॥ ४१६ ॥

( पंचभिः कुलकम् )

ऊर्जितैर्गर्जितैः सर्वं ब्रह्माण्डं स्फोटयन्निव । व्यन्तरान् भीषयमाणो भीष्मोऽन्तक इवापरः ॥ ४१७ ॥
ज्योतिष्कांस्त्रासयश्चुच्चैः कुरंगानिव केसरी । क्षणात्प्रापात्सूर्येन्दुमंडलः शक्रमंडलम् ॥ ४१८ ॥
निलिल्यिरे किल्बिषिकास्तत्रसुश्चाभियोगिकाः । सेनान्योऽपि समं सैन्यैरकस्मादपि दुद्रुवुः ॥ ४१९ ॥
पलायन्ते स्म दिक्पालाः सोमवैश्रवणादयः । वेगेनापतलस्तस्माद्भयंकरमहात्मनोः ॥ ४२० ॥
आत्मरक्षैरस्खलितो वेत्रिणाऽप्यनिवारितः । किमेतदिति संभ्रान्तैस्त्रायस्त्रिंशैर्निरीक्षितः ॥ ४२१ ॥
सकोपविस्मयैर्दृष्टः सोऽथ सामानिकैर्न्यधात् । एकं क्रमं पद्मवेद्यां सुधर्मायामथापरम् ॥ ४२२ ॥ (युग्मम् )
परिघेणेन्द्रकीलं त्रिस्ताडयित्वा स दुर्मदः । उत्कटां भ्रकुटिं बिभ्रच्छक्रमेवमवोचत ॥ ४२३ ॥
एवंविधानां वृन्देन षिड्गानामिव नाकिनाम् । ओजसा किं बिडोजस्त्वं ममोपर्यवतिष्ठसे ? ॥ ४२४ ॥
अधुना पातयामि त्वामधस्तादात्मनोऽपि हि । मुधा चिरं स्थितोऽसीह शैलाग्र इव मौकुलिः ॥ ४२५ ॥
पुर्याश्चमरचंचायाः स्वामिनं चमरासुरम् । किं मामपि न जानासि विश्वासह्यपराक्रमम् ? ॥ ४२६ ॥
केसरीव व्याधहक्कां तादृक्षं परुषं वचः । अनाकर्णितपूर्वीन्द्रः सिष्मियेऽथ विसिष्मिये ॥ ४२७ ॥ ॥ १२३ ॥

ज्ञात्वाऽवधेस्तं चमरं रे रे नश्येत्यथ ब्रुवन् । भृकुटीमिव दुर्दर्शां शक्रो दंभोलिमुद्दधे ॥ ४२८ ॥
सारं कल्पानलस्येव विद्युतामिव संचयम् । वृन्दीभूतमिवौर्वाग्निज्वालेद्धं सोऽमुचत्पविम् ॥ ४२९ ॥
तडत्तडिति कुर्वाणं त्रस्तगीर्वाणवीक्षितम् । गीर्वाणपतिमुक्तं तच्चमरं प्रत्यधावत ॥ ४३० ॥
अर्कतेज इवोलूको द्रष्टुमप्यक्षमः पविम् । वल्गुलीवोर्ध्वपादोऽधोमौलिर्विभ्रंश सोऽसुरः ॥ ४३१ ॥
भगवन्तं महावीरं प्रपित्सुः शरणं ततः । द्राक् पलायिष्ट चमरश्चमरश्छिन्नकादिव ॥ ४३२ ॥
महाहेरिव मंडूक उरभ्र इव दन्तिनः । कुञ्जरः शरभस्येव गरुडस्येव पन्नगः ॥ ४३३ ॥
अनात्मज्ञः कथमरे युयुत्सुरसुराधमः । शक्रस्यास्फलित इति स नश्यञ्जहसेऽमरैः ॥ ४३४ ॥ (युग्मम्)
योऽभूत्तादृग्महादेहो लघुदेहः क्षणेन सः । वाताहृत इवाम्भोदस्त्वरितत्वरितं ययौ ॥ ४३५ ॥
तस्याणूकृतरूपस्य गोधाया इव पृष्ठतः । समापतन्नशोभिष्ट ज्वालाजालाकुलोऽशनिः ॥ ४३६ ॥
इतश्च वज्रे निर्मुक्तमात्रे वज्रीत्यचिन्तयत् । नासुराणामिहाऽऽगन्तुं शक्तिः संभवति स्वतः ॥ ४३७ ॥
अर्हन्तमर्हच्चैत्यं वा महर्षिं कंचनाथ वा । मन्ये मनसिकृत्याऽसौ जातशक्तिरिहाययौ ॥ ४३८ ॥
विचिन्त्येत्यवधेः शक्रोऽज्ञासीत् स्वामिप्रभावतः । तत्राऽऽयातं चमरेन्द्रं यान्तं च स्वामिनं प्रति ॥ ४३९ ॥
हा हा हतोऽस्मीति वदन्निन्द्रः कुलिशवर्त्मना । द्रुतद्रुतमधाविष्ट त्रुटद्धारादिभूषणः ॥ ४४० ॥

१ शक्रेणोत्थासित इति L ॥

अधस्तान्निजभूमित्वाच्चमरस्तत्र चाग्रतः । तत्पृष्ठतोऽगाद्दम्भोलिर्वज्री तत्पृष्ठतः पुनः ॥ ४४१ ॥
पश्चात्प्रचलितोऽपीन्द्रो निजशक्त्याऽतिवेगवान् । करीव प्रतिकारस्य तयोर्निकटवर्त्यभूत् ॥ ४४२ ॥
आसन्नप्राप्तकुलिशः कथंचित्प्राप सोऽसुरः । प्रतिमास्थं महावीरं दवार्तद्विपवन्नदीम् ॥ ४४३ ॥
शरणं शरणमिति ब्रुवाणः स्वामिपादयोः । अन्तरे सूक्ष्मकीभूय कुन्थुवच्चमरोऽविशत् ॥ ४४४ ॥
चतुरंगुलमप्राप्तं स्वामिपादारविन्दयोः । वज्रं मुष्ट्याऽग्रहीद्वज्री सर्पं गारुडिको यथा ॥ ४४५ ॥
प्रभुं प्रदक्षिणीकृत्य वन्दित्वा च पुरन्दरः । कृताञ्जलिरुवाचैवं भक्तिनिर्भरया गिरा ॥ ४४६ ॥
नाऽज्ञासिषं यथा स्वामिपादपद्मप्रभावतः । आगमच्चमरेन्द्रो मामुपद्रोतुं समुद्धतः ॥ ४४७ ॥
अज्ञानादमुचं वज्रं पश्चाच्चावधिनाऽबुधम् । अमुं त्वत्पादसंलीनं सहस्वाऽऽग इदं मम ॥ ४४८ ॥
इत्युक्त्वा शक्र ऐशान्यां स्थित्वा वामांघ्रिणा भुवम् । रोषनाशाय भित्त्वा त्रिश्चमरेन्द्रमदोऽवदत् ॥ ४४९ ॥
भो भोः ! साधु त्वया चक्रे यद्विश्वाभयदः प्रभुः । शिश्रिये शरणायाऽयं गुरुः सर्वगरीयसाम् ॥ ४५० ॥
मया वैरं समुत्सृज्य मुक्तोऽसि चमरासुर ! । गत्वा चमरचंचायां स्वर्द्धिसुखभाग्भव ॥ ४५१ ॥
एवं चमरमाश्वास्य भूयोऽपि परमेश्वरम् । नमस्कृत्य प्रतिययौ निजं स्थानं पुरन्दरः ॥ ४५२ ॥
गते शक्रे चमरेन्द्रः प्रभोः पादद्वयाऽन्तरात् । निरगादस्तमितेऽर्के गुहाया इव कौशिकः ॥ ४५३ ॥

१ °सुरः *C*, *D*, *L* ॥

स प्रणम्य जगन्नाथमित्यूचे रचिताञ्जलिः । अशेषजीवजीवातो! त्वमेव मम जीवदः ॥ ४५४ ॥
अनेकदुःखनिलयाद्विमुच्यन्ते भवादपि । त्वत्पादौ शरणं प्राप्ताः किं पुनः कुलिशादहम् ॥ ४५५ ॥
अहं पूर्वभवेऽप्यज्ञोऽकार्षं बालतपः प्रभो ! । अज्ञतासहितं प्रापमासुरेन्द्रत्वं च तत्फलम् ॥४५६॥
मया स्वयमनर्थोऽयमज्ञानादात्मनः कृतः । इदमेव कृतं सुष्ठु यत्त्वं शरणमाश्रितः ॥ ४५७ ॥
शरणं प्राग्भवेऽपि त्वामकरिष्यमहं यदि । प्राप्स्यमप्यच्युतेन्द्रत्वमहमिन्द्रत्वमप्यथ ॥ ४५८ ॥
यदि वा कृतमिन्द्रत्वैः सर्वं प्राप्तं मया प्रभो ! । जगत्त्रितयनाथ ! त्वं नाथः प्राप्तोऽधुनापि यत् ॥ ४५९ ॥
सश्रद्धमभिधायैवं नत्वा च परमेश्वरम् । पुरीं चमरचंचाख्यां जगाम चमरासुरः ॥ ४६० ॥
तत्र सिंहासनाऽऽसीनश्चमरेन्द्रस्त्रपानतः । अवोचत स्वागतिकान्निजान् सामानिकादिकान् ॥ ४६१ ॥
यथा हि मध्यस्थतया शक्रो युष्माभिरौच्यत । स तथैव परं मोहादज्ञायि न मया तथा ॥ ४६२ ॥
तत्सभामगमं सिंहकन्दरामिव जंबुकः । उपेक्ष्यमाणस्तल्लोकैः कौतुकस्य दिदृक्षया ॥ ४६३ ॥
शक्रनिर्मुक्तकुलिशात् कृच्छ्रान्मुक्तो गतोऽस्म्यहम् । शरणं वीरचरणौ सुरासुरनमस्कृतौ ॥ ४६४ ॥
श्रीवीरशरणस्थोऽहं जीवन्मुक्तो बिडौजसा । इहाऽऽगच्छं चलत भो ! गत्वा वन्दामहे जिनम् ॥ ४६५ ॥
इत्युक्त्वा सपरीवारश्चमरः प्रभुमाययौ । नत्वा चक्रे च संगीतं जगाम स्वां पुरीं ततः ॥ ४६६ ॥

---

१ अज्ञानस° *C, L* ॥

प्रातर्नाथोऽपि संहृत्य प्रतिमामेकरात्रिकीम् । क्रमेण विहरन् प्राप पुरं भोगपुराभिधम् ॥ ४६७ ॥
माहेन्द्रः क्षत्रियस्तत्र जिनेन्द्रं प्रेक्ष्य दुर्मतिः । खर्जूरीयष्टिमुद्यम्य प्रजिहीर्षुरधावत ॥ ४६८ ॥
चिरदर्शनसोत्कंठो द्रष्टुं च स्वामिनं तदा । आगात् सनत्कुमारेन्द्रस्तत्राऽपश्यच्च तं शठम् ॥ ४६९ ॥
निर्भर्त्स्य च क्षत्रियं तमिन्द्रः प्रभुमवन्दत । भक्त्या सुखविहारं चाऽपृच्छत् स्वं च पदं ययौ ॥ ४७० ॥
नन्दिग्रामं ययौ ग्रामं विहरन् भगवानपि । नन्दिना पितृमित्रेण भक्तितस्तत्र चार्च्यत ॥ ४७१ ॥
ग्रामेऽथ मेण्ढकग्रामे भगवान् विहरन् ययौ । दधावे तत्र हन्तुं च गोपालो वालरज्जुभृत् ॥ ४७२ ॥
कूर्मारग्रामवत्तत्र ग्रन्तमेत्य पुरन्दरः । गोपं निवारयामास ववन्दे च जगद्गुरुम् ॥ ४७३ ॥
ततो निष्क्रम्य भगवान् कौशाम्बीं नगरीं ययौ । राजा तस्यां शतानीकः परानीकभयंकरः ॥ ४७४ ॥
चेटकोर्वीशदुहिता तद्राज्ञी च मृगावती । श्राविका तीर्थकृत्पादपूजानिष्ठा सदैव हि ॥ ४७५ ॥
राज्ञस्तस्य च सचिवः सुगुप्तो नाम तत्प्रिया । नन्दा नाम श्राविकेति मृगावत्याः परा सखी ॥ ४७६ ॥
श्रेष्ठी धनावहो नाम्ना तत्र चाऽऽसीन्महाधनः । मूलाऽभिधाना तस्यापि गृहिणी गृहकर्मठा ॥ ४७७ ॥
तत्र स्वामी पौषमासबहुलप्रतिपद्दिने । दुराचरं दुर्ग्रहं च जग्राहैवमभिग्रहम् ॥ ४७८ ॥
अयोनिगडबद्धांघ्रिर्मुण्डिताऽनशिता सती । रुदती मन्युना राजकन्याऽपि प्रेष्यतां गता ॥ ४७९ ॥

१ °भर्त्स्य क्ष° C, L ॥

देहल्यन्तः स्थितैकांघ्रिर्बहिः क्षिप्ताऽपरांघ्रिका । गृहात् प्रतिनिवृत्तेषु सर्वभिक्षाचरेषु [1]च ॥ ४८० ॥
यदि मे शूर्पकोणेन कुल्माषान् संप्रदास्यति । चिरेणापि तदैवाऽहं पारयिष्यामि नान्यथा ॥ ४८१ ॥
(त्रिभिर्विशेषकम्)

गृहीत्वाऽलक्ष्यमाणाभिग्रहं प्रतिदिनं प्रभुः । उच्चावचेषु गेहेषु भ्रमति स्म यथाक्षणम् ॥ ४८२ ॥
अभिग्रहवशाद्भिक्षां दीयमानामगृह्णति । स्वामिनि प्रत्यहं पौरास्ताम्यन्ति स्मात्मनिन्दिनः ॥ ४८३ ॥
अनात्तभिक्षः स्वाम्येवं द्वाविंशतिपरीषहीम् । सहमानोऽनयन्मासांश्चतुरः प्रहरानिव ॥ ४८४ ॥
भिक्षार्थमन्यदा स्वामी सुगुप्तामात्यवेश्मनि । प्रविवेश ददृशे च दूरादपि च नन्दया ॥ ४८५ ॥
अयमर्हन्महावीरो दिष्ट्या मद्गृहमागतः । इति ब्रुवाणाऽभ्युत्तस्थौ नन्दाऽऽनन्देन पूरिता ॥ ४८६ ॥
कल्पनीयानि भोज्यानि साऽभिज्ञा समुपानयत् । स्वाम्यप्यभिग्रहवशात्तान्यनादाय निर्ययौ ॥ ४८७ ॥
धिगहं मन्दभाग्याऽस्मि न पूर्णो मे मनोरथः । इति खेदं दधारोच्चैर्नन्दा मन्दमनाः सती ॥ ४८८ ॥
तां सखेदां च दास्यूचे देवार्योऽयं दिने दिने । अनात्तभिक्षो निर्याति न खल्वद्यैव निर्गतः ॥ ४८९ ॥
एवमाकर्ण्य नन्दाऽपि बुबुधे यदभिग्रहः । विशिष्टः कोऽपि तन्नोपादत्तेऽसौ प्रासुकान्यपि ॥ ४९० ॥
स्वामिनोऽभिग्रहो ज्ञेयः कथं न्विति विचिन्तया । निरानन्दैव नन्दाऽस्थात् सुगुप्तस्तां ददर्श च ॥ ४९१ ॥



१ तु C, L ॥

सुगुप्तस्तामुवाचैवं किमुद्विग्नेव लक्ष्यसे । खंडिताऽऽज्ञाऽसि किं केनाप्यपराद्धं मयाऽथवा ॥ ४९२ ॥
साप्यूचे खंडिता नाज्ञा नापराधस्तथापि च । न पारयामि श्रीवीरमिति खेदाय किन्तु मे ॥ ४९३ ॥
भिक्षार्थी भगवान् वीरो नित्यमायाति याति च । अनात्तभिक्ष एवायमभिग्रहविशेषतः ॥ ४९४ ॥
जानीह्यभिग्रहं भर्तुर्न चेज्जानासि तन्मुधा । बुद्धिस्तव महामात्य ! परचित्तोपलक्षिणी ॥ ४९५ ॥
सुगुप्तोऽपि जगादैवं जगद्भर्तुरभिग्रहः । यथा विज्ञास्यते प्रातः प्रयतिष्ये तथा प्रिये ! ॥ ४९६ ॥
तदैवाऽऽगान्मृगावत्या वेत्रिणी विजयाह्वया । तयोः श्रुत्वा तमालापं गत्वा देव्याः शशंस च ॥ ४९७ ॥
तथैव खेदं विदधे मृगावत्यपि तत्क्षणम् । संभ्रान्तश्च शतानीकोऽपृच्छत्तां खेदकारणम् ॥ ४९८ ॥
किंचिदुन्नमितभ्रूका व्याजहार मृगावती । अन्तर्विषादकालुष्योद्गारच्छुरितया गिरा ॥ ४९९ ॥
चराचरं जगदिदं चरैर्जानन्ति भूभुजः । त्वं तु स्वपत्तनमपि न वेत्सि ब्रूमहेऽत्र किम् ॥ ५०० ॥
त्रैलोक्यपूज्यो भगवान् वीरश्चरमतीर्थकृत् । वसत्यत्रेति किं वेत्सि? राज्यसौख्यप्रमद्वरः ॥ ५०१ ॥
वेश्म वेश्मानुप्रवेशं भिक्षामपरिगृह्य सः । कुतोऽप्यभिग्रहाद्यातीत्येतज्जानासि किं ननु ? ॥ ५०२ ॥
धिङ् मां धिक् त्वाममात्यान् धिग्यदत्र परमेश्वरः । अज्ञाताऽभिग्रहोऽनात्तभिक्षस्तस्थावियच्चिरम् ॥ ५०३ ॥
प्रत्यभाषिष्ट भूपोऽपि साधु साधु शुभाशये ! । प्रमादी शिक्षितोऽस्म्येष स्थाने धर्मविचक्षणे ! ॥ ५०४ ॥
विज्ञायाभिग्रहं प्रातः कारयिष्यामि पारणम् । विश्वस्वामिनमित्युक्त्वा राज्ञा (जा) सचिवमाह्वत ॥ ५०५ ॥ ॥ १२९ ॥

अमात्यमूचे नृपतिर्मत्पुर्यां त्रिजगद्गुरुः । अनात्तभिक्षश्चतुरो मासांस्तस्थौ धिगत्र नः ॥ ५०६ ॥
ज्ञातव्योऽभिग्रहो भर्तुः संपूर्याऽभिग्रहं यथा । कारयामि पारणकं जगन्नाथं स्वशुद्धये ॥ ५०७ ॥
अमात्योऽप्यब्रवीद् भर्तुर्ज्ञायतेऽभिग्रहो न हि । इति खिन्नेऽहमप्युच्चैरुपायः कोऽपि सूच्यताम् ॥ ५०८ ॥
अथ राजा समाहूय नामतस्तथ्यवादिनम् । उपाध्यायं धर्मशास्त्रविचक्षणमवोचत ॥ ५०९ ॥
आचाराः सर्वधर्माणां शास्त्रे तव महामते ! । कीर्त्यन्ते तत्समाख्याहि जिनभर्तुरभिग्रहम् ॥ ५१० ॥
उपाध्यायोऽप्यभाषिष्ट बहवोऽभिग्रहाः खलु । महर्षीणां द्रव्यक्षेत्रकालभावविभेदतः ॥ ५११ ॥
अभिग्रहो भगवता गृहीतोऽयमिति ध्रुवम् । विना विशिष्टज्ञानेन ज्ञायते न हि जातुचित् ॥ ५१२ ॥
राजाऽथाघोषयत्पुर्यां यदभिग्रहिणः प्रभोः । अनेकधोपनेतव्या भिक्षा भिक्षार्थमेयुषः ॥ ५१३ ॥
राजाऽऽज्ञया श्रद्धया च तथा चक्रे जनोऽखिलः अपूर्णाभिग्रहः स्वामी भिक्षां जग्राह न क्वचित् ॥ ५१४ ॥
अम्लानांगस्तथाप्यस्थाद्विशुद्धज्ञानभाक् प्रभुः । व्रीडाखेदाकुलैः पौरैर्वीक्ष्यमाणो दिने दिने ॥ ५१५ ॥
इतश्च पूर्वं नौसैन्यैः शतानीको निशैकया । गत्वाऽरुणत् पुरीं चम्पां झंपासमसमागमः ॥ ५१६ ॥
चम्पापतिः पलायिष्ट ततश्च दधिवाहनः । बलीयसाऽवरुद्धानां त्राणं नान्यत्पलायनात् ॥ ५१७ ॥
*यद्ग्रहो घोषितस्तत्र शतानीकेन भूभुजा । तदनीकभटाश्चम्पां स्वेच्छया मुमुषुस्ततः ॥ ५१८ ॥

टि.– *यद् ग्रहीतव्यम् तद् गृह्णातु इति ।

दधिवाहनराजस्य धारिणीं नामतः प्रियाम् । वसुमत्या समं पुत्र्या तत्र कोऽप्यौष्ट्रिकोऽग्रहीत् ॥५१९॥
कृतकृत्यः शतानीकोऽप्यनीकैः परिवारितः । समाजगाम कौशाम्बीं वैरिकैरवभास्करः ॥ ५२० ॥
औष्ट्रिकः सोऽपि धारिण्या देव्या रूपेण मोहितः । व्यजज्ञपद पुरतो जनानामिदमुच्चकैः ॥ ५२१ ॥
प्रौढा रूपवती चेयं मम भार्या भविष्यति । विक्रेष्ये कन्यकां त्वेतां नीत्वा पुर्यांश्चतुष्पथे ॥ ५२२ ॥
तच्छ्रुत्वा धारिणी देवी मनस्येवमधारयत् । जाता महती वंशेऽहं शशांकादपि निर्मले ॥ ५२३ ॥
महावंशप्रसूतस्य दधिवाहनभूपतेः । पत्नी चास्मि परित्यजेऽधर्मोऽधिकोऽपि हि ॥ ५२४ ॥
श्रुत्वैतान्यप्यक्षराणि धिग्जीवास्यघभाजनम् । स्वभावलोल रे जीव ! किमद्याप्यवतिष्ठसे ॥ ५२५ ॥
न चेत् स्वयं निःसरसि तथापि हि बलान्मया । निस्सार्यसे सद्य एव नीडादिव विहंगमः ॥ ५२६ ॥
इति तद्वत्सेनोद्विग्ना इव प्राणाः क्षणादपि । तस्या मन्युप्रस्फुटितहृदयाग्रा विनिर्ययुः ॥ ५२७ ॥
औष्ट्रिकस्तां मृतां प्रेक्ष्य दध्यावेतां सतीं प्रति । धिग्धिङ्मयैतदुदितं यन्मे पत्नी भविष्यति ॥ ५२८ ॥
अंगुलीदर्शनेनेव कूष्मांडं दुर्गिरा मम । विपन्नेयं यथा तद्वत् कन्याप्येषा विपत्स्यते ॥ ५२९ ॥
एवं विमृश्य साम्ना तामाल्पन्नानयत् पुरि । कौशाम्ब्यां सोऽथ निदधे विक्रेतुं राजवर्त्मनि ॥ ५३० ॥
दैवात्तत्रागतः श्रेष्ठी तामपश्यद्धनावहः । दध्यौ चेत्यनया मूर्त्या न हि सामान्यपुत्र्यसौ ॥ ५३१ ॥

१ धारिणीस्थाने सर्वत्र $L$ प्रतौ धारणी इति पाठः, अन्यासु प्रतिषु च 'धारिणी' इति ॥ २ °सि $C$ ॥

भ्रष्टा पितृभ्यां प्रायेयं निर्घृणेनामुनाऽधुना । यूथच्युता कुरंगीव लुब्धकेन दुरात्मना ॥ ५३२ ॥
विक्रेतुं पलवच्चेह स्थापिताऽनेन मूल्यतः । हस्ते हीनस्य कस्यापि हा यास्यति वराक्यसौ ॥ ५३३ ॥
दत्त्वार्थं बहुमप्यस्य गृह्णाम्येतां कृपास्पदम् । पुत्रीमिव निजां हीमां न क्षमोऽहमुपेक्षितुम् ॥ ५३४ ॥
विनाऽनर्थं मम गृहे तिष्ठन्त्याः क्रमयोगतः । अस्याः स्वजनवर्गेण भविता संगमोऽपि हि ॥ ५३५ ॥
धनावहो विमृश्यैवं दत्त्वा मूल्यं तदीप्सितम् । निन्ये वसुमतीं बालां सानुकंपः स्ववेश्मनि ॥ ५३६ ॥
सोऽपृच्छत् स्वच्छधीस्तां च वत्से! कस्यासि कन्यका । को वा स्वजनवर्गस्ते मा भैषीर्दुहिताऽसि मे ५३७
महत्त्वेन समाख्यातुं स्वकुलं सापि नाऽशकत् । न किंचिदूचेऽस्थात्तस्थौ गलितेव त्वधोमुखी ॥ ५३८ ॥
मूलां च श्रेष्ठिनीमूचे प्रियेऽसौ दुहिताऽऽवयोः । पाल्या लाल्या च तदियमतियत्नेन पुष्पवत् ॥ ५३९ ॥
एवं श्रेष्ठिगिरा तत्र गेहेऽवात्सीत्स्वगेहवत् । बाला बालेन्दुलेखेव सा नेत्राऽऽनन्ददायिनी ॥ ५४० ॥
तस्या विनयवाक्शीलै रञ्जितश्चन्दनोपमैः । चन्दनेत्यभिधां श्रेष्ठी ददौ परिजनैः सह ॥ ५४१ ॥
ईषच्च यौवनारम्भं करभोरूरवाप सा । राकारात्रिरिवाम्भोधेः श्रेष्ठिनो ददती मुदम् ॥ ५४२ ॥
निसर्गतो रूपवतीं यौवनेन विशेषतः । निरीक्ष्य चन्दनां मूला दध्यावेवं समत्सरा ॥ ५४३ ॥
पुत्रीवत्प्रतिपद्याऽपि यद्येतां रूपमोहितः । श्रेष्ठी परिणयेत्तर्हि जीवन्त्यपि मृताऽस्मि हा ॥ ५४४ ॥

१ भवता C, D, L ॥

चतुर्थः सर्गः

एवं स्त्रैणसुलभेन तुच्छत्वेन दिवाऽनिशम् । तदा प्रभृति ताम्यन्ती तस्थौ मूला दुराशया ॥ ५४५ ॥
ग्रीष्मोष्मार्तोऽन्यदा श्रेष्ठी वेश्मन्यागमदापणात् । तदांऽघ्रिक्षालको नासीत् कोऽपि दैवात् पुरःसरः ॥ ५४६ ॥
विनीता चन्दनोत्थाय श्रेष्ठिना वारिताऽपि हि । प्रावर्तत क्षालयितुं तत्पादौ पितृभक्तितः ॥ ५४७ ॥
केशपाशस्तदा तस्याः स्निग्धश्यामलकोमलः । निःसहांग्याः परिस्रस्तः क्ष्मातले जलपंकिले ॥ ५४८ ॥
वत्सायाः केशपाशोऽयं मा भूद् भूपंकभागिति । लीलायष्ट्योद्धृत्य श्रेष्ठी तमबध्नाच्च सादरः ॥ ५४९ ॥
तच्च मूला गवाक्षस्था निरीक्ष्यैवमचिन्तयत् । वितर्कैः संवदति स यः पूर्वं कल्पितो मया ॥ ५५० ॥
अस्याः स्वयं केशबन्धः पत्नीत्वस्य निबन्धनम् । प्रथमं श्रेष्ठिनो नूनं नेदृशी हि पितुः क्रिया ॥ ५५१ ॥
उच्छेदनीया तदियं मूलाद्व्याधिरिवोत्थितः । इति निश्चित्य मूलाऽस्थाच्छाकिनीव दुराशया ॥ ५५२ ॥
क्षणं श्रेष्ठ्यपि विश्रम्य पुनरेव बहिर्ययौ । अमुंडयच्चन्दनां च मूलाऽप्याहूय नापितम् ॥ ५५३ ॥
पादयोर्निगडान् क्षिप्त्वा चन्दनां बह्वताडयत् । मूला वल्लीमिव वशा विवशा क्रोधरक्षसा ॥ ५५४ ॥
गृहैकदेशे दूरस्थे मूला न्यधित चन्दनाम् । कपाटसंपुटं दत्त्वा परिवारमुवाच च ॥ ५५५ ॥
श्रेष्ठिनः पृच्छतोऽप्येतत् कथनीयं न केनचित् । कथयिष्यति यः कोऽपि मत्कोपाग्नेः स आहुतिः ॥ ५५६ ॥
एवं नियन्त्रणां कृत्वा मूला मूलगृहं ययौ । श्रेष्ठी च सायमायातोऽपृच्छत् क्व ननु चन्दना ? ॥ ५५७ ॥
मूलाभयान्न कोऽप्याख्यच्छ्रेष्ठी चैवमबुध्यत । वत्सा मे रमते क्वापि यद्वाऽस्त्युपरि वेश्मनः ॥ ५५८ ॥

एवं रात्रावप्यपृच्छत्स कोऽप्याख्यत्तथैव च । प्रसुप्ता चन्दनाऽस्तीति चाज्ञासीदृजुधीः स तु ॥ ५५९ ॥
द्वितीयेऽप्यह्नि नापश्यत्तृतीयेऽपि तथैव ताम् । शंकाकोपाकुलः श्रेष्ठी प्रोचे परिजनं ततः ॥ ५६० ॥
रे रे कथयत क्वास्ति चन्दना मम नन्दना? । नाऽऽख्यास्यथ विदन्तश्चेन्निग्रहीष्यामि वस्तदा ॥ ५६१ ॥
श्रुत्वेदं स्थविरा तत्र काचिच्चेटीत्यचिन्तयत् । जीविताऽहं चिरतरं प्रत्यासन्ना मृतिर्मम ॥ ५६२ ॥
कथिते चन्दनोदन्ते किं मूला मे करिष्यति ? । एवं विचिन्त्य तामाख्यन्मूलाचन्दनयोः कथाम् ॥ ५६३ ॥
श्रेष्ठिनोऽदर्शयद्गत्वा चन्दनारोधवेश्म सा । द्वारं चोद्घाटयामास स्वयं श्रेष्ठी धनावहः ॥ ५६४ ॥
तत्र च क्षुत्पिपासार्त्तां दवस्पृष्टां लतामिव । निगडैर्यन्त्रितामंह्र्योर्नवार्त्तां करिणीमिव ॥ ५६५ ॥
परिमुण्डितमुण्डां च भिक्षुकीमिव चन्दनाम् । अश्रुपूरितनेत्राब्जामीक्षाञ्चक्रे धनावहः ॥ ५६६ ॥ (युग्मम्)
विश्वस्ता भव वत्से ! त्वमिति जल्पन्नुदश्रुदृक् । तद्भोज्यार्थं रसवतीं ययौ श्रेष्ठी द्रुतद्रुतम् ॥ ५६७ ॥
विशिष्टं तत्र नाऽपश्यन् भोज्यं दैवाद्धनावहः । कुल्माषान् शूर्पकोणस्थांश्चन्दनायै समार्पयत् ॥ ५६८ ॥
भुङ्क्ष्व तावदेतांस्त्वं यावत्त्वन्निगडच्छिदे । कर्मारमानयामीति जल्पित्वा श्रेष्ठ्यगाद्बहिः ॥ ५६९ ॥
चन्दनोर्ध्वस्थिता चैवमचिन्तयद्दशा क्व मे । तस्मिन् राजकुले जन्म क्व चावस्थेयमीदृशी ॥ ५७० ॥
भवेऽस्मिन्नाटकप्राये क्षणाद्वस्त्वन्यथा भवेत् । स्वानुभूतमिदं मे हि किं संप्रति करोमि हा ॥ ५७१ ॥
षष्ठस्य पारणायामी कुल्माषाः सन्ति संप्रति । यद्यायात्यतिथिस्तस्मै दत्त्वा भुञ्जेऽन्यथा न हि ॥ ५७२ ॥ ॥१३४॥

एवं विचिन्त्य सा द्वारे ददौ दृष्टिमितस्ततः। तदा चाऽऽगान्महावीरो भिक्षार्थं पर्यटन् प्रभुः॥ ५७३॥
अहो पात्रमहो पात्रमहो मे पुण्यसंचयः। मुनिर्महात्मा कोऽप्येष भिक्षार्थं यदुपस्थितः॥ ५७४॥
चिन्तयित्वेति साऽचालीद्बाला कुल्माषशूर्पभृत्। एकमंघ्रिं न्यधादन्तर्देहल्या अपरं बहिः॥ ५७५॥
निगडैर्देहलीं सा तु समुल्लंघितुमक्षमा। तत्रस्थैवाऽऽर्द्रया भक्त्या भगवन्तमभाषत॥ ५७६॥
स्वामिन्ननुचितं भोज्यं यद्यप्येतत्तथापि हि। परोपकारैकरसिक ! गृहाणानुगृहाण माम्॥ ५७७॥
द्रव्यादिभेदसंशुद्धं ज्ञात्वा पूर्णमभिग्रहम्। तस्यै कुल्माषभिक्षार्थं स्वामी प्रासारयत् करम्॥ ५७८॥
अहो धन्याऽहमेवेति ध्यायन्ती चन्दनापि हि। चिक्षेप शूर्पकोणेन कुल्माषान् स्वामिनः करे॥ ५७९॥
स्वाम्यभिग्रहसंपूर्त्या प्रीतास्तत्राययुः सुराः। वसुधाराप्रभृतीनि पञ्च दिव्यानि च व्यधुः॥ ५८०॥
तुत्रुटुर्निगडास्तस्यास्तत्पदे कांचनानि च। जज्ञिरे नूपुराण्यासीत् केशपाशश्च पूर्ववत्॥ ५८१॥
सर्वांगीणं च तत्कालं रत्नालंकारधारिणी। श्रीवीरभक्तैर्विदधे विबुधैरथ चन्दना॥ ५८२॥
उत्कृष्टनादं विदधू रोदःकुक्षिंभरि सुराः। जगुश्च ननृतुश्चोच्चै रंगाचार्या इवोन्मुदः॥ ५८३॥
मृगावतीशतानीकौ सुगुप्तो नन्दया सह। तत्रैयुः सपरीवाराः श्रुत्वा तं दुन्दुभिध्वनिम्॥ ५८४॥
आययौ देवराजोऽपि शक्रो मुदितमानसः। संपूर्णाभिग्रहं नाथं नमस्कर्तुं द्रुतं[1]द्रुतम्॥ ५८५॥

---

१ °सद्रुतः C | °तं द्रुतं L ||

दधिवाहनराजस्य संपुलो नाम कंचुकी । चम्पावस्कन्द आनीतो राज्ञा मुक्तस्तदैव हि ॥ ५८६ ॥
तत्रायातो वसुमतीं दृष्ट्वा तत्पादयोर्नतः । विमुक्तकण्ठमरुदत् सर्वस्तामपि रोदयन् ॥ ५८७ ॥
किं रोदिषीति राज्ञोक्तः सा[१]श्रुः प्रोवाच कंचुकी । दधिवाहनराजस्य धारिण्याश्चेयमात्मजा ॥ ५८८ ॥
तादृग्विभवविभ्रष्टा पितृभ्यां रहिता च हा । इयं वसत्यन्यगृहे दासीवत्तेन रोदिमि ॥ ५८९ ॥
राजाऽप्यूचे न शोच्येयं संपूर्णाभिग्रहो यया । जगत्त्रयत्राणवीरः श्रीवीरः प्रतिलाभितः ॥ ५९० ॥
मृगावत्यप्यभाषिष्ट धारिणी भगिनी मम । इयं तद्दुहिता बाला ममापि दुहिता खलु ॥ ५९१ ॥
पंचाहन्यूनषण्मासतपःपर्यन्तपारणम् । कृत्वा धनावहगृहान्निर्ययौ भगवानपि ॥ ५९२ ॥
वसुधारामथाऽऽदित्सुं लोभप्राबल्यतो नृपम् । व्याजहार शतानीकं सौधर्माधिपतिः स्वयम् ॥ ५९३ ॥
नेह स्वस्वामिभावो यद्रत्नवृष्टिं जिघृक्षसि । यस्मै ददाति कन्येयं स एव लभते नृप ! ॥ ५९४ ॥
गृह्णात्विमां क इत्युक्ता राज्ञा प्रोवाच चन्दना । अयं धनावहः श्रेष्ठी पिता हि मम पालनात् ॥ ५९५ ॥
जग्राह वसुधारां तां ततः श्रेष्ठी धनावहः । भूयोऽप्याखण्डलोऽवोचच्छतानीकनरेश्वरम् ॥ ५९६ ॥
बाला चरमदेहेयं भोगतृष्णापराङ्मुखी । भविष्यत्यादिमा शिष्योत्पन्ने वीरस्य केवले ॥ ५९७ ॥
आस्वामिकेवलोत्पत्ति रक्षणीया त्वया ह्यसौ । इत्युक्त्वा मघवा नाथं नत्वा च त्रिदिवं ययौ ॥ ५९८ ॥

१ साश्रु *C*, *M* । सास्रः *L* ॥

क्षिप्तकाऽन्तःपुरे निन्ये शतानीकेन चन्दना । सा स्वामिकेवलोत्पत्तिं तत्र ध्यायन्त्यवास्थित ॥ ५९९ ॥
अनर्थमूलं मूला च श्रेष्ठिना निरवास्यत । अपध्यानवती साऽथ विपद्य नरकं ययौ ॥ ६०० ॥
नाथोऽपि विहरन् प्राप ग्रामं नाम्ना सुमंगलम् । तस्मिन् सनत्कुमारेन्द्रेणाऽभ्युपेत्याऽभ्यवन्द्यत ॥ ६०१ ॥
ततो जगाम भगवान् सुक्षेत्रे सन्निवेशने । तस्मिन्माहेन्द्रकल्पेन्द्रेणैत्य भक्त्याऽनमस्यत ॥ ६०२ ॥
नाथोऽथ पालकग्रामे ययौ तत्र त्वदृश्यत । वणिजा वायलाख्येन यात्रायै चलता सता ॥ ६०३ ॥
असावशकुनं भिक्षुः क्षिपाम्यस्यैव मूर्धनि । इति हन्तुं प्रभुं पापः स कृष्टाऽसिमधावत ॥ ६०४ ॥
सिद्धार्थव्यन्तरस्तस्य स्वयमेवाऽऽच्छिदच्छिरः । स्वामी च विहरन् प्राप चम्पां नाम महापुरीम् ॥ ६०५ ॥
तत्राग्निहोत्रशालायां स्वातिदत्तद्विजन्मनः । तस्थौ वर्षाचतुर्मासीं द्वादशीं स्वाम्युपोषितः ॥ ६०६ ॥
पूर्णभद्रमाणिभद्रौ यक्षौ तत्र महर्द्धिकौ । रात्रौ रात्रौ समभ्येत्य पर्यपूजयतां प्रभुम् ॥ ६०७ ॥
स्वातिदत्तोऽचिन्तयच्च [1]किमसौ [2]वेत्ति किंचन । देवार्यो यदमुं देवाः पूजयन्ति प्रतिक्षपम् ॥ ६०८ ॥
एवं विचिन्त्य जिज्ञासुरेत्य पप्रच्छ स प्रभुम् । देहे शिरःप्रभृत्यंगपूर्णे जीवः क उच्यते ? ॥ ६०९ ॥
स्वाम्यपि व्याहरज्जीवः स योऽहमिति मन्यते। स्वातिदत्तोऽप्युवाचैवं सोऽपि कश्छिन्धि संशयम् ॥६१०॥
भगवान् श्रीमहावीरः प्रत्यभाषिष्ट भो द्विज ! । शिरःकरप्रभृतिभ्यो विभिन्नः स हि सूक्ष्मकः ॥ ६११ ॥

---

१ °भाव° *D*, *M* ॥ २ वेत्ति तत्त्वं हि किंचन *L* ॥

स्वातिदत्तद्विजोऽप्यूचे ब्रूहि सूक्ष्मोऽपि को नु सः? । व्याजहार प्रभुरपि न गृह्येत य इन्द्रियैः ॥ ६१२ ॥ चतुर्थः सर्गः

प्रश्नेनानेन विप्रः स ज्ञात्वा तत्त्वविदं प्रभुम् । भक्त्याऽऽनर्च प्रभुणापि स भव्य इति बोधितः ॥ ६१३ ॥

चतुर्मास्यत्यये स्वामी जृम्भकग्राममाययौ । तत्र नाट्यविधिं शक्रो दर्शयित्वाऽब्रवीदिति ॥ ६१४ ॥

जगद्गुरो! कतिपयैरद्य प्रभृति वासरैः । उत्पत्स्यतेऽत्र भवतः केवलज्ञानमुज्ज्वलम् ॥ ६१५ ॥

इत्युदित्वा सुनासीरो वीरं नत्वा ययौ दिवम् । श्रीवीरोऽप्यगमद् ग्रामे मेंढकग्रामनामनि ॥ ६१६ ॥

चमरेन्द्रस्तत्र चैत्य भगवन्तमवन्दत । पृष्ट्वा सुखविहारं च जगाम भवनं निजम् ॥ ६१७ ॥

ग्रामं षण्मानिनामानं जगाम भगवानपि । बहिश्च कायोत्सर्गेण तस्थौ ध्यानपरायणः ॥ ६१८ ॥

वेद्यं कर्म तदोदीर्णं प्रभोर्विष्णुभवार्जितम् । शय्यापालश्रवःक्षिप्ततप्तत्रपुनिबन्धनम् ॥ ६१९ ॥

शय्यापालस्य जीवोऽपि गोपालस्तत्र सोऽभवत् । स्वाम्यन्तिके वृषान्मुक्त्वा गोदोहादिकृते ययौ ॥ ६२० ॥

चरन्तः स्वेच्छया ते च प्राविशन्नटवीं वृषाः । क्षणात्सोऽप्याययौ गोपोऽपश्यन्नुक्ष्णोऽवदत्प्रभुम् ॥ ६२१ ॥

देवार्य! क्व ममोक्षाणः? किं न ब्रूषे मुनिब्रुव! । न शृणोषि वचः किं वा कर्णरन्ध्रे वृथैव तत् ॥ ६२२ ॥

अवादिनि प्रभावेवमत्यन्तकुपितोऽथ सः । अक्षिपत्काशशलाके स्वामिनः कर्णरन्ध्रयोः ॥ ६२३ ॥

शलाके ताडिते तेन तथा ते मिलिते मिथः । अखंडैकशलाकत्वं बिभरांचक्रतुर्यथा ॥ ६२४ ॥

मा द्राक्षीत् कीलकावेतौ कोऽपीति स्वधिया कुधीः । तत्कीलकबहिर्भागं छित्त्वा गोपालको ययौ ॥ ६२५ ॥
प्रणष्टमायामिथ्यादिशल्योऽपि श्रुतिशल्यभाग् । अकम्पितः शुभध्यानादपापां मध्यमां ययौ ॥ ६२६ ॥
पारणार्थं प्रभुस्तत्र सिद्धार्थवणिजो गृहे । जगाम भगवांस्तेन भक्त्या च प्रतिलाभितः ॥ ६२७ ॥
पूर्वायातस्तत्र वैद्यः सिद्धार्थस्य सुहृत्प्रियः । खरकाख्यः प्रभुं प्रेक्ष्य सूक्ष्मधीरब्रवीदिदम् ॥ ६२८ ॥
अहो भगवतो मूर्तिः संपूर्णा सर्वलक्षणैः । परं शल्यवती चेयं म्लानत्वेनोपलक्ष्यते ॥ ६२९ ॥
सिद्धार्थः संभ्रमादूचे यद्येवं तन्निरूपय । सम्यग्भगवतो देहे क्व शल्यं हन्त तिष्ठति ? ॥ ६३० ॥
वैद्योऽपि निपुणं पश्यन्नखिलं स्वामिनो वपुः । ददर्श कर्णयोः कीलौ सिद्धार्थस्याप्यदर्शयत् ॥ ६३१ ॥
सिद्धार्थोऽथावदत् केनाप्यपवादादभीरुणा । नरकादप्यभीतेन चक्रेऽदः कर्म दारुणम् ॥ ६३२ ॥
कृतं वा तस्य पापस्य कथयाऽप्यनया सखे ! नाथस्य शल्योद्धाराय प्रयतस्व महामते ! ॥ ६३३ ॥
स्वामिनः कर्णयोः शल्ये पीडा तु महती मम । विलम्बं न सहेऽत्रार्थे सर्वस्वमपि यातु मे ॥ ६३४ ॥
कर्णाभ्यां विश्वनाथस्योद्धृतयोरिह शल्ययोः । मन्ये भवमहाम्भोधेरावामेव समुद्धृतौ ॥ ६३५ ॥
वैद्योऽप्युवाच नाथोऽयं विश्वत्राणक्षयक्षमः । कर्मक्षयायोपैक्षिष्ट तं नाऽशक्त्याऽपकारिणम् ॥ ६३६ ॥
कथं चिकित्सनीयोऽयं निरपेक्षो वपुष्यपि । यः कर्मनिर्जरालुब्धो वेदनां साधु मन्यते ॥ ६३७ ॥

---

१ °लस ब° D ॥

सिद्धार्थोऽप्यवदत् केयं वाचोयुक्तिस्तवाधुना । न कालो वचसामेषां चिकित्स्यो भगवान् खलु ॥ ६३८ ॥
तयोर्ब्रुवाणयोरेवं निरपेक्षः प्रभुर्ययौ । तस्थौ च बहिरुद्याने शुभध्यानपरायणः ॥ ६३९ ॥
सिद्धार्थखरकौ तौ च गृहीत्वा भेषजादिकम् । तत्रोद्याने त्वरावन्तौ भगवन्तमुपेयतुः ॥ ६४० ॥
तैलद्रोण्यां विनिवेश्य तैलेनाभ्यज्य च प्रभुम् । संवाहकैर्बलीयोभिस्तावमर्दयतामथ ॥ ६४१ ॥
श्लथेषु मर्दनात्संधिष्वोजस्विपुरुषैः प्रभोः । संदंशाभ्यामकृष्येतां युगपत्कर्णकीलकौ ॥ ६४२ ॥
कीलद्वयं सरुधिरं निर्ययौ कर्णरन्ध्रयोः । अवशिष्टं वेदनीयं कर्म साक्षादिव प्रभोः ॥ ६४३ ॥
तथाऽभूद्वेदना कीलकर्षणेन यथा प्रभुः । ररास भैरवारावं वज्राहत इवाचलः ॥ ६४४ ॥
नाऽस्फुटत् स्वामिमाहात्म्यात्तेन नादेन मेदिनी । विपद्यपि हि नाऽर्हन्तः परोपद्रवकारिणः ॥ ६४५ ॥
संरोहण्या रोहयित्वा कर्णौ नाथं प्रणम्य च । क्षमयित्वा च सिद्धार्थखरकौ गृहमीयतुः ॥ ६४६ ॥
वेदनामपि तौ भर्तुः कृतवन्तौ शुभाशयौ । बभूवतुः सुरलोकश्रीभाजनमुभावपि ॥ ६४७ ॥
दुष्टाशयस्तु गोपालो विधाय स्वामिवेदनाम् । सप्तमावनिदुःखानां भाजनं समजायत ॥ ६४८ ॥
स्वामिनो भैरवारावान्महाभैरवमित्यभूत् । तदुद्यानं तत्र देवकुलं च विदधे जनैः ॥ ६४९ ॥
एवं श्रीवीरनाथस्योपसर्गेष्वखिलेष्वपि । जघन्येषूत्कृष्टं कटपूतनाशीतमुत्कटम् ॥ ६५० ॥
कालचक्रं मध्यमेषूत्कृष्टेषूद्धरणं त्विदम् । गोपारब्धा उपसर्गा गोपेनैव च निष्ठिताः ॥ ६५१ ॥ (युग्मम्)

चतुर्मासक्षपणानि नव द्विमासिकानि षट् । मासिकानि द्वादशार्धमासिकानि द्विसप्तति ॥ ६५२ ॥
एकं षाण्मासिकं द्वे त्रिमासे द्वे सार्धमासिके । सार्धद्विमासिके द्वे च भद्रादिप्रतिमात्रयम् ॥ ६५३ ॥
महानगर्यां कौशाम्ब्यामभिग्रहसमन्वितम् । अहोभिः पंचभिर्न्यूनमेकं षाण्मासिकं तथा ॥ ६५४ ॥
प्रतिमाश्चैकरात्रिक्यो द्वादशाष्टमभक्ततः । चरमायां विभावर्यां कायोत्सर्गसमन्विताः ॥ ६५५ ॥
एकोनत्रिंशदधिके द्वे च षष्ठशते प्रभोः । नित्यभक्तं चतुर्थं च बभूव न कदाचन ॥ ६५६ ॥
प्रभोरेकोनपंचाशं पारणाहशतत्रयम् । व्रताहाश्चेत्यभूत् सार्धा द्वादशाब्दी सपक्षिका ॥ ६५७ ॥

कृत्वा तपो जलविहीनमशेषमित्थं
छद्मस्थ एव विहरन् विजितोपसर्गः ।
स्वामी जगाम ऋजुपालिकया महत्या
नद्या सनाथमथ जृम्भकसन्निवेशम् ॥ ६५८ ॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये दशमपर्वणि श्रीमहावीरद्वितीयसामषड्वार्षिकछद्मस्थविहारवर्णनो नाम चतुर्थः सर्गः ॥

## ॥ अथ पंचमः सर्गः ॥

जगन्नाथोऽथ तत्रर्जुपालिकोत्तररोधसि । श्यामाकनाम्नो गृहिणः क्षेत्रे शालतरोस्तले ॥ १ ॥
अव्यक्तचैत्यस्यासन्ने षष्ठेनोत्कटिकासनी । मुहूर्ते विजये स्वामी तस्थावातापनापरः ॥ २ ॥ ( युग्मम् )
शुक्लध्यानान्तरस्थस्य क्षपकश्रेणिवर्तिनः । स्वामिनो घातिकर्माणि तुत्रुटुर्जीर्णरज्जुवत् ॥ ३ ॥
वैशाखश्वेतदशम्यां चन्द्रे हस्तोत्तरागते । यामे चतुर्थेऽह्नो भर्तुरुदपद्यत केवलम् ॥ ४ ॥
विज्ञायाऽऽसनकंपेन केवलज्ञानमीशितुः । इन्द्राः सह सुरैस्तत्र समाजग्मुः प्रमोदिनः ॥ ५ ॥
केऽप्युत्पेतुः केऽपि पेतुर्ननृतुः केऽपि केऽपि च । जहसुः केऽपि च जगुर्बुक्कुः केऽपि सिंहवत् ॥ ६ ॥
केऽप्यश्ववदहेषन्त बबृंहुः केऽपि हस्तिवत् । रथवत् केऽपि चीचक्रुः पूच्चक्रुः केऽपि नागवत् ॥ ७ ॥
स्वामिनः केवलोत्पत्त्या हृष्टात्मानोऽपरेऽपि हि । चतुर्विधा दिविषदो विविधं विचिचेष्टिरे ॥ ८ ॥
प्रतिवप्रं चतुर्द्वारं वप्रत्रितयभूषितम् । चक्रुः समवसरणं यथाविधि दिवौकसः ॥ ९ ॥
न सर्वविरतेरर्हः कोऽप्यत्रेति विदन्नपि । कल्प इत्यकरोत्तत्र निषण्णो देशनां विभुः ॥ १० ॥
तत्तीर्थजन्मा मातंगो यक्षः करिरथोऽसितः । बीजपूरं भुजे वामे दक्षिणे नकुलं दधत् ॥ ११ ॥

सिद्धायिका तथोत्पन्ना सिंहयाना हरिच्छविः । समातुलिंगवल्लक्यौ वामबाहू च बिभ्रती ॥ १२ ॥
पुस्तकाऽभयदौ चोभौ दधाना दक्षिणौ भुजौ । अभूतां ते प्रभोर्नित्याऽऽसन्ने शासनदेवते ॥ १३ ॥
(त्रिभिर्विशेषकम्)

उपकाराऽर्हल्लोकानामभावात्तत्र च प्रभुः । परोपकारैकपरः प्रक्षीणप्रेमबन्धनः ॥ १४ ॥
तीर्थकृन्नामगोत्राऽऽख्यं कर्म वेद्यं मदन्मया । भव्यजन्तुप्रबोधेनानुभाव्यमिति भावयन् ॥ १५ ॥
सुसन्निकायकोटीभिरसंख्याताभिरावृतः । सुरैः संचार्यमाणेषु स्वर्णाब्जेषु दधत्क्रमौ ॥ १६ ॥
स्फुटे मार्गे दिन इव देवोद्द्योतेन निश्यपि । द्वादशयोजनाऽध्वानां भव्यसत्त्वैरलंकृताम् ॥ १७ ॥
गौतमाद्यैः प्रबोधार्हैर्भूरिशिष्यसमावृतैः । यज्ञाय मिलितैर्जुष्टामपापामगमत्पुरीम् ॥ १८ ॥
(पंचभिः कुलकम्)

तस्या अदूरे पुर्याश्च महासेनवनाभिधे । उद्याने चारुसमवसरणं विबुधा व्यधुः ॥ १९ ॥
सञ्जातसर्वातिशयः स्तूयमानः सुरासुरैः । पूर्वद्वारेण समवसरणं प्राविशत्प्रभुः ॥ २० ॥
द्वात्रिंशद्धनुरुत्तुंगं रत्नच्छंदच्छविर्निभम् । ततः प्रदक्षिणीकृत्य चैत्यवृक्षं जगद्गुरुः ॥ २१ ॥
नमस्तीर्थायेत्युदित्वा पालयन्नार्हतीं स्थितिम् । सपादपीठे न्यषदत्पूर्वसिंहासने प्रभुः ॥ २२ ॥

१ स्वमानाद् द्वादशगुणं र° L, D । द्वात्रिंशद्धनु° C ॥ २ °चक्रे C, D, M ॥

स्वामिनः प्रतिरूपाणि तन्महिम्नैव नाकिनः । विचक्रिरे भक्तिमन्तस्तिसृष्वन्यासु दिक्ष्वपि ॥ २३ ॥
यथाद्वारं प्रविश्याथ यथास्थित्यवतस्थिरे । पश्यन्तः स्वामिवदनं सर्वे सुरनरादयः ॥ २४ ॥
नमस्कृत्य जगन्नाथं पुरुहूतः कृताञ्जलिः । रोमाञ्चितवपुर्भक्त्या स्तोतुमेवं प्रचक्रमे ॥ २५ ॥
लावण्यपुण्यवपुषि त्वयि नेत्राऽमृतांजने । माध्यस्थ्यमपि दौस्थ्याय किं पुनर्द्वेषविप्लवः ॥ २६ ॥
तवापि प्रतिपक्षोऽस्ति सोऽपि कोपादिविप्लुतः । अनया किंवदन्त्याऽपि किं जीवन्ति विवेकिनः ? ॥ २७ ॥
विपक्षस्ते विरक्तश्चेत् स त्वमेवाऽथ रागवान् । न विपक्षो विपक्षः किं खद्योतो द्युतिमालिनः ? ॥ २८ ॥
स्पृहयन्ति (ते) त्वद्योगाय यत्तेऽपि लवसत्तमाः । योगमुद्रादरिद्राणां परेषां तत्कथैव का ॥ २९ ॥
त्वां प्रपद्यामहे नाथं त्वां स्तुमस्त्वामुपास्महे । त्वत्तो हि न परस्त्राता किं ब्रूमः किमु कुर्महे ॥ ३० ॥
स्वयं मलीमसाचारैः प्रतारणपरैः परैः । वञ्च्यते जगदप्येतत् कस्य पूत्कुर्महे पुरः ॥ ३१ ॥
नित्यमुक्ताञ्जगज्जन्मस्थेमक्षयकृतोद्यमान् । वन्ध्यास्तनन्धयप्रायान् को देवांश्चेतनः श्रयेत् ॥ ३२ ॥
कृतार्था जठरोपस्थदुःस्थितैरपि दैवतैः । भवादृशान्निह्नुवते हा हा देवास्तिकाः परे ॥ ३३ ॥
खपुष्पप्रायमुत्प्रेक्ष्य किंचिन्मानं प्रकल्प्य च । संमान्ति देहे गेहे वा न गेहेनर्दिनः परे ॥ ३४ ॥
कामरागस्नेहरागावीषत्करनिवारणौ । दृष्टिरागस्तु पापीयान् दुरुच्छेदः सतामपि ॥ ३५ ॥
प्रसन्नमास्यं मध्यस्थे दृशौ लोकम्पृणं वचः । इति प्रीतिपदे बाढं मूढास्त्वय्यप्युदासते ॥ ३६ ॥

निषेद्धाद्युर्द्वेवेदद्रिज्वलेज्जलमपि कचित् । तथापि ग्रस्तो रागाद्यैर्नाप्तो भवितुमर्हति ॥ ३७ ॥
इत्यभिष्टुत्य विरते बिडौजसि जगद्गुरुः । सर्वभाषाजुषा वाचा विदधे देशनामिति ॥ ३८ ॥
अहो अपारः संसारः सरस्वानिव दारुणः । कारणं तस्य कर्मैव हन्त बीजं तरोरिव ॥ ३९ ॥
कर्मणा स्वकृतेनैव विवेकपरिवर्जितः । कूपकार इवाधस्ताद्गतिमाप्नोति देहभृत् । ४० ॥
अप्यूर्ध्वगतिमाप्नोति निजेनैव हि कर्मणा । प्रासादकारक इव शरीरी विशदाशयः ॥ ४१ ॥
प्राणातिपातं नो कुर्यात् कर्मबन्धनिबन्धनम् । स्वप्राणवत् परप्राणपरित्राणपरो भवेत् ॥ ४२ ॥
न मृषा जातु भाषेत किं तु भाषेत सूनृतम् । परपीडां परिहरन्नात्मपीडामिवांगवान् ॥ ४३ ॥
अदत्तं नाददीतार्थं बाह्यप्राणोपमं नृणाम् । अर्थं हि हरता तेषां वध एव कृतो भवेत् ॥ ४४ ॥
मैथुनं न विदध्याच्च बहुजीवोपमर्दकम् । ब्रह्मैव कुर्यात्तत्प्राज्ञः परब्रह्मनिबन्धनम् ॥ ४५ ॥
परिग्रहं न कुर्याच्च परिग्रहवशेन हि । गौरिवाधिकभारेण विधुरो निपतत्यधः ॥ ४६ ॥
एतान्प्राणातिपातादीन् सूक्ष्मांस्त्यक्तुं न चेत्क्षमाः । त्यजेयुर्बादरांस्तर्हि सूक्ष्मत्यागेऽनुरागिणः ॥ ४७ ॥
इत्थं च देशनां भर्तुः शृण्वन्तोऽवहिता जनाः । तस्थुरानन्दनिस्पन्दा आलेख्यलिखिता इव ॥ ४८ ॥
इतश्च मगधे देशे गोर्वरग्रामनामनि । ग्रामे गोतमगोत्रोऽभूद्वसुभूतिरिति द्विजः ॥ ४९ ॥

१ "व" *D*, *M* ॥

तस्येन्द्रभूत्यग्निभूतिवायुभूत्यभिधाः सुताः । पत्न्यां पृथिव्यामभवंस्तेऽपि गोत्रेण गौतमाः ॥ ५० ॥
कोल्लाकेऽभूद्धनुर्मित्रो धम्मिल्लश्च द्विजन्मनोः । पुत्रौ व्यक्तः सुधर्मा च वारुणीभद्रिलाभवौ ॥ ५१ ॥
धनदेवश्च मौर्यश्च मौर्याऽऽख्ये सन्निवेशने । द्वावभूतां द्विजन्मानौ मातृष्वस्रेयकौ मिथः ॥ ५२ ॥
पत्न्यां विजयदेवायां धनदेवस्य नन्दनः । मंडिकोऽभूत्तत्र जाते धनदेवो व्यपद्यत ॥ ५३ ॥
लोकाचारो ह्यसौ नेत्यभार्यो मौर्यकोऽकरोत् । भार्यां विजयदेवां तां देशाचारो हि न ह्रिये ॥ ५४ ॥
क्रमाद्विजयदेवायां मौर्यस्य तनयोऽभवत् । स च लोके मौर्यपुत्र इति नाम्नैव पप्रथे ॥ ५५ ॥
तथैव [1]मिथिलापुर्यां देवनाम्नो द्विजन्मनः । अभूदकंपितो नाम जयन्तीकुक्षिजः सुतः ॥ ५६ ॥
अभूच्च कोशलापुर्यां वसुनाम्नो द्विजन्मनः । सूनुर्नाम्नाऽचलभ्राता नन्दाकुक्षिसमुद्भवः ॥ ५७ ॥
वत्सदेशे तुंगिकाऽऽख्ये सन्निवेशे द्विजन्मनः । दत्तस्य सूनुर्मेतार्यो वरुणाकुक्षिभूरभूत् ॥ ५८ ॥
तथा पुरे राजगृहे बलनाम्नो द्विजन्मनः । प्रभासो नाम पुत्रोऽभूदतिभद्रोदरोद्भवः ॥ ५९ ॥
एकादशापि तेऽभूवंश्चतुर्वेदाब्धिपारगाः । गौतमाद्या उपाध्यायाः पृथक् शिष्यशतैर्वृताः ॥ ६० ॥
विप्रः पुर्यामपापायां यष्टुमाढ्योऽथ सोमिलः । आनिनाय श्रद्धया तान् यज्ञकर्मविचक्षणान् ॥ ६१ ॥
तदा च तत्र समवसृतं वीरं विवन्दिषून् । सुरानापततः प्रेक्ष्य बभाषे गौतमो द्विजान् ॥ ६२ ॥

१ मिलितापु° C । मिथुलापु° D । विमल्थ पु° M ॥

मंत्रेणास्माभिराहूताः प्रत्यक्षा नन्वमी सुराः । इह यज्ञे समायान्ति प्रभावं पश्यत क्रतोः ॥ ६३ ॥
त्यक्त्वा चण्डालवेश्मेव यज्ञवाटं सुरेषु तु । प्रति समवसरणं यात्सु लोकोऽब्रवीदिति ॥ ६४ ॥
उद्याने समवसृतः सर्वज्ञोऽतिशयान्वितः । तं वन्दितुं सुराः यान्ति पौराश्चामी प्रमोदिनः ॥ ६५ ॥
सर्वज्ञ इत्यक्षराणि श्रुत्वाऽऽक्रोशमिवोच्चकैः । इन्द्रभूतिः प्रकुपितः स्वान्तेवमवदज्जनान् ॥ ६६ ॥
मां त्यक्त्वा किममी यान्ति पाखण्डिनममुं जनाः । त्यक्त्वा चूतमिवाऽविज्ञाः करीरं मरुमानुषाः ॥ ६७ ॥
ममापि पुरतोऽत्रास्ति सर्वज्ञ इति कोऽपि किम् । पञ्चाननस्य न ह्यग्रे भवत्यन्यः पराक्रमी ॥ ६८ ॥
मनुष्या यद्यमी मूर्खा यान्त्येनं यान्तु तन्ननु । देवाः कथममी यान्ति दम्भः कोऽप्यस्य तन्महान् ॥ ६९ ॥
यादृशो वैष सर्वज्ञो देवा अपि हि तादृशाः । यदि वा यादृशो यक्षो जायते तादृशो बलिः ॥ ७० ॥
अस्य सर्वज्ञतादर्पमसावपहराम्यहम् । देवानां मानवानां च पश्यतामेव संप्रति ॥ ७१ ॥
सोऽहंकारादुदीर्यैवं शिष्यपंचशतीवृतः । ययौ समवसरणे वीरं सुरनरावृतम् ॥ ७२ ॥
तत्रर्द्धिं स्वामिनः प्रेक्ष्य रूपं तेजश्च तादृशम् । किमेतदिति साश्चर्ये इन्द्रभूतिरैवास्थित ॥ ७३ ॥
भो गौतमेन्द्रभूते ! किं तव स्वागतमित्यथ । सुधामधुरया वाचा तं बभाषे जगद्गुरुः ॥ ७४ ॥
गौतमोऽचिन्तयन्मेऽसौ गोत्रं नाम च वेत्ति किम् ? । जगत्प्रसिद्धमथवा को जानाति न मामिह ॥ ७५ ॥

१ °मानुषा *M* ॥ २ °श्चै *L* ॥ ३ °रिवा° *L* ॥

संशयं हृदयस्थं मे भाषते च छिनत्ति च। यद्यसौ ज्ञानसंपत्त्या तदाऽऽश्चर्यंकरः खलु ॥ ७६ ॥
इत्यन्तः संशयधरं तमूचे परमेश्वरः। अस्ति जीवो न चेत्पुंभिर्विद्यते तत्र संशयः ॥ ७७ ॥
अस्त्येव जीवः स पुनर्ज्ञेयो गौतम ! लक्षणैः। चित्तचैतन्यविज्ञानसंज्ञाप्रभृतिभिः खलु ॥ ७८ ॥
न जीवोऽवस्थितश्चेत्स्याद्भाजनं पुण्यपापयोः। यागदानादिकं तर्हि किंनिमित्तं तवाप्यहो ! ॥ ७९ ॥
इति स्वामिवचः श्रुत्वा मिथ्यात्वेन सहैव सः। उज्झाञ्चकार सन्देहं स्वामिनं प्रणनाम च ॥ ८० ॥
ऊचे च त्वत्परीक्षार्थं दुर्बुद्धिरहमागमम्। उत्तुंगवृक्षमुत्सुकः प्रमातुमिव वामनः ॥ ८१ ॥
बोधितोऽस्मि त्वया साधु दुष्टोऽप्येषोऽहमद्य तत् ! भवाद्विरक्तं प्रव्रज्यादानेनानुगृहाण माम् ॥ ८२ ॥
आद्यं गणधरं ज्ञात्वा भाविनं तं जगद्गुरुः। स्वयं प्रव्राजयामास पञ्चशिष्यशतीयुतम् ॥ ८३ ॥
उपनीतं कुबेरेण धर्मोपकरणं ततः। त्यक्तसंगोऽप्याददानो गौतमोऽथेत्यचिन्तयत् ॥ ८४ ॥
निरवद्यव्रतत्राणे यदेतदुपयुज्यते। वस्त्रपात्रादिकं ग्राह्यं धर्मोपकरणं हि तत् ॥ ८५ ॥
छद्मस्थैरिह षड्जीवनिकाययतमार्पैः। सम्यक् प्राणिदयां कर्तुं शक्येत कथमन्यथा ॥ ८६ ॥
यच्चोद्गमोत्पादैषणाभिर्गुणसंयुतम्। गृहीतं सदहिंसायै तद्धि ग्राह्यं विवेकिना ॥ ८७ ॥
ज्ञानदर्शनचारित्राऽऽचारशक्तिसमन्वितः। आद्यन्तमध्येष्वमूढसमयार्थं हि साधयेत् ॥ ८८ ॥
ज्ञानाऽवलोकहीनो यस्त्वभिमानधनः पुमान्। अस्मिन् परिग्रहाऽऽशंकां कुरुते स हि हिंसकः ॥ ८९ ॥

परिग्रहधियं धत्ते धर्मोपकरणेऽपि यः। बालानविदितत्त्वान् स रञ्जयितुमिच्छति ॥ ९० ॥
जलज्वलनवायूर्वीतरुत्रसतया बहून्। जीवांस्त्रातुं कथमलं धर्मोपकरणं विना ॥ ९१ ॥
गृहीतोपकरणोऽपि करणत्रयदूषितः। असंतुष्टः स आत्मानं प्रतारयति केवलम् ॥ ९२ ॥
इन्द्रभूतिर्विभाव्यैवं शिष्याणां पञ्चभिः शतैः। समं जग्राह धर्मोपकरणं त्रिदशार्पितम् ॥ ९३ ॥
तं च श्रुत्वा प्रव्रजितमग्निभूतिरचिन्तयत्। तेनेन्द्रजालिकेनेन्द्रभूतिर्नूनं प्रतारितः ॥ ९४ ॥
गत्वा जयाम्यसर्वज्ञमपि सर्वज्ञमानिनम्। आनयामि भ्रातरं स्वं माययैव पराजितम् ॥ ९५ ॥
सर्वशास्त्ररहस्यज्ञमिन्द्रभूतिं महामतिम्। कोऽलं जेतुं विना मायां माया जैत्री त्वमायिषु ॥ ९६ ॥
स चेन्मे संशयं ज्ञाता छेत्ता च हृदयस्थितम्। तदाऽहमपि तच्छिष्यः सशिष्योऽपीन्द्रभूतिवत् ॥ ९७ ॥
अग्निभूतिर्विमृश्यैवं पञ्चशिष्यशतावृतः। ययौ समवसरणे तस्थौ चोपजिनेश्वरम् ॥ ९८ ॥
तमालपत्प्रभुर्विमाग्निभूते ! गौतमान्वय !। अस्ति वा नास्ति किं कर्मेत्येष ते संशयो हृदि ॥ ९९ ॥
प्रत्यक्षादिप्रमाणानामगम्यं कर्म मूर्तिमत्। कथंकारं स बध्नीयाज्जीवो मूर्तत्ववर्जितः ॥ १०० ॥
उपघातानुग्रहाश्च कथं मूर्तेन कर्मणा। जीवस्य स्युरमूर्तस्येत्याशंका हि मुधैव ते ॥ १०१ ॥
प्रत्यक्षं कर्माऽतिशयज्ञानिनां त्वादृशां पुनः। अनुमानाभिगम्यं तज्जीववैचित्र्यदर्शनात् ॥ १०२ ॥
कर्मणामेव वैचित्र्याद्भवन्ति च शरीरिणाम्। सुखदुःखादयो भावास्तत्कर्मास्तीति निश्चिनु ॥ १०३ ॥

तथाहि स्युर्नृपाः केऽपि हस्त्यश्वरथवाहनाः । केचिच्च भवे पादचारिणो निरुपानहः ॥ १०४ ॥
सहस्रकुक्षिंभरयो भवन्त्येके महर्द्धयः । भिक्षया स्वोदरमपि पूरयन्त्यपरे पुनः ॥ १०५ ॥
देशकालादितुल्यत्वेऽप्येकस्य व्यवहारिणः । भूयिष्ठो जायते लाभो मूलनाशोऽपरस्य तु ॥ १०६ ॥
एवंविधानां कार्याणां ज्ञेयं कर्मैव कारणम् । न विना कारणं कार्यवैचित्र्यमुपजायते ॥ १०७ ॥
मूर्तानां कर्मणां जीवेनामूर्तेन च संगमः । समीचीनः सोऽपि नूनमाकाशघटयोरिव ॥ १०८ ॥
उपघातानुग्रहाश्च नानाविधसुरौषधैः । अमूर्तेऽपि भवन्तीति निरवद्यमदोऽपि हि ॥ १०९ ॥
एवं च स्वामिना छिन्नसंशयस्त्यक्तमत्सरः । अग्निभूतिः प्रवव्राज शिष्यपञ्चशतीयुतः ॥ ११० ॥
तस्मिन्नपि प्रव्रजिते वायुभूतिर्व्यचिन्तयत् । जितौ मे भ्रातरौ येन सर्वज्ञः खल्वयं ततः ॥ १११ ॥
तदेतस्य भगवतोऽभ्यर्हणाद्वन्दनादिभिः । धौतकल्मषकालुष्यः स्यां छिनद्मि च संशयम् ॥ ११२ ॥
एवं विचिन्त्य सोऽप्यागात् स्वामिनं प्रणनाम च । स्वाम्यप्युवाच जीवः स तद्वपुश्चेति ते भ्रमः ॥ ११३ ॥
प्रत्यक्षाद्यग्रहणेन जीवो भिन्नस्तनोर्न हि । जलबुद्बुदवत्सोऽङ्गे मूर्च्छतीति तवाशयः ॥ ११४ ॥
मिथ्या तद्देशप्रत्यक्षो जीवः सर्वशरीरिणाम् । तद्गुणानामीहादीनां प्रत्यक्षत्वात्स्वसंविदा ॥ ११५ ॥
देहेन्द्रियातिरिक्तः स इन्द्रियाऽपगमेऽपि यत् । इन्द्रियार्थान् संस्मरति मरणं च प्रपद्यते ॥ ११६ ॥ ॥ १५०

१ °रसौ° *D*, *L* ॥

इति स्वामिगिराच्छिन्नसंशयो विमुखो भवात्[1] । पर्यव्राजीद्वायुभूतिः शिष्यपञ्चशतीयुतः ॥ ११७ ॥
व्यक्तोऽप्यचिन्तयद्व्यक्तं सर्वज्ञो भगवानयम् । इन्द्रभूत्यादयो येन जिता वेदा इव त्रयः ॥ ११८ ॥
ममापि संशयं छेत्ता निश्चितं भगवानयम् । ततः शिष्यीभविष्यामि ध्यात्वैवं सोऽप्यगात्प्रभुम् ११९ (युग्मम्)
तमप्युवाच भगवान् भो व्यक्त ! तव चेतसि । न हि भूतानि विद्यन्ते पृथ्व्यादीनीति संशयः ॥ १२० ॥
तेषां तु प्रतिपत्तिर्या सा भ्रमाज्जलचन्द्रवत् । सर्वशून्यत्वमेवैवमिति ते हृद आशयः ॥ १२१ ॥
तन्मिथ्या सर्वशून्यत्वपक्षे भुवनविश्रुताः । स्युः स्वप्नाऽस्वप्नगन्धर्वपुरेतरभिदा न हि ॥ १२२ ॥
इत्थं च छिन्न संदेहो व्यक्तोऽपि व्यक्तवासनः । परिवव्राज शिष्याणां शतैः पञ्चभिरन्वितः ॥ १२३ ॥
उपाध्यायः सुधर्माऽपि संशयच्छेदवाञ्छया । समाययौ महावीरमतुच्छालोकभास्करम् ॥ १२४ ॥
तमप्यजल्पद्भगवान् सुधर्मस्तव धीरियम् । यादृगत्र भवे देही तादृक् परभवेऽपि हि ॥ १२५ ॥
कार्यं हि कारणस्यानुरूपं भवति संसृतौ । न ह्युप्ते कलमबीजे प्ररोहति यवांकुरः ॥ १२६ ॥
तन्न युक्तं यद्भवेऽस्मिन् यो मृदुत्वाऽऽर्जवादिभिः । नरः कर्म नरायुष्कं बध्नाति स पुनर्नरः ॥ १२७ ॥
मायादियुक् पशुर्यस्तु स प्रेत्याऽपि पशुः खलु । कर्माधीना समुत्पत्तिस्तन्नानात्वं च जन्मिनाम् ॥ १२८ ॥
सदृशं कारणस्यैव कार्यमित्यप्यसंगतम् । शृंगप्रभृतिकेभ्योऽपि शरादीनां प्ररोहणात् ॥ १२९ ॥

१ भवान् *C. D. L.*

इत्याकर्ण्य सुधर्मोऽपि पञ्चशिष्यशतीयुतः। प्रव्रज्यामाददे पार्श्वे स्वामिपादारविन्दयोः॥ १३० ॥ पंचमः
मंडिकोऽपि जगामाऽथ स्वामिनं संशयच्छिदे। स्वाम्यप्युवाच तं बन्धमोक्षयोस्तव संशयः॥ १३१ ॥ सर्गः
तदसद्बन्धमोक्षौ हि प्रसिद्धौ तत्र चात्मनः। मिथ्यात्वादिकृतः कर्मसंबन्धो बन्ध उच्यते॥ १३२ ॥
रज्जुबद्ध इव श्वभ्रतिर्यग्नृसुरभूमिषु। दुःखं तेनानुभवति प्राणी परमदारुणम्॥ १३३ ॥
ज्ञानदर्शनचारित्रप्रमुखैर्हेतुभिस्तु यः। वियोगः कर्मणां ज्ञेयः स मोक्षोऽनन्तशर्मदः॥ १३४ ॥
अप्यनादिमिथःसिद्धयोगानां जीवकर्मणाम्। ज्ञानादिना स्याद्वियोगोऽग्निना स्वर्णाऽश्मनामिव॥ १३५ ॥
इति स्वामिगिराच्छिन्नसंशयो मंडिकोऽपि हि। सार्धत्रिशत्या शिष्याणां सहितो व्रतमाददे॥ १३६ ॥
मौर्यपुत्रोऽपि संदेहच्छिदे स्वामिनमाययौ। स्वाम्युप्यूचे मौर्यपुत्र ! तव देवेषु संशयः॥ १३७ ॥
स मिथ्या पश्य नन्वेतान् प्रत्यक्षमपि नाकिनः। अस्मिन् समवसरणे शक्रादीन् स्वयमागतान्॥ १३८ ॥
संगीतकादिवैयग्र्यान्मर्त्यगन्धाच्च दुःसहात्। नायान्ति शेषकालेऽमी तदभावो न तावता॥ १३९ ॥
अर्हज्जन्माभिषेकादावायान्ति यदमी भुवि। प्रभावः कारणं तत्र गरीयान् श्रीमदर्हताम्॥ १४० ॥
इति स्वामिगिरा बुद्धो मौर्यपुत्रोऽपि तत्क्षणम्। परिवव्राज शिष्याणां सार्धं सार्धःशतैस्त्रिभिः॥ १४१ ॥
ययावकंपितोऽपीशमीशोऽत्रोचदकंपित ! न सन्त्यदृश्यमानत्वान्नारका इति ते मतिः॥ १४२ ॥
तदसन्नारकाः कामं पारतंत्र्यवशादिह। आगन्तुमक्षमा गन्तुं तत्र च त्वादृशा अपि॥ १४३ ॥ 

प्रत्यक्षं नोपलभ्यास्ते युक्तिगम्या भवादृशाम् । प्रत्यक्षा एव ते सन्ति क्षायिकज्ञानिनां पुनः ॥ १४४ ॥
क्षायिकज्ञानिनोऽप्यत्र नो सन्तीति स्म मा ब्रवीः । मय्येव व्यभिचारोऽस्या आशंकायाः परिस्फुटः ॥१४५॥
इति श्रुत्वा प्रतिबुद्धोऽकंपितः स्वामिनोऽन्तिके । उपाददे परिव्रज्यां त्रिभिः शिष्यशतैः समम् ॥ १४६ ॥
अथाऽऽगादचलभ्राता प्रभुं प्रभुरपि स्फुटम् । ऊचे तवाचलभ्रातः ! सन्देहः पुण्यपापयोः ॥ १४७ ॥
मा कृथाः संशयं तत्र यत्फलं पुण्यपापयोः । प्रत्यक्षं दृश्यते लोके तथैव व्यवहारतः ॥ १४८ ॥
दीर्घमायुः श्रियो रूपमारोग्यं जन्म सत्कुले । इत्यादि पुण्यस्य फलं विपरीतं तु पाप्मनः ॥ १४९ ॥
इत्थं भगवता छिन्नसंशयः समुपाददे । प्रव्रज्यामचलभ्राता त्रिभिः शिष्यशतैः सह ॥ १५० ॥
मेतार्यः स्वामिनमगात् स्वाम्यूचे तव धीरियम् । भवान्तरप्राप्तिरूपः परलोको न विद्यते ॥ १५१ ॥
भूतसंदोहरूपत्वाज्जीवस्येह चिदात्मनः । परलोकः कथं भूताऽभावे तस्याप्यभावतः ॥ १५२ ॥
तदसत् खलु जीवस्य भूतेभ्यो हि स्थितिः पृथक् । पिण्डितेष्वपि भूतेषु चेतनानुपलम्भतः ॥ १५३ ॥
भूतेभ्यश्चेतनाऽप्येवं जीवधर्मतया पृथक् । परलोकगतिस्तत्स्याज्जातिस्मृत्यादितोऽपि च ॥ १५४ ॥
इत्थं प्रबुद्धो मेतार्यः समीपे स्वामिपादयोः । शिष्यत्रिशत्या सहितः परिव्रज्यामुपाददे ॥ १५५ ॥
प्रभुमागात् प्रभासोऽपि तमूचे भगवानपि । निर्वाणमस्ति नो वेति प्रभास ! तव संशयः ॥ १५६ ॥
मा संशयिष्ठा निर्वाणं मोक्षः कर्मक्षयः स तु । वेदात् सिद्धं कर्म जीवाऽवस्थावैचित्र्यतोऽपि च ॥ १५७॥

क्षीयते कर्म शुद्धैस्तु ज्ञानचारित्रदर्शनैः । प्रत्यक्षोऽतिशयज्ञानभाजां मोक्षस्तदस्ति भोः ! ॥ १५८ ॥
प्रतिबुद्धः प्रभासोऽपि स्वाम्युपन्यस्तया गिरा । दीक्षामादत्त सहितः *खंडिकानां त्रिभिः शतैः ॥ १५९ ॥
महाकुला महाप्राज्ञाः संविग्ना विश्ववंदिताः । एकादशाऽपि तेऽभूवन्मूलशिष्या जगद्गुरोः ॥ १६० ॥
इतश्च चन्दना तत्र शतानीकगृहस्थिता । पश्यन्ती यान्तमायान्तं दिविषज्जनमम्बरे ॥ १६१ ॥
स्वामिनः केवलोत्पत्तिविज्ञप्त्याह्लादकांक्षिणी । त्रिदशैरुर्वीयोभिर्निन्ये श्रीवीरपर्षदि ॥ १६२ ॥
सा त्रिः प्रदक्षिणीकृत्य नत्वा चोपास्थित प्रभुम् । प्रव्रज्यार्थं नृपाऽमात्यपुत्र्यो बह्व्योऽपरा अपि ॥ १६३ ॥
चन्दनां धुरि कृत्वा ताः स्वयं प्राव्राजयत् प्रभुः । अस्थापयच्छ्रावकत्वे नृनारीश्च सहस्रशः ॥ १६४ ॥
जाते संघे चतुर्धैवं ध्रौव्योत्पादव्ययात्मिकाम् । इन्द्रभूतिप्रभृतीनां त्रिपदीं व्याहरत् प्रभुः ॥ १६५ ॥
आचारांगं सूत्रकृतं स्थानांगं समवाययुक् । पंचमं भगवत्यंगं ज्ञाताधर्मकथापि च ॥ १६६ ॥
उपासकान्तकृदनुत्तरोपपातिकादशाः । प्रश्नव्याकरणं चैव विपाकश्रुतमप्यथ ॥ १६७ ॥
दृष्टिवादश्चेत्यंगानि तत्त्रिपद्या कृतानि तैः । पूर्वाणि दृष्टिवादान्तः सूत्रितानि चतुर्दश ॥ १६८ ॥
तत्रोत्पादाऽऽग्रायणीये वीर्यप्रवादमित्यपि । अस्तिनास्तिप्रवादं च ज्ञानप्रवादनाम च ॥ १६९ ॥

टि– *खण्डिकः शिष्यः ।

१ स्थानकं *C, L* ॥

सत्यप्रवादमात्मप्रवादं कर्मप्रवादयुक् । प्रत्याख्यानं च विद्याप्रवादकल्याणके अपि ॥ १७० ॥
प्राणावायाऽभिधानं च क्रियाविशालमित्यपि । लोकबिन्दुसारमथ पूर्वाण्येवं चतुर्दश ॥ १७१ ॥
सूत्रितानि गणधरैरंगेभ्यः पूर्वमेव यत् । पूर्वाणीत्यभिधीयन्ते तेनैतानि चतुर्दश ॥ १७२ ॥
एवं रचयतां तेषां सप्तानां गणधारिणाम् । परस्परमजायन्त विभिन्नास्तत्र वाचनाः ॥ १७३ ॥
अकंपिताऽचलभ्रात्रोः श्रीमेतार्यप्रभासयोः । परस्परमजायन्त सदृक्षा एव वाचनाः ॥ १७४ ॥
श्रीवीरनाथस्य गणधरेष्वेकादशस्वपि । द्वयोर्द्वयोर्वाचनयोः साम्यादासन् गणा नव ॥ १७५ ॥
सौगन्धिकरत्नचूर्णपूर्णमादाय भाजनम् । उत्थाय स्वामिपार्श्वेऽस्थात् समयज्ञोऽथ वज्रभृत् ॥ १७६ ॥
तेऽपीन्द्रभूतिप्रमुखाः परिपाट्याऽवतस्थिरे । प्रतीच्छवः स्वाम्यनुज्ञां किंचिन्नमितमौलयः ॥ १७७ ॥
द्रव्यैर्गुणैः पर्यायैश्चाऽनुज्ञातं तीर्थमित्यथ । जल्पन् स्वाम्यक्षिपत् पूर्वं चूर्णं गौतममूर्धनि ॥ १७८ ॥
अप्यन्येषां क्रमात् स्वामी चूर्णं चिक्षेप मूर्धसु । पुष्पवर्षं चूर्णवर्षं प्रीता देवाश्च चक्रिरे ॥ १७९ ॥
चिरंजीवी चिरं धर्मं द्योतयिष्यत्यसाविति । धुरि कृत्वा सुधर्माणमन्वज्ञासीद्गणं प्रभुः ॥ १८० ॥
साध्वीनां संयमोद्योगघटनार्थं तदैव च । प्रवर्तिनीपदे स्वामी स्थापयामास चन्दनाम् ॥ १८१ ॥
पूर्णप्रथमपौरुष्यां देशनां व्यसृजत् प्रभुः । राजोपनीतस्तत्र प्राग्द्वारेण प्राविशद्बलिः ॥ १८२ ॥

१ पूर्वं प्र° C ॥

उदस्तस्य बलेस्तस्य खेऽप्यर्धं जगृहुः सुराः । अर्धस्य पतितस्यार्धं राजाशेषं पुनर्जनाः ॥ १८३ ॥
अथोत्थाय जगन्नाथो देवच्छन्द उपाविशत् । स्वाम्यंघ्रिपीठे चाऽऽसीनो गौतमो देशनां व्यधात् ॥ १८४ ॥
द्वितीयस्यां तु पौरुष्यां पूर्णायां गौतमोऽपि हि । देशनाया विरराम वृष्टेरिव यथाम्बुदः ॥ १८५ ॥

तत्रातिगमय्य कतिचिद्दिवसानि विश्व-
विश्वोपकारनिरतः प्रतिबोध्य लोकम् ।
स्वामी सुरासुरनरेश्वरसेव्यमान-
पादारविन्दयुगलो विजहार पृथ्व्याम् ॥ १८६ ॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये दशमपर्वणि श्रीमहावीरकेवलज्ञानचतुर्विधसंघोत्पत्तिवर्णनो नाम पंचमः सर्गः ॥

## ॥ अथ षष्ठः सर्गः ॥

इतश्चाऽत्रैव भरते कुशाग्रपुरपत्तने । कुशाग्रीयमतिरभूत् प्रसेनजिदिलापतिः ॥ १ ॥
अलंकृताऽशेषदिक्कस्तस्यापारो यशोऽर्णवः । जग्रसे विद्विषां कीर्तिनिर्झरिणीः समन्ततः ॥ २ ॥
तस्याऽभूत् केवलं राज्यशोभार्थं सैन्यसंग्रहः । यत्प्रतापाऽनलेनैव वैरिव्याघ्राननाशयत् ॥ ३ ॥
स्खल्योऽद्रिणा वायुरपि दंभोलिरपि वार्द्धिना । आज्ञा तस्य पुनः पृथ्व्यामस्खल्यत न केनचित् ॥ ४ ॥
स प्रसारितपाणिभ्यो याचकेभ्यो ददद्वसु । तेषामिव स्पर्धया स्वं न पाणिं समकोचयत् ॥ ५ ॥
हित्वा स्वस्वपतीन् जातेऽन्धकारे रणरेणुभिः । तमालिलिंगुः सर्वांगं जयलक्ष्म्योऽभिसारिकाः ॥ ६ ॥
शुद्धे मनसि तस्याभूत्सदाचारशिरोमणेः । जिनधर्मः स्थिरः सान्द्रे केशपाशेऽधिवासवत् ॥ ७ ॥
श्रीमत्पार्श्वजिनाधीशशासनाम्भोजषट्पदः । सम्यग्दर्शनपुण्यात्मा सोऽणुव्रतधरोऽभवत् ॥ ८ ॥
राज्ञां कन्याभिरूढाभिस्तस्योर्वीशशिरोमणेः । अवरोधोऽभवद् भूयान् दिवीव दिविषत्पतेः ॥ ९ ॥

१ वज्रिणा *L* ॥ २ सार्द्रे *L* ॥

पाकशासनतुल्यस्य शासतस्तस्य मेदिनीम् । सूनवो बहवोऽभूवंस्तन्मूर्तय इवापराः ॥ १० ॥
इतश्चात्रैव भरते वसन्तपुरपत्तने । यथार्थनामा समभूज्जितशत्रुर्महीपतिः ॥ ११ ॥
अमरीव भुवं प्राप्ता तस्य चाऽमरसुन्दरी । बभूव पट्टमहिषी गुणरत्नमहाखनिः ॥ १२ ॥
तयोः सुमंगलो नाम मंगलानां निवासभूः । सुतोऽभूद्रूपकन्दर्पः कलानां निधिरिन्दुवत् ॥ १३ ॥
सेनको नाम स[illegible]स्याभून्मन्त्रिपुत्रकः । अलक्षणानां सर्वेषामुदाहरणमादिमम् ॥ १४ ॥
स पिंगकेशो दावाग्निदीप्तशृंग इवाचलः । घूकवच्चिपिटघ्राणो मार्जार इव पिंगदृक् ॥ १५ ॥
उष्ट्रवल्लम्बकण्ठौष्ठ आखुवल्लघुकर्णकः । मुखंकुन्दांकुराऽऽकारैर्बहिर्भूतरदावलिः ॥ १६ ॥
जलोदरीवोदरिलो ह्रस्वोरुर्ग्रामकोलवत् । मंडलस्थानकेनेव वक्रजंघोऽतिशूर्पपात् ॥ १७ ॥ ( त्रिभिर्विशेषकम् )
संचचार दुराकारो वराको यत्र यत्र सः । जगाम तत्र तत्रापि हास्यमेकान्तपात्रताम् ॥ १८ ॥
दूरतोऽपि तमायान्तं राजपुत्रः सुमंगलः । जहास विकृताऽऽकारं विलोक्यैव विदूषकम् ॥ १९ ॥
एवं च राजपुत्रेण हस्यमानो दिवानिशम् । वैराग्यं सेनको भेजेऽपमानद्रुमहाफलम् ॥ २० ॥
अथ संजातवैराग्यो मन्दभाग्यस्ततः पुरात् । निरगाच्छून्यहृदय उन्मत्त इव सेनकः ॥ २१ ॥
सुमंगलकुमारोऽपि मन्त्रिपुत्रे निरीयुषि । कालेन कियताप्यात्मराज्ये पित्रा न्यवेश्यत ॥ २२ ॥

१ °लं कृ° ॥ २ र्ब° ॥

सेनकोऽपि भ्रमन्नर्कं दृष्ट्वा कुलपतिं वने । तत्पार्श्वे तापसो भूत्वा गृह्णाति स्मोष्ट्रिकाव्रतम् ॥ २३ ॥
तीव्रेण बालतपसा स्वमत्यन्तं कदर्थयन् । वसन्तपुरमेवाऽऽगादपरेद्युः स तापसः ॥ २४ ॥
मंत्रिसूस्तापसश्चेति तमानर्च जनोऽखिलः । वैराग्यकारणं पृष्टः कथयामास चेति सः ॥ २५ ॥
सुमंगलकुमारेण रूपमेतदहासि मे । वैराग्यं तेन मे जातं सत्यंकारस्तपःश्रियः ॥ २६ ॥
तच्छ्रुत्वा तं नमस्कर्तुं सुमंगलनृपोऽभ्यगात् । क्षमयित्वा पारणाय न्यमंत्रयत चाऽऽदरात् ॥ २७ ॥
सोऽपि राज्ञे प्रदत्ताशीरनुमेने तदर्थनाम् । कृतकृत्य इवागाच्च राजापि निजवेश्मनि ॥ २८ ॥
पूर्णेऽथ मासक्षपणे नृपतेः प्रार्थनां स्मरन् । शान्तात्मा राजभवनद्वारमाप स तापसः ॥ २९ ॥
शरीराऽसौष्ठवमभूत्तदा च पृथिवीपतेः । द्वारं च पिदधे द्वास्थः कस्तदा भिक्षुमीक्षते ॥ ३० ॥
स्खलितो द्वारदानेन सेतुनेव जलप्लवः । पथा यथागतेनैव तपस्वी व्याजुघोट सः ॥ ३१ ॥
निश्चित्य मासक्षपणं ययौ च पुनरुष्ट्रिकाम् । नचाकुप्यत्तपोवृद्धौ हृष्यन्ति हि महर्षयः ॥ ३२ ॥
स्वस्थीभूतो द्वितीयेऽह्नि भक्तो राजा तपस्विषु । गत्वा नत्वा क्षमयित्वा पुनरेवमुवाच तम् ॥ ३३ ॥
निमन्त्रितोऽसि पुण्याय मयाऽघं पुनरर्जितम् । प्रायः पापनिवासानां पापमेवातिधीयते ॥ ३४ ॥
तवान्यत्रापि भगवन्निषिद्धं पारणं मया । अदातुर्हि प्रियालापोऽन्यत्र लाभान्तरायकृत् ॥ ३५ ॥

१ तपसा नित्यं स्व° M ॥ २ यया C. L ॥ ३ °चोय° L ॥

तत्प्रसीद द्वितीयेऽपि मासक्षपणपारणे । मत्प्रांगणमलंकुर्याः कल्पशाखीव नन्दनम् ॥ ३६ ॥
तथेति प्रतिपेदाने तापसेऽगान्नृपो गृहम् । गणयन्नङ्गुलीस्तस्थौ तत्पारणदिनाय च ॥ ३७ ॥
पूर्णे च मासक्षपणे स तपस्वी नृपौकसि । ययौ दैवादभूद्राज्ञः प्राग्वद्वपुरपाटवम् ॥ ३८ ॥
तथैव पिहिते द्वारे व्याघुट्यागात्स उष्ट्रिकाम् । स्वस्थीभूतोऽथ तं राजा न्यमंत्रयत पूर्ववत् ॥ ३९ ॥
पूर्णेऽथ मासक्षपणे तृतीयेऽपि स तापसः । तथैवाऽगात्तथैवाऽभूद्राज्ञः पुनरपाटवम् ॥ ४० ॥
राजकीयैर्विचिन्त्येष तपस्व्येति यदा यदा । तदा तदा भवत्यस्मत्स्वामिनोऽशिवमेव हि ॥ ४१ ॥
ते चारक्षास्तथादिक्षंस्तपस्वी मन्त्रिसूरपि । प्रविशन्नप्यसौ सर्प इव निर्वास्यतामहो ॥ ४२ ॥
कृते तथैवाऽरक्षैश्च निदानं तापसोऽकरोत् । भूयासमस्मेतस्य वधाय नृपतेरिति ॥ ४३ ॥
मृत्वा च तापसो जज्ञे सोऽल्पर्द्धिर्वानमन्तरः । राजाऽपि तापसो भूत्वा तामेव गतिमाप सः ॥ ४४ ॥
च्युत्वा सुमंगलः सोऽथ प्रसेनजिदिलापतेः । सुतोऽभूच्छ्रेणिको नाम धारिणीकुक्षिसंभवः ॥ ४५ ॥
इतश्च तत्रैव पुरे रथिको नाग इत्यभूत् । प्रसेनजिन्महीपालचरणाम्भोजषट्पदः ॥ ४६ ॥
दयावानार्हतो दाता परनारीसहोदरः । वीरो धीरोऽधीतकलः स सर्वगुणभूरभूत् ॥ ४७ ॥
नामधेयेन सुलसाऽनलसा पुण्यकर्मणि । बभूव गेहिनी तस्य पुण्यश्रीरिव देहिनी ॥ ४८ ॥

१ °श्चास्तथा° *C, L* ॥

पतिव्रतात्वसम्यक्त्वाऽऽर्जवप्रभृतयो गुणाः । तस्यां युगपदावात्सुः सपांशुक्रीडका इव ॥ ४९ ॥
एकदा नागरथिकोऽपुत्रोऽचिन्तयदुच्चकैः । सनालनलिनाकारकरतल्पशयाननः ॥ ५० ॥
पुत्रमुल्लापयिष्यामि लालयिष्यामि चेति मे । अपुत्रस्याऽवकेशीव निष्फलोऽभून्मनोरथः ॥ ५१ ॥
न बाल्याद् ब्रह्म विदधे पुत्रवक्त्रं च नैक्षि यैः । धिक् तेषां कामवैवश्यं लोकद्वितयवंचकम् ॥ ५२ ॥
इति चिन्ताविवर्णास्यं पंकमग्नमिव द्विपम् । पतिं प्रोवाच सुलसा विनयाद्रचिताञ्जलिः ॥ ५३ ॥
हस्तशय्या मुखस्येयं चिन्तामाख्याति नाथ! ते । किं चिन्तयस्यादिश मे मां चिन्ताभागिनीं कुरु ॥५४॥
नागोऽप्याख्यदपुत्रोऽस्मि पुत्रकौतूहलं च मे । न किंचिदस्त्यौपयिकं पुत्रीयं[1] पुत्रकाम्यतः ॥ ५५ ॥
सुलसोवाच कन्यास्त्वं बह्वीः परिणयाऽपराः । पुत्रप्रसविनी तासु किमेकापि न भाविनी ? ॥ ५६ ॥
नागोऽप्यूचे त्वयैवाहं जायावानिह जन्मनि । जायाभिः कृतमन्याभिस्तत्पुत्राणां तु का कथा ॥ ५७ ॥
त्वदंगसंभवं पुत्रमिच्छामि प्रियदर्शने ! स आवयोः प्रीतिवल्लेः फलायेत चिरादपि ॥ ५८ ॥
त्वं प्राणास्त्वं प्रतिवपुस्त्वं मन्त्री त्वं च मे सखा । तद्यतस्व सुतार्थेऽस्मिन्नुपयाचितकादिभिः ॥ ५९ ॥
सुलसोचे करिष्येऽहमर्हदाराधनां प्रिय ! । अर्हदाराधनैवैका सर्वकार्येषु कामधुक् ॥ ६० ॥
आचामाम्लादिभिरथ तपोभिरतिदुस्तपैः । आजन्मापि[2] पवित्रं स्वं पावयन्ती विशेषतः ॥ ६१ ॥

१ पुत्रार्थं C ॥ २ °न्मादि C । °न्मात्रि L ॥

सितमौक्तिकालंकारा नवोत्फुल्लेव मल्लिका । कौसुंभवसना संध्येवारुणाभ्रा प्रगेतनी ॥ ६२ ॥
वीतरागार्चनपरा ब्रह्मचर्यपरायणा । समाहितमनाः साऽस्थात्परदुःखार्द्रमानसा ॥६३॥ (त्रिभिर्विशेषकम्)
इतश्च शक्रः सदसि प्रशंसामिति निर्ममे । श्राविका उग्र सुलसां साम्प्रतं भरतावनौ ॥ ६४ ॥
एको देवस्तदाकर्ण्य विस्मयोत्कर्णिताननः । सुलसायाः श्राविकात्वं परीक्षितुमुपाययौ ॥ ६५ ॥
देवार्चनप्रसक्तायाः सुलसायाः स वेश्मनि । प्राविशत् साधुरूपेण विरचय्य निषद्यिकाम् ॥ ६६ ॥
सुलसापि हि तं दृष्ट्वाऽभ्युत्तस्थौ वदागतम् । भक्त्या ववन्देऽपृच्छच्च तदागमनकारणम् ॥ ६७ ॥
स उवाच ममाख्यातं वैद्येन त्वद्गृहेऽस्ति यत् । लक्षपाकं महातैलं ग्लानार्थं तत्प्रदीयताम् ॥ ६८ ॥
सफलस्तैलपाकोऽयं साधावुपकरिष्यते । इत्युदीर्य मुदा तैलकुम्भमभ्यानिनाय सा ॥ ६९ ॥
स तैलकुम्भो देवेन स्वशक्त्या पातितः करात् । द्राक् च त्रटिति पुस्फोट कुलायगलिताण्डवत् ॥ ७० ॥
तैलकुम्भो द्वितीयोऽपि तया पुनरढौक्यत । तथैव सोऽपि स्फुटितो न पुनर्विषसाद सा ॥ ७१ ॥
तैलकुम्भस्तृतीयोऽपि तयाऽऽनीतस्तथाऽस्फुटत् । सा दध्यौ चाल्पपुण्याऽस्मि मोघयाच्ञेन साधुना ॥७२॥
देवस्ततो निजं रूपं धृत्वेति निजगाद ताम् । भद्रे ! तव श्राविकात्वं प्रशशंस दिवस्पतिः ॥ ७३ ॥
शक्रप्रशंसया चैष विस्मितः स्वर्गवास्यहम् । त्वत्परीक्षार्थमायातस्तुष्टोऽस्मि च वरं वृणु ॥ ७४ ॥

---

१ को न: सा° *L* । °क: स: स: सा° *D* ॥ २ त्रटिति *M*. ॥

सुलसा श्राविकाऽप्यूचे यदि तुष्टोऽसि तन्मम । देहि पुत्रमपुत्राया नान्यदिष्टमतः परम् ॥ ७५ ॥
द्वात्रिंशतं स गुटिका दत्त्वा देवोऽब्रवीदिदम् । क्रमेण भक्षयेरेतास्तावन्तः स्युः सुतास्तव ॥ ७६ ॥
पुनः प्रयोजनवशात् स्मर्तव्योऽहं त्वयाऽनघे ! । एष्यामि भूय इत्युक्त्वा त्रिदशः स तिरोदधे ॥ ७७ ॥
अचिन्तयच्च सुलसा क्रमेण गुटिकाऽदनात् । बहूनां बालरूपाणां मर्दिष्यानि हि कोऽशुचिम् ॥ ७८ ॥
तस्मात्प्राश्नाम्यहं सर्वा युगपद् गुटिका इमाः । यथैकोऽपि भवेत् पुत्रो द्वात्रिंशल्लक्षणान्वितः ॥ ७९ ॥
इत्थं विमृश्य स्वधिया सा प्राश गुटिकाः समाः । तथा बुद्धिरियं जज्ञे नान्यथा भवितव्यता ॥ ८० ॥
उत्पेदिरे तदुदरे गर्भा द्वात्रिंशदप्यथ । तैर्गर्भैरसहा साभूद्वल्लीव बहुभिः फलैः ॥ ८१ ॥
सा गर्भान् धर्तुमसहा वज्रसारान् कृशोदरी । कायोत्सर्गस्थिता देवं सस्मार पुनरेव तम् ॥ ८२ ॥
स्मृतमात्रोपस्थितेन सप्रस्तेनाऽमरेण सा । किं स्मृतोऽस्मीति पृष्टाऽऽख्यत्तां तथा गुटिकाकथाम् ॥ ८३॥
देवोऽवदत् किं गुटिका युगपद् भक्षितास्त्वया ? । अमोघाः खल्विमास्तेन गर्भास्तावन्त एव ते ॥ ८४ ॥
न साधु विदधे भद्रे ! त्वयेदमृजुचेतसा । पुत्रास्तुल्यायुषो ह्येवं द्वात्रिंशदपि भाविनः ॥ ८५ ॥
मा विषीद महाभागे ! बलिष्ठा भवितव्यता । गर्भपीडापहारं तु करिष्ये सुस्थिता भव ॥ ८६ ॥
सुलसाया गर्भपीडामपहृत्य स नाकसद् । जगाम साऽभूत्स्वस्था च गूढगर्भा च भूरिव ॥ ८७ ॥
पूर्णे काले च सुलसा शुभेऽहनि शुभे क्षणे । द्वात्रिंशल्लक्षणान् पुत्रान् द्वात्रिंशतमजीजनत् ॥ ८८ ॥ 

धात्रीभिर्लाल्यमानास्ते क्रमाद्ववृधिरे सुताः। कलभा इव विन्ध्याद्रावखण्डितसमीहिताः ॥ ८९ ॥

प्रांगणे ते रुरुचिरे रममाणाः कुमारकाः। गृहलक्ष्मीविहंगम्याः क्रीडाक्षितिरुहा इव ॥ ९० ॥

उत्संगे नागरथिको ग्राहं ग्राहं कुमारकान्। स्नेहादस्नपयद्दिवाऽऽनन्दजैर्बाष्पवारिभिः ॥ ९१ ॥

पादे क्रोडे शिरोदेशे लगमानैः कुमारकैः। विरेजे नागरथिकः सिंहपोतैरिवाचलः ॥ ९२ ॥

सर्वेऽपि नागरथिनः सूनवो वयसा समाः। ते श्रेणिककुमारस्य बभूवुरनुयायिनः ॥ ९३ ॥

अन्यदा च स्वपुत्राणां राज्यार्हत्वं परीक्षितुम्। एकत्र पायसस्थालान्यशनाय नृपोऽर्पयत् ॥ ९४ ॥

ततो भोक्तुं प्रवृत्तानां कुमाराणाममोचयत्। व्याघ्रानिव व्यात्तवक्त्रान् सारमेयान् स सारथीः ॥ ९५ ॥

कुमारा द्रुतमुत्तस्थुरापतत्सु ततः श्वसु। एकस्तु श्रेणिकस्तस्थौ धियां धाम तथैव हि ॥ ९६ ॥

सोऽन्यस्थालात्पायसान्नं स्तोकं स्तोकं शुनां ददौ। यावल्लिलिहिरे श्वानस्तावच्च बुभुजे स्वयम् ॥ ९७ ॥

येन केनाप्युपायेन परानेष निरोत्स्यति। भोक्ष्यते च स्वयं पृथ्वीं राजा तेनेति रञ्जितः ॥ ९८ ॥

राजा पुनः परीक्षार्थं सुतानामन्यदा ददौ। मोदकानां करण्डांश्च पयस्कुंभांश्च मुद्रितान् ॥ ९९ ॥

इमां मुद्रामभञ्जन्तो भुञ्जीध्वं मोदकानमून्। पयः पिबत मा कुद्वं छिद्रमित्यादिशन्नृपः ॥ १०० ॥

विना श्रेणिकमेतेषां कोऽपि नाऽभुक्त नाऽपिबत्। बुद्धिसाध्येषु कार्येषु कुर्युरूर्जस्विनोऽपि किम् ॥ १०१ ॥

चलयित्वा चलयित्वा श्रेणिकस्तु करंडकम् । बुभुजे मोदकक्षोदं शलाकाविवरच्युतम् ॥ १०२ ॥
रूप्यशुक्त्या घटस्याधो गलद्वारिबिन्दुपूर्णया । स पयोऽपि पपौ किं हि दुःसाध्यं सुधियां धियः ॥ १०३ ॥
एवं परीक्षानिर्व्यूढं श्रेणिकं बुद्धिसंपदा । अमंस्त राज्यार्हतया कुशाग्रनगरेश्वरः ॥ १०४ ॥
कुशाग्रे चाभवच्छीघ्रं शीघ्रमग्नेरुपद्रवः । ततश्चाघोषणां राजा प्रसेनजिदकारयत् ॥ १०५ ॥
उत्थास्यति पुरे वह्निर्यस्य यस्य गृहादिह । स स निर्वासनीयोऽस्मात् पुरान्मय इवाऽऽमयी ॥ १०६ ॥
सूपकारप्रमादेन राज्ञ एवाऽन्यदा गृहात् । उदस्थादग्निरग्निर्हि न स्वः कस्यापि विप्रवत् ॥ १०७ ॥
तस्मिन् प्रदीपने वृद्धिमुपेयुषि महीपतिः । यो यद् गृह्णाति मद्गेहात्तत्तस्येत्यादिशत् सुतान् ॥ १०८ ॥
सर्वे कुमारा हस्त्यादि समादाय यथारुचि । निर्ययुः श्रेणिकस्त्वेकां भम्भामादाय निर्ययौ ॥ १०९ ॥
किमेतत्कुष्टमित्युक्तो नृपेण श्रेणिकोऽवदत् । जयस्य चिह्नं भम्भेयं प्रथमं पृथिवीभुजाम् ॥ ११० ॥
अस्याः शब्देन भूपानां दिग्यात्रामंगलं महत् । रक्षणीया क्षमापालैः स्वामिंस्तदियमेव हि ॥ १११ ॥
ततश्चैवं महेच्छत्वप्रसन्नः पृथिवीपतिः । श्रेणिकस्य ददौ भम्भासार इत्यपराभिधाम् ॥ ११२ ॥
इदं च न विसस्मार तदा राजा प्रसेनजित् । उत्तिष्ठेयद्गृहादग्निः स पुरे न वसेदिति ॥ ११३ ॥
ततश्चाचिंतयत्राऽहमात्मानमनुशास्मि चेत् । सर्वथा तर्हि पर्याप्तं परेषामनुशासनम् ॥ ११४ ॥

१-२ चल° M. ॥

इति तत्याज नगरं तद्राजा सपरिच्छदः । क्रोशेनैकेन च ततः शिबिरं स न्यवेशयत् ॥ ११५ ॥
सञ्चरन्तस्तदा चैवं वदन्ति स्म मिथो जनाः । क्व नु यास्यथ ? यास्यामो वयं राजगृहं प्रति ॥ ११६ ॥
ततो राजगृहं नाम तत्रैव नगरं नृपः । चकार परिखावप्रचैत्यसौधाऽट्टबन्धुरम् ॥ ११७ ॥
राज्यार्हमानिनो मैनं राज्यार्हं सूनवोऽपरे । ज्ञासिषुरित्यवाऽज्ञासीच्छ्रेणिकं पृथिवीपतिः ॥ ११८ ॥
पृथक् पृथक् कुमाराणां ददौ देशान्नरेश्वरः । न किंचिच्छ्रेणिकस्यास्तु राज्यमस्यायताविति ॥ ११९ ॥
ततोऽभिमानी स्वपुरात् कलभः काननादिव । निःसृत्य श्रेणिकोऽगच्छद्वेणातटपुरं क्रमात् ॥ १२० ॥
तत्र च प्रविशन् भद्राऽभिधस्य श्रेष्ठिनोऽथ सः । कर्म लाभोदयं मूर्तमिवोपाविशदापणे ॥ १२१ ॥
तदा च नगरे तस्मिन् विपुलः कश्चिदुत्सवः । नव्यदिव्यदुकूलांगरागपौराऽऽकुलोऽभवत् ॥ १२२ ॥
प्रभूतकार्यैरासीत् स श्रेष्ठी व्याकुलस्तदा । कुमारोऽप्यार्पयद्बुद्ध्वा तत्पुटापुटिकादिकम् ॥ १२३ ॥
द्रव्यं कुमारमाहात्म्याच्छ्रेष्ठी भूयिष्ठमार्जयत् । पुण्यपुंसां विदेशेऽपि सहचर्यो ननु श्रियः ॥ १२४ ॥
अथाऽवितथपुण्यस्य कस्यातिथिरसीत्यथ । श्रेणिकः श्रेष्ठिना पृष्टो भवतामित्यभाषत ॥ १२५ ॥
नन्दायोग्यो वरो दृष्टः स्वप्नेऽद्य निशि यो मया । असौ साक्षात् स एवेति श्रेष्ठी चेतस्यचिन्तयत् ॥ १२६ ॥
सोऽभाषिष्ट च धन्योऽस्मि यद्भवत्यतिथिर्मम । असावलसमध्येन ननु गंगा समागता ॥ १२७ ॥

१ °तं नत्वोश° /. ॥

संवृत्याऽहं ततः श्रेष्ठी तं नीत्वा निजवेश्मनि । स्नपयित्वा परिधाप्य सगौरवमभोजयत् ॥ १२८ ॥
एवं च तिष्ठंस्तद्गेहे श्रेणिकः श्रेष्ठिनाऽन्यदा । कन्यां परिणयेमां मे नन्दां नाम्नेत्ययाच्यत ॥ १२९ ॥
ममाऽज्ञातकुलस्यापि कथं दत्से सुतामिति । श्रेणिकेनोक्त ऊचे स ज्ञातं तव गुणैः कुलम् ॥ १३० ॥
ततस्तस्योपरोधेनोदधेरिव सुतां हरिः । श्रेणिकः पर्यणैषीत्तां भवद्धवलमंगलम् ॥ १३१ ॥
भुञ्जानो विविधान् भोगान् सह वल्लभया तया । अतिष्ठच्छ्रेणिकस्तत्र निकुञ्ज इव कुञ्जरः ॥ १३२ ॥
श्रेणिकस्य स्वरूपं तद्विवेदाऽऽशु प्रसेनजित् । सहस्राक्षा हि राजानो भवन्ति चरलोचनैः ॥ १३३ ॥
उग्रं प्रसेनजिद्रोगं प्रापाऽथान्तं विदन्निजम् । ततः श्रेणिकमानेतुं शीघ्रमादिक्षदौष्ट्रिकान् ॥ १३४ ॥
औष्ट्रिकेभ्यो ज्ञातवार्तः पितुरत्यर्तिवार्तया । नन्दां सम्बोध्य सस्नेहं प्रतस्थे श्रेणिकस्ततः ॥ १३५ ॥
वयं पाण्डुरकुड्या गोपाला राजगृहे पुरे । आह्वानमंत्रप्रतिमान्यक्षराणीति चार्पयत् ॥ १३६ ॥
[1]माऽन्या तातस्य रोगार्तैर्मदर्तिर्भूदिति द्रुतम् । उष्ट्रीं श्रेणिक आरुह्य ययौ राजगृहं पुरम् ॥ १३७ ॥
तं दृष्ट्वा मुदितो राजा हर्षनेत्राश्रुभिः समम् । राज्येऽभ्यषिञ्चद्विमलैः सुवर्णकलशाम्बुभिः ॥ १३८ ॥
राजाऽपि संस्मरन् पार्श्वजिनं पंचनमस्क्रियाम् । चतुःशरणमापन्नो विपद्य त्रिदिवं ययौ ॥ १३९ ॥
विश्वं विश्वंभराभारं बभार श्रेणिकस्ततः । तेन गर्भवती मुक्ता गर्भं नन्दापि दुर्वहम् ॥ १४० ॥

१ माभाता तस्य रो° *C. L.*॥

तस्या दोहद इत्यासीद्गजारूढा शरीरिणाम् । महाभूत्योपकुर्वाणा भवाम्यभयदा यदि ॥ १४१ ॥
विज्ञपय्याऽथ राजानं तत्पित्राऽपूरि दोहदः । पूर्णे काले च साऽसूत प्राची रविमिवार्भकम् ॥ १४२ ॥
दोहदार्थानुसारेण तस्याथ दिवसे शुभे । चकाराभयकुमार इति मातामहोऽभिधाम् ॥ १४३ ॥
स क्रमाद्ववृधे विद्या निरवद्याः पपाठ च । अष्टवर्षोऽभवद्दक्षो द्वासप्तत्यां कलासु च ॥ १४४ ॥
सवयाः कलहे कोऽपि तं कोपादित्यतर्जयत् । किं त्वं जल्पसि यस्याऽहो पितापि ज्ञायते न हि ॥ १४५ ॥
ऊचेऽभयकुमारस्तं ननु भद्रः पिता मम । पिता भद्रो भवन्मातुः प्रत्युवाचेति सोऽभयम् ॥ १४६ ॥
नन्दां प्रत्यभयोऽप्यूचे मातः को मे पितेत्यथ । अयं तव पिता भद्रश्रेष्ठी नन्देत्यचीकथत् ॥ १४७ ॥
भद्रस्तव पिता शंस मदीयं पितरं ननु । पुत्रेणेत्युदिता नन्दा निरानन्देदमब्रवीत् ॥ १४८ ॥
देशान्तरादागतेन परिणीतास्मि केनचित् । मम च त्वयि गर्भस्थे तमापुः केचिदौष्ट्रिकाः[1] ॥ १४९ ॥
रहः स किंचिदुक्त्वा तैः सहैव क्वचिदप्यगात् । अद्यापि तं न जानामि कुतस्त्यः कश्चिदित्यहम् ॥ १५० ॥
स यान् किंचिज्जल्प त्वामिति पृष्टाऽभयेन सा । अक्षराण्यर्पितान्येतानीति पत्रमदर्शयत् ॥ १५१ ॥
तद्विभाव्याऽभयः प्रीतोऽब्रवीन्मम पिता नृपः । पुरे राजगृहे तत्र गच्छामो ननु संप्रति ॥ १५२ ॥
आपृच्छ्य श्रेष्ठिनं भद्रं सामग्रीसंयुतस्ततः । नान्देयो नन्दया सार्धं ययौ राजगृहं पुरम् ॥ १५३ ॥

१ दाय" D. M. ॥

मातरं बहिरुद्याने विमुच्य सपरिच्छदाम् । तत्र स्वल्पपरीवारः प्रविवेशाभयः पुरे ॥ १५४ ॥
इतश्च मेलितान्यासंस्तदा श्रेणिकभूभुजा । शतानि पंचैकोनानि मन्त्रिणां मन्त्रसत्त्रिणाम् ॥ १५५ ॥
मन्त्रिपञ्चशतीं पूर्णां कर्तुं नरपतिस्ततः । लोके गवेषयामास कंचिदुत्कृष्टपूरुषम् ॥ १५६ ॥
ततश्च तत्परीक्षार्थं शुष्ककूपे निजोर्मिकाम् । प्रचिक्षेप क्षितिपतिर्लोकानित्यादिदेश च ॥ १५७ ॥
आदास्यते करेणैतामूर्मिकां यस्तटस्थितः । तस्य धीकौशलक्रीती मदीया मन्त्रिधुर्यता ॥ १५८ ॥
तेऽप्यूचुर्यदशक्यानुष्ठानमस्मादृशामिदम् । ताराः करेण यः कर्षेत्स इमामूर्मिकामपि ॥ १५९ ॥
ततोऽभयकुमारोऽपि संप्राप्तस्तत्र सस्मितम् । ऊचे किं गृह्यते नैषा किमेतदपि दुष्करम् ? ॥ १६० ॥
तं दृष्ट्वा च जना दध्युः कोऽप्यसावतिशायिधीः । समग्रे मुखरागो हि नृणामाख्याति पौरुषम् ॥ १६१ ॥
ऊचुस्ते तं गृहाणेमामूर्मिकां तत्पणीकृताम् । अर्धराज्यश्रियं पुत्रीं धुर्यतां चेषु मंत्रिषु ॥ १६२ ॥
ततोऽभयकुमारोऽपि मुद्रिकां कूपमध्यगाम् । आर्द्रगोमयपिण्डेन निजघानोपरिस्थितः ॥ १६३ ॥
प्रक्षिप्योपरि तत्कालं ज्वलन्तं तृणपूलकम् । सद्यः संशोषयामास गोमयं तन्महामतिः ॥ १६४ ॥
नन्दाया नन्दनः शीघ्रं कारयित्वाऽथ सारणिम् । वारिणाऽपूरयत् कूपं विस्मयेन च तं जनम् ॥ १६५ ॥
तद्गोमयं श्रेणिकसूः करेण तटदाददे । धीमद्भिः सुप्रयुक्तस्य किमुपायस्य दुष्करम् ? ॥ १६६ ॥
तस्मिन् स्वरूपे चाऽऽरक्षैर्विज्ञप्ते जातविस्मयः । नृपोऽभयकुमारं द्रागाजुहावाऽऽत्मसन्निधौ ॥ १६७ ॥

अभयं श्रेणिकः पुत्रमलिपरयाथ सस्वजे। बन्धुरज्ञायमानोऽपि हृष्टो मोदयते मनः ॥ १६८ ॥
कुतस्त्वमागतोऽसीति पृष्टः श्रेणिकभूभुजा। आगतोऽस्मि पुराद्वेणातटादित्यभयोऽवदत् ॥ १६९ ॥
राजापृच्छद्भद्रमुख! [1]किं भद्र इति विश्रुतः। श्रेष्ठी तत्रास्ति? तस्यापि नन्दानाम्नी च नन्दना? ॥ १७० ॥
अस्त्येष सम्यगित्युक्ते तेन भूयोऽपि भूपतिः। ऊचे नन्दोदरिण्यासीत् किमपत्यमजायत? ॥ १७१ ॥
अथाऽऽख्यत्कान्तदन्तांशुश्रेणिः श्रेणिकसूरिदम्। देवाभयकुमाराख्यं सा नन्दनमजीजनत् ॥ १७२ ॥
किंरूपः किंगुणः सोऽस्तीत्युदिते सति भूभुजा। ऊचेऽभयः स एवाहं स्वामिन्नस्मीति चिन्त्यताम् ॥ १७३ ॥
परिष्वज्यांकमारोप्य तमाघ्राय च मूर्धनि। स्नेहात्स्नपयितुमिव राजाऽसिञ्चद् दृगंभसा ॥ १७४ ॥
कुशलं वत्स! ते मातुरिति पृष्टे महीभुजा। इति विज्ञपयामास बद्धाञ्जलिपुटोऽभयः ॥ १७५ ॥
अनुस्मरन्ती भृंगीव त्वत्पादाम्भोजसंगमम्। स्वामिन्नायुष्मती मेऽम्बा बाह्योद्यानेऽस्ति संप्रति ॥ १७६ ॥
ततो नन्दां समानेतुममन्दानन्दकन्दलः। न्ययुंक्त सर्वसामग्रीमग्रेकृत्वा नृपोऽभयम् ॥ १७७ ॥
ततः स्वयमपि प्राज्योत्कंठोल्लिखितमानसः। नन्दामभिययौ राजा राजहंस इवाब्जिनीम् ॥ १७८ ॥
शिथिलीभूतवलयां कपोलस्खलितालकाम्। अनञ्जनाक्षीं कबरीधारिणीं मलिनांशुकाम् ॥ १७९ ॥
ततोऽस्तनिम्ना दधतीं द्वितीयेन्दुकलातुलाम्। ददर्श राजा सानन्दो नन्दामुद्यानवासिनीम् ॥ १८० ॥

१ सुमं M. ॥ २ °को L. ॥

॥ १७९

नन्दामानन्य नृपतिर्नीत्वा च स्वं निकेतनम्। पट्टराज्ञीपदेऽकार्षीत् सीतामिव रघूद्वहः ॥ १८१ ॥
ततः स्वसुः सुसेनायाः पुत्रीं मंत्रिषु धुर्यताम्। राज्यस्यार्धं चाभयाय नृपतिः श्रेणिको ददौ ॥ १८२ ॥
भक्तितः पितरि स्वस्य पदातिपरमाणुताम्। मन्वानः साधयामास दुःसाध्यान् भूभुजोऽभयः ॥ १८३ ॥
इतश्च वसुधावध्वा मौलिमाणिक्यसन्निभा। वैशालीति श्रीविशाला नगर्यस्त्यगरीयसी ॥ १८४ ॥
आखण्डल इवाखण्डशासनः पृथिवीपतिः। चेटीकृतारिभूपालस्तत्र चेटक इत्यभूत् ॥ १८५ ॥
पृथग्राज्ञीभवास्तस्य बभूवुः सप्त कन्यकाः। सप्तानामपि तद्राज्यांगानां सप्तेव देवताः ॥ १८६ ॥
प्रभावती पद्मावती मृगावती शिवाऽपि च। ज्येष्ठा तथैव सुज्येष्ठा चेल्लणा चेति ताः क्रमात् ॥ १८७ ॥
चेटकस्तु श्रावकोऽन्यविवाहनियमं वहन्। ददौ कन्या न कस्मैचिदुदासीन इव स्थितः ॥ १८८ ॥
तन्मातर उदासीनमपि ह्यापृच्छ्य चेटकम्। वराणामनुरूपाणां प्रददुः पंच कन्यकाः ॥ १८९ ॥
प्रभावती वीतभयेश्वरोदायनभूपतेः। पद्मावती तु चम्पेशदधिवाहनभूभुजः ॥ १९० ॥
कौशाम्बीशशतानीकनृपस्य तु मृगावती। शिवा तूज्जयिनीशस्य प्रद्योतपृथिवीपतेः ॥ १९१ ॥
कुण्डग्रामाधिनाथस्य नन्दिवर्धनभूभुजः। श्रीवीरनाथज्येष्ठस्य ज्येष्ठा दत्ता यथारुचि ॥ १९२ ॥
सुज्येष्ठा चेल्लणा चापि कुमार्यावेव तस्थतुः। रूपश्रियोपमाभूते ते द्वे एव परस्परम् ॥ १९३ ॥
ते दिव्याकारधारिण्यौ दिव्यवस्त्रविभूषणैः। अवियुक्ते सदाऽभूतां तारे इव पुनर्वसू ॥ १९४ ॥

कलाकलापकुशले श्रुतार्थोपनिषद्विदौ । मूर्ती इव सरस्वत्या रेमाते ते परस्परम् ॥ १९५ ॥
सममानर्चतुर्देवं धर्मं शुश्रुवतुः समम् । चक्रतुः सममन्यच्च ते द्वे एकात्मिके इव ॥ १९६ ॥
अपरेद्युश्च सुज्येष्ठाचेल्लणाभ्यामलंकृतम् । कन्यान्तःपुरमभ्यागादेका स्थविरतापसी ॥ १९७ ॥
सा च व्याख्यच्छौचमूलं धर्मं पापविनाशकम् । उत्फुल्लगल्लमज्ञानपर्षदीव तयोः पुरः ॥ १९८ ॥
सुज्येष्ठावोचदाः शौचमशुभास्रवरूपकम् । अशुभश्चास्रवः पापहेतुः पापच्छिदे कथम् ॥ १९९ ॥
सुज्येष्ठैवं गुणज्येष्ठा तस्या धर्मं निराकरोत् । श्रुतकूपनिपानाभैर्वचोभिर्युक्तिवर्मितैः ॥ २०० ॥
ततो निरुत्तरीभूतां तां मुद्रितमुखामिव । शुद्धान्तदास्यो जहसुर्मुखमर्कटिकादिभिः ॥ २०१ ॥
स्वस्वामिनीजयोन्मत्तास्तामन्तःपुरचेटिकाः । उत्तालतुमुलाः कण्ठे गृहीत्वा निरवासयन् ॥ २०२ ॥
उपाहातुं गता दातुं प्रतीतेवाथ तापसी । पूजार्थिन्यागता सैवं प्रत्युताऽनर्थमासदत् ॥ २०३ ॥
यान्ती च तापसी दध्याविमां वैदग्ध्यगर्विताम् । भूयसीषु सपत्नीषु दुःखपात्रीकरोम्यहम् ॥ २०४ ॥
सुज्येष्ठारूपमथ सा पिण्डस्थध्यानलीलया । कृत्वा मनस्यालिलेख पटेऽखिलकलापटुः ॥ २०५ ॥
लिखितं तच्च तद्रूपं त्वरिता क्रूरतापसी । गत्वा राजगृहे राज्ञेऽदर्शयच्छ्रेणिकाय सा ॥ २०६ ॥
तां दृष्ट्वा लिखितां नेत्रमृगैकमृगजालिकाम् । राजा राजगृहाऽधीशः सानुरागमवर्णयत् ॥ २०७ ॥

१ मुनीमि M ॥

यान्यस्याः केशपाशास्त्वं ते कलापाः कलापिनाम् । मनोज्ञनयनं वक्त्रं निलीनालीव पंकजम् ॥ २०८ ॥
पत्रावलम्बनं कम्बोः कुरुते कण्ठकन्दलः । क्रीडत्कोकं सर इव वक्षो वक्षोजभूषितम् ॥ २०९ ॥
नितम्बः स्मरभातुष्कयोग्या भूरिव विस्तृतः । आलानविभ्रमहरावूरू च क्रमवर्तुलौ ॥ २१० ॥
बिसकाण्डविडम्बिन्यौ जंघे सरलकोमले । पादौ च ऋजुजंघाकावुन्नालनलिनोपमौ ॥ २११ ॥
अहो सौन्दर्यमद्वैतमहो लावण्यमुज्ज्वलम् । अहो अपरमप्यस्याः सर्वं रम्यं मृगीदृशः ॥ २१२ ॥
अपृच्छच्च महाभागे! किमियं श्रीमतल्लिका । अलेखि स्वप्रतिभया रूपदर्शनतोऽथवा ? ॥ २१३ ॥
तापस्यूचे यथाशक्ति दृष्टं रूपमलेख्यदः । यादृक्तु वर्तते राजंस्तादृक् स्यादर्पणे यदि ॥ २१४ ॥
चित्रस्थामपि तां राजा प्रपश्यन् प्रेममोहितः । आलिलिंगिषुरिवाभूच्चुचुम्बिषुरिवाथवा ॥ २१५ ॥
ऊचे च मुक्तावलिवद्वंशे कस्मिन्नभूदियम् ? । इयं मृगांकलेखेव कां चालंकुरुते पुरीम् ? ॥ २१६ ॥
धन्यस्य कस्य वा पुत्री लक्ष्मीः क्षीरोदधेरिव ? । यान्यस्याः कानि वा पुण्यान्यक्षराण्यभिधानताम् ? २१७
सरस्वत्याऽनुजगृहे कलयेयं कया कया । अस्याः पुंस्पाणिना पाणिश्चुम्बितो यदि वा न वा ? ॥ २१८ ॥
तापसी कथयामास वैशाल्यधिपतेः सुता । हैहयान्वयजातस्य चेटकस्य कुमार्यसौ ॥ २१९ ॥
निधिः कलानां सर्वासां सुज्येष्ठा नामधेयतः । गुणरूपानुरूपेण त्वत्तामुद्वोढुमर्हसि ॥ २२० ॥
त्वयि सत्यपि चेदस्याः पतिरन्यो भविष्यति । तृतीयपुरुषार्थेन तर्हि त्वमसि वंचितः ॥ २२१ ॥ ॥ १७३ ॥

विसृज्य तापसीं तस्थौ कथंचिदथ पार्थिवः। पक्षौ विधाय वैशाल्यां यियासुरिव तां स्मरन्॥ २२२॥
सुज्येष्ठाप्रार्थने दत्त्वा शिक्षां राजगृहेश्वरः। अन्येद्युः प्रेषयामास दूतं चेटकभूपतेः॥ २२३॥
दूतोऽपि सद्यो वैशाल्यां गत्वा नत्वा च चेटकम्। उवाच वाचिकपटुर्न यच्चटु न वा कटु॥ २२४॥
सुज्येष्ठां याचते त्वत्तो मत्स्वामी मगधाधिपः। न कन्याप्रार्थनं जातु लज्जायै महतामपि॥ २२५॥
चेटकोऽप्यब्रवीदेवमनात्मज्ञस्तव प्रभुः। वाहीककुलजो वाञ्छन् कन्यां हैहयवंशजाम्॥ २२६॥
समानकुलयोरेव विवाहो हन्त नान्ययोः। तत्कन्यां न हि दास्यामि श्रेणिकाय प्रयाहि भोः॥ २२७॥
दूतेन चागत्य तथाऽऽख्याते श्रेणिकभूपतिः। खेदमासादयामास जितो भट इवारिभिः॥ २२८॥
अभयोऽपि हि तत्रस्थः पितृपादाब्जषट्पदः। उवाच तात! मा शोचीः करिष्ये वः समीहितम्॥ २२९॥
कलाकलापपाथोधिकुम्भजन्माऽभयोऽपि हि। गृहे गत्वाऽलिखद्रूपं फलके मगधेशितुः॥ २३०॥
ततो गुटिकया वर्णस्वरभेदं विधाय सः। वणिग्वेशं गृहीत्वा च वैशालीं नगरीं ययौ॥ २३१॥
उपचेटकराजान्तःपुरं सोऽऽपणमग्रहीत्। तत्रान्तःपुरचेटीनां क्रेतव्यमधिकं ददौ॥ २३२॥
अभयश्चार्चयन्नित्यं श्रेणिकं लिखितं पटे। दासीपृष्टश्चाऽऽख्यदयं देवो मे श्रेणिको नृपः॥ २३३॥
दास्यश्च कथयामासुः सुज्येष्ठायै सविस्मयाः। रूपं तादृग्यथा दृष्टं श्रेणिकस्यातिदैवतम्॥ २३४॥
सुज्येष्ठाऽथ सखीप्रायां ज्येष्ठदासीं समादिशत्। द्रुतमानय तद्रूपं महत्कौतूहलं मम॥ २३५॥

अभयादुपरोधेन तदुपादाय दास्यपि । स्वामिन्यै दर्शयामास रूपं श्रेणिकभूपतेः ॥ २३६ ॥
रूपमत्यन्तसुभगं सुज्येष्ठा तु विलोक्य तत् । निष्पन्दनेत्रनलिना योगिनीव लयं ययौ ॥ २३७ ॥
जगाद च क्षणं स्थित्वा गत्वा रहसि सत्वरम् । गूढाभिप्रायसर्वस्वनिधानवसुधां सखीम् ॥ २३८ ॥
यस्येदं फलके रूपं धीमतीच्छामि तं पतिम् । तदेनं संघटयितुं विधिभट्टारकोऽस्तु कः ॥ २३९ ॥
यद्ययं मे पतिर्न स्यात्तदानीं हृदयं मम । पचेलिममिवै*र्वारु द्विधा भावि न संशयः ॥ २४० ॥
तद्भद्रे! क इहोपाय उपायो यदि वाऽस्त्ययम् । शरणं वणिगेवैष य एतद्रूपमर्चति ॥ २४१ ॥
तं प्रसादय मत्कार्यधुर्ये! तद्वाचिकं च मे । तूर्णमागत्य कथयेः स्वस्ति तुभ्यं यशस्विनि! ॥ २४२ ॥
गत्वा दास्या तथाऽत्यन्तमभयोऽभ्यर्थितोऽवदत् । पूरयिष्यामि न चिरात्त्वत्स्वामिन्या मनोरथम् ॥ २४३ ॥
सुरंगां खानयिष्यामि तमानेष्ये सुरंगया । तत्कालमेवाधिष्ठेयस्त्वत्स्वामिन्याऽपि तद्रथः ॥ २४४ ॥
त्वत्स्वामिनी च तत्कालं दृष्ट्वा श्रेणिकमागतम् । आलेख्यदृष्टतद्रूपसंवादान्मुदमेष्यति ॥ २४५ ॥
स्थानेऽमुष्मिन् दिनेऽमुष्मिन् क्षणेऽमुष्मिन् सुरंगया । राजैष्यतीति संकेतं तन्मुखेनाभयो ददौ ॥ २४६ ॥
दासी तस्यै तदाख्यायाऽऽगत्य चाभयमब्रवीत् । प्रमाणं त्वद्वच इति पुनश्चान्तःपुरं ययौ ॥ २४७ ॥
अभयोऽपि हि संकेतकथाख्यापनपूर्वकम् । पितृप्रयोजनमह्न आहत् पितरमाश्वपि ॥ २४८ ॥

टि०-* ऐर्वारु-चीभडुं इति गुर्जरभाषायाम् ।

सुज्येष्ठा तत्प्रभृत्येव स्मरन्ती श्रेणिकं नृपम् । प्रभूतां प्रापदरतिं रतिनाथवशंवदा ॥ २४९ ॥
अन्यदा त्वह्नि निर्णीते श्रेणिकः सुलसासुतैः । द्वात्रिंशता सार्धमागात् सुरंगाद्वारसीमनि ॥ २५० ॥
रथस्थैः सुलसापुत्रैरन्वितोऽथ रथस्थितः । चक्रीव वैताढ्यगुहां सुरंगां श्रेणिकोऽविशत् ॥ २५१ ॥
सुरंगानिर्गतं प्रेक्ष्य सुज्येष्ठा मगधेश्वरम् । चित्रदृष्टानुसाराच्चोपलक्ष्य सुमुदेतराम् ॥ २५२ ॥
साऽऽख्याय सर्वं वृत्तान्तमापप्रच्छे च चेल्लणाम् । प्रत्यज्ञासीच्चेल्लणापि स्थास्यामि त्वदृते न हि ॥ २५३ ॥
रथमारोपयदथ सुज्येष्ठाऽऽख्यौ हि चेल्लणाम् । स्वकं त्वगात् समानेतुं द्रुतं रत्नकरंडिकाम् ॥ २५४ ॥
ऊचुश्च सुलसापुत्रास्तदा श्रेणिकपार्थिवम् । स्वामिन्न युज्यते स्थातुं सुचिरं वैरिवेश्मनि ॥ २५५ ॥
आदाय चेल्लणां राजा प्रेरितः सुलसासुतैः । सुरंगयैव व्याघुट्य यथाऽऽयातस्तथा गतः ॥ २५६ ॥
सुज्येष्ठाऽऽगात्तु पादाय यावद्रत्नकरंडिकाम् । नापश्यच्छ्रेणिकं तावदभ्रान्नभूतचन्द्रवत् ॥ २५७ ॥
तदा चापूर्णकामत्वाद्भगिनीहरणादपि । ज्येष्ठाऽरटन्मुषिताऽस्मि ह्रियते हन्त चिल्लणा ॥ २५८ ॥
प्राक् चेटकं संनद्धन्तं रथी वीरंगकस्तदा । उवाच कोऽयमाक्षेपो मयि सत्यपि नाथ ! ते ॥ २५९ ॥
ततो वीरंगकः सज्जीभूय युद्धाय दुर्धरः । सुरंगाद्वारमभ्यागात् कन्याप्रत्याजिहीर्षया ॥ २६० ॥
सुरंगया गच्छतश्च ततश्च सुलसासुतान् । वीरंगको महाबाहुरेकेनैवेषुणाऽवधीत् ॥ २६१ ॥
संकीर्णत्वात् सुरंगायाः स रथी तद्रथानथ । यावदाकर्षयत्तावद्दूरेऽगान्मगधाधिपः ॥ २६२ ॥

ततोऽर्धजरतीयेन कृताकृतसमीहितः । वीरंगकस्तदखिलं चेटकाय व्यजिज्ञपत् ॥ २६३ ॥
दुहितुर्हरणात्तेषां रथिकानां वधादपि । चेटको युगपद्द्वेषतोषाभ्यामभ्यपूर्यत ॥ २६४ ॥
सुज्येष्ठाऽचिन्तयदहो धिग्धिग्विषयगृध्नुता । सुखकांक्षिभिरीदृक्षा यदाप्यन्ते विडम्बनाः ॥ २६५ ॥
इत्थं विरक्ता सुज्येष्ठा स्वयमापृच्छ्य चेटकम् । समीपे चन्दनार्यायाः परिव्रज्यामुपाददे ॥ २६६ ॥
श्रेणिकोऽपि हि सुज्येष्ठे सुज्येष्ठे इति चिल्लणाम् । अभ्यालपदजानानश्चेल्लणां तत्र तस्थुषीम् ॥ २६७ ॥
चेल्लणाऽकथयत्तस्मै सुज्येष्ठा न समागता । सुज्येष्ठायाः कनिष्ठाऽहं चेल्लणेत्यभिधा मम ॥ २६८ ॥
श्रेणिको व्याजहारैवं नायासोऽभून्मुधा मम । सुभ्रु ! त्वमपि सुज्येष्ठा तस्या न खलु हीयसे ॥ २६९ ॥
चेल्लणा पतिलाभेन भगिनीवञ्चनेन च । निकामं हर्षशोकाभ्यां समकालमलिप्यत ॥ २७० ॥
श्रेणिकः पवनेनेव रथेनासद्यरंहसा । शीघ्रमाप स्वनगरं पश्चात्तस्थावभयोऽपि हि ॥ २७१ ॥
गान्धर्वेण विवाहेन परिणीयाथ चेल्लणाम् । राजा नागसुलसयोर्गत्वाऽऽख्यत्तत्सुतान्मृतान् ॥ २७२ ॥
तौ दंपती नृपाच्छ्रुत्वा सुतोदन्तममंगलम् । मुक्तकंठं रुरुदतुर्विलापं चेति चक्रतुः ॥ २७३ ॥
रे कृतान्त ! कृतान्तोऽसि पुत्राणां युगपत्कथम् । किमेकशृंखलत्वेन तवाऽभूवन् कदाप्यमी ॥ २७४ ॥
पक्षिणामप्यपत्यानि भूयांस्यपि भवन्ति हि । क्रमेण तु विपद्यन्ते न त्वेवं युगपत्क्वचित् ॥ २७५ ॥ 

१ तदा भू° L ॥

स्नेहादेकतया किं नु मृताः स्थ युगपत्सुताः। ज्ञातौ किमावां निःस्नेहौ वञ्चितौ सह मृत्युना ॥ २७६ ॥
इति तारं रुदन्तौ तावाचार्य इव तत्त्ववित्। अभयो बोधयामास श्रेणिकेन सहागतः ॥ २७७ ॥
जन्मिनां प्रकृतिर्मृत्युर्विकृतिर्जीवितं पुनः। ततः स्वभावसिद्धेऽर्थे को विषादो विवेकिनो ! ॥ २७८ ॥
अभयेनेति दंपत्योस्तयोर्बोधितयोः सतोः। कृत्वा संभाषमुचितं श्रेणिकः सदनं ययौ ॥ २७९ ॥
ततश्च चेल्लणादेव्या समं मगधभूपतिः। निर्विघ्नं बुभुजे भोगान् पौलोम्येव पुरंदरः ॥ २८० ॥
अतिवाह्य व्यन्तरायुरुष्ट्रिकाक्षपकोऽपि हि। पुत्रत्वेन चेल्लणायाः कुक्षाववततार सः ॥ २८१ ॥
तस्य गर्भस्य दोषेण पतिमांसादनेऽभवत्। दुर्दोहदश्चेल्लणाया राक्षस्या अपि यो न हि ॥ २८२ ॥
पतिभक्ता चेल्लणा तं नाऽऽख्यत्कस्यापि दोहदम्। अपूर्णदोहदत्वाच्च क्षीयते स्म दिवेन्दुवत् ॥ २८३ ॥
स गर्भश्चेल्लणादेव्या दुर्दोहदविरक्तया। पापमप्युररीकृत्य पात्यमानोऽपि नापतत् ॥ २८४ ॥
शुष्यदंगीं च तां दृष्ट्वा वल्लीमसलिलामिव। पप्रच्छ कारणं राजा प्रेमबन्धुरया गिरा ॥ २८५ ॥
मया किमभिभूताऽसि? खंडिताऽऽज्ञासि वा क्वचित्? । दुःस्वप्नदृश्वरी वासि? भग्नकामासि वा? प्रिये! २८६
एवं राज्ञा सोपरोधं पृच्छ्यमाना कथंचन। तत्तादृगाख्यदापीतविषेव स्खलदक्षरम् ॥ २८७ ॥
दोहदं पूरयिष्यामीत्याश्वास्य नृपतिः प्रियाम्। कथं पूर्यो दोहदोऽयमित्यादिक्षदथाभयम् ॥ २८८ ॥

अभयोऽपि श्रेणिकस्योदरे शशकजंगलम्† । तच्चर्माच्छादितं चक्रेऽथोत्तानं तमशाययत् ॥ २८९ ॥
श्रेणिकस्यानुज्ञया च ततो रहसि चेल्लणा । अघास मांसमव्यग्रा रक्षसामिव देवता ॥ २९० ॥
तस्यां च मांसं खादन्त्यामेवमेव महीपतिः । अधीनी नटविद्यायामिवामूर्च्छन्मुहुर्मुहुः ॥ २९१ ॥
चिन्तयन्त्यां पतिं तस्याश्चकंपे हृदयं क्षणात् । गर्भं पुनश्चिन्तयन्त्याः क्षणादुल्लसति स्म च ॥ २९२ ॥
एवं बुद्धिप्रयोगेण चेल्लणा पूर्णदोहदा । आः पतिघ्न्यस्मि पापाहमिति मोहमुपाययौ ॥ २९३ ॥
राजापि राज्ञ्यै तत्कालं स्वमक्षतमदर्शयत् । तद्दर्शनाद्दहृष्यच्च पद्मिनीवार्कदर्शनात् ॥ २९४ ॥
गतेषु मासेषु नवस्वथ चेटकनन्दना । नन्दनं सा प्रसुषुवे मलयोर्वीव चन्दनम् ॥ २९५ ॥
आदिदेशाथ सा दासीं पितुर्वैर्येष दारकः । तत्क्वापि त्यजतां दूरे पापः पन्नगपोतवत् ॥ २९६ ॥
दास्याऽशोकवनं गत्वा परित्यक्तः स भुव्यभात् । उपपादपदोत्पन्नगीर्वाण इव भासुरः ॥ २९७ ॥
तत्र तं बालकं त्यक्त्वा दास्यायान्ती महीभुजा । अप्रच्छि क गताऽसीति तादृगेव च साऽब्रवीत् ॥२९८॥
अशोकवनिकां गत्वा राजाऽप्यालोक्य तं सुतम् । द्वाभ्यां जग्राह पाणिभ्यां प्रीतः स्वामिप्रसादवत् २९९
आगत्य चेल्लणां चोचे कुलोत्पन्ने ! विवेकिनि ! किमकार्षीरकर्मेदमकृत्यं श्वपचैरपि ॥ ३०० ॥
अपि दुश्चारिणी या स्यादधर्मज्ञातिकर्कशा । पुत्रं *कुंडं †गोलकं वा साऽपि न स्वयमुज्झति ॥ ३०१ ॥

टि०- † मांसम् । * कुंडो नाम पत्यौ मृते सति यः जारेण जायते । † गोलको नाम पत्यौ जीवति यः जारेण जायते ।

चेल्लणा स्माह ते नाथ! पुत्ररूपेण वैर्यसौ। यस्मिन् गर्भस्थितेऽप्यासीद्दोहदो नरकावहः॥ ३०२॥
जातोऽप्यत्याजि तेनायं कुलजानां हि योषिताम्। पत्युः क्षेमाकांक्षिणीनां किं पुत्रेणापरेण वा॥ ३०३॥
श्रेणिकोऽथान्वशाद्राज्ञीं ज्येष्ठं त्यक्ष्यसि चेत्सुतम्। तदा तवान्ये पुत्राः स्युर्न स्थिरा बुद्बुदा इव॥३०४॥
एवं पत्युर्निदेशेनानिच्छन्त्यपि हि चेल्लणा। स्तन्यदानादहर्निशं तं बालकमपालयत्॥ ३०५॥
कान्त्या चन्द्र इवाऽशोकवनिकायामदर्श्यसौ। अशोकचन्द्र इत्याख्यामिति तस्याऽकरोन्नृपः॥ ३०६॥
तदा वनान्तस्य तस्यांगुलिस्तस्य कनिष्ठिका। अक्षाणि कुक्कुटीपिच्छेनाशोकदलकोमला॥ ३०७॥
तदर्त्यो रुदतस्तस्यांगुलीं पूतिमतीमपि। स्नेहान्मुखेऽक्षिपद्राजा स व्यरंसीच्च रोदनात्॥ ३०८॥
रूढव्रणाऽपि सा तस्य कूणिताभवदंगुलिः। ततः सपांशुरमणैः सोऽभ्यधीयत कूणिकः॥ ३०९।
क्रमेण चेल्लणादेव्या हृदयाम्भोजभास्करौ। सुतौ हल्लविहल्लाख्यावभूतामपरावपि॥ ३१०॥
ते त्रयश्चेल्लणापुत्रा नित्यं राज्ञोऽनु चेरतुः। प्रभुत्वमंत्रोत्साहानां प्रत्यक्षा इव मूर्तयः॥ ३११॥
पितृद्वेष कूणिकायाऽस्था प्रैषीद्गुडमोदकान्। मत्स्यण्डीमोदकान् हल्लविहल्लाभ्यां पुनः सदा॥ ३१२॥
श्रेणिकः कारयत्येषमिति प्राक्कर्मदूषितः। कूणिको विमृशन्नित्यं प्रपेदे मध्यमं वयः॥ ३१३॥
श्रेणिकोऽपि स्नेहलात्मा महेन महताऽन्यदा। पद्मावतीं राजपुत्रीं कूणिकेनोदवाहयत्॥ ३१४॥

१ °नुगा बभुः *M.*॥

श्रेणिकादथ धारिण्या सिन्धुरस्वप्नसूचितः । गर्भोऽभूज्जनयन्मेघवृष्टौ भ्रमणदोहदम् ॥ ३१५ ॥
राजाऽऽदेशात्सोऽभयेनापूर्यताऽऽराध्य देवताम् । ततो मेघकुमार इत्याख्ययाऽसूत सा सुतम् ॥ ३१६ ॥
इतश्चैकः पुरा विप्रः प्रारेभे यज्ञमध्वरम् । तत्र दासं न्ययुंक्तैकं दासोऽप्येवं तमब्रवीत् ॥ ३१७ ॥
ददासि यदि मे शेषं तदा स्थास्यामि नान्यथा । विप्रोऽपि तत्प्रपेदेऽथ दासोऽस्थाद्यज्ञवाटके ॥ ३१८ ॥
शेषं लब्ध्वा स दासोऽपि साधुभ्यः प्रददौ स्वयम् । तत्प्रभावेण देवायुर्बद्ध्वा मृत्वा दिवं ययौ ॥ ३१९ ॥
दासजीवो दिवश्च्युत्वा श्रेणिकस्य सुतोऽभवत् । नन्दिषेणः स विप्रस्तु बभ्रामानेकयोनिषु ॥ ३२० ॥
इतश्चैकस्मिन्नरण्ये हस्तियूथे महीयसि । एकोऽभूद्यूथपः स्थाम्ना दिग्वारणकुमारवत् ॥ ३२१ ॥
मैष भूद्यौवनेऽमुष्य वशायूथस्य कामुकः । इति बुद्ध्या स कलभं जातं जातममारयत् ॥ ३२२ ॥
तद्यूथगाया एकस्याः करिण्या उदरेऽन्यदा । स विप्रजीवोऽवातारीद् गुर्विणी साऽप्यचिन्तयत् ॥ ३२३ ॥
पापेनानेन मे पुत्रा बहवोऽपि विनाशिताः । पुत्रं केनाप्युपायेन रक्षिष्याम्यधुना पुनः ॥ ३२४ ॥
इति निश्चित्य सा वातभग्नपादेव हस्तिनी । बभूव मायया कुण्टा मन्दं मन्दं चचार च ॥ ३२५ ॥
माऽन्ययूथपतेर्भोग्या भवत्वेषेति तां वशाम् । स्तोकं स्तोकं व्रजन् यूथनाथस्तां प्रत्यपालयत् ॥ ३२६ ॥
साऽपीव मन्दगा भूत्वा हस्तिनी तस्य हस्तिनः । अर्धयामेन यामेनामिलदह्ना द्व्यहेन वा ॥ ३२७ ॥
अशक्तैव वराकीयं मिलत्येव चिरादपि । इति हस्ती विशश्वास मायिभिः को न वञ्च्यते ॥ ३२८ ॥ ॥१८१

साऽन्यदा दूरगे तस्मिन् यूथनाथे मतंगजी । तृणपूलं मूर्ध्नि कृत्वा प्रययौ तापसाश्रमम् ॥ ३२९ ॥
पादेषु निपतन्ती सा मस्तके न्यस्तपूलका । अज्ञायि तापसैरेषा वराकी शरणार्थिनी ॥ ३३० ॥
विश्वस्ता भव वत्से ! त्वमिति तैरुदिते सति । तत्राश्रमे सुखं साऽस्थात् पितृधाम्नीव कन्यका ॥ ३३१ ॥
अन्यदा जातपुत्रा सा पुत्रं तत्राश्रमेऽमुचत् । स्वयं त्वरण्ये यूथान्तर्विचचार तथैव हि ॥ ३३२ ॥
सा स्तन्यं कलभायादादागत्यागत्य चान्तरा । शनैश्चाश्रमशाखीव ववृधे कलभोऽपि सः ॥ ३३३ ॥
पक्वनीवारकवलैः शल्लकीकवलैरपि । प्रेम्णा निजं पोतमिव तापसास्तमपोषयन् ॥ ३३४ ॥
अंके पर्यस्तिकां मूर्ध्नि जटामुकुटमुत्कटम् । स करेण व्यरचयत् पार्श्वे क्रीडंस्तपस्विनाम् ॥ ३३५ ॥
कलशैः सिषिचुर्वृक्षांस्तापसास्तान्निरीक्ष्य च । सिषेच सोऽपि पयसाऽऽपूर्यापूर्य निजं करम् ॥ ३३६ ॥
एवं चाश्रमजान् वृक्षान् सिञ्चनः प्रतिवासरम् । चक्रुः सेचनक इति नाम तस्य तपस्विनः ॥ ३३७ ॥
करसत्कोन्नतदन्तो मधुपिंगललोचनः । भूमिस्पृक्पुष्करकरः पूर्वासनसमुन्नतः ॥ ३३८ ॥
उच्चैःकुंभो लघुग्रीवः क्रमावनतवेणुकः । शुंडेषदूनलांगूलो विंशत्या शोभितो नखैः ॥ ३३९ ॥
अपराग्[1]देशयोर्नीचैरुच्चकैर्गात्रदेशयोः । स सर्वलक्षणैर्युक्तः[2] क्रमान्मदमुखोऽभवत् ३४० (त्रिभिर्विशेषकम्)
तेनान्यदा पयः पातुं नदीतीरे प्रसर्पता । स पिता यूथपो दृष्टः कृत्वा युद्धममार्यत ॥ ३४१ ॥

१ अपरादे° *C, D, L.* ॥ २ युंक्तः *M.* ॥

स्वयं यूथपतिर्जज्ञे चिन्तयामास चेतसि । अमुष्मिन्नाश्रमे मात्रा छद्मना ह्यस्मि रक्षितः ॥ ३४२ ॥
रक्षितेन मयाऽकारि यत्पितुस्तन्ममापि हि । मा कार्षीदाश्रमेऽमुष्मिञ्जातत्रातोऽपरो गजः ॥ ३४३ ॥
इति संचिन्त्य निःशेषं भंक्त्वा तं तापसाश्रमम् । अकृताऽलक्ष्यसंस्थानं स नद्योघ इव स्थलम् ॥ ३४४ ॥
दास्यते नाश्रमे सौख्यं दुरात्मेति तपस्विनः । तं गजं श्रेणिकायाऽऽख्यन् राजार्हं सर्वलक्षणैः ॥ ३४५ ॥
श्रेणिकोऽपि द्रुतं गत्वा तं बद्ध्वा करिकुञ्जरम् । समानयत् कौतुकिनः सेनांगेषु हि भूभुजः ॥ ३४६ ॥
प्रसह्यासह्यस्थामाऽपि स्तंभेऽबध्यत स द्विपः । किमसाध्यं मनुष्याणामभेद्यमिव पाथसाम् ॥ ३४७ ॥
निस्पन्दकरलांगूलकर्णतालः क्रुधा च सः । तस्थावालिखित इव त्रिपदीवर्जितोऽपि सन् ॥ ३४८ ॥
दिष्ट्याऽभूदाश्रमक्षेममिति ते प्रीतचेतसः । तापसा एत्य तं नागमालानितमतर्जयन् ॥ ३४९ ॥
लालितः पालितोऽस्माभिः पोषितो वर्धितोऽसि च । स्वस्थानघातको रे त्वमाश्रयाश इवाभवः ॥ ३५० ॥
अस्मत्कवलदुर्मत्तेनाऽऽश्रमोऽभञ्जि यत्त्वया । तत्कर्मणः फलमिदं प्राप्तोऽस्यालानसौहृदम् ॥ ३५१ ॥
गजोऽपि चिन्तयामास नूनमेभिस्तपस्विभिः । उपायरचनां कृत्वा प्रापितोऽहमिमां दशाम् ॥ ३५२ ॥
अभांक्षीन्मंक्षु स क्रुद्धः स्तंभं कदलीकाण्डवत् । अत्रोटयच्च त्रटिति बन्धनं बिसतन्तुवत् ॥ ३५३ ॥

१ 'दलि' *C. D. L* ॥

सोऽप्यरण्यं दधावेऽथाऽऽध्मातताम्रारुणाननः । विक्षिपन्नतिदूरेण तापसान्वमथूनिव* ॥ ३५४ ॥
श्रेणिकोऽपि तमानेतुं हयारूढैः सुतैरगात् । मृगयाग्राममृगवत् परिवेष्टयति स्म च ॥ ३५५ ॥
प्रलोभनां तर्जनं वा सान्त्विनां स मतंगजः । बलवद्व्यन्तरग्रस्त इव मेने न किंचन ॥ ३५६ ॥
नन्दिषेणस्य तु वचो निशम्य तमुदीक्ष्य च । स शान्तोऽभूदवधिना जानन् प्राग्जन्म तत्तथा ॥ ३५७ ॥
नन्दिषेणोऽपि सपदि कक्षामालम्ब्य तं गजम् । अपरायां दत्तपादोऽध्यारोहन्मुष्टिभिस्त्रिभिः ॥ ३५८ ॥
नन्दिषेणस्य वचसा दन्तघातादिकाः क्रियाः । स कुर्वन् शिक्षित इवाऽऽलानगोचरतां ययौ ॥ ३५९ ॥
पट्टं विश्राणयामास श्रेणिकस्तस्य हस्तिनः । प्रसादपात्रीचक्रे च युवराजमिवाथ तम् ॥ ३६० ॥
अपरेऽपि हि कालाद्याः पुत्राः प्रथितविक्रमाः । अभूवन् कुलपत्नीषु श्रेणिकस्य महीपतेः ॥ ३६१ ॥
इतश्च विहरन् भव्यावबोधाय जगद्गुरुः । सुरासुरपरीवारो ययौ राजगृहं पुरम् ॥ ३६२ ॥
तस्मिन् गुणशिले चैत्ये चैत्यवृक्षोपशोभितम् । सुरप्रक्लृप्तं समवसरणं शिश्रिये प्रभुः ॥ ३६३ ॥
श्रुत्वा च समवसृतं श्रीवीरं श्रेणिको नृपः । ऋद्ध्या महत्या ससुतो वन्दितुं समुपाययौ ॥ ३६४ ॥
प्रभुं प्रदक्षिणीकृत्य नत्वा च श्रेणिको नृपः । निषद्य च यथास्थानमिति तुष्टाव भक्तिमान् ॥ ३६५ ॥

१ सान्मधुपानि" M. ॥

टि.- *वमथुः करसीकरः (शुण्डानिर्गतबिन्दुः)

जगज्जैत्रा गुणास्त्रातरन्ये तावत्तवासताम् । उदात्तशान्तया जिग्ये मुद्रयैव जगत्त्रयी ॥ ३६६ ॥
एवं च मेरुस्तृणतां नीतोऽब्धिर्गोष्पदीकृतः । गरिष्ठेभ्यो गरिष्ठो यैः पाप्मभिस्त्वमपोहितः ॥ ३६७ ॥
च्युतश्चिन्तामणिः पाणेस्तेषां लब्धा सुधा मुधा । यैस्ते शासनसर्वस्वमज्ञानैर्नात्मसात्कृतम् ॥ ३६८ ॥
यस्त्वय्यपि दधौ दृष्टिमुल्मुकाकारधारिणीम् । तमाशुशुक्षणिः साक्षादालप्याऽलमिदं हि वा ॥ ३६९ ॥
त्वच्छासनस्य साम्यं ये मन्यन्ते शासनान्तरैः । विषेण तुल्यं पीयूषं तेषां हन्त हतात्मनाम् ॥ ३७० ॥
अनेडमूका भूयासुस्ते येषां त्वयि मत्सरः । शुभोदर्काय वैकल्यमपि पापेषु कर्मसु ॥ ३७१ ॥
तेभ्यो नमोऽञ्जलिरयं तेषां तान्समुपास्महे । त्वच्छासनामृतरसैर्यैरात्माऽसिच्यतान्वहम् ॥ ३७२ ॥
भुवे तस्यै नमो यस्यां तव पादनखांशवः । चिरं चूडामणीयन्ते ब्रूमहे किमतः परम् ॥ ३७३ ॥
जन्मवानस्मि धन्योऽस्मि कृतकृत्योऽस्मि यन्मुहुः । जातोऽस्मि त्वद्गुणग्रामरामणीयकलम्पटः ॥ ३७४ ॥
इत्यभिष्टुत्य विरते श्रेणिके परमेश्वरः । पीयूषवृष्टिदेशीयां विदधे धर्मदेशनाम् ॥ ३७५ ॥
श्रुत्वा तां देशनां भर्तुः सम्यक्त्वं श्रेणिकोऽश्रयत् । श्रावकधर्मं त्वभयकुमाराद्याः प्रपेदिरे ॥ ३७६ ॥
देशनान्ते जगन्नाथं प्रणम्य श्रेणिको नृपः । प्रीतः स्वामिगिरा प्रीतैः सुतैः सह ययौ गृहे ॥ ३७७ ॥
श्रेणिकं धारिणीं चाथ भक्त्या विरचिताञ्जलिः । कुमारो मेघकुमार उदारोक्तिर्व्यजिज्ञपत् ॥ ३७८ ॥
पालितो लालितश्चास्मि युवाभ्यां सुचिरं ह्यहम् । अमार्गेष्वभूवं वां प्रार्थये तु तथाऽप्यदः ॥ ३७९ ॥ ॥ १८५ ॥

अनन्तदुःखसंभारात्संसाराच्चकितोऽस्म्यहम् । संसारोत्तारकश्चार्हन् स्वयमेवात्र तिष्ठति ॥ ३८० ॥
तन्मामथाऽनुमन्येथां प्रव्रजामि यथाऽधुना । संसारभीरुशरणश्रीवीरचरणान्तिके ॥ ३८१ ॥
तावप्येवं बभाषाते व्रतं नेषत्करं खलु । कुमार ! सुकुमारस्त्वं कथमेतच्चरिष्यसि ॥ ३८२ ॥
मेघोऽप्यूचे भवाद्भीतः सुकुमारोऽप्यहं व्रतम् । करिष्ये दुष्करमपि तदिदानीं प्रसीदतम् ॥ ३८३ ॥
पित्रोरप्यंकतो मृत्युराच्छिनत्ति सुतादिकम् । स्वामिपादानुसरणात्तन्मृत्युं छलयाम्यहम् ॥ ३८४ ॥
अथ तं श्रेणिकोऽवोचद्वत्सोद्विग्नोऽसि यद्यपि । तथाप्यावत्स्व मे राज्ये निविश्य दृशौ मम ॥ ३८५ ॥
एवमस्त्वित्युक्तवन्तं मेघं राज्ये न्यधान्नृपः । भूयस्ते किं करोमीति हर्षावेशादुवाच च ॥ ३८६ ॥
मेघोऽभ्यधात्तर्हि तातानीयतां कुत्रिकापणात् । रजोहरणपात्रादि मह्यं दीक्षां जिघृक्षवे ॥ ३८७ ॥
राजापि स्ववचोबद्धस्तच्चक्रे विमना अपि । मेघोऽपि स्वामिपादान्ते गत्वा दीक्षामुपाददे ॥ ३८८ ॥
नक्तं मेघकुमारोऽथानुज्येष्ठं न्यस्तसंस्तरे । प्रसुप्तो गच्छदागच्छन्मुनिपादैर्व्यघट्यत ॥ ३८९ ॥
सोऽथ दध्यौ निर्विभवं पादैर्मां घट्टयन्त्यमी । सर्वत्र विभवाः पूज्याः प्रातस्त्यक्ष्यामि तद् व्रतम् ॥ ३९० ॥
एवं [1]विचिन्तयन् रात्रिं कथंचन निनाय सः । त्यक्तुकामो व्रतं प्रातर्जगाम स्वामिसन्निधौ ॥ ३९१ ॥
तद्भावं केवलाज्ज्ञात्वा सर्वज्ञोऽभिदधेऽथ तम् । भग्नः संयमभारात् किं स्मरसि प्राग्भवान्न किम् ? ॥३९२॥

१ च चि° *D. L.* ॥

इतो भवे तृतीये त्वं हस्ती वैताढ्यभुव्यभूः । मेरुप्रभाख्यो दावार्तः पयः पातुं सरस्यगाः ॥ ३९३ ॥
तत्पंकमग्नो निःस्थामा प्रतीभेन हतस्ततः । सप्ताहान्ते मृतो विन्ध्ये गजोऽभूराख्यया तया ॥ ३९४ ॥
दृष्ट्वा दवानलं जातिं स्मृत्वोन्मूल्य द्रुमादिकम् । नद्यां स्वयूथरक्षार्थमकार्षीः स्थण्डिलत्रयम् ॥ ३९५ ॥
अन्येद्युर्ज्वलिते दावे धावंस्त्वं स्थण्डिलान्यभि । तत्र द्वे स्थण्डिले पूर्णे पूर्वायातैर्मृगादिभिः ॥ ३९६ ॥
ते व्यतीत्य तृतीयेऽयाः स्थण्डिले तत्र च स्थितः । गात्रकण्डूयनकृते चरणं समुदक्षिपः ॥ ३९७ ॥
अन्योऽन्यसत्त्वसंमर्दपर्यस्तस्तावकस्य तु । समुत्क्षिप्तस्य तस्यांघ्रेरधस्ताच्छशकोऽपतत् ॥ ३९८ ॥
तथास्थं शशकं दृष्ट्वा करुणापूर्णमानसः । उत्क्षिप्तपाद एवास्थास्त्रिपदीभून्मदादिव ॥ ३९९ ॥
सार्धाद् द्व्यहाद्दवे शान्ते जीवा जग्मुः शशादयः । त्वमपि क्षुत्तृषाऽऽक्रान्तः पानीयाय प्रधावितः ॥ ४०० ॥
चिरोद्धरणखिन्नैकांघ्रित्वाच्च न्यपतः क्षितौ । क्षुत्तृष्णाक्लेशविवशस्त्र्यहान्मृत्युं त्वमासदः ॥ ४०१ ॥
शशानुकंपापुण्येनाधुना राजसुतोऽभवः । लब्धं कथंचिन्मानुष्यमिदं नयसि किं मुधा ? ॥ ४०२ ॥
अप्येकं शशकं त्रातुं कष्टमस्थास्तथा तदा । साध्वंघ्रिघट्टनात्कष्टात् प्रणष्टोऽस्यधुना कथम् ? ॥ ४०३ ॥
एकजीवाभयदानफलमीदृक्षमासदः । सर्वजीवाभयदानं प्रतिपन्नोऽसि साधु तत् ॥ ४०४ ॥
पालय प्रतिपन्नं स्वं भवाम्भोधिं समुत्तर । मानुष्यं दुर्लभं हीदं तत्समुत्तारणक्षमम् ॥ ४०५ ॥

इति स्वामिगिरा मेघकुमारोऽभूद् व्रते स्थिरः । चक्रे मिथ्यादुष्कृतं च तेपे च विविधं तपः ॥ ४०६ ॥
पालयित्वा व्रतं सम्यग्मृत्वाऽभूद्विजये सुरः । ततश्च्युत्वा विदेहेषूत्पद्य मोक्षं स यास्यति ॥ ४०७ ॥
स्वामिदेशनयाऽन्येद्युर्बुद्धो व्रतजिघृक्षया । आपप्रच्छे नन्दिषेणः कथंचिच्छ्रेणिकं नृपम् ॥ ४०८ ॥
स पित्राऽनुमतोऽचालीद् व्रतादानाय वेश्मतः । ऊचे देवतया चैवमन्तरीक्षतलस्थया ॥ ४०९ ॥
किमुत्सुकायसे वत्स ! प्रव्रज्याग्रहणं प्रति ? । चारित्रावारकं भोगफलं कर्मास्ति यत्तव ॥ ४१० ॥
किंचित्कालं प्रतीक्षस्व गृहे तत्कर्मणः क्षये । प्रव्रज्यां प्रतिपद्येथा नाकाले फलति क्रिया ॥ ४११ ॥
चारित्रावारकं कर्म साधुसंगजुषो मम । करिष्यति किमित्युक्त्वा स ययौ स्वामिनोऽन्तिके ॥ ४१२ ॥
तथा निषिद्धो भर्त्राऽपि रभसेन भृशायितः । प्रत्यपादि परिव्रज्यां तत्पादकमलान्तिके ॥ ४१३ ॥
षष्ठाष्टमप्रभृतीनि तप्यमानस्तपांसि सः । व्यहार्षीत्प्रभुणा सार्धं ग्रामाकरपुरादिषु ॥ ४१४ ॥
स सूत्रमथ सूत्रार्थं नित्यमेव व्यभावयत् । निषण्णो गुरुपादान्ते सहमानः परीषहान् ॥ ४१५ ॥
भोग्यकर्मोदयाद्भोगेच्छां भवन्तीं बलादपि । रोद्धुं तपोभिः स्ववपुः कशयामास सोऽधिकम् ॥ ४१६ ॥
स इन्द्रियविकाराणां निकारायानुवासरम् । चकाराऽऽतापनां घोरां श्मशानादिषु भूमिषु ॥ ४१७ ॥
बलादपि विकारेषु भवत्स्विन्द्रियरोषणः । स्वमुद्बद्धुं समारेभे प्रव्रज्याभंगकातरः ॥ ४१८ ॥

१ °येश्वरः L ॥ २ °नः L ॥

बन्धच्छेद चकारास्य देवता व्रतधारणी । स्वमाघ्नानस्य शस्त्रेण शस्त्रं कुण्ठीचकार च ॥ ४१९ ॥
विषं मुमूर्षोरदतस्तस्यावीर्यं चकार सा । वह्नौ च विशतो वह्निमह्लायाऽकृत शीतलम् ॥ ४२० ॥
आत्मानं सोऽथ शैलाग्रादपातयदथान्तरे । तं धृत्वा देवतोवाच न किं स्मरसि मद्वचः ? ॥ ४२१ ॥
नालं भोग्यफलं कर्माऽभुक्त्वा क्षेप्तुं जिना अपि । तत्प्रतीपं मुधैव त्वमेवमुत्तिष्ठसेऽन्वहम् ॥ ४२२ ॥
इत्युक्तः स तथैकाकिविहारपरिकर्मभृत् । भिक्षार्थं निर्जगामैकश्चिकीर्षुः षष्ठपारणम् ॥ ४२३ ॥
अथाऽनाभोगदोषेण वेश्यावेश्म विवेश सः । धर्मलाभ इति वाचमुवाच च महामुनिः ॥ ४२४ ॥
न नोऽर्थो[1] धर्मलाभेन द्रम्मलाभोऽस्तु केवलम् । इति वेश्या सोपहासविकारा[2] प्रत्युवाच तम् ॥ ४२५ ॥
असौ वराकी हसति किं मामिति विचिन्त्य सः । कृष्ट्वा नीव्रतृणं लब्ध्या रत्नराशिमपातयत् ॥ ४२६ ॥
द्रम्मलाभोऽयमित्युक्त्वा स तस्मान्निर्ययौ गृहात् । ससंभ्रमा साऽपि वेश्याऽनुधाव्येति तमभ्यधात् ॥४२७॥
तपो दुष्करमुज्झ त्वं भोगान् भुंक्ष्व मया सह । त्यक्ष्यामि सर्वथा प्राणान् प्राणनाथाऽहमन्यथा ॥ ४२८ ॥
भूयो भूयस्तयेत्युक्तो भोगान् दुःखान् विदन्नपि । भोग्यकर्मवशात्तस्याः प्रत्यपादि वचोऽथ सः ॥ ४२९ ॥
दशाधिकान् वाऽनुदिनं बोधयिष्यामि नो यदि । तदाऽऽदास्ये पुनर्दीक्षां प्रतिज्ञामिति चाकृत ॥ ४३० ॥
त्यक्तर्षिलिंगः सोऽवात्सीत्तद्गृहे चिन्तयन् सदा । दीक्षानिषेधिकां वाचं देवताया जिनस्य च ॥ ४३१ ॥

१ मेऽर्थो *L* ॥ २ कारं *L* ॥ ३ ती° *M.* ॥

भोगान् सह तयाऽभुंक्त सोऽन्वहं च जनान्दश । प्रबोध्य भव्यान् दीक्षार्थं प्रैषीदुपजिनेश्वरम् ॥ ४३२ ॥
क्षीणेऽन्यदा भोगफले तस्य बोधयतः सतः । नवाबुधञ्जनाष्टकजातीयो दशमो न तु ॥ ४३३ ॥
तस्मिन्नबुध्यमाने सा वेश्या रसवतीं कृताम् । आचख्यौ नन्दिषेणाय समयज्ञा मुहुर्मुहुः ॥ ४३४ ॥
सोऽपूर्णाभिग्रहो भोक्तुं नोत्तस्थौ किं तु सादरम् । तं दक्षं बोधयन्नस्थाद् गीर्भिर्विविधभंगिभिः ॥ ४३५ ॥
तदा चोवाच तं वेश्या प्राक्सिद्धान्नं विरस्यभूत् । भूयो निष्पन्नमस्त्यन्नं किं विलम्बयसि प्रभो ! ॥ ४३६ ॥
नन्दिषेणोऽप्यवोचत्तां बोधितो दशमो न हि । अहमेवाद्य दशमः प्रव्राजिष्यामि तत्पुनः ॥ ४३७ ॥
इत्युक्त्वा तां नन्दिषेणो भुक्तं भोग्यफलं विदन् । निर्गत्य स्वामिनः पार्श्वे प्रव्रज्यां पुनरादद ॥ ४३८ ॥

आलोच्य तद् दुश्चरितं महात्मा ।
समं जिनेन्द्रेण स नन्दिषेणः ॥
कुर्वन्विहारं निशितं व्रतं च ।
प्रपालयन्देवभुवं जगाम ॥ ४३९ ॥

॥ इत्याचार्यश्रीहेमचन्द्रसूरिविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये दशमपर्वणि श्रेणिक-
सम्यक्त्वलाभ-मेघकुमारनन्दिषेणप्रव्रज्यावर्णनो नाम षष्ठः सर्गः ॥

## ॥ अथ सप्तमः सर्गः ॥

अथाक्रीडज्जलक्रीडादिभिश्चेलणया सह । श्रेणिकः प्रेमसूत्रेण मिथः स्यूतमना इव ॥ १ ॥
श्रेणिकश्चेलणादेव्या रहसि प्रतिवासरम् । स्वौ करौ कंकतीकृत्य केशपाशममार्जयत् ॥ २ ॥
स्वहस्तग्रथितैः सद्योऽनवद्यैः पुष्पदामभिः । तस्या बबन्ध धम्मिल्लं बालबन्ध इव स्वयम् ॥ ३ ॥
स्वयं घृष्टमृगमदद्रव्यैस्तस्याः कपोलयोः । लिलेख चित्रकृदिव विचित्राः पत्रवल्लरीः ॥ ४ ॥
आसने शयने याने भोजनेऽन्यत्र वा नृपः । तत्पार्श्वं नात्यजज्जातु सौविदल्ल इव स्वयम् ॥ ५ ॥
एकदा च प्रवृत्ते शिशिरर्तुर्भयंकरः । हिमवैषम्यिकोदीच्यपवनो वनदाहकः ॥ ६ ॥
सन्निधिस्थहसन्तीकाः* कश्मीरजविलेपनाः । श्रीमन्तो गर्भगेहस्थाः कालातिक्रमणं व्यधुः ॥ ७ ॥
गजदन्तीकृतकरा वेपमाना भयादिव । रोरार्भका गृहद्वारे दन्तवीणामवादयन् ॥ ८ ॥
पाणिपद्मं स्वभावोष्णप्रियावक्षसिजान्निशि । सालाबुवीणादण्डाभं युवानो नापसारयन् ॥ ९ ॥

टि.-* हसन्ती -सगडी इति गुर्जर भाषायाम् ।

तदा च समवासार्षीत्तत्र श्रीज्ञातनन्दनः । सर्वातिशयसंपन्नः सेव्यमानः सुरासुरैः ॥ १० ॥
देव्या चेल्लणया सार्धमपराह्णेऽन्यदा नृपः । वीरं समवसरणस्थितं वन्दितुमभ्यगात् ॥ ११ ॥
वन्दित्वा श्रीमदर्हन्तं वलितौ तौ तु दम्पती । जलोपान्ते ददृशतुः श्रमणं प्रतिमास्थितम् ॥ १२ ॥
निरुत्तरीयं तं शीतपरीषहसहं मुनिम् । तौ दम्पती च दाते सपद्युत्तीर्य वाहनात् ॥ १३ ॥
तं क्षमाश्रमणं भक्त्या सह पत्न्या महीपतिः । वन्दित्वा स्वं ययौ हर्म्यं पुण्यवार्ताः प्रपंचयन् ॥ १४ ॥
निर्दग्धागरुकर्पूरधूपधूमान्धकारिते । वासागारे ययौ राजा कृत्वा सायोचितां क्रियाम् ॥ १५ ॥
देव्या चेलणया गंडोपधानीकृतदोर्लतः । तद्वक्षसि न्यस्तकरः सुष्वाप श्रेणिको निशि ॥ १६ ॥
चामनीकृतवक्षोजं गाढमालिंगितस्तया । राजा निद्रामुपेयाय राज्ञी निद्रायते च सा ॥ १७ ॥
निद्राभरे चेल्लणायाः प्रच्छदात् पाणिपल्लवः । बहिर्बभूव निद्रा हि परिरंभविघट्टनी ॥ १८ ॥
शीतेन दुःसहेनालिंकटकेनेव तत्करः । स्पृष्टश्च तद्वेदनया प्राबुध्यत च चेलणा ॥ १९ ॥
शीतार्त्ताकृतसीत्कारा सा पाणिकमलं निजम् । प्रच्छदान्तर्नृपहृदि निजं मन इव न्यधात् ॥ २० ॥
तदा निरुत्तरीयं तं महर्षिं प्रतिमास्थितम् । स्मृत्वोवाचेदृशे शीते स कथं हा भविष्यति ॥ २१ ॥
साऽऽससाद पुनर्निद्रां तथैव सरलाशया । दासीव वश्या प्रायेण निद्रा ह्यक्षुद्रचेतसाम् ॥ २२ ॥

सप्तमः
सर्गः

तस्याः सीत्कारमात्रेणाल्पनिद्रः पार्थिवोऽपि हि । प्रबुद्धस्तद्वचः श्रुत्वा चिन्तयामास चेतसि ॥ २३ ॥
नूनमस्या मनस्यन्यः प्रेयानस्ति रिरंसितः । शीताऽऽर्तिसंभावनया यमेवमनुशोचति ॥ २४ ॥
स ताम्यन्नीर्ष्यया चैवं तां निशां जाग्रदत्यगात् । प्रियजानिरकुहनो* न कदाऽपि सचेतनः ॥ २५ ॥
अन्तरन्तःपुरं गन्तुं प्रातरादिश्य चेल्लणाम् । आहूयाभयमित्यूचे श्रेणिकश्चण्डशासनः ॥ २६ ॥
ज्ञातमन्तःपुरमभूद्रे दुराचारदूषितम् । तत्सर्वं ज्वाल्यतां मा भूर्मातृमोहादनीदृशः ॥ २७ ॥
इत्यादिश्याऽथ राजा राजमानोऽद्भुतश्रिया । अर्हद्भट्टारकं वीरस्वामिनं वन्दितुं ययौ ॥ २८ ॥
अभयः सभयस्ताते स्वभावाच्च विमृश्यकृत् । मन्त्रविन्मन्त्रयांचक्रे मनीषी मनसा सह ॥ २९ ॥
सतीमतल्लिकाः सर्वा मातरो मे स्वभावतः । तास्वहं कुलरक्षोऽस्मि तातस्याऽऽज्ञा च तादृशी ॥ ३० ॥
संभावितं त्वसंभाव्यं तातपादैः करोमि किम् । नदीपूर इवासह्यः कोपो हि प्रथमं प्रभोः ॥ ३१ ॥
तथाऽपि चित्रमुत्पाद्य कालक्षेपः करिष्यते । कालक्षेपाद्यदि पुनः प्रभोः कोपो निवर्तते ॥ ३२ ॥
शुद्धान्तसन्निधौ जीर्णभकुटीरभयस्ततः । ज्वालयामास निर्दग्धः शुद्धान्त इति घोषयन् ॥ ३३ ॥
इतश्च श्रेणिकोऽपृच्छत् समये परमेश्वरम् । एकपत्नी किमनेकपत्नी वा चेल्लणा प्रभो! ॥ ३४ ॥

---

टि.- * अकुहनः अनीर्ष्यालुः ।

स्वाम्याख्यद्धर्मपत्नी ते चेल्लणा हि महासती । तामन्यथा मा शंकिष्ठाः शीलालंकारशालिनीम् ॥ ३५ ॥
इदं च श्रेणिकः श्रुत्वा पश्चात्तापमुपागतः । सपदि स्वामिनं नत्वा दधावे नगरं प्रति ॥ ३६ ॥
तथा प्रदीपनं कृत्वाऽभ्यायान्तं चाभयं नृपः । अपृच्छदस्मदादेशो भवता किमनुष्ठितः ? ॥ ३७ ॥
अभयोऽपि भयादूचे प्रणम्य रचिताञ्जलिः । स्वाम्यादेशोऽपरस्यापि प्रमाणं किं पुनर्मम ॥ ३८ ॥
राजा प्रोवाच रे पाप ! दग्ध्वा मातृजनं निजम् । जीवसि त्वं किमद्यापि किं नापप्तः प्रदीपने ? ॥ ३९ ॥
अभयोऽप्यभ्यधाद्देव ! श्रुतार्हद्वचनस्य मे । पतंगमरणं मार्गयिष्ये ज्वलदग्ने मनाक् ॥ ४० ॥
अभविष्यत्तदाऽऽदेशो यद्येवमपि मे प्रभोः । तदा पतंगमृतिमप्यन्वभ्याऽस्यं न संशयः ॥ ४१ ॥
अकृत्यं मद्गिराऽप्येवं किमकार्षीरिति ब्रुवन् । ततः पीतविष इव मूर्च्छयाऽऽलिंगि पार्थिवः ॥ ४२ ॥
राजानमभयोऽसिञ्चत् स्वयं शिशिरवारिणा । स्वस्थीभूते च तत्रोचे क्षेममन्तःपुरे प्रभो ! ॥ ४३ ॥
मन्मातृणामप्रसादं प्रभो ! भाग्यविपर्ययात् । अकार्षीर्निग्रहादेशादपराद्धं मया त्वदः ॥ ४४ ॥
जीर्णाः करिकुटीस्तात ! शुद्धान्तस्यादधीयसीः । अधाक्षं युष्मदाज्ञामप्यविमृश्य करोमि न ॥ ४५ ॥
राजोचे मम पुत्रोऽसि बुद्धिमानसि चाभय ! समागच्छत्कलंको मे दूरं येनापसारितः ॥ ४६ ॥
पारितोषिकदानेनाऽनुग्राह्याऽथाऽभयं नृपः । अत्युत्कश्चेल्लणादेवीदर्शने सदनं ययौ ॥ ४७ ॥

१ °गच्छन् क° *D. M.* ॥

ततो नवनवेनैव प्रेम्णा प्रतिदिनं नृपः । अरंस्त चेल्लणादेव्या श्रीदेव्येव वृषाकपिः ॥ ४८ ॥
अन्येद्युः पार्थिवो दध्यौ चेल्लणा प्रेयसी मम । कः कर्तव्योऽन्यराज्ञीभ्यः प्रसादोऽस्यां विशेषवान् ॥ ४९ ॥
एकस्तंभं तदेतस्याः प्रासादं कारयाम्यहम् । तत्र स्थिता क्रीडतु सा विमानस्थेव खेचरी ॥ ५० ॥
उपायमिति निश्चित्य श्रेणिकोऽभयमादिशत् । एकस्तंभं कारयेथाः प्रासादं चेल्लणाकृते ॥ ५१ ॥
अभयोऽपि स्तंभयोग्यदार्वानयनहेतवे । आदिशद्वर्धकिं सोऽपि दार्वर्थमटवीं ययौ ॥ ५२ ॥
पश्यन्नेकैकशो वृक्षानटव्यामथ वर्धकिः । वृक्षमेकमुदैक्षिष्ट सर्वलक्षणलक्षितम् ॥ ५३ ॥
दध्यौ च बहलच्छायोऽभ्रंलिहः पुष्पितः फली । महाशाखो महास्कन्धः सामान्योऽयं तरुर्न हि ॥ ५४ ॥
यादृशं तादृशमपि स्थानं निर्दैवतं न हि । वृक्षराजः पुनरयं श्रियाऽपि व्यक्तदैवतः ॥ ५५ ॥
आराधयामि तपसा तदेतस्याधिदेवताम् । यथाऽमुं छिन्दतो न स्याद्विघ्नः सस्वामिनो मम ॥ ५६ ॥
ततश्चोपोषितो भूत्वा वर्धकिस्तं महातरुम् । भक्त्याऽध्यवासयद्गन्धधूपमाल्यादिवस्तुभिः ॥ ५७ ॥
तदाऽभयकुमाराय व्यन्तरस्तद्द्रुमाश्रयः । आख्यत्तदर्थसिद्ध्यर्थं रक्षार्थं स्वाश्रयस्य च ॥ ५८ ॥
मदाश्रयद्रुर्नच्छेद्यस्तं निवारय वर्धकिम् । प्रासादमेकस्तंभं हि करिष्याम्यहमेव भोः ॥ ५९ ॥
सर्वर्तुमंडितं सर्ववनस्पतिसमाकुलम् । उद्यानं नन्दनमिव करिष्ये च तदाश्रितम् ॥ ६० ॥

१ °ध्यपूजय° L ॥

भणितो व्यन्तरेणैवमभयो वर्धकिं यनात्। आहास्त सद्यः सिद्धं नः समीहितमिति ब्रुवन् ॥ ६१ ॥
प्रतिपन्नं व्यधात् सौधं व्यन्तरोऽपि तथैव तम्। अधिकाः किंकरेभ्योऽपि वाग्बद्धा देवयोनयः ॥ ६२ ॥
प्रासादमेकस्तंभं तं सर्वर्तुवनमंडितम्। अभयोऽदर्शयद्राज्ञे राजा प्रीतोऽब्रवीददः ॥ ६३ ॥
इच्छतां केवलं सौधं सर्वर्तुवनमप्यभूत्। उपक्रान्ते क्षीरपाणे शर्करापतनं ह्यदः ॥ ६४ ॥
मुमोच चेलणां तत्र प्रासादे मगधाधिपः। सोऽलंचक्रे तयाऽत्यन्तं पद्मह्रद इव श्रिया ॥ ६५ ॥
राज्ञी तु चेलणा तत्र सर्वर्तूद्यानसंभवैः। पुष्पैरानर्च सर्वज्ञमुचितग्रथितैः स्वयम् ॥ ६६ ॥
सद्योऽवचित्य ग्रथितैः पुष्पैस्तैरेव चेलणा [1]सैरंध्रीव स्वयं पत्युः केशपाशमपूरयत् ॥ ६७ ॥
एवं श्रीवीतरागार्थं पत्यर्थं चावचिन्वती। धर्मकामफलीचक्रे तद्वनप्रसवानि सा ॥ ६८ ॥
चेलणोपवने तत्र सदापुष्पे सदाफले। श्रेणिकं रमयामास मूर्तेव वनदेवता ॥ ६९ ॥
विद्यासिद्धस्य मातंगपतेस्तत्पुरवासिनः। पत्न्या अन्येद्युरुत्पेदे माकन्दफलदोहदः ॥ ७० ॥
साऽवोचत्पतिमाम्राणि देहि पूरय दोहदम्। सोऽब्रवीदयि! मूढा त्वमाम्राण्यसमये कुतः ॥ ७१ ॥
मातंगपतिमित्यूचे भार्याऽर्यसुत! विद्यते। फलितं चेल्लणोद्याने सहकारवनं सदा ॥ ७२ ॥
तदैव चेल्लणोद्यानसमीपं समुपेयिवान्। अतितुंगान् स मातंगोऽद्राक्षीच्च तान् सदाफलान् ॥ ७३ ॥

१ सौरध्री *C*। सैरिंध्री *D. L.*॥

उत्पश्योऽपश्यदागत्य निश्याम्राणि पुनश्च सः। पचेलिमानि गणको नक्षत्राणीव भूस्थितः ॥ ७४ ॥
क्षणादेवाऽवनामन्या विद्यासिद्धः स विद्यया। आम्रशाखां नमयित्वा स्वैरमाम्राण्युपाददे ॥ ७५ ॥
प्रातर्लूनफलामाम्रवाटिकां राझ्युदैक्षत। चित्रशालामिव भ्रष्टचित्रामरतिदायिनीम् ॥ ७६ ॥
राज्ञी राज्ञे तदाचख्यौ राजाऽप्यभयमादिशत्। अदृष्टपदसंचारमाम्रचौरं गवेषय ॥ ७७ ॥
दस्योर्यस्येदृशी शक्तिरतिशायिन्यमानुषी। वत्स! संभाव्यते तस्मादप्यन्तःपुरविप्लवः ॥ ७८ ॥
अवादीदभयोऽप्येवमर्पयिष्यामि तस्करम्। अचिरादेव तं देव! दर्शनप्रतिभूरिव ॥ ७९ ॥
इति प्रतिज्ञां निर्माया‌भयस्तद्दिवसादपि। पुरेऽहर्निशमभ्राम्यत्तस्य दस्योर्दिदृक्षया ॥ ८० ॥
एकदा च पुरे भ्राम्यन्नभयो धीमतां वरः। कार्यमाणे पुरजनैः क्वापि संगीतके ययौ ॥ ८१ ॥
पौरदत्ताऽऽसनाऽऽसीनोऽभयः पौरानभाषत। न यावदायान्ति नटास्तावदाकर्ण्यतां कथा ॥ ८२ ॥
वसन्तपुरवास्तव्यो जीर्णश्रेष्ठ्यतिनिर्धनः। एकोऽभूत्तस्य च बृहत्कुमार्येका वरोचिता ॥ ८३ ॥
वरवृन्दारकप्राप्त्यै देवं पूजयितुं स्मरम्। क्वाप्युद्याने चौरिकयोच्चिकये पुष्पाणि सान्वहम् ॥ ८४ ॥
पुष्पचौरं धरिष्येऽहमद्येत्युद्यानपालकः। एकदाऽन्तर्हितो भूत्वा तस्थौ व्याध इव स्थिरः ॥ ८५ ॥
प्रागवदागत्य विश्रंभात्तां पुष्पाण्यवचिन्वतीम्। दृष्ट्वा रूपवतीं क्षोभमियायारामिकः स तु ॥ ८६ ॥ ॥१०,७।

---

१ °णि विचिन्व° *M.* ॥

तां धृत्वा बाहुनोद्यानपालको जातवेपथुः । सद्यो विस्मृतपुष्पापहारकोपो जजल्प च ॥ ८७ ॥
रमयस्व रिरंसुं मामासन्नं वरवर्णिनि ! । अन्यथा त्वां न मोक्ष्यामि पुष्पक्रीता मया ह्यसि ॥ ८८ ॥
तमूचे पुष्पलावी सा मा मा मां स्पृश पाणिना । कुमार्यस्मि न पुंस्पर्शमद्याप्यर्हामि मालिक ! ॥ ८९ ॥
आरामिकोऽपि तामूचे त्वया तद्व्यूढमात्रया । प्रथमं मम संभोगपात्रीकार्यमिदं वपुः ॥९०॥
तथेति तां प्रपेदानां बालामुद्यानपालकः । मुमोचाक्षतकौमारा साऽपि स्वसदनं ययौ ॥ ९१ ॥
अन्येद्युः परिणीता च सा वरेण वरीयसा । उवाच च पतिं रात्रौ वासागारमुपेयुषी ॥ ९२ ॥
आर्यपुत्र ! मया मालाकारस्यास्ति प्रतिश्रुतः । उदूढमात्रया तस्याभिगमः प्रथमं खलु ॥ ९३ ॥
तस्मान्मामनुमन्यस्व वाग्बद्धा तं व्रजाम्यहम् । त्वत्सादपि भविष्यामि सकृत्तमभिजग्मुषी ॥ ९४ ॥
अहो शुभाशया सत्यसंधेयमिति विस्मयात् । सा पत्याऽनुमता सद्यो निर्ययौ वासवेश्मतः ॥ ९५ ॥
विचित्ररत्नाभरणा सा यान्ती पथि तथ्यवाक् । अरुध्यत धनायद्भिः पाप्मभिः पारिपन्थिकैः ॥ ९६ ॥
सा तथा मालिककथामाख्यायोवाच तस्करान् । हे भ्रातरो ! व्याघुटन्त्या गृह्णीताऽऽभरणानि मे ॥ ९७ ॥
स्वभावकथनात्तस्या मन्वानैः सत्यसन्धताम् । आगच्छन्तीं ग्रहीष्याम इति चौरैरमोचि सा ॥ ९८ ॥
अग्रे च रक्षसैकेन बुभुक्षाक्षामकुक्षिणा । रुरुधे मृगनेत्रा सा मृगीव मृगवैरिणा ॥ ९९ ॥
तस्याः स्वभावाऽऽख्यानेन विस्मितो राक्षसोऽपि हि । वलितां भक्षयिष्यामीत्याशयेन मुमोच ताम् ॥१००॥

सा ययौ च तमाराममारामिकमुवाच च । पुष्पलाव्यस्मि सैषाहं नवोढा त्वामुपागता ॥ १०१ ॥
अहो महासत्त्वी सत्यप्रतिज्ञेयं महात्मिका । इति तां मातृवन्मत्वा मालिकोऽपि मुमोच सः ॥ १०२ ॥
सा व्याघुटन्ती तत्रैव रक्षसस्तत्र तस्थुषः । मालिकेन यथा मुक्ता तथाऽऽख्यदखिलां कथाम् ॥ १०३ ॥
मालिकादपि किं हीनसत्त्वोऽहमिति चिन्तयन् । मुमोच तां राक्षसोऽपि प्रणम्य स्वामिनीमिव ॥ १०४ ॥
पश्यन्तां वर्त्म चौराणां सन्निधानमुपेत्य सा । जगाद भ्रातरः ! सर्वैः सर्वस्वं गृह्यतां मम ॥ १०५ ॥
मालिकेन यथा मुक्ता यथा मुक्ता च रक्षसा । तत् साऽऽख्यदखिलं तेऽपि तदाकर्ण्यैवमूचिरे ॥ १०६ ॥
न वयं हीनसत्त्वाः स्मो मालिकात्कौणपादपि । तद्गच्छ भद्रे ! भद्रं ते वन्दिताऽसि भगिन्यसि ॥ १०७ ॥
गत्वाऽऽचख्यौ च सा स्वस्मै वराय वरवर्णिनी । चौरराक्षसमालाकृत्कथामवितथां तथा ॥ १०८ ॥
विभावरीं तामखिलां भुक्तभोगस्तया सह । सर्वस्वस्वामिनीं चक्रे तां पतिस्तपनोदये ॥ १०९ ॥
विचार्य तद् ब्रूत जनाः कः स्याद् दुष्करकारकः । किं पतिस्तस्कराः किं वा ? किं रक्षो ? मालिकोऽथ किम् ? ११०
तत्र चेर्ष्यालवः प्रोचुः पतिर्दुष्करकारकः । नवोढाऽनंगलग्नापि येन प्रैष्यन्यपुंस्कृते ॥ १११ ॥
ऊचे क्षुधातुरै रात्रिंचरो दुष्करकारकः । येनातिक्षुधितेनापि प्राप्ता सा न हि भक्षिता ॥ ११२ ॥
जारैरभिदधे मालाकारो दुष्करकारकः । न सा येनोपबुभुजे स्वयमेवाऽऽगता निशि ॥ ११३ ॥

१ 'द्वामंग' L. ॥

चूतचौरेण च प्रोचे चौरा दुष्करकारकाः । अलुण्ठितसुवर्णैव नवोढा यैरमोचि सा ॥ ११४ ॥
अभयोऽपि परिज्ञाय तस्करं तमधारयत् । पप्रच्छ च कथं चूतापहारो विदधे त्वया ? ॥ ११५ ॥
चौरोऽप्यकथयद्विद्याबलेनेति ततोऽभयः । राज्ञे तत्सर्वमाचख्यौ तं च चौरं समार्पयत् ॥ ११६ ॥
श्रेणिकोऽप्यवदत्प्राप्तश्चौरो नान्योऽप्युपेक्ष्यते । शक्तिमान् किं पुनरयं तन्निग्राह्यो ह्यसंशयम् ॥ ११७ ॥
अभयोऽप्यच्छलं प्रार्थ्य महीनाथं व्यजिज्ञपत् । विद्याऽस्माद् गृह्यतां देव ! पश्चाद्युक्तं करिष्यते ॥ ११८ ॥
ततश्च मातंगपतिमुपवेश्यात्मनः पुरः । विद्यां पठितुमारेभे तन्मुखान्मगधाधिपः ॥ ११९ ॥
राज्ञः सिंहासनस्थस्य सा विद्या पठतोऽपि हि । हृदि नावस्थितिं चक्रे वारि च्युतमिवोन्नते ॥ १२० ॥
ततश्च तर्जयामास चौरं राजगृहेश्वरः । कूटं किमपि ते विद्या न संक्रामति यन्मयि ॥ १२१ ॥
अभयोऽप्यभ्यधाद्देव ! विद्यागुरुरयं हि वः । गुरौ विनयभाजां हि विद्या स्फुरति नान्यथा ॥ १२२ ॥
आस्यतामेष मातंगो देव ! सिंहासने निजे । अस्याग्रे त्वञ्जलिं बद्ध्वा स्वयं भुव्युपविश्यताम् ॥ १२३ ॥
तस्याथ प्रतिपत्तिं तां विद्याऽर्थी नृपतिर्व्यधात् । नीचादप्युत्तमां विद्यां गृह्णीयात्प्रथितं ह्यदः ॥ १२४ ॥
उन्नामन्यवनामन्यौ विद्ये तद्वदनाच्छ्रुते । राज्ञो हृद्यवतस्थाते दर्पणे प्रतिबिंबवत् ॥ १२५ ॥
अभयोऽपि महीपालं प्रसाद्य रचिताञ्जलिः । विद्यागुरुत्वमापन्नं तं चौरं पर्यमोचयत् ॥ १२६ ॥
अन्यस्मिन्नह्नि समवसृतं श्रीज्ञातनन्दनम् । नन्तुं गजघटाघण्टाटंकारैः पूरयन् दिशः ॥ १२७ ॥

वार्तयद्भिरिव मिथो हेषाव्याजेन वाजिभिः। निरुन्धानोऽवनितलं वाह्यालीरंगनर्तकैः ॥ १२८ ॥
अम्बरादवतरन्मेघमंडलश्रीविडम्बकैः। शोभमानश्चमूलोको मायूरातपवारणैः ॥ १२९ ॥
वाहनस्य तुरंगस्य नृत्यतः स्पर्धया भुवम्। प्रनृत्यद्गजनाडंकः सहोद्गत इवासने ॥ १३० ॥
राकानिशाकरस्पर्द्धिधवलातपवारणः। जाह्नवीयमुनाकल्पचारस्त्रीधुतचामरः ॥ १३१ ॥
वैतालिकैः स्तूयमानः स्वर्णालंकारबन्धुरैः। भूमिष्ठ इव सुत्रामा जगाम मगधाधिपः॥ १३२॥ (षड्भिः कुलकम्)
तदा च वर्त्मन्येकाऽभूज्जातमात्रोज्झिताऽर्भिका। पूत्यादिभ्योऽपि दुर्गन्धा नरकांश इवागतः ॥ १३३ ॥
तद्गन्धं घ्रातुमसहाः सर्वे घ्राणमपूपुरन्। प्राणायामकृतः सार्धं गायत्रीजापका इव ॥ १३४ ॥
किमेतदिति पृष्टश्च श्रेणिकेन परिच्छदः। कथयामास दुर्गन्धां जातमात्रोज्झितां च ताम् ॥ १३५ ॥
राजाऽप्यर्हन्मुखान्नित्यं श्रुतद्वादशभावनः। अजुगुप्सापरो बालां तां निरीक्ष्य ययौ स्वयम् ॥ १३६ ॥
गत्वा समवसरणे वन्दित्वा परमेश्वरम्। दुर्गन्धाया कथां तस्याः पप्रच्छ समये नृपः ॥ १३७ ॥
स्वाम्याख्यत्पर्यन्तदेशे शालिग्रामेऽभवद्धनी। धनमित्र इति श्रेष्ठी धनश्रीरिति तत्सुता ॥ १३८ ॥
धनश्रियो विवाहे च प्रारब्धे श्रेष्ठिनाऽन्यदा। विहरन्तः समाजग्मुर्ग्रीष्मर्तौ केऽपि साधवः ॥ १३९ ॥
प्रतिलाभय साधूनित्यादिदेश च तां पिता। सा सद्वृत्ता प्रवृत्ता च प्रतिलाभयितुं क्षणात् ॥ १४० ॥
महामुनीनां तेषां च स्वेदक्लिन्नांगवाससाम्। मलगन्धस्तया जघ्रे प्रतिलम्भयमानया ॥ १४१ ॥ 

सुगन्धचोक्षवसना नानालंकारधारिणी । अंगरागविलिप्ता सा दध्यौ शृंगारमोहिता ॥ १४२ ॥
अर्हद्भिर्भाषितो धर्मोऽनवद्यः सकलोऽपि हि । स्नायेत प्रासुकाम्भोभिश्चेद्दोषः स्यात्तदा हि कः ॥ १४३ ॥
मुनीनां मलदुर्गन्धजुगुप्सनसमुद्भवम् । दुष्कर्म तदनालोच्याप्रतिक्रम्य च सा मृता ॥ १४४ ॥
मृत्वा राजगृहे राजन्नगाम गणिकोदरे । अभून्मातुश्च सा गर्भस्थिताऽप्यरतिदायिनी ॥ १४५ ॥
वेश्यया प्रत्यहं पीतैर्गर्भपातौषधैरपि । स गर्भो नापतत् कर्म बलीयः कीदृगौषधम् ॥ १४६ ॥
साऽसूतेमां सुतां वेश्या दुर्गन्धां तेन कर्मणा । विष्ठामिव च तत्याजोदराक्षिपतितामपि ॥ १४७ ॥
पप्रच्छ पुनरप्येवं श्रेणिकः परमेश्वरम् । सुखदुःखानुभवभाक् कथमेषा भविष्यति ? ॥ १४८ ॥
स्वाम्याख्यदनया सर्वमपि दुःखमभुज्यत । यथा तु सुखभागेषा भविष्यति तथा शृणु ॥ १४९ ॥
अष्टौ वर्षाण्यसावग्रमहिषी ते भविष्यति । अभिज्ञानमिदं चात्र तत्परिज्ञानकारणम् ॥ १५० ॥
शुद्धान्ते रममाणस्य तव पृष्ठे करिष्यति । या हंसलीलां जानीथास्तामिमां मगधाधिप ! ॥ १५१ ॥
अहो आश्चर्यमेषा मे कथं पत्नी भविष्यति । चिन्तयन्निति राजाऽगाद् गृहे नत्वा जिनेश्वरम् ॥ १५२ ॥
दुर्गन्धायाश्च गन्धोऽथ कर्मनिर्जरया ययौ । आभीर्या चैकया दृष्टोपाददे साऽनपत्यया ॥ १५३ ॥
आभीर्योदरजातेव पाल्यमाना क्रमेण सा । बभूव यौवनप्राप्ता रूपलावण्यशालिनी ॥ १५४ ॥

अन्यदा नगरे कौमुद्युत्सवोऽभून्मनोरमः । शृंगाररससर्वस्वनाटिकासुखसन्निभः ॥ १५५ ॥
कुमारयुवतिमीश्रा सश्रोत्सवदिदृक्षया । युवलोचनसारंगवागुरा सा समाययौ ॥ १५६ ॥
शुचिसंव्यानसंवीतसर्वांगौ श्रेणिकाभयौ । विशाहृप्रस्थितवराविव तत्र समेयतुः ॥ १५७ ॥
महत्युत्सवसंमर्दे श्रेणिकस्य करोऽलगत् । आभीरीदुहितुस्तस्या ह्युन्नतकुचस्थले ॥ १५८ ॥
राजा जातानुरागो द्राक् तस्या निवसनाञ्चले । निजां बबन्ध संभोगसत्यंकारमिवोर्मिकाम् ॥ १५९ ॥
अभयं चादिशन्नाममुद्रा मे व्यग्रचेतसः । केनाप्यहारि तच्छोध्यस्त्वया तदपहारकः ॥ १६० ॥
रुरोध धीमतां धुर्यो रंगद्वाराण्यथाभयः । लोकानेकैकशोऽपि क्रष्टुं द्वार[illegible] ॥ १६१ ॥
सर्वेषामपि वस्त्राणि केशपाशान् मुखानि च । अभयः शोधयामास धिषणाधनशेवधिः ॥ १६२ ॥
आभीरीपुत्रिकायाश्च तस्या वस्त्रादि शोधयन् । स ददर्शाञ्चले बद्धां नृपनामांकितोर्मिकाम् ॥ १६३ ॥
तामपृच्छच्च जगृहे त्वयेयं कथमूर्मिका ? । कर्णौ पिधाय साऽप्यूचे न जाने किंचिदप्यदः ॥ १६४ ॥
तां च रूपवतीं दृष्ट्वा स दध्यौ धीमतां वरः । नूनं तातोऽनुरक्तोऽस्यामाभीरीदुहितर्यभूत् ॥ १६५ ॥
अस्याः संग्रहणविधायभिज्ञानं निजोर्मिकाम् । राजा रागपरवशो बबन्ध नियतं स्वयम् ॥ १६६ ॥
अभयश्चिन्तयन्नेवं तां निन्ये राजसन्निधौ । राजाऽप्यपृच्छत् किं प्राप्तो ? यशस्कर ! स तस्करः ॥ १६७ ॥

१ °णि E ॥

अभयोऽभिदधे देव! सेयं चौरी यया प्रभोः। अचोरि चित्तं पर्याप्तमूर्मिकाकथया तया ॥ १६८ ॥
स्मितं कृत्वा नृपोऽप्यूचे परिणेष्याम्यमूमपि। किं नाश्रौषीरुपादेयं स्त्रीरत्नं दुष्कुलादपि ॥ १६९ ॥
इति सद्योऽनवद्यांगीं राजा परिणिनाय ताम्। चकार चाग्रमहिषीमनुरागेण भूयसा ॥ १७० ॥
रेमेऽन्यदाऽक्षै राज्ञीभिर्नृपस्तत्रेत्यभूत् पणः। जितस्य पृष्ठेऽश्वस्येवाध्यारोहति जयी हि यः ॥ १७१ ॥
राज्ञ्यः सर्वाः कुलोत्पन्ना व्यजयन्त यदा नृपम्। तदा न्यधुर्वस्त्रमात्रं तत्पृष्ठे जयसूचकम् ॥ १७२ ॥
वेश्यासुता तु सा राज्ञी जिगाय नृपमन्यदा। आरुरोह च निःशंका तत्पृष्ठं कठिनाशया ॥ १७३ ॥
जहास च नृपोऽकस्मात्तत्स्मृत्वा भगवद्वचः। साऽप्युत्तीर्य च पप्रच्छ हासकारणमादरात् ॥ १७४ ॥
राजाऽपि स्वामिनाऽऽख्यातं तस्याः पूर्वभवादिकम्। पृष्ठारोहणपर्यन्तं वृत्तान्तं तमचीकथत् ॥ १७५ ॥
तच्छ्रुत्वा द्राग्विरक्ता साऽनुज्ञाप्य पतिमादरात्। श्रीमहावीरपादान्ते परिव्रज्यामुपाददे ॥ १७६ ॥
इतश्च मध्येऽम्भोराशि पातालभवनोपमः। आर्द्रको नाम देशोऽस्ति पुरं तत्रार्द्रकाभिधम् ॥ १७७ ॥
राजमानः श्रिया राजा राजेवानन्दको दृशाम्। तत्राभूदार्द्रक इति महिषी तस्य चार्द्रका ॥ १७८ ॥
तयोरार्द्रककुमारोऽभवदार्द्रमनाः सुतः। स प्राप्तयौवनो भोगान् भुञ्जानोऽस्थाद्यथारुचि ॥ १७९ ॥
तस्य चार्द्रकराजस्य बभूव श्रेणिकस्य च। पारंपर्यागता प्रीतिस्तन्मनोनिगडोपमा ॥ १८० ॥
अन्यदा श्रेणिकः प्रैषीन्निजामात्यमुपार्द्रकम्। समर्प्य प्राभृतं प्राज्यं दोहदं स्नेहवीरुधः ॥ १८१ ॥

स मन्त्री गतमात्रोऽपि तेनार्द्रकमहीभुजा। मूर्तिस्थं श्रेणिकाजय्यमिवाद्दश्यत गौरवात् ॥ १८२ ॥
मन्त्रिणा चोपनीतानि प्राभृतान्याददे नृपः। सौवर्चलनिंयपत्रकम्बलादीन्यनेकशः ॥ १८३ ॥
महत्या प्रतिपत्त्या तं संभाव्याऽऽर्द्रकभूपतिः। प्रपच्छ कच्चित्कुशलं मद्बन्धोर्मगधेशितुः ॥ १८४ ॥
स्वस्वामिकुशलोदन्तैः सान्द्रैश्चन्द्रातपैरिव। तन्मनःकुमुदानन्दं सचिवेन्दुरदत्त सः ॥ १८५ ॥
पप्रच्छाऽऽर्द्रककुमारस्तात ! को मगधाधिपः ?। तव येनेद्दशी प्रीतिर्मधुनेव मनोभुवः ॥ १८६ ॥
राजा प्रोवाच राजाऽस्ति श्रेणिको मगधाधिपः। पारंपर्यागता मैत्री तत्कुले मत्कुलेऽपि च ॥ १८७ ॥
श्रागार्द्रककुमारोऽपि प्रोन्मीलत्प्रेमकन्दलः। दृशा सुधातरंगिण्या पश्यन्मन्त्रिणमब्रवीत् ॥ १८८ ॥
किमनूनगुणः सूनुस्त्वत्प्रभोरस्ति कश्चन। अमात्य ! कर्तुमिच्छामि तं सभाजनभाजनम् ॥ १८९ ॥
मन्त्र्यूचेऽस्ति धियां धाम पञ्चमन्त्रिशताधिपः। वदान्योऽनन्यसामान्यकरुणारससागरः ॥ १९० ॥
दक्षः कृतज्ञः सकलकलाजलधिपारगः। अभयो नाम तनयः श्रेणिकस्य महीपतेः ॥ १९१ ॥ (युग्मम्)
बुद्धिविक्रमसंपन्नं धर्मज्ञं भयवर्जितम्। अभयं विश्वविदितं न जानासि कुमार ! किम् ? ॥ १९२ ॥
गुणा न केऽपि ते सन्ति येऽभये न कृतास्पदाः। जीवाकारा इवाम्भोधौ स्वयंभूरमणाभिधे ॥ १९३ ॥
आर्द्रकेशोऽपि पुत्रं स्वमभये सौहृदार्थिनम्। ऊचे मन्मार्गसंलग्नः कुलीनो नन्दनोऽसि मे ॥ १९४ ॥
द्वयोः समानगुणयोः समानकुलसंपदोः। विवाहसम्बन्ध इव युज्यते वत्स सौहृदम् ॥ १९५ ॥

अवाप्य पितुरादेशं स्वमनोरथसन्निभम् । जनान्तिकेन सचिवं तमुवाचार्द्रकात्मजः ॥ १९६ ॥
मा यासीर्मामनापृच्छ्य श्रोतव्यं गच्छता त्वया । अभयं प्रति मे स्नेहद्रुमबीजनिभं वचः ॥ १९७ ॥
मन्त्र्यप्येवमिति प्रोचे कुमारं सुकुमारगीः । राज्ञा विसृष्टश्च ययौ वेत्रिदर्शितमाश्रयम् ॥ १९८ ॥
अन्येद्युर्मौक्तिकादीनि प्राभृतान्यार्द्रकेश्वरः । अर्पयित्वा स्वपुरुषं व्यसाक्षीन्मन्त्रिणं च तम् ॥ १९९ ॥
अथार्द्रककुमारोऽपि हस्ते तस्यैव मन्त्रिणः । प्रैषीद्विद्रुममुक्तादिवस्तून्यभयहेतवे ॥ २०० ॥
स पुमान्मन्त्रिणा सार्धं गत्वा राजगृहे पुरे । प्राभृतान्यर्पयामास श्रेणिकायाभयाय च ॥ २०१ ॥
अभयस्य समाचख्यौ वाचिकं चेति मन्त्रिराट् । स आर्द्रककुमारस्ते सख्यं सौभ्रात्रमिच्छति ॥ २०२ ॥
अचिन्तयच्चेत्यभयः कुशलो जिनशासने । विराधितश्रामण्यत्वाज्जातोऽनार्येषु स ध्रुवम् ॥ २०३ ॥
नूनमासन्नभव्यः स महात्मा राजपुत्रकः । अभव्यदूरभव्यानां न मया सख्यकामना ॥ २०४ ॥
समानपुण्यपापानां प्रीतिः प्रायेण देहिनाम् । तेषां ह्येकः स्वभावः स्यान्मैत्री चैकस्वभावजा ॥ २०५ ॥
तदुपायेन केनापि कृत्वा तं जिनधर्मिणम् । आप्तो भवामि स ह्याप्तो योऽप्रेरूर्ध्वर्मवर्त्मनि ॥ २०६ ॥
तस्यार्द्रककुमारस्य तीर्थकृद्बिम्बदर्शनात् । उत्पद्यते यदि पुनर्जातिस्मरणमुत्तमम् ॥ २०७ ॥
तत्प्राभृतच्छलेनार्हत्प्रतिमामहमुत्तमाम् । प्रेषयामि रत्नमयीं महाऽऽचार्यप्रतिष्ठिताम् ॥ २०८ ॥
इत्यादिनाथदेवस्याप्रतिमां प्रतिमां न्यधात् । पेटामध्ये समुद्गस्थां श्रेयस्कामगवीं स्वयम् ॥ २०९ ॥

ततश्च धूपदहनघंटिकादीनि तत्पुरः । मुमोच देवपूजोपकरणान्यखिलान्यपि ॥ २१० ॥
दत्त्वा च तालकं द्वारे ततः श्रेणिकराजसूः । मंजूषां मुद्रयामास मुद्रया निजया स्वयम् ॥ २११ ॥
आर्द्रकेशपुमांसं तं प्राभृतैः प्राभृतैः सह । विससर्ज प्रियाऽऽलापपूर्वकं मगधाधिपः ॥ २१२ ॥
अभयोऽपि हि तां पेटां तस्य हस्ते समर्पयन् । तमुवाचेति सत्कृत्य वाचा पीयूषसारया ॥ २१३ ॥
एषाऽऽर्द्रककुमारस्य पुरः पेटोपढौक्यताम् । मदीयं तस्य मद्बन्धोर्वाच्यमेतच्च वाचिकम् ॥ २१४ ॥
रहस्येकाकिना भूत्वोन्मुद्र्य पेटामिमां स्वयम् । तदन्तर्वस्तु संप्रेक्ष्यं दर्शनीयं न कस्यचित् ॥ २१५ ॥
इति कर्तव्यमित्युक्त्वा स पुमान् स्वपुरं ययौ । उपायनान्यार्पयच्च स्वस्वामिस्वामिपुत्रयोः ॥ २१६ ॥
तथार्द्रककुमारायाचख्यावभयवाचिकम् । ततो रहसि स स्थित्वा तां पेटामुदघाटयत् ॥ २१७ ॥
ददर्श च तदन्तःस्थां तमस्युद्योतकारिणीम् । तामादिनाथप्रतिमां ज्योतिर्भिर्घटितामिव ॥ २१८ ॥
दध्यौ च किमिदं किंचिदंगाभरणमुत्तमम् ? । किमारोप्यं मूर्ध्नि कण्ठे हृदयेऽन्यत्र वा क्वचित् ? ॥ २१९ ॥
दृष्टपूर्वमिवेदं मे क्वापीति प्रतिभासते । न तु स्मृतिपथं याति मन्दाभ्यासस्य शास्त्रवत् ॥ २२० ॥
इत्यार्द्रककुमारस्य भृशं चिन्तयतः सतः । मूर्च्छा जातिस्मृतिजनन्यजनिष्ट गरीयसी ॥ २२१ ॥
उत्पन्नजातिस्मरणः स्वयमेवाप्तचेतनः । स एवं चिन्तयामास पूर्वजन्मकथां निजाम् ॥ २२२ ॥
इतो भवात्तृतीयस्मिन् भवे मगधनीवृति । कुटुम्बी वसन्तपुरेऽभूवं सामायिकाभिधः ॥ २२३ ॥ 

भार्या बन्धुमती मेऽभूदश्रौषं च तया सह । यथावदार्हतं धर्मं सुस्थिताचार्यसन्निधौ ॥ २२४ ॥
धर्मं श्रुत्वा सभार्योऽपि प्रतिबुद्धस्तदन्तिके । गृहवासविरक्तोऽहं परिव्रज्यामुपात्तवान् ॥ २२५ ॥
पत्तने चाहमेकस्मिन् गुरुणा विहरन्नगाम् । बन्धुमत्यपि तत्राऽऽगात् संयताजनमध्यगा ॥ २२६ ॥
एकस्मिन्नह्नि तां पश्यन् स्मरन् पूर्वरतान्यहम् । अनुरक्तोऽभवं तस्यां तदाख्यं चान्यसाधवे ॥ २२७ ॥
सोऽप्याचख्यौ प्रवर्तिन्यै बन्धुमत्यै च सा पुनः । प्रवर्तिनीं च प्रोवाच विषण्णा बन्धुमत्यदः ॥ २२८ ॥
गीतार्थोऽप्येष मर्यादां लंघेत यदि का गतिः ? मर्यादां पालयन्नब्धिरपि पृथ्वीं न लुंपति ॥ २२९ ॥
देशान्तरमपि गतां यावच्छ्रोष्यति मामसौ । तावन्महानुभावश्च मयि रागं न हास्यति ॥ २३० ॥
तस्मादहं भगवति ! पपत्स्ये मरणं खलु । न चास्य नापि मे शीलखंडनं जायते यथा ॥ २३१ ॥
इति साऽनशनं कृत्वा स्वमुद्बध्य च लीलया । निष्ठ्यूतवज्जहौ प्राणान् देवभूयमियाय च ॥ २३२ ॥
तथा मृतां च तां श्रुत्वा मयाऽप्येतद्विचिन्तितम् । महानुभावाऽमृत सा व्रतभंगभयात् खलु ॥ २३३ ॥
भग्नव्रतः पुनरहं तदलं जीवितेन मे । कृत्वेत्यनशनमहं विपद्य त्रिदशोऽभवम् ॥ २३४ ॥
ततश्च्युत्वाहमुत्पन्नोऽस्म्यनार्यो धर्मवर्जितः । प्रतिबोधयिता यो मां स बन्धुः स गुरुश्च मे ॥ २३५ ॥
भाग्योदयेन केनापि बोधितोऽस्मि मन्त्रिणा । अद्यापि मन्दभाग्योऽस्मि तं द्रष्टुं यदनीश्वरः ॥ २३६ ॥

१ 'वोमय्यनुरागं *D. L.* ॥

तदनुज्ञाप्य पितरमननुज्ञाप्य वाऽप्यहम् । आर्यदेशं गमिष्यामि यत्र मेऽस्त्यभयो गुरुः ॥ २३७ ॥
इत्थं मनोरथं कुर्वन् प्रतिमामादिमार्हतः । पूजयन्नार्द्रकासूनुर्व्यतियाति स्म वासरान् ॥ २३८ ॥
अन्येद्युरार्द्रकासूनुर्नृपमेवं व्यजिज्ञपत् । ताताभयकुमारेण सममिच्छामि दर्शनम् ॥ २३९ ॥
अवादीदार्द्रकेशोऽपि न गन्तव्यं खलु त्वया । वत्स ! स्थानस्थितानां हि सौहृदं श्रेणिकेन नः ॥ २४० ॥
पित्राज्ञया निषिद्धश्चोत्कंठितश्चाभयं प्रति । ततश्चाऽऽर्द्रककुमारो न तस्थौ न जगाम च ॥ २४१ ॥
वर्षन्नश्रान्तमस्राम्भः स भाद्रपदमेघवत् । अभयोत्कंठितस्तस्थावनुद्धानविलोचनः ॥ २४२ ॥
आसने शयने याने भोजनेऽन्यक्रियास्वपि । अभयालंकृतामाशां दृशोरग्रे चकार सः ॥ २४३ ॥
पारापत इवोड्डीय यियासुरभयान्तिके । न त्वार्द्रककुमारोऽगाद्रतिं रोर इवाप्तवान् ॥ २४४ ॥
कीदृशो मगधो देशः ? कीदृग्राजगृहं पुरम् ? । कस्कोऽध्वा तत्र गमने ? ऽपृच्छदेवं च पार्श्वगान् ॥ २४५ ॥
दध्यावार्द्रकराजोऽपि कुमारो मम निश्चितम् । यास्यत्यकथयित्वैव कदाऽप्यभयसन्निधौ ॥ २४६ ॥
ततश्च पञ्च सामन्तशतान्यादिशदार्द्रकः । यदार्द्रककुमारोऽयं रक्ष्यो देशान्तरं व्रजन् ॥ २४७ ॥
देहच्छायेव तत्पार्श्वं सामन्तास्तेऽत्यजन्न हि । बन्दे धृतमिवात्मानं कुमारोऽपि स्ममंस्त सः ॥ २४८ ॥
आर्द्रकिर्हृदये कृत्वाऽभयोपगमनं सुधीः । प्रत्यहं कर्तुमारेभे वाह्याल्यां वाहवाहनम् ॥ २४९ ॥
अश्वारूढाश्च पार्श्वेऽस्थुः सामन्तास्तेऽङ्गरक्षकाः । कुमारो वाहयन्नश्वं किञ्चिद्गत्वा न्यवर्तत ॥ २५० ॥

एवं च वाहयन्नश्वं स यथावधिकाधिकम । पुनः पुनश्च व्याघुट्याययौ ते च विशश्वसुः ॥ २५१ ॥
आर्द्रकात्सूनुरन्येद्युः पुंभिः प्रत्ययितैर्निजैः । प्रगुणं कारयामास यानपात्रं पयोनिधौ ॥ २५२ ॥
रत्नैश्च पूरयामास यानपात्रं तदार्द्रकिः । अग्रेऽप्यारोहयामास तत्राऽर्हत्प्रतिमां च ताम् ॥ २५३ ॥
तदैव वाहयन्नश्वमदृशी(श्यो)भूय पूर्ववत् । तत्रारुह्य प्रवहणे स ययावार्यनीवृतम् ॥ २५४ ॥
यानादुत्तीर्य संप्रेष्य प्रतिमामभयाय ताम् । सप्तक्षेत्र्यां धनान्युप्त्वा यतिलिंगमुपाददे ॥ २५५ ॥
उच्चारयितुमारेभे यावत्सामायिकं च सः । आकाशस्थितया तावदूचे देवतयोच्चकैः ॥ २५६ ॥
महासत्त्वो यद्यपि त्वं ग्रहीर्दीक्षां तथापि मा । अद्यापि ते भोगफलं कर्मास्त्यागमयस्व तत् ॥ २५७ ॥
भुक्त्वा भोगफलं कर्माऽऽददीथाः समये व्रतम् । अवश्यमेव भोक्तव्यं भोग्यं तीर्थकृतामपि ॥ २५८ ॥
महात्मंस्तद् व्रतेनालं यदात्तमपि हास्यते । भोजनेनापि किं तेन यद् भुक्तमपि वम्यते ॥ २५९ ॥
अथाऽऽर्द्रककुमारोऽपि स्वमूरीकृत्य पौरुषम् । दैवीं वाचमनादृत्य प्रव्रज्यां स्वयमाददे ॥ २६० ॥
प्रत्येकबुद्धः स मुनिर्निशितं पालयन् व्रतम् । विहरन्नन्यदा प्राप वसन्तपुरपत्तनम् ॥ २६१ ॥
बाह्यदेवकुले क्वापि तस्थौ प्रतिमया च सः । सर्वाऽऽधिपरिहारेण समाधिमधिजग्मिवान् ॥ २६२ ॥
इतश्च तस्मिन्नगरे वरश्रेष्ठी महाकुलः । देवदत्तोऽभवत्तस्य पत्नी धनवती पुनः ॥ २६३ ॥

१ °क्य C. L. ॥

स तु बन्धुमतीजीवश्च्युत्वाऽजनि सुता तयोः । सुरूपा श्रीमती नाम श्रीमतीनां शिरोमणिः ॥ २६४ ॥
धात्रीभिर्लाल्यमाना च मालतीपुष्पदामवत् । पांशुक्रीडोचितां प्राप वयोऽवस्थां क्रमेण सा ॥ २६५ ॥
तत्र देवकुलेऽन्येद्युः पौरबालाभिरन्विता । श्रीमती पतिरमणक्रीडया रन्तुमाययौ ॥ २६६ ॥
भर्तारं वृणुतेत्यूचुस्तत्र सर्वाश्च बालिकाः । कयाऽपि कोऽपि सर्वाभिर्वरः स्वरुचि वव्रिरे ॥ २६७ ॥
श्रीमत्युवाच सख्योऽसौ वृतो भट्टारको मया । साधु वृतं[1] साधु वृतमिति[2] चोवाच देवता ॥ २६८ ॥
तन्वाना गर्जितं रत्नान्यवर्षत् सा च देवता । श्रीमती गर्जिभीता तु तस्य पादेऽलगन्मुनेः ॥ २६९ ॥
सोऽचिन्तयत् क्षणं स्थित्वा ममाऽभूदिह तस्थुषः । उपसर्गोऽनुकूलोऽयं व्रतद्रुममहानिलः ॥ २७० ॥
इति ध्यात्वाऽन्यतः सोऽगान्महर्षीणां हि कुत्रचित् । आस्थान्यत्रापि न प्रायः सापायेषु तु का कथा ॥२७१॥
तामादातुं रत्नवृष्टिमाजगाम महीपतिः । अस्वामिकं धनं राज्ञोऽर्हतीति कृतनिश्चयः ॥ २७२ ॥
तद् द्रव्यं संचिचीषन्तो ददृशू राजपूरुषाः । नागलोकद्वारमिव स्थानं तन्नागसंकुलम् ॥ २७३ ॥
ऊचे च देवताऽमुष्यै दत्तं वरणके मया । द्रव्यमेतदिति श्रुत्वा विलक्षोऽपासरन्नृपः ॥ २७४ ॥
ततश्च तद्धनं सर्वमाददे श्रीमतीपिता । स्थानं ययुश्च सर्वे स्वं तदा सायमिवाण्डजाः ॥ २७५ ॥
अथोद्वोढुमढौकन्त श्रीमतीं बहवो वराः । वरं वृणीष्वेति पित्रोक्ता जगाद श्रीमती त्वदः ॥ २७६ ॥ ॥२११॥

१ वृतं C, L. । वृतः D ॥ २ वृत इति D ॥

वृतो मया यो महर्षिर्वैरस्तात ! स एव मे । मम तद्वरणेऽदाच्च द्रव्यं तद्गृह्यदेवता ॥ २७७ ॥
स्वरुच्याऽपि मया तावन्महर्षिः स वृतो वरः । तद् द्रव्यमाददानेन त्वयाऽप्यनुमतं हि तत् ॥ २७८ ॥
तत्तस्मै कल्पयित्वा मां नान्यस्मै दातुमर्हसि । किं न श्रुतं त्वया तात ! बाला अपि वदन्त्यदः ॥ २७९ ॥
सकृज्जल्पन्ति राजानः सकृज्जल्पन्ति साधवः । सकृत्कन्याः प्रदीयन्ते त्रीण्येतानि सकृत् स ॥ २८० ॥
श्रेष्ठ्यूचे स कथं प्राप्यो न चैकत्रावतिष्ठते । अलीव पुष्पं स स्थानमातिष्ठति नवं नवम् ॥ २८१ ॥
स किमायास्यति न वाऽऽयातोऽपि ज्ञास्यते कथम् । किं नाम तस्याभिज्ञानं ? कति नायान्ति भिक्षवः २८२
श्रीमत्युचे मया तात ! तदा गर्जितभीतया । दृष्टं तदंह्रौ लक्ष्मास्ति वानर्यैव विलग्नया ॥ २८३ ॥
तस्मादतः परं तात ! तथा कुरु यथाऽखिलान् । यातायातपरान् साधून् पश्यामि प्रतिवासरम् ॥ २८४ ॥
श्रेष्ठ्यब्रवीदिहायान्ति ये केचिदिह पत्तने । भिक्षां देहि स्वयं तेभ्यो महर्षिभ्यो दिने दिने ॥ २८५ ॥
चक्रे च प्रत्यहमपि तदाद्यपि तथैव सा । दिदृक्षमाणा तल्लक्ष्मांह्रीन्मुनीनामवन्दत ॥ २८६ ॥
द्वादशाब्दे च दिङ्मूढः स महामुनिरन्यदा । तया तत्राऽऽगत उपलक्षि तल्लक्ष्मवीक्षणात् ॥ २८७ ॥
तमृषिं श्रीमती स्माह तत्र देवकुले तदा । मया वृतोऽसि त्वं नाथ ! त्वमेव हि वरो मम ॥ २८८ ॥
तदा गतोऽसि मां मुग्धां निर्धूय स्वेदबिन्दुवत् । क्व यास्यस्यद्य तु प्राप्तस्त्वमृणं धारयन्निव ॥ २८९ ॥
दृष्टनष्टो यदाऽभूस्त्वं तदाद्यपि हि नाथ ! मे । परासोरिव कालोऽगात्तत्प्रसीद भजस्व माम् ॥ २९० ॥

एवं स्थितेऽपि नैष्ठुर्याद्यदि मामवमन्यसे । भूत्वा तदग्निसाद्दास्ये स्त्रीहत्यापातकं तव ॥ २९१ ॥
राज्ञा महाजनेनान्यैरप्युद्वाहाय सोऽर्थितः । सस्मार तां गिरं दिव्यां अभारकमनिषेधिकाम् ॥ २९२ ॥
तां स्मरन्दैवतीं वाचं निर्बन्धेनोदितश्च तैः । महात्मा पर्यणैषीत्तां श्रीमतीं भावि नान्यथा ॥ २९३ ॥
भुञ्जानस्य चिरं भोगान् श्रीमत्या सह तस्य तु । उत्पेदे क्रमयोगेण पुत्रो गार्हस्थ्यकीर्तनम् ॥ २९४ ॥
क्रमेणासादयन् वृद्धिं विमुञ्चन् क्षीरकण्ठताम् । स वक्तुमुल्लसज्जिह्वो राजकीर इवाभवत् ॥ २९५ ॥
पुत्रे तावति स प्रोचे श्रीमतीं मतिमद्वरः । अतः परं सहायस्ते पुत्रोऽस्तु प्रव्रजाम्यहम् ॥ २९६ ॥
श्रीमती धीमती तत्रान्तरे ज्ञापयितुं सुतम् । सतूलपूलकं तर्कुमादायासन्युपाविशत् ॥ २९७ ॥
सा तर्कुकर्म प्रारेभे पप्रच्छ च स बालकः । किमेतदम्ब ! प्रारब्धं कर्मेतरजनोचितम् ॥ २९८ ॥
साऽवोचज्जात ! ते तातः प्रव्रज्यार्थं गमिष्यति । गतेऽस्मिन् पतिहीनायाः शरणं तर्कुरेव मे ॥ २९९ ॥
बालकोऽप्यवदद्बाल्यादक्षरैर्लल्लमन्मनैः । बद्ध्वाऽहं धारयिष्यामि कथं यास्यति मे पिता ॥ ३०० ॥
इत्युक्त्वा तर्कुसूत्रेण लालयेवोर्णनाभकः । आवेष्टयत् पितुः पादौ स मुग्धमधुराननः ॥ ३०१ ॥
उवाच चाम्ब ! मा भैषीः स्वस्था भव मया ह्यसौ । बद्धपादो द्विप इवेशीत यातुं कथं पिता ? ॥ ३०२ ॥
श्रीमतीपतिरप्येवमचिन्तयदहो शिशोः । स्नेहानुबन्धः कोऽप्येष मन्मनःपक्षिपाशभूत् ॥ ३०३ ॥

१ पूलि" L ॥

तन्मदङ्घ्र्योः कृताः सन्ति यावन्तः सूत्रवेष्टकाः । तावन्त्यब्दानि स्थास्यामि पुत्रप्रेम्णा गृहस्थताम् ॥३०४॥ सप्तमः

पादयोस्तन्तुबन्धाश्च गणिता द्वादशाभवन् । गार्हस्थ्ये द्वादशाब्दानि ततः सोऽप्यत्यवाहयत् ॥ ३०५ ॥ सर्गः

संधाऽवधौ च संपूर्णे वैराग्येणोररीकृतः । यामिन्याः पश्चिमे यामे स सुधीरित्यचिन्तयत् ॥ ३०६ ॥

संसारकूपान्निर्गन्तुं व्रतमालम्ब्य रज्जुवत् । मया प्राप्तं च मुक्तं च मग्नस्तत्रास्म्यहं पुनः ॥ ३०७ ॥

मनसैव व्रतं भग्नं प्राग्जन्मनि तथाऽप्यहम् । अनार्यत्वं प्रपन्नोऽस्मि का गतिः स्यादतः परम् ॥ ३०८ ॥

भवत्विदानीमप्यात्तपरिव्रज्यस्तपोऽग्निना । अग्निशौचांशुकमिवात्मानं प्रक्षालयाम्यहम् ॥ ३०९ ॥

प्रातश्च श्रीमतीं पत्नीं स संभाष्यानुमान्य च । यतिलिंगमुपादाय निर्ममो निर्ययौ गृहात् ॥ ३१० ॥

स प्रस्थितो राजगृहमन्तराले ददर्श ताम् । स्वां सामन्तपञ्चशतीं चौर्यवृत्तिपरायणाम् ॥ ३११ ॥

उपलक्ष्य स तैर्भक्त्या ववन्दे सोऽवदच्च तान् । किमेषा जीविका पापहेतुर्युष्माभिराहृता ? ॥ ३१२ ॥

तेऽवोचन् वञ्चयित्वाऽस्मान् पलायिष्ठा यदा प्रभो! । दर्शयामः स्म न तदाऽऽत्मानं भूमिपतेर्ह्रिया ॥३१३॥

तवैवान्वेषणे लग्ना भ्रमन्तः सागराम्बराम् । चौर्यवृत्त्यैव जीवामः किमन्यन्निःस्वशस्त्रिणाम् ॥ ३१४ ॥

मुनिरप्यभ्यधाद्भद्राः ! कष्टमापतितं यदि । धर्मानुबन्धि तत्कार्यं सफलं लोकयोर्द्वयोः ॥ ३१५ ॥

केनापि पुण्ययोगेन मानुष्यकमवाप्यते । प्राप्तस्य तस्य च फलं धर्मः स्वर्गापवर्गदः ॥ ३१६ ॥

१ °मालंबि र° *L.* ॥ २ °ष्ठा *C. D. L.* ॥

जीवेष्वहिंसा सत्योक्तिरस्तेयं ब्रह्मचारिता । अकिंचन्यं च धर्मोऽयमार्हतोऽभिमतोऽस्तु वः ॥ ३१७ ॥
स्वामिभक्ताः स्थ हे भद्रा राजवत्स्वाम्यहं च वः । तन्ममैवामुमध्यानं प्रपद्यध्वं सुमेधसः ! ॥ ३१८ ॥
ते प्रोचुरग्रे स्वामी त्वं सांप्रतं गुरुरप्यसि । त्वया ज्ञापितधर्माः स्मो दीक्षयाऽनुगृहाण नः ॥ ३१९ ॥
इत्यार्द्रककुमारस्तान् प्रव्राज्य सहितश्च तैः । वन्दितुं श्रीमहावीरमभिराजगृहं ययौ ॥ ३२० ॥
गच्छतश्च मुनेस्तस्य गोशालोऽभिमुखोऽभवत् । अकृतप्रणयस्तस्मै विवादं च प्रचक्रमे ॥ ३२१ ॥
भूचराः खेचराश्चापि तत्रायाताः सहस्रशः । तस्थुः सामाजिकीभूय कौतुकोत्तानितेक्षणाः ॥ ३२२ ॥
गोशालोऽथावदत् कष्टं तपोमूलं वृथैव भोः । शुभाशुभफलानां हि कारणं नियतिः खलु ॥ ३२३ ॥
प्रत्यूचे स मुनिर्मा स्म मुखमस्तीत्यहो ब्रवीः । कारणं पौरुषमपि मन्यस्वानेन हेतुना ॥ ३२४ ॥
कारणं यदि सर्वत्र नियतिं ननु मन्यसे । तत्त्वापीष्टसिद्ध्यर्थं प्रसज्जेरन् वृथा क्रियाः ॥ ३२५ ॥
तथाहि नियतिनिष्ठः स्थानस्थः किं न तिष्ठसि ? । भोजनार्थं प्रयतसे भोजनावसरे च किम् ? ॥ ३२६ ॥
एवं नियतिवत्साधु पौरुषं स्वार्थसिद्धये । नियतेरप्यर्थसिद्धौ पौरुषं त्वतिरिच्यते ॥ ३२७ ॥
तथाहि खात् पतत्यम्भो भूखातादपि तद्भवेत् । बलीयसी हि नियतिर्नियतेरपि पौरुषम् ॥ ३२८ ॥
एवं निरुत्तरीचक्रे गोशालं स महामुनिः । तुष्टुवे खेचराद्यैश्च कुर्वद्भिर्जयमंगलम् ॥ ३२९ ॥

---

१ भक्ता *L* ॥ २ वचः *D* ॥ ३ मुख° *L. M.* ॥

आर्द्रकर्षिर्ययौ हस्तितापसानामथाऽऽश्रमम् । *उद्दानायातपक्षिप्तहस्तिमांसाकुलोटजम् ॥ ३३० ॥
तत्रस्थास्तापसाश्चैकं सुमहान्तं मतंगजम् । हत्वा तन्मांसमश्नन्तो ते निन्युर्दिवसान् बहून् ॥ ३३१ ॥
ते चैवमूचुर्हन्तव्यो वरमेको मतंगजः । यस्यैकस्यापि मांसेन भूयान् कालोऽतिगम्यते ॥ ३३२ ॥
मृगतित्तिरमत्स्याद्यैर्वाऽऽन्यैर्वा बहुभिश्च किम् । तैरप्याहार एवार्थः पापं तत्रातिरिच्यते ॥ ३३३ ॥
तदा च ते दयाभासधर्मनिष्ठास्तपस्विनः । बबन्धुर्मारणायैकं महाकायं मतंगजम् ॥ ३३४ ॥
स भारशृंखलाबद्धो यत्र चाऽऽसीन्मतंगजः । तेनाध्वना स जगाम महर्षिः करुणार्द्रधीः ॥ ३३५ ॥
स च हस्ती महर्षिं तं मुनिपंचशतीवृतम् । ईक्षामास वन्द्यमानं भूलुठन्मौलिभिर्जनैः ॥ ३३६ ॥
लघुकर्मा करी सोऽपि मुनिं दृष्ट्वेत्यचिन्तयत् । वन्दे यद्यहमप्येनं बद्धस्तु करवाणि किम् ॥ ३३७ ॥
महर्षिदर्शनात्तस्य गरुत्मद्दर्शनादिव । अयःपाशा व्यशीर्यन्त नागपाशा इवाभितः ॥ ३३८ ॥
निर्गलः सोथ हस्ती वन्दितुं तं महामुनिम् । अभ्यसार्षीज्जनस्तूचे मुनिरेष हतो हतः ॥ ३३९ ॥
पलायाञ्चक्रिरे लोका मुनिस्तस्थौ तथैव सः । इभ्योऽप्यवनमत्कुम्भस्थलः प्रणमति स्म तम् ॥ ३४०
स्पर्शं स्पर्शं च तत्पादौ दाहार्तः कदलीमिव । परमां निर्वृतिं प्राप प्रसारितकरः करी ॥ ३४१ ॥
स हस्ती पुनरुत्थाय भक्तिमन्थरया दृशा । पश्यन्महर्षिं प्राविक्षदरण्यानीमनाकुलः ॥ ३४२ ॥

टि०-* उद्दाने - शृङ्खलकरणम् ।

तत्प्रभावाद्भुतं दृष्ट्वा परं कोपमुपागताः । तेऽप्यार्द्रककुमारेण प्रत्यबोध्यन्त तापसाः ॥ ३४३ ॥
श्रीमहावीरसमवसरणे प्रेषिताश्च ते । गत्वोपाददिरे दीक्षां शमसंवेगशालिनः ॥ ३४४ ॥
तत्र श्रेणिकराजोऽपि तत्तथा गजमोक्षणम् । तापसप्रतिबोधं च श्रुत्वाऽऽगादभयान्वितः ॥ ३४५ ॥
भक्त्या वन्दितवन्तं चाऽऽनन्दयामास पार्थिवम् । सर्वकल्याणकारिण्या धर्मलाभाशिषा मुनिः ॥ ३४६ ॥
दृष्ट्वा मुनिमनाबाधमासीनं शुद्धभूतले । राजाऽपृच्छन्ममाश्चर्यं भगवन् ! हस्तिमोक्षणात् ॥ ३४७ ॥
महर्षिरूचे नोर्वीश ! दुष्करं करिमोक्षणम् । तर्कुतन्तुपाशमोक्षो दुष्करः प्रतिभासते ॥ ३४८ ॥
राज्ञा पृष्टश्च स मुनिस्तर्कुतन्तुकथां तथा । कथयामास राजाऽपि सलोकोऽपि विसिष्मिये ॥ ३४९ ॥
स आर्द्रककुमारर्षिरभाषत ततोऽभयम् । निःकारणोपकारी त्वं ममाभूर्धर्मबान्धवः ॥ ३५० ॥
त्वया हि प्रेषिता राजपुत्राऽर्हत्प्रतिमा मम । तद्दर्शनादहं जातीस्मरीभूयाऽर्हतोऽभवम् ॥ ३५१ ॥
किं किं त्वया न दत्तं मे किं किं नोपकृतं ननु । येनाहमार्हते धर्मे कृत्वोपायं प्रवर्तितः ॥ ३५२ ॥
अनार्यत्वमहापंकनिमग्नोऽहं त्वयोद्धृतः । त्वद्बुद्ध्युत्पन्नबोधः सन्नार्यदेशे ह्युपागमम् ॥ ३५३ ॥
परिव्रज्यां प्रपन्नोऽस्मि त्वयाऽहं प्रतिबोधितः । ततोऽभयकुमार ! त्वं श्रेयोभिर्भूशमेधसे ॥ ३५४ ॥ ॥२१७॥

श्रेणिकश्चाभयश्चान्ये लोकाश्च तमृषिं ततः । वन्दित्वा प्रीतमनसः स्वं स्वं प्रययुराश्रयम् ॥ ३५५ ॥

तदा पुरे राजगृहेऽभ्युपेतं
श्रीवीरनाथं स मुनिर्ववन्दे ।
तत्पादपद्मद्वयसेवया स्वं
कृतार्थयित्वा च शिवं प्रपेदे ॥ ३५६ ॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये दशमपर्वणि चेल्लणायोग्यैकस्तंभप्रासादनिर्माणाम्र-फलापहरण-श्रेणिकविद्याग्रहण-दुर्गन्धाकथा-ऽऽर्द्रककुमारकथावर्णनो नाम सप्तमः सर्गः ॥

## ॥ अथ अष्टमः सर्गः ॥

* * *

अथ भव्यानुग्रहाय ग्रामाकरपुरादिषु । विहरन् ब्राह्मणकुण्डग्रामेऽगात् परमेश्वरः ॥ १ ॥
बहुशालाभिधोद्याने पुरात्तस्माद्बहिःस्थिते । चक्रुः समवसरणं त्रिवप्रं त्रिदशोत्तमाः ॥ २ ॥
न्यषदत्प्राङ्मुखस्तत्र पूर्वसिंहासने प्रभुः । गौतमाद्या यथास्थानं सुराद्याश्चावतस्थिरे ॥ ३ ॥
श्रुत्वा सर्वज्ञमायातं पौरा भूयांस आययुः । देवानन्दार्षभदत्तावेयतुस्तौ च दंपती ॥ ४ ॥
त्रिश्च प्रदक्षिणीकृत्य प्रणम्य च जगद्गुरुम् । श्रद्धावानृषभदत्तो यथास्थानमुपाविशत् ॥ ५ ॥
देवानन्दा प्रभुं नत्वार्षभदत्तस्य पृष्ठतः । शुश्रूषमाणोर्ध्वज्ञाऽस्थादानन्दविकचानना ॥ ६ ॥
स्तनाभ्यां प्राक्षरत्स्तन्यं रोमाञ्चश्चाभवत्तनौ । तदा च देवानन्दायाः पश्यन्त्याः परमेश्वरम् ॥ ७ ॥
तथाविधां च तां प्रेक्ष्य जातसंशयविस्मयः । स्वामिनं गौतमस्वामी पप्रच्छेति कृताञ्जलिः ॥ ८ ॥

१ °र्ध्वजाऽस्था° P. ।

उत्प्रस्नवा निर्निमेषदृष्टिर्देववधूरिव । देवानन्दा तवाऽऽलोकात्सूनोरिव कथं प्रभो ! ॥ ९ ॥
अथाख्यद्भगवान् वीरो गिरा स्तनितधीरया । देवानां प्रिय ! भो देवानन्दायाः कुक्षिजोऽस्म्यहम् ॥ १० ॥
दिवसान् पञ्चाशीतिं कुक्षावस्या द्व्यशीत्यहम् । अज्ञातपरमार्थापि तन्मैषा वत्सला मयि ॥ ११ ॥
देवानन्दर्षभदत्तौ मुमुदाते निशम्य तत् । सर्वा विसिष्मिये पर्षत्तादृगश्रुतपूर्विणी ॥ १२ ॥
क्व सूनु स्त्रिजगन्नाथः क्व चावां गृहिमात्रकौ । इत्युत्थाय ववन्दाते दम्पती तौ पुनः प्रभुम् ॥ १३ ॥
पितरौ दुःप्रतीकारावित्यधीर्भगवानपि । तावुद्दिश्य जनांश्चापि विदधे देशनामिति ॥ १४ ॥
इयं माता पितैषोऽयं पुत्र इत्यादिको भवे । जायते विघटते च संबन्धः प्राणिनामिह ॥ १५ ॥
इन्द्रजालप्रायमेतत्समस्तमपि संसृतौ । न वस्तु क्षणमप्यत्र श्रद्धीत विविक्तधीः ॥ १६ ॥
इदं शरीरं नो यावज्जर्जरीकुरुते जरा । न यावदन्तकः प्राणानाच्छेत्तुमुपतिष्ठते ॥ १७ ॥
सुखाद्वैतनिधानस्य निर्वाणस्यैकसाधनीम् । तावद्दीक्षामाश्रयध्वं प्रमादोऽत्र न युज्यते ॥ १८
देवानन्दर्षभदत्तावथ नत्वैवमूचतुः । आवां विरक्तौ संसारवासादस्मादसारतः ॥ १९ ॥
देहि जंगमकल्पद्रो ! दीक्षां संसारतारणीम् । तरीतुं तारयितुं च कोऽपरस्त्वदृते क्षमः ॥ २० ॥
अस्त्वेतदिति नाथेन प्रोक्तौ तौ धन्यमानिनौ । ईशान्यां दिशि गत्वोज्झांचक्रतुर्भूषणादिकम् ॥ २१ ॥
पञ्चमुष्टिकचोत्पाटं कृत्वा संवेगतस्तु तौ । नाथं प्रदक्षिणीकृत्य वन्दित्वा चैवमूचतुः ॥ २२ ॥

स्वामिञ्जन्मजरामृत्युभीतौ त्वां शरणं श्रितौ । स्वयं दीक्षाप्रदानेन प्रसीदाऽनुगृहाण नौ ॥ २३ ॥
ददौ तयोः स्वयं दीक्षां समाचारं शशंस च । आवश्यकविधिं चाख्यत्सिरवद्यमनस्कयोः ॥ २४ ॥
वसन्ति सन्तो यत्राहरपि तत्रोपकारिणः । किं पुनर्भगवान् विश्वकृतज्ञग्रामणीः प्रभुः ॥ २५ ॥
देवानन्दां चन्दनायै स्थविरेभ्यस्त्वथर्षभम् । स्वामी समर्पयामास तौ चाऽपातां परं व्रतम् ॥ २६ ॥
अधीतैकादशांगौ तौ नानाविधतपःपरौ । अवाप्य केवलज्ञानं मृत्वा शिवमुपेयतुः ॥ २७ ॥
भगवान् वर्धमानोऽपि जगदानन्दवर्धनः । विजह्रार ततो धात्र्यां ग्रामाकरपुराकुलाम् ॥ २८ ॥
क्रमाच्च क्षत्रियकुण्डग्रामं स्वामी समाययौ । तस्थौ समवसरणे विदधे चाथ देशनाम् ॥ २९ ॥
स्वामिनं समवसृतं नृपतिर्नन्दिवर्धनः । ऋद्ध्या महत्या भक्त्या च तत्रोपेयाय वन्दितुम् ॥ ३० ॥
स त्रिः प्रदक्षिणीकृत्य वन्दित्वा च जगद्गुरुम् । उपाविशद्यथास्थानं भक्तितो रचिताञ्जलिः ॥ ३१ ॥
जमालिनाम जामेयो जामाता च प्रभोस्तदा । प्रियदर्शनया सार्धं तत्र वन्दितुमाययौ ॥ ३२ ॥
जमालिर्देशनां श्रुत्वा पितरावनुमान्य च । क्षत्रियाणां पञ्चशत्या सहितो व्रतमाददे ॥ ३३ ॥
जमालिभार्या भगवद्दुहिता प्रियदर्शना । सहिता स्त्रीसहस्रेण प्राव्राजीत् स्वामिनोऽन्तिके ॥ ३४ ॥
ययौ विहर्तुमन्यत्र ततश्च भगवानपि । जमालिरप्यनुचरः सहितः क्षत्रियर्षिभिः ॥ ३५ ॥
एकादशांगीमध्यैष्ट जमालिर्विहरन् क्रमात् । सहप्रव्रजितानां च तमाचार्यं व्यधात्प्रभुः ॥ ३६ ॥

चतुर्थषष्ठाष्टमादीन्यतप्यत तपांसि सः । चन्दनामनुगच्छन्ती सा चापि प्रियदर्शना ॥ ३७ ॥
नाथं जमालिर्नत्वोचेऽन्यदाऽहं सपरिच्छदः । विहारेणानियतेन प्रयामि त्वदनुज्ञया ॥ ३८ ॥
अनर्थं भाविनं ज्ञात्वा भगवान् ज्ञानचक्षुषा । भूयो भूयः पृच्छतोऽपि जमालेर्नोत्तरं ददौ ॥ ३९ ॥
अनिषिद्धमनुज्ञातं जमालिरिति बुद्धितः । विहर्तुं सपरीवारः प्रभुपार्श्वाद्विनिर्ययौ ॥ ४० ॥
क्रमेण विहरन् प्राप श्रावस्तीं सोऽन्यदा पुरीम् । बहिश्च समवासार्षीदुद्याने कोष्ठकाभिधे ॥ ४१ ॥
विरसैः शीतलै रुक्षैस्तुच्छैरसमयाशितैः । पानान्नैस्तस्य चान्येद्युस्तत्र पित्तज्वरोऽभवत् ॥ ४२ ॥
आसीनः सोऽसहः स्थातुं पंकान्तरिव कीलकः । संस्तारको मे क्रियतामित्युवाचान्तिषन्मुनीन् ॥ ४३ ॥
तेऽपि संस्तारकं कर्तुं प्रारभन्त महर्षयः । शिष्याः कुर्वन्ति गुर्वाज्ञां राजाज्ञामिव सेवकाः ॥ ४४ ॥
पित्तेन पीडितोऽत्यन्तं सोऽपृच्छच्च पुनः पुनः । किं संस्तृतः संस्तरको ? न वेति ब्रूत साधवः ! ॥ ४५ ॥
संस्तारकः संस्तृतोऽसावित्यूचुः साधवोऽपि हि । उत्थाय प्रययावार्तो जमालिश्च तदन्तिकम् ॥ ४६ ॥
संस्तरं संस्तीर्यमाणं प्रेक्ष्याक्षमवपुष्टया । निषद्योत्पन्नमिथ्यात्वः क्रुद्धः साधूनदोऽवदत् ॥ ४७ ॥
भो भोश्चिरं वयं भ्रान्तास्तत्त्वं ज्ञातं चिरादिदम् । क्रियमाणं न हि कृतं कृतमेव कृतं खलु ॥ ४८ ॥
संस्तरः संस्तीर्यमाणः संस्तीर्ण इति वर्णितः । यद्भवद्भिरसत्यं तन्न वक्तुं जातु युज्यते ॥ ४९ ॥
उत्पद्यमानमुत्पन्नं क्रियमाणं कृतं च यत् । ब्रूतेऽर्हंस्तन्न घटते प्रत्यक्षेण विरोधतः ॥ ५० ॥

परापरक्षणव्यूहयोगनिष्पद्यमानके । कार्ये कथं कृतमिति प्रारम्भेऽपि निगद्यते? ॥ ५१ ॥
अर्थक्रियाविधानुत्थं यस्य तस्यैव वस्तुता । पदार्थे प्रथमकालोत्पन्ने तदपि नास्ति हि ॥ ५२ ॥
अप्यारम्भे कृतमिति यदि शेषक्षणेषु तत् । कृतस्य करणे नूनमनवस्था प्रसज्यते ॥ ५३ ॥
तद्युक्तिसंगतमिदं कृतमेव कृतं स्फुटम् । न ह्यजातस्य पुत्रस्य नाम केनापि दीयते ॥ ५४ ॥
प्रत्यक्षं प्रतिपद्यध्वं निर्दोषं मुनयस्ततः । न ह्ययुक्तमिति गृह्णीम युक्तियुक्तं हि गृह्यते ॥ ५५ ॥
सर्वज्ञ इति विख्यातो नार्हन्मिथ्या वदेदिति । नैवं सोऽपि वदत्येव स्खलनं महतामपि ॥ ५६ ॥
एवं विभाषमाणं तं मुक्तमर्यादमुत्पथम् । जमालिमूचुः स्थविरा विपरीतं ब्रवीषि किम्? ॥ ५७ ॥
न जल्पन्त्यन्यथाऽर्हन्तो रागद्वेषविवर्जिताः । न प्रत्यक्षविरुद्धादिदोषलेशोऽपि तद्गिराम् ॥ ५८ ॥
यद्याद्य समये वस्तु निष्पन्नं नोच्यते तदा । समयाविशेषात्तस्योत्पत्तिर्न समयान्तरे ॥ ५९ ॥
अर्थक्रियासाधकत्वं वस्तुनो यच्च लक्षणम् । तदप्यव्यभिचार्येवाभिधाज्ञानोपयोगतः ॥ ६० ॥
तथाहि तादृशं वस्तु लोकैः प्रथमतोऽपि हि । किं करोषीति पृष्टः सन् घटाद्यभिधया वदेत् ॥ ६१ ॥
पूर्वकालकृते यच्चाऽनवस्था करणस्य हि । साप्यलीकाऽन्यान्यकार्यान्तरसाधनतः खलु ॥ ६२ ॥
छद्मस्थानां त्वादृशानां युक्तायुक्तविवेचनम् । कथं भवेद्युक्तियुक्तं त्वद्वचो येन गृह्यते ॥ ६३ ॥

सर्वज्ञः केवलालोकज्ञातत्रैलोक्यवस्तुकः । प्रमाणं भगवान् वीरो युक्तयुक्ती मुधैव ते ॥ ६४ ॥
यदवादीर्जमाले ! त्वं स्खलनं महतामिति । मत्तस्येव प्रमत्तस्येवोन्मत्तस्येव ते वचः ॥ ६५ ॥
क्रियमाणं कृतमिति साधु सर्वज्ञभाषितम् । न चेत्तद्वचसा राज्यं संत्यज्य प्राव्रजः कथम् ? ॥ ६६ ॥
अदूष्यं दूषयंस्तस्य वचनं किं न लज्जसे ? । निमज्जसि भवाम्भोधौ किमनेन स्वकर्मणा ॥ ६७ ॥
प्रायश्चित्तं गृहाण त्वं श्रीवीरस्वामिनोऽन्तिके । निजं तपो जन्म चेदं मा स्म नैषीर्निरर्थकम् ॥ ६८ ॥
अप्येकाक्षरमात्रं यः श्रद्धात्यर्हतां न हि । प्रपद्यते स मिथ्यात्वं ततो भवपरंपराम् ॥ ६९ ॥
बहुधा स्थविरैरेवं जमालिर्बोधितोऽपि हि । न न्यवर्तिष्ट कुमतान्मौनमेव तु शिश्रिये ॥ ७० ॥
कुमतप्रतिपक्षं तं हित्वा केऽपि तदैव हि । स्थविराः स्वामिनं जग्मुः केऽपि तत्रावतस्थिरे ॥ ७१ ॥
मोहेन स्त्रीसुलभेन प्राक् स्नेहेन च शिश्रिये । जमालिपक्षं सपरीवाराऽपि प्रियदर्शना ॥ ७२ ॥
क्रमाज्जमालिरुद्ग्राह्य आत्मानमपरानपि । व्युद्ग्राहयन् दुर्मतेन तेन च प्रतिवासरम् ॥ ७३ ॥
हसन् जिनेन्द्रवचनं सर्वज्ञोऽहमिति ब्रुवन् । साहंकारः प्रववृते विहर्तुं सपरिच्छदः ॥ ७४ ॥ (युग्मम्)
सोऽन्येद्युः पुरिचंपायां पूर्णभद्राभिधे वने । श्रीवीरं समवसृतं गत्वाऽवादीन्मदोद्धुरः ॥ ७५ ॥
छद्मस्था असमुत्पन्नकेवला भगवंस्तव । शिष्या विपन्ना भूयांसस्तादृगस्मि न खल्वहम् ॥ ७६ ॥

१ युक्तायुक्ते C ॥ २ °रा L ॥

अक्षये मे समुत्पन्ने केवलज्ञानदर्शने । सर्वज्ञः सर्वदर्शी चाहमेवार्हन्निह क्षितौ ॥ ७७ ॥
अथोचे गौतमस्त्वं भो ! जमाले! ज्ञानवान् यदि । किं शाश्वतोऽशाश्वतो वा जीवो लोकश्च शंस तत् ७८
तस्य प्रत्युत्तरं मूढो जमालिर्दातुमक्षमः । प्रसारितमुखस्तस्थौ शून्यो वायसपोतवत् ॥ ७९ ॥
अथोचे भगवान् वीरो जमाले! विद्धि तत्त्वतः । शाश्वतोऽशाश्वतश्चायं लोको जीवोऽपि लोकवत् ॥ ८० ॥
लोकोऽयं द्रव्यरूपत्वाच्छाश्वतोऽशाश्वतः पुनः । प्रतिक्षणपरिध्वंसिपर्यायापेक्षया खलु ॥ ८१ ॥
जीवोऽपि द्रव्यरूपत्वापेक्षत्वेनैष शाश्वतः । अशाश्वतो नृदेवादिपर्यायान्तरसंभवात् ॥ ८२ ॥
एवमाख्यात्यपि नाथे मिथ्यात्वमथिनाशयः । निर्ययौ समवसृतेर्जमालिः सपरिच्छदः ॥ ८३ ॥
ततो जमालिः संघेन निह्नवत्वाद्बहिष्कृतः । स्वामिनः केवलोत्पत्तेस्तदाऽब्दानि चतुर्दश ॥ ८४ ॥
स्वदर्शनाभिप्रायं स सर्वत्रापि प्ररूपयन् । स्वच्छन्दचारी सर्वज्ञमानी व्यहरतावनिम् ॥ ८५ ॥
जज्ञे प्रसिद्धिः सर्वत्र यज्जमालिर्जगद्गुरोः । मोहाद्विप्रतिपन्नः सन् मिथ्यात्वं प्रतिपन्नवान् ॥ ८६ ॥
विहरन्नन्यदा सोऽगाच्छ्रावस्तीं नगरीं पुनः । तस्थावेकत्र चोद्याने परिवारसमावृतः ॥ ८७ ॥
आर्यासहस्रसहिता साप्यार्या प्रियदर्शना । तस्थौ ढंककुलालस्य शालायामृद्धिशालिनः ॥ ८८ ॥
परमश्रावको ढंकस्तां दृष्ट्वा कुमतस्थिताम् । बोधयिष्याम्युपायेन केनापीति व्यचिन्तयत् ॥ ८९ ॥
स भाण्डान्यन्यदोचिन्वन् बुद्धिपूर्वमलक्षितम् । पटे प्रियदर्शनायाश्चिक्षेप हुतभुक्कणम् ॥ ९० ॥ ॥ २२

दह्यमानं पटं प्रेक्ष्य बभाषे प्रियदर्शना । भो ढंक ! त्वत्प्रमादेन पश्य दग्धः पटो मम ॥ ९१ ॥
ढंकोऽप्युवाच मा साध्वि ! मृषा वादीर्मते हि वः । सकलेऽपि पटे दग्धे युज्यते वक्तुमीदृशम् ॥ ९२ ॥
दह्यमानोऽपि दग्धोऽयमिति वाक् श्रीमदर्हताम् । युज्यते प्रतिपत्तुं तत्तद्वचोऽनुभवादपि ॥ ९३ ॥
तच्छ्रुत्वा साऽपि चोत्पन्नशुद्धधीरभ्यधादिति ! अहं चिरविमूढाऽपि त्वया साध्वस्मि बोधिता ॥ ९४ ॥
ही दूषितमियत्कालं श्रीवीरस्वामिनो वचः । तन्मिथ्यादुष्कृतं मेऽस्तु तत्प्रमाणमतः परम् ॥ ९५ ॥
अथ ढंको बभाषे तां साधु चेतितवत्यसि । गच्छाधुनापि सर्वज्ञं प्रायश्चित्तं समाचर ॥ ९६ ॥
ढंकेनेत्युदितेच्छामोऽनुशिष्टिमिति भाषिणी । हित्वा जमालिं सपरीवारा वीरं जगाम सा ॥ ९७ ॥
जमालिवर्जमन्येऽपि ढंकेन प्रतिबोधिताः । सर्वेऽपि मुनयो जग्मुः श्रीवीरस्वामिनोऽन्तिके ॥ ९८ ॥
ततो जमालिरेकाकी कुमतेन प्रतारयन् । महीं पर्यट्य भूयांसि वर्षाणि व्रतमाचरन् ॥ ९९ ॥
अन्तेऽर्धमासानशनं कृत्वा दुष्कर्म तन्निजम् । अनालोच्य मृतः कल्पे षष्ठे किल्बिषिकोऽभवत् ॥ १०० ॥
मृतं जमालिं विज्ञाय वन्दित्वा गौतमः प्रभुम् । पप्रच्छ कां गतिं प्राप ? जमालिः स महातपाः ॥ १०१ ॥
स्वाम्याख्यल्लान्तके कल्पेऽभवत् किल्बिषिकामरः । त्रयोदशसमुद्रायुर्जमालिः स तपोधनः ॥ १०२ ॥
भूयोऽपि गौतमोऽपृच्छत्तपोभिस्तादृशैरपि । सोऽभूत् किल्बिषिकः कस्माच्च्युत्वा च क्व स यास्यति ? १०३
अथाख्यद्भगवान् धर्मगुरूणां शीलशालिनाम् । उपाध्यायकुलगणसंघानां च विरोधिनः ॥ १०४ ॥

तपस्तप्त्वाऽपि जायन्ते जीवाः किल्बिषिकादिषु । जमालिरपि दोषेण तेन किल्बिषिकोऽभवत् ॥ १०५ ॥

(युग्मम्)

च्युत्वा ततः पञ्चकृत्वो भ्रान्त्वा तिर्यङ्नरादिषु । अवाप्तबोधिर्निर्वाणं जमालिः समवाप्स्यति ॥ १०६ ॥

धर्माचार्यप्रभृतीनां तत्र भाव्यं विरोधिना । एवमाख्याय भगवान् विहरन्नन्यतो ययौ ॥ १०७ ॥

इतश्च साकेतपुरे यक्षो नाम्ना सुरप्रियः । स चित्र्यते च प्रत्यब्दं क्रियते च महोत्सवः ॥ १०८ ॥

स चित्रकं चित्रकरं चित्रितः सन्निहन्ति च । अचित्रितः पुनर्मारिं विकरोति पुरेऽखिले ॥ १०९ ॥

ततो भीताश्चित्रकराः प्रावर्तन्त पलायितुम् । रुद्धाश्च भूभुजा सर्वे स्वप्रजामारिभीरुणा ॥ ११० ॥

तेषामात्तप्रतिभुवां लिखित्वा पत्रकेषु च । घटे क्षिप्तानि नामानि यमाक्षपटलोपमे ॥ १११ ॥

आपातमात्रेणाकृष्टमब्देऽब्दे यस्य पत्रकम् । निर्ययौ चित्रकृद्यक्षं स गत्वा तमचित्रयत् ॥ ११२ ॥

एवं व्रजति काले च कौशाम्ब्या एकदैककः । चित्रकृद्दारकस्तत्र चित्रशिक्षार्थमाययौ ॥ ११३ ॥

चित्रकृत्स्थविरायाः स तस्थौ कस्याश्चिदोकसि । समं तत्सूनुना मैत्री जज्ञे तस्य क्रमेण च ॥ ११४ ॥

तदा च स्थविरासूनोर्निर्ययौ नामपत्रकम् । कृतान्तोत्क्षिप्तपत्राभं स्थविरा सा रुरोद च ॥ ११५ ॥

कौशाम्बीचित्रकृत्सूना पृष्टा रुदितकारणम् । सा चख्यौ यक्षवृत्तान्तं स्वपुत्रस्य च वारकम् ॥ ११६ ॥

सोऽप्यभाषिष्ट मा रोदीर्मातस्तिष्ठतु ते सुतः । चित्रकृद्रक्षकं यक्षं चित्रयिष्याम्यहं हि तम् ॥ ११७ ॥ ॥२२

उवाच स्थविराऽप्येवं वत्स त्वमपि मे सुतः । सोऽप्युवाचाम्ब ! मे भ्राता मयि सत्यस्तु सुस्थितः ॥११८॥
स कृत्वा समये षष्ठं स्नात्वा चन्दनचर्चितः । शुच्यंशुकोऽष्टगुणया पट्या संयमिताननः ॥ ११९ ॥
नूतनैः कूर्चकैरग्र्यैर्वर्णकैस्तमचित्रयत् । चित्रकृद्दारको यक्षं नत्वा चैवमवोचत ॥ १२० ॥
सुरप्रिय सुरश्रेष्ठ निमातु चित्रकर्म ते । कोऽलमत्यन्तनिष्णोऽपि मुग्धः कोऽहं वराककः ॥ १२१ ॥
तथापि हि यथाशिक्षं यक्षराज ! मया कृतम् । युक्तायुक्तं तत्क्षमस्व निग्रहानुग्रहक्षम ! ॥ १२२ ॥
एवं तस्य गिरा तुष्टो यक्षो विनयसारया । ऊचे वरं वृणीष्वेति बभ्रे चित्रकृदप्यदः ॥ १२३ ॥
त्वं देव ! यदि तुष्टोऽसि वराकस्य ममाधुना । वरस्तदयमेवास्तु मार्यो नातः परं जनः ॥ १२४ ॥
यक्षोऽप्यूचे सिद्धमेतद्यत्त्वं नैव विनाशितः । अन्यद्याचस्व भो भद्र ! स्वार्थसिद्धिनिबन्धनम् ॥ १२५ ॥
चित्रकृत्पुनरूचेऽथ मारिश्चेद्रक्षिता त्वया । संजातः कृतकृत्योऽहं स्वामिंस्तेनायतापि हि ॥ १२६ ॥
विस्मितोऽथावदद्यक्षः परार्थवरयाच्ञया । भूयोऽपि तव तुष्टोऽस्मि वृणु स्वार्थकृते वरम् ॥ १२७ ॥
उवाच चित्रकृदपि तुष्टोऽसि यदि देव ! मे । यस्य द्विपदस्य चतुःपदस्यान्यस्य वापि च ॥ १२८ ॥
पश्याम्येकांशमपि हि तदंशस्यानुसारतः । यथावस्थिततद्रूपालेखने शक्तिरस्तु मे ॥ १२९ ॥ (युग्मम्)
एवमस्त्विति यक्षेणोदितः पौरैश्च पूजितः । ययौ पुरीं स कौशाम्बीं शतानीकनृपाश्रिताम् ॥ १३० ॥

---

१ रत्नेऽह ! ॥

तत्रान्यदा शतानीकः सभास्थो गर्वितः श्रिया । ऊचे दूतं नास्ति किं मे यदस्ति परभूभुजाम् ॥ १३१ ॥
तव चित्रसभा नास्तीत्यूचे दूतेन भूपतिः । स चाऽदिशच्चित्रकरान् सभाचित्रणहेतवे ॥ १३२ ॥
चित्रकृद्भिः सभाभूमिर्विभज्य जगृहे च सा । अन्तःपुरासन्नदेशस्तस्य चित्रकृतस्त्वभूत् ॥ १३३ ॥
चित्रं तत्र च कुर्वाणो जालकस्यान्तरेण सः । पादाङ्गुष्ठं मृगावत्या देव्याः सोर्मिकमैक्षत ॥ १३४ ॥
इयं मृगावती देवीत्यनुमानात् स चित्रकृत् । आलिखत्तां तथारूपां यक्षराजप्रसादतः ॥ १३५ ॥
उन्मील्यमाने नेत्रे तूरुमूले कूर्चिकामुखात् । निपपात मषीबिन्दुः सोऽपनिन्ये च तं द्रुतम् ॥ १३६ ॥
भूयोऽपतन्मषीबिन्दुर्भूयः सोऽपि ममार्ज तम् । भूयश्च पतितं प्रेक्ष्य स चित्रकृदचिन्तयत् ॥ १३७ ॥
नूनं लाञ्छनमेतस्याः प्रदेशे ह्यत्र विद्यते । भवितव्यं ततोऽनेन नापनेष्याम्यतः परम् ॥ १३८ ॥
एवं समापिते चित्रे तत्रागादीक्षितुं नृपः । पश्यन् क्रमेण तद्रूपं मृगावत्याः ददर्श च ॥ १३९ ॥
ऊरौ प्रेक्ष्य च तं बिन्दुं क्रुद्धो राजा व्यचिन्तयत् । विध्वस्ता नूनमेतेन पापेन मम पत्न्यसौ ॥ १४० ॥
अन्यथा वस्त्रमध्यस्थं मषग्रन्थिं मृगीदृशः । मृगावत्या विजानीयात् कथमेष दुराशयः ॥ १४१ ॥
इति कोपेन तं दोषमुदीर्य नृपतिः स्वयम् । आरक्षकाणां तं सद्यो निग्रहाय समार्पयत् ॥ १४२ ॥
नृपं चित्रकृतोऽथोचुरसावेकांशदर्शनात् । लिखत्यखिलमालेख्यं यक्षदत्तवरौजसा ॥ १४३ ॥
इत्युक्ते तत्परीक्षार्थं क्ष्माभुजा क्षुद्रचेतसा । वरचित्रकृतस्तस्य दर्शितं कुब्जिकामुखम् ॥ १४४ ॥

कुब्जिकां तां यथारूपां[1] सोऽथ चित्रकरोऽलिखत् । तथाप्यमर्षाद्राजा तत्संदंशकमकर्तयत् ॥ १४५ ॥
चित्रकृत् सोऽपि तं यक्षं गत्वाऽभ्यगदुपोषितः । सोऽप्यूचे वामहस्तेन तद्वच्चित्रं करिष्यसि ॥ १४६ ॥
एवं लब्धवरश्चित्रकरोऽमर्षादचिन्तयत् । अहं निरागास्तेनेमां किं राज्ञा प्रापितो दशाम् ॥ १४७ ॥
तस्य प्रतिकरिष्येऽहमुपायेनापि केनचित् । कुर्वन्ति विक्रमासाध्यं साध्यं बुद्ध्यैव धीधनाः ॥ १४८ ॥
एवं विमृश्य फलके कल्पिताकल्पभूषणाम् । विश्वैकभूषणं देवीं स लिलेख मृगावतीम् ॥ १४९ ॥
स्त्रीलोलस्य प्रचण्डस्य चण्डप्रद्योतभूपतेः । गत्वा मृगावतीरूपं स मनोज्ञमदर्शयत् ॥ १५० ॥
तत्प्रेक्ष्य चण्डप्रद्योतस्तमूचे चित्रकृद्वर ! । विज्ञानकौशलं मन्ये तवेदं न तु वेधसः ॥ १५१ ॥
न दृष्टपूर्वं मर्त्येऽस्मिन् श्रुतपूर्वं न वा दिवि । कथं रूपमलेखीदं प्रतिच्छन्दं विना त्वया ॥ १५२ ॥
आख्याहि सत्यतः क्वेयं येन गृह्णाम्यमूमहम् । अस्थाने कश्चिदस्त्येषा मय्येवौचित्यमञ्चति ॥ १५३ ॥
पूर्णो मनोरथो मेऽसाविति हृष्टोऽथ चित्रकृत् । शशंस पुरि कौशाम्ब्यां शतानीकोऽस्ति भूपतिः ॥ १५४ ॥
नाम्ना मृगावती पूर्णमृगांकास्या मृगेक्षणा । एषाऽग्रमहिषी तस्य मृगारातिसमौजसः ॥ १५५ ॥
लेखितुं तां यथावस्थां विश्वकर्माऽपि न क्षमः । मया तु किंचिल्लिखिता दूरे सा वचसामपि ॥ १५६ ॥

१ °रूपं C ॥

उवाच चण्डप्रद्योतः शतानीकस्य पश्यतः । मृगस्येव मृगीं[1] सिंहो ग्रहीष्यामि मृगावतीम् ॥ १५७ ॥
राजनीतिस्तथाऽप्यस्तु यातु दूतस्तदर्थने । अनर्थः प्रथमं तस्य मा भूदादेशकारिणः ॥ १५८ ॥
इति प्रैषीद्वज्रजंघं सोऽनुशिष्य तदन्तिके । गत्वा सोऽपि शतानीकं दूतराडेवमब्रवीत् ॥ १५९ ॥
शतानीकादिशति त्वां चण्डप्रद्योतभूपतिः । देवी मृगावती लब्धा त्वया दैवादियं खलु ॥ १६० ॥
स्त्रीरत्नमीदृशं योग्यं मामेव त्वं हि कीदृशः । तच्छीघ्रं प्रेषयास्मभ्यं राज्यं प्राणाश्च चेत्प्रियाः ॥ १६१ ॥
शतानीकोऽप्यथोवाच कोपाद्रे दूतपांशन ! । अनाचारं वदन्नेवं दूतत्वान्नात्र हन्यसे ॥ १६२ ॥
ईदृग्मय्यप्यनागसे यस्येच्छा तस्य पाप्मनः । स्वाधीनायां क आचारः प्रजायां हन्त वर्तते ॥ १६३ ॥
शतानीकनृपेणैवं दूतो निर्भर्त्स्य निर्भयम् । निर्वासितोऽगादवन्त्यां प्रद्योतस्य शशंस च ॥ १६४ ॥
क्रुद्धोऽथ चण्डप्रद्योतः सैन्यैराच्छादयन् दिशः । चचाल प्रतिकौशाम्बि निर्मर्याद इवार्णवः ॥ १६५ ॥
श्रुत्वा प्रद्योतमायान्तं गरुत्मन्तमिवोरगः । जातातिसारः प्रक्षोभाच्छतानीको व्यपद्यत ॥ १६६ ॥
देवी मृगावती दध्यौ पतिस्तावद्व्यपादि मे । बालः स्वल्पबलः सूनुरसावुदयनोऽपि च ॥ १६७ ॥
बलीयसोऽनुसरणं नीतिः स्त्रीलम्पटे त्विह । सा मे कुलकलंकाय तस्माच्छद्मेह युज्यते ॥ १६८ ॥
वाचिकैरनुकूलैस्तदेनमत्र स्थिताऽप्यहम् । प्रलोभ्य कालं नेष्यामि समयप्राप्तिकांक्षया ॥ १६९ ॥

१ मृगी C. L. ॥

विमृश्यैवमनुशिष्य दूतः प्रस्थापितस्तया । स्कन्धावारस्थितं गत्वा चण्डप्रद्योतमब्रवीत् ॥ १७० ॥
ब्रूते मृगावतीति त्वां शतानीके दिवं गते । त्वमेव शरणं किं तु पुत्रोऽप्राप्तबलो मम ॥ १७१ ॥
मयाऽयं[1] मुक्तः प्रत्यन्तभूपैरभिभविष्यते । भृशं पितृविपत्त्युत्थैः शोकावेगैरिवोल्बणैः ॥ १७२ ॥
प्रद्योतस्तद्गिरा हृष्टोऽभाषिष्ट ननु तत्सुतम् । पराभवितुमीशः स्यात् को नाम मयि गोप्तरि ॥ १७३ ॥
दूतोऽवदत् पुनर्देव ! देव्यैतदपि भाषितम् । प्रद्योते स्वामिनि सुतं न जेतुं कश्चिदीश्वरः ॥ १७४ ॥
देवपादाः परं दूरे समीपे सीमभूभुजः । तदौषध्यो हिमगिरावहिरुच्छीर्षके पुनः ॥ १७५ ॥
त्वं निर्विघ्नं मया योगं यदीच्छसि कुरुष्व तत् । उज्जयिन्या इष्टकाभिः कौशाम्ब्यां वप्रमुत्कटम् ॥ १७६ ॥
प्रद्योतस्तत्क्षेपे[2] देऽथ मार्गे[3] श्रेणितया निजान् । चतुर्दशापि नृपतीनमुचत् सपरिच्छदान् ॥ १७७ ॥
पुंस्परम्परयाऽवन्त्याः समानीय स इष्टकाः । कौशाम्ब्या वप्रमकरोद्बलिष्ठमचिरादपि ॥ १७८ ॥
भूयो मृगावती दूतमुखेनोचे पुरीमिमाम् । धनधान्येन्धनाद्यैस्त्वं प्रद्योत नृप ! पूरय ॥ १७९ ॥
सर्वमाशु तथा चक्रे चण्डप्रद्योतभूपतिः । किं किं करोति न पुमानाशापाशवशीकृतः ॥ १८० ॥
पुरीं रोधक्षमां ज्ञात्वा धीमत्यथ मृगावती । तस्थौ पिधाय द्वाराणि वप्रे चारोपयद्भटान् ॥ १८१ ॥
चण्डप्रद्योतराजोऽपि तस्थौ रुद्ध्वाऽभितः पुरीम् । प्रालम्बभ्रष्टकपिवत् परं वैलक्ष्यमुद्वहन् ॥ १८२ ॥

१ मया स L ॥ २ °क्षितिषे C, L ॥ ३ °देमा° L, L ॥

अष्टमः सर्गः

अन्येद्युरुद्यद्वैराग्या दध्यावेवं मृगावती। यद्येति भगवान् वीरः प्रव्रजामि तदा ह्यहम्॥ १८३॥
इमं च तस्याः संकल्पं विज्ञाय परमेश्वरः। सुरासुरपरीवारोऽचिरादेव समाययौ॥ १८४॥
बहिश्च समवसृतं श्रुत्वाऽर्हन्तं मृगावती। द्वाराण्युद्घाट्य निर्भीका महाऋद्ध्या समाययौ॥ १८५॥
सा वन्दित्वा जगन्नाथं यथास्थानमवास्थित। प्रद्योतोऽप्येत्य वन्दित्वा त्यक्तवैरमुपाविशत्॥ १८६॥
आयोजनविसर्पिण्या सर्वभाषानुयातया। गिरा श्रीवीरनाथोऽथ विदधे धर्मदेशनाम्॥ १८७॥
सर्वज्ञोऽसाविति जनाच्छ्रुत्वैको धन्वभृत्पुमान्। संशयं मनसाऽपृच्छद्दूरस्थो जगद्गुरुम्॥ १८८॥
तं बभाषे जगन्नाथो वचसा पृच्छ संशयम्। अन्येऽपि प्रतिबुध्यन्ते भव्यसत्त्वा अमी यथा॥ १८९॥
इत्युक्तेऽपि त्रपानिघ्नो व्यक्तं वक्तुमनीश्वरः। स ऊचे भगवन् या सा सा सेति प्रमिताक्षरम्॥ १९०॥
एवमेतदिति स्वामी प्रोचे मुकुलिताक्षरम्। पप्रच्छ गौतमः स्वामिन्! या सा सा सेति किं वचः॥ १९१॥
अथाचचक्षे भगवानिहैव भरते पुरि। चम्पायां स्वर्णकारोऽभूदेकः स्त्रीलम्पटः पुरा॥ १९२॥
यां यां रूपवतीं कन्यामपश्यद्विचरन् भुवि। पञ्चस्वर्णशतीं दत्त्वा तां तां परिणिनाय सः॥ १९३॥
पर्यणैषीत् क्रमादेवं स्त्रीणां पंचशतानि सः। सर्वांगीणाभरणानि तासां प्रत्येकमप्यदात्॥ १९४॥
वारकोऽभूद्यदा यस्याः सर्वालंकारभृत्तदा। स्नानांगरागलिप्तांगी तेन रन्तुं ससज्ज सा॥ १९५॥

१ °वत् C. L. M.॥

अन्यदाऽस्युरुपशान्तवेशाः सर्वाश्च तत्स्त्रियः। अन्यथाऽशिक्षयत्ताः स तर्जनाताडनादिभिः ॥ १९६ ॥
अनीर्ष्यालुतया तासां रक्षणार्थं समुद्यतः। न जातु स गृहद्वारं सौविदल्ल इवामुचत् ॥ १९७ ॥
भोजनं स्वजनेभ्योऽपि न सोऽदत्त निजे गृहे। नाभुक्त स्वयमप्यन्यगृहे तासामविश्वसन् ॥ १९८ ॥
अन्यदा प्रियमित्रेणानिच्छन्नपि निमन्त्रितः। निन्ये निजगृहे भोक्तुमिदं मैत्र्या हि लक्षणम् ॥ १९९ ॥
तदा च दध्युस्तत्पत्न्यो धिग्गृहं धिक् च यौवनम्। धिग्जीवितं च तिष्ठामो यद्गुप्ताविव यन्त्रिताः २००
यमदूत इव द्वारं पापः पतिरयं हि नः। न जातु मुंचति चिरादद्य साध्वन्यतो ययौ ॥२०१ ॥
तिष्ठामः स्वेच्छया तावत् क्षणमद्येति बुद्धितः। स्नात्वाऽङ्गरागमाकल्पं वरमाल्यादि चादधुः ॥ २०२ ॥
यावद्दर्पणमादाय स्वं पश्यन्त्योऽवतस्थिरे। तास्तावदाययौ स्वर्णकारो दृष्ट्वा च सोऽकुपत् ॥ २०३ ॥
तत्रैकां महिलां पापः स तथाऽताडयद् भृशम्। यथा व्यपादि सा दन्तिपादाक्रान्तेव पद्मिनी ॥ २०४॥
मन्त्रयाञ्चक्रिरेऽथान्या हनिष्यत्येष नोऽपि हि। संभूय हन्मस्तदमुं रक्षितेनामुना हि किम् ? ॥ २०५ ॥
एवं विचिन्त्य तास्तस्मै चक्राणीव प्रचिक्षिपुः। शतानि पंचैकोनानि दर्पणानामशंकिताः ॥ २०६ ॥
विपेदे सोऽपि तत्कालं सानुतापाश्च ताः स्त्रियः। चितावज्ज्वालयित्वौको व्यपद्यन्त क्षणादपि ॥ २०७ ॥
सानुतापतया ताश्चाकामनिर्जरया मृताः। शतानि पंचैकोनानि मनुष्यत्वेन जज्ञिरे ॥ २०८ ॥
दैवद्दुर्योगतश्चौर्यजीविनो मिलिताः क्रमात्। एकत्र दुर्गे तिष्ठन्तश्चौर्यं संभूय कुर्वते ॥ २०९ ॥

सोऽप्युत्पेदे स्वर्णकारस्तिर्यक्षु प्राग्मृता तु सा । ततस्त्युत्पद्य तिर्यक्षु पुत्रो विप्रकुलेऽभवत् ॥ २१० ॥
पंचाब्दके तत्र जाते निर्यक्त्वात् स्वर्णकृत् स तु । तत्कुले भगिनीत्वेन तस्यैव समजायत ॥२११॥
तस्याश्च पालकश्चक्रे पितृभ्यां स तु दारकः । अतिदुष्टतयाऽरोदीत् पाल्यमानाऽपि तेन सा ॥ २१२ ॥
उदरस्पर्शनं तस्याः कुर्वता तेन चान्यदा । गुह्ये कथमपि स्पृष्टा सा न्यवर्तिष्ट रोदनात् ॥ २१३ ॥
तद्रोदनप्रतीकारं तं ज्ञात्वा स तु दारकः । तस्या रुदत्यास्तत्स्थानस्पर्शं चक्रे तथैव हि ॥ २१४ ॥
तथा कुर्वन् पितृभ्यां सोऽन्यदा ज्ञातो निहत्य च । निर्वासितो निजगृहाद्ययौ च गिरिगह्वरे ॥ २१५ ॥
शतानि पंचैकोनानि दस्यवो यत्र तेऽवसन् । तां पल्लीं सोऽगमत्तैश्च चौरैः संयुयुजेतराम् ॥ २१६ ॥
तस्य सा ऽनासतारुण्याऽप्यभवत् कुलटैव सा । स्वेच्छया पर्यटन्ती च ग्रामे काप्यन्यदा ययौ ॥ २१७ ॥
तैस्तस्करैः स तु ग्रामस्तदैवागत्य लुण्टितः । गृहीता दारिका सा तु भार्याचक्रेऽखिलैरपि ॥ २१८ ॥
तेऽन्यदाऽचिन्तयंश्चौरा यदेकेयं वराकिका । सर्वेषां सेवयाऽस्माकं मरिष्यत्यचिरादपि ॥ २१९ ॥
ते विमृश्यैवमानिन्युरपरामपि योषितम् । ईर्ष्यया पूर्वभार्या सा तच्छिद्राणि स्म मार्गति ॥ २२० ॥
चौराश्चौर्याय चान्येद्युर्ययुः साप्याप्य तच्छलम् । उपकूपं सपत्नीं तां निन्ये व्याजेन केनचित् ॥ २२१ ॥
ऊचे च भद्रे ! कूपान्तः किमप्यस्तीह पश्य तत् । साप्यद्रष्टुमारेभे मध्ये क्षिप्ता ततस्तया ॥ २२२ ॥
आगता दस्यवस्ते च तां पप्रच्छुः क सा ननु । साऽवोचत् किमहं वेद्मि स्वप्रियां किं न रक्षथ? ॥ २२३ ॥

॥२३५॥

नैर्ग्रन्थमनया यस्मा वराकी मारितेर्ष्यया । दुःशीला मत्स्वसैषा किं विममर्शेति स द्विजः ॥ २२४ ॥
सर्वज्ञोऽत्रागतोऽस्तीति श्रुत्वा लोकादिहागतः । प्रागेष मनसाऽपृच्छत् स्वसृदुःशीललज्जया ॥ २२५ ॥
मयोक्तं पृच्छ वाचेति या सा सा सेति पृष्टवान् । अस्माभिश्चैवमित्युक्त्वा तां जामिं ज्ञापितो ह्यसौ २२६
एवं च रागद्वेषाद्यैर्मूढात्मानो भवे भवे । भ्राम्यन्ति भविनो नानादुःखभाजनतां गताः ॥ २२७ ॥
एवमाकर्ण्य स पुमान् परं संवेगमागतः । स्वामिपार्श्वे प्रवव्रजे तां पल्लीं पुनरप्यगात् ॥ २२८ ॥
प्रबोधिता चौरपुंसा तेन प्रव्रजितेन च । एकोना सा पंचशती चौराणामग्रहीद्व्रतम् ॥ २२९ ॥
उत्थाय स्वामिनं नत्वा जगादाथ मृगावती । चण्डप्रद्योतमापृच्छ्य प्रव्रजिष्याम्यहं प्रभो ! ॥ २३० ॥
साऽथ प्रद्योतमप्यूचे यदि त्वमनुमन्यसे । प्रव्रजामि भवोद्विग्ना तदा पुत्रस्तु तेऽर्पितः ॥ २३१ ॥
स्वामिप्रभावान्निर्वाणवैरः प्रद्योतभूपतिः । तामनुज्ञाय कौशाम्ब्यां चक्रारोदयनं नृपम् ॥ २३२ ॥
सहागृह्णन्मृगावत्या प्रव्रज्यां स्वामिसन्निधौ । अष्टावंगारवत्याद्याः प्रद्योतनृपतेः प्रियाः ॥ २३३ ॥
मृगावत्याद्याः प्रभुणाऽप्यनुशिष्य समर्पिताः । चन्दनायास्तदुपास्त्या सामाचारीं च जज्ञिरे ॥ २३४ ॥
इतश्चास्ति निरुपमं परमाभिर्विभूतिभिः । नाम्ना वाणिजकग्राम इति ख्यातं महापुरम् ॥ २३५ ॥
तत्र प्रजानां विधिवत्पितेव परिपालकः । जितशत्रुरिति ख्यातो बभूव पृथिवीपतिः ॥ २३६ ॥
आसीद् गृहपतिस्तत्र नयनानन्ददर्शनः । आनन्दो नाम मेदिन्यामायात इव चन्द्रमाः ॥ २३७ ॥

सधर्मचारिणी तस्य रूपलावण्यहारिणी । बभूव शिवनन्देति शशांकस्येव रोहिणी ॥ २३८ ॥
निधौ वृद्धौ व्यवहारे चतस्रोऽस्य पृथक् पृथक् । हिरण्यकोट्योऽभूवंश्चत्वारश्च व्रजा गवाम् ॥ २३९ ॥
तत्पुरादुत्तरप्राच्यां कोल्लाकाख्योपपत्तने । आनन्दस्यातिबहवो बन्धुसंबन्धिनोऽभवन् ॥ २४० ॥
तदा च पृथ्वीं विहरञ्जिनः सिद्धार्थनन्दनः । तत्पुरोपवने दूतिपलाशे समवासरत् ॥ २४१ ॥
जितशत्रुर्महीनाथस्त्रिजगन्नाथमागतम् । श्रुत्वा ससंभ्रमोऽगच्छद्वन्दितुं सपरिच्छदः ॥ २४२ ॥
आनन्दोऽपि ययौ पद्भ्यां पादमूले जगत्पतेः । कर्णपीयूषगण्डूषकल्पां श्रुत्वा च देशनाम् ॥ २४३ ॥
अथानन्दः प्रणम्यांह्री त्रिजगत्स्वामिनः पुरः । जग्राह द्वादशविधं गृहिधर्मं महामनाः ॥ २४४ ॥
शिवनन्दामन्तरेण स्त्रीः स तत्याज हेम तु । चतस्रश्चतस्रः स्वर्णकोटीर्निध्यादिगा विना ॥ २४५ ॥
प्रत्याचख्यौ व्रजानेष ऋते च चतुरो व्रजान् । क्षेत्रत्यागं च विदधे हलपंचशतीं विना ॥ २४६ ॥
शकटान् वर्जयामास पंच पंचशतान्यृते । दिग्यात्राव्यापृतानां च वहतां चानसां स तु ॥ २४७ ॥
दिग्यात्रिकाणि चत्वारि स सांवाहनिकानि च । विहाय वहनान्यन्यवाहनानि व्यवर्जयत् ॥ २४८ ॥
अपरं गन्धकाषाय्याः स तत्याजांगपुंसनम् । दन्तधावनमार्द्रीयां मधुयष्टेर्ऋते जहौ ॥ २४९ ॥
वर्जयामास च क्षीरामलकादपरं फलम् । अभ्यंगं च विना तैले सहस्रशतपाकिमे ॥ २५० ॥

१ दूत° *D* । पूति° *M* ॥

अन्यत्सुरभिगन्धाढ्यादुद्वर्तनकमत्यजत् । अष्टभ्य औष्ट्रिकपयस्कुंभेभ्योऽन्यच्च मज्जनम् ॥ २५१ ॥
अपरं क्षौमयुगलाद्वासः सर्वमवर्जयत् । श्रीखंडागरुघुसृणान्यपास्यान्यद्विलेपनम् २५२ ॥
ऋते च मालतीमाल्यात् पद्माच्च कुसुमं जहौ । कर्णिकानाममुद्राभ्यामन्यच्चाशेषभूषणम् ॥ २५३ ॥
तुरुष्कागरुधूपेभ्य ऋते धूपविधिं जहौ । घृतपूरात्खंडखाद्यादपरं भक्ष्यमत्यजत् ॥ २५४ ॥
काष्ठपेयां विना पेयां कलमादन्यदोदनम् । माषमुद्गकलायेभ्य ऋते सूपमपाकरोत् ॥ २५५ ॥
घृतं च वर्जयामास विना शारदगोघृतात् । शाकं स्वस्तिकमंडूकीं पालक्यां च विना जहौ ॥ २५६ ॥
ऋते स्नेहाम्लदाल्यस्लास्तेमनं स्वाम्बुनोऽम्बु च । पंचसुगन्धितांबूलान्मुखवासं च सोऽमुचत् ॥ २५७ ॥
आनन्दः शिवनन्दाया उपेत्याथ ससंभ्रमः । अशेषं कथयामास गृहिधर्मं प्रतिश्रुतम् ॥ २५८ ॥
शिवाय शिवनन्दाऽपि यानमारुह्य तत्क्षणम् । भगवत्पादमूलेऽगाद् गृहिधर्मार्थिनी ततः ॥ २५९ ॥
तत्र प्रणम्य चरणौ जगत्त्रयगुरोः पुरः । प्रपेदे शिवनन्दाऽपि गृहिधर्मं समाहिता ॥ २६० ॥
अधिरुह्य ततो यानं विमानमिव भासुरम् । भगवद्वाक्सुधापानमुदिता सा गृहं ययौ ॥ २६१ ॥
अथ प्रणम्य सर्वज्ञमिति पप्रच्छ गौतमः । महात्माऽयं किमानन्दो यतिधर्मं ग्रहीष्यति ? ॥ २६२ ॥
त्रिकालदर्शी भगवान् कथयामासिवानिति । श्रावकव्रतमानन्दः सुचिरं पालयिष्यति ॥ २६३ ॥



॥ २६४

१ वालुक्यां M. ॥

ततः सौधर्मकल्पेऽसौ विमाने चारुणप्रभे । भविष्यत्यमरवरश्चतुःपल्योपमस्थितिः ॥ २६४ ॥
इतश्च जाह्नवीहंसश्रेणिभिरिव चारुभिः । चैत्यध्वजै राजमाना चम्पेत्यस्ति महापुरी ॥ २६५ ॥
भोगिभोगायतभुजस्तंभः कुलगृहं श्रियः । जितशत्रुरिति नाम्ना तस्यामासीन्महीपतिः ॥ २६६ ॥
अभूद् गृहपतिस्तस्यां कामदेवाभिधः सुधीः । आश्रयोऽनेकलोकानां महातरुरिवाध्वनि ॥ २६७ ॥
लक्ष्मीरिव स्थिरीभूता रूपलावण्यशालिनी । अभूद्भद्राकृतिर्भद्रा नाम तस्य सधर्मिणी ॥ २६८ ॥
निधौ षट् स्वर्णकोट्यः षट् वृद्धौ षट् व्यवहारगाः । व्रजाः षट् तस्य दशगोसहस्रमितयोऽभवन् ॥२६९॥
तदा च विहरन्नुर्वी तत्रोर्वीमुखमंडने । पूर्णभद्राभिधोद्याने श्रीवीरः समवासरत् ॥ २७० ॥
कामदेवोऽथ पादाभ्यां भगवन्तमुपागमत् । शुश्राव च श्रोत्रसुधां स्वामिनो धर्मदेशनाम् ॥ २७१ ॥
कामदेवस्ततो देवनरासुरगुरोः पुरः । प्रपेदे द्वादशविधं गृहिधर्मं विशुद्धधीः ॥ २७२ ॥
प्रत्याख्यत् स विना भद्रां स्त्रीर्व्रजान् षड्व्रजीं विना । निधौ वृद्धौ व्यवहारे षट् षट् कोटीर्विना वसु २७३
शेषं च वस्तुनियममानन्द इव सोऽग्रहीत् । ततः प्रभुं नमस्कृत्य ययौ निजनिकेतनम् ॥ २७४ ॥
स्वयमात्तं श्रावकत्वं तेनाऽऽख्याते च तत्प्रिया । भद्राऽप्युपेत्य जग्राह स्वाम्यग्रे श्रावकव्रतम् ॥ २७५ ॥
इतश्च काशिनाम्नाऽनुगंगमस्ति पुरी वरा । विचित्ररचनारम्या तिलकश्रीरिवावनेः ॥ २७६ ॥

१ पुष्पप्रभ° C. L. ॥

सुत्रामेवामरावत्यामविसूत्रितविक्रमः । जितशत्रुरभूत्तत्र धरित्रीधवपुंगवः ॥ २७७ ॥
आसीद् गृहपतिस्तस्यां महेभ्यश्चुलनीपिता । प्राप्तो मनुष्यधर्मेव मनुष्यत्वं कुतोऽपि हि ॥ २७८ ॥
जगदानन्दिनस्तस्यानुरूपा रूपशालिनी । श्यामा नामाभवद्भार्या श्यामेव तुहिनद्युतेः ॥ २७९ ॥
अष्टौ निधानेऽष्टौ वृद्धावष्टौ च व्यवहारगाः । इति तस्याभवन् हेम्नश्चतुर्विंशतिकोटयः ॥ २८० ॥
एकैकशो गोसहस्रैर्दशभिः प्रमितानि तु । तस्याऽऽसन् गोकुलान्यष्टौ कुलवेश्मानि संपदाम् ॥ २८१ ॥
तस्याः पुर्यामथान्येद्युरुद्याने कोष्ठकाभिधे । भगवान् समवसृतो विहरंश्चरमो जिनः ॥ २८२ ॥
ततो भगवतः पादवन्दनाय सुरासुराः । सेन्द्राः समाययुस्तत्र जितशत्रुश्च भूपतिः ॥ २८३ ॥
पद्भ्यां चचाल चुलनीपिताऽप्युचितभूषणः । वन्दितुं नन्दितमनाः श्रीवीरं त्रिजगत्पतिम् ॥ २८४ ॥
भगवन्तं ततो नत्वोपविश्य चुलनीपिता । शुश्राव परया भक्त्या प्राञ्जलिर्धर्मदेशनाम् ॥ २८५ ॥
अथोत्थितायां सदसि प्रणम्य चरणौ प्रभोः । इति विज्ञपयामास विनीतश्चुलनीपिता ॥ २८६ ॥
स्वामिन्नस्मादृशां बोधहेतोर्विहरसे महीम् । जगद्बोधं विना नान्यो ह्यर्थश्चंक्रमणे रवेः ॥ २८७ ॥
सर्वोऽपि याच्यते गत्वा स दत्ते यदि वा न वा । आगत्याऽयाचितो धर्मं दत्से हेतुः कृपाऽत्र ते ॥ २८८ ॥
जानामि यतिधर्मं चेद् गृह्णामि स्वामिनोऽन्तिके । योग्यता परमियती मन्दभाग्यस्य नास्ति मे ॥ २८९ ॥
याचे श्रावकधर्मं तु स्वामिन् ! देहि प्रसीद मे । आदत्तेऽथावप्युदंको भरणं निजमेव हि ॥ २९० ॥

यथासुखं गृहाणेति स्वामिनाऽनुमतस्ततः । प्रतिपेदे श्रावकार्हं धर्मं द्वादशधाऽपि सः ॥ २९१ ॥
अष्टाष्टकोट्यभ्यधिकं स्वर्णं निध्यादिषु त्रिषु । व्रजेभ्योऽन्यानथाष्टभ्यः प्रत्याचख्यौ व्रजानपि ॥ २९२ ॥
नियमं चान्यवस्तूनां कामदेव इवाददे । श्यामा तत्पत्न्यपि स्वामिसमीपे श्रावकव्रतम् ॥ २९३ ॥
तदा च गौतमो नत्वा पप्रच्छेति जगत्पतिम् । महाव्रतधरः किं स्यान्न वाऽयं चुलनीपिता ? ॥ २९४ ॥
अथोचे स्वामिना नैष यतिधर्मं प्रपत्स्यते । गृहिधर्मरतः किं तु मृत्वा सौधर्ममेष्यति ॥ २९५ ॥
अरुणाभे विमाने च चतुःपल्योपमस्थितिः । ततश्च्युत्वा विदेहेषूत्पद्य निर्वाणमेष्यति ॥ २९६ ॥
तत्रैवाऽऽसीत् सुरादेवो गृही धन्या च तत्प्रिया । आसीत्तस्य हिरण्यादि पुष्कलं कामदेववत् ॥ २९७ ॥
स कामदेववद्गत्वा स्वाम्यग्रे श्रावकव्रतम् । नियमांश्चाग्रहीत् सार्धं धन्यया धर्मधन्यया ॥ २९८ ॥
ततश्च विहरन् स्वामी पुरीमालभिकां ययौ । तत्र शंखवनोद्याने भगवान् समवासरत् ॥ २९९ ॥
पुर्यां तत्राभवच्चुल्लशतिको नामतो गृही । कामदेवसमस्त्वृद्ध्या बहुलेति च तत्प्रिया ॥ ३०० ॥
स कामदेववद्गत्वा श्रीवीरचरणान्तिके । समं बहुलया धर्मं प्रपेदे नियमानपि ॥ ३०१ ॥
ततश्च काम्पिल्यपुरे जगाम विहरन् प्रभुः । सहस्राम्रवणनामन्युद्याने समवासरत् ॥ ३०२ ॥
तत्रासीत्कामदेवर्द्धिर्गृहस्थः कुंडकोलिकः । नाम्ना पुष्पेति तद्भार्या शीलालंकारशालिनी ॥ ३०३ ॥

कामदेव इव स्वामिपादाग्रे श्रावकव्रतम् । सोऽग्रहीन्नियमांश्चापि पुष्पया भार्यया सह ॥ ३०४ ॥
इतश्च पोलाशपुरे गोशालोपासकोऽवसत् । शब्दालपुत्रः कुलालोऽग्निमित्रा तस्य च प्रिया ॥ ३०५ ॥
हिरण्यकोटिस्तस्यैका निधानेऽन्या तु वृद्धिगा । तृतीया व्यवहारेऽभूद् व्रज एकश्च गोऽयुतम् ॥ ३०६ ॥
बहिश्च पोलाशपुरात् कुम्भकारस्य तस्य तु । कुम्भकारापणशतान्यासन् पंच सदापि च ॥ ३०७ ॥
तमशोकवनेऽवोचत्त्रिदशः कोऽपि यत्प्रगे । सर्वज्ञोऽर्हन्महाब्रह्मा त्रैलोक्यार्च्य इहैष्यति ॥ ३०८ ॥
सेवेथास्तं च फलकपीठसंस्तरकादिना । एवं द्विस्त्रिर्गदित्वा तं त्रिदशः स तिरोदधे ॥ ३०९ ॥
आजीवभक्तो दध्यौ स नूनं धर्मगुरुः स मे । सर्वज्ञः खलु गोशालः प्रातरत्र समेष्यति ॥ ३१० ॥
विचिन्त्यैवं स्थिते तस्मिन् प्रातस्तत्र समागतः । श्रीवीरः समवासार्षीत् सहस्राम्रवणे वने ॥ ३११ ॥
कुम्भकारः सोऽपि गत्वा भगवन्तमवन्दत । कृत्वा च देशनां स्वामी तं कुलालमभाषत ॥ ३१२ ॥
शब्दालपुत्र ! भो ह्यस्त्वामशोकवनगं सुरः । कोऽप्यूचे यत्प्रगे ब्रह्मा सर्वज्ञोऽर्हन्निहैष्यति ॥ ३१३ ॥
उपास्यः स त्वया पीठफलकादिसमर्पणात् । त्वयाऽपि तद्गिराऽचिन्ति यद्गोशालः समेष्यति ॥ ३१४ ॥
इति स्वामिवचः श्रुत्वा सोऽचिन्तयदहो अयम् । सर्वज्ञोऽर्हन्महावीरो महाब्राह्मण आगतः ॥ ३१५ ॥
तन्नमस्करणीयोऽयमुपास्यः सर्वथाऽपि हि । इत्युत्थाय प्रभुं नत्वा स प्राञ्जलिरदोऽवदत् ॥ ३१६ ॥

---
१-२- 'लास५' [illegible] ॥

बहिरस्मात्पुरात् कुम्भकारापणशतानि मे । पंच सन्ति तेषु पीठाद्यादायाऽनुगृहाण माम् ॥ ३१७ ॥
तद्वचः प्रत्यपादीशस्तं च गोशालशिक्षया । उपात्ताग्नियतिवादाग्रुक्तिभिर्विन्यवर्तयत् ॥ ३१८ ॥
त्यक्त्वा नियतिवादं स प्रमाणीकृत्य पौरुषम् । आनन्द इव शिश्राय स्वाम्यग्रे श्रावकव्रतम् ॥ ३१९ ॥
परं विशेषो नियमे निधिवृद्धिनियोगगाः । तिस्रस्तस्य स्वर्णकोट्यो व्रजस्त्वेको गवामिति ॥ ३२० ॥
अग्निमित्रा च तत्पत्नी तेनैव प्रतिबोधिता । आगत्य स्वामिनः पार्श्वे शिश्रिये श्रावकव्रतम् ॥ ३२१ ॥
विहर्तुमन्यतोऽचालीत्ततश्च भगवानपि । गोशालकोऽपि श्रौषीज्जनश्रुत्येदमुच्चकैः ॥ ३२२ ॥
आजीवकानां समयं हित्वा शब्दालपुत्रकः । निर्ग्रंथानां श्रमणानां शासनं प्रतिपन्नवान् ॥ ३२३ ॥
ततश्चाचिन्तयत्तत्र गत्वा शब्दालपुत्रकम् । आजीवकानां समये स्थापयाम्यद्य पूर्ववत् ॥ ३२४ ॥
इत्यागात्तत्र गोशालस्तद्वेश्माऽऽजीवकैर्वृतः । तं च शब्दालपुत्रो न दृशाऽपि समभावयत् ॥ ३२५ ॥
शब्दालपुत्रं गोशालः स्वे संस्थापयितुं मते । श्रावकत्वाच्चालयितुं चाऽशक्तो निर्ययौ पुनः ॥ ३२६ ॥
अथ राजगृहं वीरश्चैत्ये गुणशिलाह्वये । गत्वाऽथ समवासार्षीत् सुरासुरनिषेवितः ॥ ३२७ ॥
चुलनीपितृतुल्यर्द्धिर्महाशतकनामकः । गृहभृत्तस्य पत्न्यश्च रेवत्याद्यास्त्रयोदश ॥ ३२८ ॥
हिरण्यकोट्यो रेवत्या अष्टावष्ट व्रजाः पुनः । एका कोटी व्रजश्चैकोऽन्यासां प्रत्येकमप्यभूत् ॥ ३२९ ॥

१ वाऽ M. ॥

चुलनीपितृवत्सोऽपि स्वाम्यग्रे श्रावकव्रतम् । नियमांश्चाग्रहीत्पत्नीस्ता विना त्वमुचत् स्त्रियः ॥ ३३० ॥
श्रावस्त्यामन्यदा पुर्यां भगवान् विहरन् ययौ । तत्र कोष्ठकसंज्ञे चोपवने समवासरत् ॥ ३३१ ॥
तत्र चानन्दतुल्यर्द्धिर्गृह्यासीन्नन्दिनीपिता । अश्विनीव शशांकस्य तस्य चाश्विन्यभूत्प्रिया ॥ ३३२ ॥
आकर्ण्य श्रीमहावीरवदनाद्धर्मदेशनाम् । श्रावकत्वं नियमांश्च सोऽप्यानन्द इवाऽग्रहीत् ॥ ३३३ ॥
तत्रैवानन्दतुल्यर्द्धिर्गृह्यासील्लान्तिकापिता । तत्पत्नी फल्गुनीनामा फल्गु वल्गु प्रजल्पिनी ॥ ३३४ ॥
श्रीवीरस्वामिपादान्ते समाकर्णितदेशनः । श्रावकत्वं नियमांश्च सोऽप्यानन्द इवाऽऽददे ॥ ३३५ ॥
सुरैरप्यपरिक्षोभ्याः श्रावकत्वाद्गिरिस्थिराः । दशैवं श्रावकवराः श्रीवीरस्वामिनोऽभवन् ॥ ३३६ ॥
एवं च बोधयन् भव्यानम्भोजानीव भास्करः । भूयो जगाम कौशाम्बीं नगरीं परमेश्वरः ॥ ३३७ ॥
प्रभोश्चरमपौरुष्यां वन्दनायेन्दुभास्करौ । स्वाभाविकविमानस्थौ तस्यां युगपदेयतुः ॥ ३३८ ॥
तयोर्विमानतेजोभिर्नभस्युद्योतिते सति । लोकस्तथैव तत्राऽस्थात् कौतुकव्यग्रमानसः ॥ ३३९ ॥
विज्ञायोत्थानसमयं चन्दना तु प्रवर्तिनी । वीरं प्रणम्य वसतिं स्वां ययौ सपरिच्छदा ॥ ३४० ॥
मृगावती तु तत्रस्थमार्तण्डोद्योततेजसा । नाज्ञासीद्रात्रिमायातां तत्रैवाऽऽस्थाद्दिनभ्रमात् ॥ ३४१ ॥
चन्द्रार्कयोर्गतवतोर्ज्ञात्वा रात्रिं मृगावती । प्रतिश्रयमुपेयाय चकिता काललंघनात् ॥ ३४२ ॥
तामूचे चन्दना साध्वि ! कुलीनायास्तवेदृशम् । किं युज्यते ? यन्निशायां बहिरेकाकिनी स्थिता ॥ ३४३ ॥

इत्युक्ते चन्दनां तस्या क्षमयन्त्या मुहुर्मुहुः । घातिक्षयान्मृगावत्या उदपद्यत केवलम् ॥ ३४४ ॥
निद्रान्त्याश्च प्रवर्तिन्या भुवो बाहुमुदक्षिपत् । तत्पार्श्वे यान्तमुरगं दृष्ट्वा केवलशक्तितः ॥ ३४५ ॥
प्रबुद्धया चन्दनया पृष्टा किं बाहुरुन्नतः ? । महाहिरिह यातीति तामाख्यच्च मृगावती ॥ ३४६ ॥
भूयोऽपि चन्दनाऽवोचत्सूचीभेद्ये तमस्यपि । मृगावति ! कथं दृष्टस्त्वयाऽहिर्विस्मयो मम ॥ ३४७ ॥
मृगावती भगवतीत्याचचक्षे प्रवर्तिनि ! उत्पन्नकेवलज्ञानचक्षुषा ज्ञातवत्यहम् ॥ ३४८ ॥
कैवल्याशातनीं धिङ्मामित्यश्रान्तं स्वगर्हया । उत्पेदे केवलज्ञानं चन्दनाया अपि क्षणात् ॥ ३४९ ॥
इतश्च गौतमोऽपृच्छन्नाथ ! भावाः स्वभावतः । किं यान्त्यन्यत्वमर्केन्दुविमाने यदिहेयतुः ॥ ३५० ॥
स्वाम्याख्यत् स्युर्दशाश्चर्याण्युपसर्गो यदर्हताम् । गर्भापहारश्चन्द्रार्कविमानावतरस्तथा ॥ ३५१ ॥
चमरोत्पातः परिषदभव्याऽष्टोत्तरं शतम् । सिद्धा अपरकंकायां कृष्णस्य गमनं तथा ॥ ३५२ ॥
असंयतार्चा स्त्रीतीर्थं हरिवंशकुलोद्भवः । ततोऽसौ संगतोऽर्केन्दुविमानावतरः खलु ॥ ३५३ ॥
(त्रिभिर्विशेषकम्)
इत्याख्याय ततो नाथः श्रावस्तीं विहरन् ययौ । तस्यां च समवासार्षीदुद्याने कोष्ठकाभिधे ॥ ३५४ ॥
तस्यां प्रागागतस्तेजोलेश्याहतविरोधिकः । अष्टांगनिमित्तज्ञानज्ञातलोकमनोगतः ॥ ३५५ ॥
अजिनोऽपि जिनशब्दमात्मना संप्रकाशयन् । हालाहलाकुंभकार्या गोशालोऽवसदापणे ३५६ (युग्मम्)

तस्य चार्हन्निति ख्यातिं लोक आकर्ण्य मुग्धधीः । उपेत्योपेत्य विदधे निरन्तरमुपासनम् ॥ ३५७ ॥
इतश्च समये प्राप्ते गौतमः स्वाम्यनुज्ञया । प्राविशत् पुरि भिक्षार्थं चिकीर्षुः षष्ठपारणम् ॥ ३५८ ॥
गोशालोऽत्रास्ति सर्वज्ञोऽर्हन्नित्याकर्ण्य तत्र च । गौतमः सविषादोऽगादात्तभिक्षोऽन्तिके प्रभोः ॥ ३५९ ॥
यथावत् पारणं कृत्वा गौतमः समये प्रभुम् । पश्यतां पौरलोकानामपृच्छत् स्वच्छधीरिति ॥ ३६० ॥
स्वामिन्नगर्यामेतस्यां व्याहरन्त्यखिला जनाः । सर्वज्ञ इति गोशालं किमेतद् घटते न वा ? ॥ ३६१ ॥
अथाख्यद्भगवानेष सूनुर्मङ्खस्य मङ्खलेः । अजिनोऽपि जिनंमन्यो गोशालः कपटालयः ॥ ३६२ ॥
मयैव दीक्षितश्चायं शिक्षां च ग्राहितो मया । मिथ्यात्वं प्रतिपन्नो मे सर्वज्ञो नैष गौतम ! ॥ ३६३ ॥
तत्तु स्वामिवचः श्रुत्वा पौराः पुर्यामितस्ततः । एवं बभाषिरेऽन्योऽन्यं चत्वरेषु त्रिकेषु च ॥ ३६४ ॥
हं हो अर्हन्निहायातो वीरस्वामी वदत्यदः । गोशालो मङ्खलिसुतो मिथ्या सर्वज्ञमान्यसौ ॥ ३६५ ॥
जनश्रुत्या ततः श्रुत्वा गोशालः कालसर्पवत् । आपूर्यमाणः कोपेन तस्थावाजीवकावृतः ॥ ३६६ ॥
इतश्च स्वामिनः शिष्य आनन्दः स्थविराग्रणीः । षष्ठपारणकं कर्तुं भिक्षार्थं प्राविशत् पुरि ॥ ३६७ ॥
हालाहलागृहासीनो गोशालस्तत्प्रदेशगम् । आनन्दमुनिमाहूय साधिक्षेपमदोऽवदत् ॥ ३६८ ॥
भो आनन्द ! तवाचार्यो लोकात् सत्कारमात्मनः । इच्छन् वीरः सभान्वक्षं मां तिरस्कुरुतेतराम् ॥ ३६९ ॥

१ नाम C. M. ॥

संरक्षमनर्हस्त्वमस्वैरं च नक्ति माम् । तेजोलेश्यां न स वेत्ति विपक्षदहनक्षमाम् ३७० ॥
भस्मराशीकरिष्यामि तमहं सपरिच्छदम् । त्वामेवैकं विमोक्ष्यामि दृष्टान्तोऽत्र निशम्यताम् ॥ ३७१ ॥
अवसरः प्रसरश्च संवादः कारकस्तथा । भद्रनो वणिजोऽभूवन् क्षेमिलायां पुरा पुरि ॥ ३७२ ॥
भाण्डैरापूर्य शकटान्निर्ययुस्ते वणिज्यया । यान्तश्च निर्जलारण्यं विविशुः किंचिदध्वनि ॥ ३७३ ॥
ते पश्चापि तृषाक्रान्ता मरुमार्गंगना इव । जलं गवेषयामासुः पर्यटन्तो महाटवीम् ॥ ३७४ ॥
भ्राम्यन्नवसरः पञ्चशिखरं*वामलूरकम् । ददर्शादर्शयत्तेषां चतुर्णां सुहृदामपि ॥ ३७५ ॥
ते तस्य पूर्वशिखरं संभूयाऽस्फोटयन् द्रुतम् । तस्माच्च लेभिरे वारि तत्पीत्वा सुस्थतां ययुः ॥ ३७६ ॥
अथोचे प्रसरोऽपाच्यशृंगमप्यस्य दीर्यताम् । लप्स्यामहे नूनमितो वस्त्वन्यदपि किंचन ॥ ३७७ ॥
अथाब्रवीदवसरः खननं नास्य युज्यते । उत्थास्यत्यहिरेतस्मा†न्नाकुरोको हि भोगिनाम् ॥ ३७८ ॥
अवादीदथ संवादो विसंवादोऽप्यभूदिह । यत्परिस्फोटितात्पूर्वशिखरान्नाहिरुत्थितः ॥ ३७९ ॥
भूयोऽप्यवसरोऽवोचद्दैवादिह पयोऽभवत् । अथोचे कारको दैवाद् द्रम्मा इह नु भाविनः ॥ ३८० ॥
इत्युदित्वा तत् खनितुं समारभत कारकः । मतं ममेदं नेत्युक्त्वा गन्त्रीमवसरो ययौ ॥ ३८१ ॥
बभाषे भद्रनो यातोऽवसरो यदि यातु तत् । विनाऽप्यमुं खनिष्याम इति सर्वेऽपि तेऽखनन् ॥ ३८२ ॥

टि० – * वामलूरः – वल्मीकः राफडो इति गुर्जरभाषायाम् ) † नाकुः – वल्मीकः ।

खातात्तस्मान्नाकुश्रृंगात् सद्यो द्रम्मा विनिर्ययुः। विभज्यावसरज्ञं चत्वारो जगृहुश्च तान् ॥ ३८४ ॥
चखनुश्चतुर्थमपि ते श्रृंगं स्वर्णं च लेभिरे। ततो रजतमप्यौज्झन् सुवर्णादानलोभतः ॥ ३८५ ॥
रत्नानि पञ्चमे शृंगे भविष्यन्तीति बुद्धितः। चखनुस्तदपि लोभान्धा लाभाल्लोभो हि वर्धते ॥ ३८६ ॥
अत्यन्तमथिताद्ब्धेः कालकूट इवोत्कटः। तस्माच्छृंगात् खन्यमानादुत्तस्थौ दृग्विषोरगः ॥ ३८७ ॥
वल्मीकाग्रस्थितः सोऽहिः प्राक् सूर्यं प्रेक्ष्य तान्दृशा। भस्मीचकार चतुरः सगन्त्रीवृषभानपि ॥ ३८८ ॥
निर्लोभ इत्यवसरं सगन्त्रीवृषमप्यथ। तस्याहेर्देव्यधिष्ठात्री प्रापयत् स्थानमीप्सितम् ॥ ३८९ ॥
धक्ष्यामि त्वद्गुरुं सर्पोऽधाक्षीत्तांश्चतुरो यथा। मोक्ष्यामि त्वामहं सोऽहिर्मुमोचावसरं यथा ॥ ३९० ॥
ततोऽसमाप्तभिक्षार्थ एवाऽऽनन्दो ययौ प्रभुम्। गोशालोक्तं तदाऽचख्यावपृच्छच्चेति शंकितः ॥ ३९१ ॥
भस्मराशीकरिष्यामीत्युक्तं गोशालकेन यत्। उन्मत्तभाषितं तत् किं तत्कर्तुमथवा क्षमः ? ॥ ३९२ ॥
अथाचचक्षे भगवानर्हद्भ्यः सोऽन्यतः क्षमः। अर्हतामपि सन्तापमात्रं कुर्यादनार्यधीः ॥ ३९३ ॥
तद्गत्वा गौतमादीनां शंसेदं ते यथा हि तम्। इहागतं नोदनया धर्म्ययापि [1]नुदन्ति न ॥ ३९४ ॥
तेषां गत्वाऽऽख्यदानन्दस्तदा गोशालकोऽपि हि। तत्राऽऽगात् स्वामिनोऽग्रे चावस्थाय व्यब्रवीदिति ३९५
भोः काश्यप ! वदस्येवं गोशालो मंखलेः सुतः। अन्तेवासी ममेत्यादि तन्मृषा भाषितं तव ॥ ३९६ ॥

१ तु° C. L. M. ॥

अष्टमः सर्गः

गोशालस्तव यः शिष्यः स हि शुक्लाभिजातिकः । धर्मध्यानस्थितो मृत्वा त्रिदशेषूदपद्यत ॥ ३९७ ॥
तद्देहेऽस्मिन्नुपसर्गपरीषहसहेऽविशम् । उदायनामाऽहमृषिः परित्यज्य निजं वपुः ॥ ३९८ ॥
ततो मामपरिज्ञाय गोशालं मंखलेः सुतम् । स्वशिष्यं कथमाख्यासि न खल्वसि गुरुर्मम ॥ ३९९ ॥
स्वाम्यथोचे यथाऽऽरक्षैः क्रम्यमाणो मलिम्लुचः । गर्तं दुर्गं वनं वाऽपि स्वान्तर्धानमवाप्नुवन् ॥ ४०० ॥
ऊर्णालोम्ना शणलोम्ना तूलांशेन तृणेन वा । मन्धनेऽन्तर्दत्तनात्मानमावृतमल्पधीः ॥ ४०१ ॥
एवं त्वमपि गोशालोऽनन्योऽप्याख्यान् स्वमन्यथा । किमर्थं भाषसेऽलीकं स एवास्यपरो न हि ॥ ४०२ ॥
एवं स्वामिगिरा क्रुद्धो गोशालोऽप्यब्रवीत् प्रभुम् । अद्य भ्रष्टोऽसि नष्टोऽसि न भवस्येष काश्यप ! ॥ ४०३ ॥
सर्वज्ञशिष्यः सर्वानुभूतिर्गुर्वनुरागतः । अक्षमस्तद्वचः सोढुं गोशालकमभाषत ॥ ४०४ ॥
गुरुणा दीक्षितोऽनेन शिक्षितोऽस्यमुनैव हि । निह्नुषे हेतुना केन गोशाल ! त्वं स एव हि ॥ ४०५ ॥
अथ गोशालकः कोपात्तेजोलेश्यामनाहताम् । सर्वानुभूतयेऽमुञ्चद् दृग्ज्वालामिव दृग्विषः ॥ ४०६ ॥
निर्दह्यमानः सर्वानुभूतिर्गोशाललेश्यया । शुभध्यानपरो मृत्वा सहस्रारे सुरोऽभवत् ॥ ४०७ ॥
गोशालोऽपि हि तत्कालं स्वलेश्याशक्तिगर्वितः । निर्भर्त्सयितुमारेभे भगवन्तं पुनः पुनः ॥ ४०८ ॥
स्वामिशिष्यः सुनक्षत्रस्तमथ स्वामिनिन्दकम् । गुरुभक्त्याऽनुशास्ति स्म भृशं सर्वानुभूतिवत् ॥ ४०९ ॥

१ नान्यो C. ॥

गोशालमुक्तया तेजोलेश्यया प्रज्वलत्तनुः । प्रभुं प्रदक्षिणीकृत्याऽऽदाय भूयो व्रतानि च ॥ ४१० ॥
आलोच्याथ प्रतिक्रम्य क्षमयित्वाऽखिलान्मुनीन् । सुनक्षत्रमुनिर्मृत्वाऽच्युतकल्पे सुरोऽभवत् ॥ ४११ ॥
( युग्मम् )
जिनकाशी च गोशालस्ततोऽतिपरुषाक्षरम् । समाक्रोशन्निजगदे स्वामिना करुणाजुषा ॥ ४१२ ॥
दीक्षितः शिक्षितश्चासि श्रुतभाक् च मया कृतः । ममैवावर्णवादी त्वं कोऽयं ते धीविपर्ययः ? ॥ ४१३ ॥
स्वामिना स्वयमित्युक्तो गोशालः कुपितो भृशम् । उपेत्य किंचिदमुचत्तेजोलेश्यां प्रभुं प्रति ॥ ४१४ ॥
स्वामिन्यप्रभविष्णुः सा महावात्येव पर्वते । प्रभुं प्रदक्षिणीचक्रे भक्तिभागनुहारिणी ॥ ४१५ ॥
संतापमात्रं स्वाम्यंगेऽभूत्तेजोलेश्यया तया । तीरकक्षोद्भवेनेव दावेन सरिदम्भसः ॥ ४१६ ॥
अकार्याय प्रयुक्ता धिगनेनेति क्रुधेव सा । तेजोलेश्या निवृत्यांगे गोशालस्याविशद्बलात् ॥ ४१७ ॥
तयाऽन्तर्दह्यमानोऽपि गोशालो धार्ष्ट्यमाश्रितः । भगवन्तं महावीरमभ्यधत्तैवमुद्धतः ॥ ४१८ ॥
मत्तेजोलेश्यया ध्वस्तः षण्मासान्ते हि काश्यप ! । पित्तज्वरपराभूतश्छद्मस्थोऽपि विपत्स्यसे ॥ ४१९ ॥
स्वाम्यथोवाच गोशाल ! मृषा ते वागहं यतः । अन्यानि षोडशाब्दानि विहरिष्यामि केवली ॥ ४२० ॥
स्वतेजोलेश्ययैव त्वं पुनः पित्तज्वरार्दितः । विपत्स्यसे सप्तदिनपर्यन्ते नात्र संशयः ॥ ४२१ ॥

१ °ददे L ॥

तेजोलेश्याक्लिश्यमानवपुष्को विलपन्नथ । भूमौ पपात गोशालः शालद्रुरिव वायुना ॥ ४२२ ॥
गुर्ववज्ञाप्रकुपिता मुनयो गौतमादयः । एवं मर्मविधा वाचोच्चैर्गोशालमूचिरे ॥ ४२३ ॥
धर्माचार्यप्रातिकूल्यभाजां भो ! भवतीदृशम् । तेजोलेश्या क्व तव सा धर्माचार्ये नियोजिता ? ॥ ४२४ ॥
सुचिरं विब्रुवाणोऽपि निघ्नन्नपि महामुनी । क्रूरं तेनेक्षितौ भस्मी स्वतेजोभि[illegible] ॥ ४२५ ॥
व्यपत्स्यथाः पुराऽपि त्वं वैशिकायनलेश्यया । स्वलेश्यया शीतया त्वां नारक्षिष्यद्यदि प्रभुः ॥ ४२६ ॥
शार्दूल इव गर्ताऽन्तः पतितस्तेषु साधुषु । निः कर्तुं सोऽक्षमस्तस्थावुद्वेल्लनपरः क्रुधा ॥ ४२७ ॥
निःश्वसन् दीर्घमुष्णं च दंष्ट्रालोमानि चोत्खनन् । पादाभ्यां ताडयन्नुर्वीं हतोऽस्मीति मुहुर्ब्रुवन् ॥ ४२८ ॥
निष्क्रम्य स्वामिसदसो दस्युवद्वीक्षितो जनैः । हालाहलाकुम्भकार्या गोशालोऽगमदापणम् ४२९ (युग्मम्)
अथ स्वामी मुनीनूचे तेजो गोशालकेन यत् । अस्मद्वधाय प्रक्षिप्तं तस्येयं शक्तिरूर्जिता ॥ ४३० ॥
वत्साच्छकुत्समगधवंगमालवकोशलान् । पाटलाटवज्रिमालिमलयाबाधकांगकान् ॥ ४३१ ॥
काशीन् सुंह्मोत्तरान् देशान् निर्दग्धुं षोडशेश्वरा । तेजोलेश्या गोशालस्य तपसोग्रेण साधिता ॥ ४३२ ॥
ते विसिष्मियिरे सर्वे मुनयो गौतमादयः । सन्तः शक्तौ परस्यापि मात्सर्यं न हि बिभ्रति ॥ ४३३ ॥
गोशालकोऽपि स्वेनैव दह्यमानोऽथ तेजसा । तापशान्त्यै पपौ मद्यं दधानो मद्यभाजनम् ॥ ४३४ ॥ ॥ २५१ ॥

१ सद्धोत्त° *D. M.* ॥

मदोन्मत्तो गायति स्म गोशालो नृत्यति स्म च । हालाहलायाः प्रणतिं प्राञ्जलिश्चाकरोन्मुहुः ॥ ४३५ ॥
अंगरागीचकारांगे भाण्डार्थं मृदिमां मृदम् । लुलोठ च गृहस्रोतोजले तच्चापिबन्मुहुः ॥ ४३६ ॥
असंबद्धविरुद्धानि प्रजजल्प वचांसि च । शिष्यैः सशोकैः स उपचर्यमाणोऽत्यगाद्दिनम् ॥ ४३७ ॥
गोशालोपासकस्तत्रायंपुलो धर्मजागरम् । पूर्वरात्रापररात्रे कुर्वन्नेवं व्यचिन्तयत् ॥ ४३८ ॥
तृणगोपालिका किंसंस्थानेति न हि वेद्म्यहम् । गत्वा पृच्छामि गोशालं सर्वज्ञं गुरुमात्मनः ॥ ४३९ ॥
एवं निश्चित्य *गोसर्गेऽनर्घ्यभूषणभूषयौ । हालाहलागृहेऽपश्यद्गोशालं च तथा स्थितम् ॥ ४४० ॥
लज्जयाऽथापचक्राम द्रुतद्रुतमयंपुलः । गोशालशिष्यैः स्थविरैर्दृष्टश्च जगदे च सः ॥ ४४१ ॥
अयंपुल ! निशायां ते पश्चिमायामजायत । तृणगोपालिकासंस्थाविषयः संशयः खलु ॥ ४४२ ॥
विस्मितः सोऽप्युवाचैवमेवमेतन्महर्षयः । गोशालचेष्टितं गोप्तुं ते भूयस्तं बभाषिरे ॥ ४४३ ॥
गायन्नृत्यन् पात्रपाणिरञ्जलिं च करोति यत् । निर्वाणप्राप्तिलिंगानि तदाख्यानि गुरुस्तव ॥ ४४४ ॥
यदेतत् पश्चिमं गेयं नृत्यमञ्जलिकर्म च । पानं मृदंगरागादि यदन्यदपि किंचन ॥ ४४५ ॥
गोशालस्य चतुर्विंशस्यार्हतो मोक्षलक्ष्म तत् । गत्वाऽमुं पृच्छ सन्देहं सर्वज्ञो ह्येष ते गुरुः ॥ ४४६ ॥

---

टि०- * गोसर्गे – प्रभाते ।

१ °सर्गे C. L. ॥

इत्युक्तस्तैरभिगन्तुं स प्रावर्तिष्ट तेऽपि हि । तस्याऽऽगमं संशयं च गोशालस्य पुरोऽवदन् ॥ ४४७ ॥
तेऽन्यतो मद्यपात्रादि गोशालेन व्यमोचयन् । आसने चासयाञ्चक्रुस्तदा चाऽऽगादयंपुलः ॥ ४४८ ॥
ततो निषण्णमग्रे तमूचे गोशालकोऽपि हि । तृणगोपालिका किंसंस्थानेति तव संशयः ॥ ४४९ ॥
तृणगोपालिकां विद्धि वंशीमूलसमाकृतिम् । श्रुत्वेति मुदितः सद्योऽयंपुलः स्वाश्रयं ययौ ॥ ४५० ॥
अन्येद्युश्चेतनां लब्ध्वा ज्ञात्वाऽन्तसमयं निजम् । शिष्यानाहूय गोशालो व्याजहारेति सादरः ॥ ४५१ ॥
मृतस्य मे वपुः स्नप्यं गन्धाम्भोभिर्विलेपनैः । सुगन्धिभिर्विलेप्यं चाऽऽमोच्यं चोत्कृष्टवाससा ॥ ४५२ ॥
भूष्यं च भूषणैर्दिव्यैरारोप्यं तदनन्तरम् । सहस्रवाह्यां शिबिकां ततो निःसार्यमुत्सवात् ॥ ४५३ ॥
अयमत्रावसर्पिण्यां चतुर्विंशो जिनेश्वरः । गोशालः प्रययौ मोक्षमित्युद्घोष्यं पुरेऽखिले ॥ ४५४ ॥
ते तथा प्रत्यपद्यन्त गोशालोऽप्यह्नि सप्तमे । जातशुद्धाशयः पश्चात्तापादेवमचिन्तयत् ॥ ४५५ ॥
अहो ! पापोऽहमर्हन्तं वीरं धर्मगुरुं निजम् । नितान्तमाशातितवांस्त्रिधाऽप्यत्यन्तदुर्मतिः ॥ ४५६ ॥
अश्रामण्यं च सर्वज्ञमात्मानं सर्वतोऽपि हि । मृषोपदेशैः सत्याभैः सर्वं लोकं प्रतारयन् ॥ ४५७ ॥
द्विमहर्षी मया दग्धौ गुरुगृह्यावुभौ च तौ । तेजोलेश्या स्वदाहायामुच्यत स्वामिने च धिक् ॥ ४५८ ॥
कृते दिनानां स्तोकानां किमकार्षं मया कृतम् । भूयिष्ठनरकावासविनिवासनिबन्धनम् ॥ ४५९ ॥

१ °स्यास्तस° C । °स्या त स° B । °स्यांत स° D ॥

न केवलमयं स्वात्मा नरकायातिथीकृतः । किं त्वयं सकलो लोकोऽप्यसन्मार्गोपदेशतः ॥ ४६० ॥
भवत्वियत्यपि गते लोको यातु पथैव हि । विमृश्यैवं समाहूय शिष्यानेवमथावदत् ॥ ४६१ ॥
भो ! भोः ! शृणुत सर्वेऽपि नाहमर्हन्न केवली । किं त्वस्मि मंखलिसुतो गोशालो वीरशिष्यकः ॥४६२॥
आश्रयाशो वह्निरिव प्रत्यनीको गुरोरहम् । मया दंभादियत्कालमात्मा लोकश्च वंचितः ॥ ४६३ ॥
छद्मस्थोऽहं मरिष्यामि दह्यमानः स्वतेजसा । वामांघ्रौ रज्जुभिर्बद्ध्वा कर्षणीयः पुरीह भोः ॥ ४६४ ॥
निष्ठीवद्भिर्मम मुखे मां कर्षद्भिर्मृतं श्ववत् । घोषणीयमिदं पुर्यां त्रिकशृंगाटकादिषु ॥ ४६५ ॥
स एष मंखलिसुतो गोशालो दंभितप्रजः । मुनिघात्यजिनो दोषनिधानं गुरुतल्पगः ॥ ४६६ ॥
जिनस्तु भगवान् वीरः सर्वज्ञः करुणानिधिः । हितोपदेष्टा न्यह्नोष्ट गोशालस्तं मुधैव हि ॥ ४६७ ॥
इत्यर्थं शपथं दत्त्वा व्यथया स व्यपद्यत । तच्छिष्याश्च कुलालौकोद्वाराणि पिदधुर्ह्रिया ॥ ४६८ ॥
श्रावस्तीमालिखंस्तत्र शिष्याः शपथमुक्तये । तथा गोशालमाकर्षन् कुर्वन्तो घोषणादिकम् ॥ ४६९ ॥
ततो निष्क्रमयामासुस्तद्गोशालकलेवरम् । ऋद्ध्या महत्या तच्छिष्याश्चक्रुश्च ज्वलनातिथिम् ॥ ४७० ॥
प्रभुः श्रीवर्धमानोऽपि मेंढकग्राममभ्यगात् । चैत्ये च समवासार्षीत्तत्र कोष्ठकनामनि ॥ ४७१ ॥
स्वामिनं तत्र चापृच्छत् समये गौतमो मुनिः । गोशालः कां गतिमगात् स्वाम्यूचे सोऽच्युतं गतः ॥४७२॥

भूयोऽपि गौतमोऽपृच्छत् स्वामिन्नीदृग्भिरप्यघैः । स दुरात्मा कथं देवो बभूवाश्चर्यमत्र मे ॥ ४७३ ॥
स्वाम्याचख्यौ निन्दति योऽवसाने दुष्कृतं निजम् । न दूरे तस्य देवत्वं गोशालोऽपि तथाऽकरोत् ॥४७४॥
पप्रच्छ गौतमोऽथैवं काले च्युत्वा तु सोऽच्युतात् । स्वामिन्नुत्पत्स्यते कुत्र कदा सिद्धिं च यास्यति ४७५
स्वाम्युवाचाऽत्रैव जम्बूद्वीपे वर्षे च भारते । भाव्युपविन्ध्यं पुंड्रेषु शतद्वारं महापुरम् ॥ ४७६ ॥
तत्र संमुचिभूपस्य भद्राकुक्षिभवः सुतः । गोशालजीवो भविता महापद्मोऽभिधानतः ॥ ४७७ ॥
स च भावी महाराजस्तस्योभौ यक्षपुंगवौ । पूर्णभद्रमाणिभद्रौ सैनापत्यं करिष्यतः ॥ ४७८ ॥
तस्यापरं गुणोद्भूतं देवसेन इति प्रजाः । नामधेयं करिष्यन्ति भागधेयमहानिधेः ॥ ४७९ ॥
तस्योच्चैश्चक्रिण इवोत्पत्स्यतेऽद्भुततेजसः । हस्ती श्वेतश्चतुर्दन्त ऐरावण इवापरः ॥ ४८० ॥
तत्राऽऽरूढवतस्तस्य तद्वृद्धिमुदिता जनाः । विमलवाहन इति करिष्यन्त्यभिधान्तरम् ॥ ४८१ ॥
तस्याऽन्यदा पूर्वभवाभ्यस्तर्षिद्वेषकर्मणा । उत्पत्स्यते श्रमणेषु नितान्तं दुष्टबुद्धिता ॥ ४८२ ॥
निन्दनैस्ताडनैर्बन्धैरुद्दाहैर्हननैश्च सः । श्रुतमात्रान् दृष्टमात्रान्मुनीन् विनटयिष्यति ॥ ४८३ ॥
तं च विज्ञापयिष्यन्ति पौरामात्यादयोऽप्यदः । भूभुजां युज्यते दुष्टनिग्रहः साधुपालनम् ॥ ४८४ ॥
अमूंस्त्वनागसः साधून् भिक्षावृत्तींस्तपोधनान् । स्वामिन् ! न पासि चेन्मा स्म पासीस्तन्निग्रहस्तु किम् ४८५

१ °न्वे C. L. ॥

कोपिष्यति (च) चेत्कोऽपि निरागस्ताडनान्मुनिः । स्वतेजसा तदा स त्वां सराष्ट्रमपि धक्ष्यति* ॥४८६॥
तैरित्युक्तो विना भावं तद्वचः प्रतिपत्स्यते । सोऽन्यदा तु रथारूढः क्रीडयोद्यानमेष्यति ॥ ४८७ ॥
स त्रिज्ञानं मुनिं सिद्धतेजोलेश्यं सुमंगलम् । कायोत्सर्गस्थितं तत्र द्रक्ष्यत्यातापनापरम् ॥ ४८८ ॥
सोऽथ निष्कारणक्रुद्धो विरुद्धः साधुदर्शने । तं रथाग्रेण पर्यस्य महर्षिं पातयिष्यति ॥ ४८९ ॥
स उत्थाय मुनिर्भूयः कायोत्सर्गं करिष्यति । तथैव भूपतिर्भूयस्तं पृथ्व्यां पातयिष्यति ॥ ४९० ॥
उत्थाय स्थास्यति पुनः कायोत्सर्गे सुमंगलः । प्रयुज्य चाऽवधिं ज्ञात्वा तद्भवानिति वक्ष्यति ॥ ४९१ ॥
रे ! रे ! न देवसेनोऽसि न वा विमलवाहनः । स्मर गोशालकोऽसि त्वं सूनुर्मंखस्य मंखलेः ॥ ४९२ ॥
येन चाऽऽशातितो धर्मगुरुश्चरमतीर्थकृत् । तच्छिष्यौ च परिप्लुष्टौ दुर्मदेन तदा त्वया ॥ ४९३ ॥
यथा हि तैस्तदा क्षान्तं क्षमिष्येऽहं तथा न हि । भूयः करिष्यसेऽथ चेद्धक्ष्यामि त्वां क्षणात्तदा ॥ ४९४ ॥
तेनेत्युक्तोऽधिकं दीप्तः सर्पिःसिक्त इवानलः । पातयिष्यति भूयोऽपि महापद्मः सुमंगलम् ॥ ४९५ ॥
क्रमानपेत्य सप्ताष्टान् स तेजोलेश्यया मुनिः । निधक्ष्यति महापद्मं सरथ्यरथसारथिम् ॥ ४९६ ॥
तत्कर्माऽऽलोच्य स मुनिः पालयित्वा चिरं व्रतम् । अन्ते च मासानशनं कृत्वा सर्वार्थमेष्यति ॥ ४९७ ॥
त्रयस्त्रिंशत्सागरस्यायुषोऽन्ते स परिच्युतः । महाविदेहेषूत्पद्य दीक्षया मोक्षमेष्यति ॥ ४९८ ॥

*अस्मिन् पादे एकम् अक्षरम् न्यूनं वर्तते । अष्टाक्षरप्रमाणे पादे सप्ताक्षरभवनेन ।

महापद्मोऽपि निर्दग्धः सप्तमोर्वीं गमिष्यति । क्रमादुत्पत्स्यते द्विर्द्विः सर्वेषु नरकेषु सः ॥४९९॥
तिर्यग्जातिषु सर्वासूत्पत्स्यतेऽथ मुहुर्मुहुः । स शस्त्रवध्यः सर्वत्र दाहार्तश्च मरिष्यति ॥ ५०० ॥
इत्थं कालमनन्तं तु भवान् भ्रान्त्वाऽतिदुःखदान् । स समुत्पत्स्यते वेश्या बही राजगृहात्पुरात् ॥ ५०१ ॥
सुप्ता भूषणलुब्धेन कामिना सा हनिष्यते । भूयो राजगृहस्यान्तर्वेश्या भूत्वा विपत्स्यते ॥ ५०२ ॥
स विन्ध्यमूले वेभेले सन्निवेशे भविष्यति । विप्रकन्याऽथ विप्रेण केनापि परिणेष्यते ॥ ५०३ ॥
गुर्विणी श्वशुरगृहादायान्ती दावबह्निना । मार्गे दग्धोत्पत्स्यतेऽग्निकुमारेषु सुरेषु सा ॥ ५०४ ॥
ततोऽपि मानुषो भावी प्रव्रज्यां च ग्रहीष्यति । विराधितश्रामण्यः सन्नसुरेषु भविष्यति ॥ ५०५ ॥
पुनः पुनर्मर्त्यभवान् कतिचित्प्राप्य सोऽसकृत् । विराधितश्रामण्यः सन् भविष्यत्यसुरादिषु ॥ ५०६ ॥
पुनश्च मानुषीभूयातीचाररहितं व्रतम् । पालयित्वा स सौधर्मे कल्पे देवो भविष्यति ॥ ५०७ ॥
एवं सप्तभवान् यावच्छ्रामण्यमनुपाल्य सः । कल्पे कल्पे समुत्पद्य सर्वार्थमपि यास्यति ॥ ५०८ ॥
ततश्च्युत्वा विदेहेषु भूत्वाऽऽढ्यतनयः सुधीः । दृढप्रतिज्ञो नाम्ना स विरक्तः प्रव्रजिष्यति ॥ ५०९ ॥
स जातकेवलो ज्ञात्वाऽऽगोशालकभवान्निजान् । गुर्ववज्ञामुनिवधमूलान् शिष्येषु शंसिता ॥ ५१० ॥
[1]निर्देक्ष्यति च शिष्येभ्यो गुर्ववज्ञादि सर्वथा । न कार्यमन्वभूवं हि तत्फलानि बहून् भवान् ॥ ५११ ॥

१ निर्द° L । निर्देक्ष्य° C । निर्दिक्ष्य° D ॥

स्वशिष्यान् बोधयित्वैवं विहरन्नवनीतलम् । कर्मक्षयेण गोशालजीवो निर्वाणमेष्यति ॥ ५१२ ॥
भूयोऽपि गौतमोऽपृच्छत् केन प्राग्जन्मकर्मणा । प्रत्यनीको बभूवैवं गोशालो भगवंस्तव ॥ ५१३ ॥
अथाऽऽख्यद्भगवानत्र जंबूद्वीपेऽत्र भारते । प्राक्चतुर्विंशतावर्हन्नुदायो नामतोऽभवत् ॥ ५१४ ॥
तस्य मोक्षमहिमानं कर्तुमीयुः सुरासुराः । प्रत्यन्तवासी तानेकः प्रेक्ष्य जातिस्मरोऽभवत् ॥ ५१५ ॥
प्रत्येकबुद्धः प्राव्राजीत् स तदैव महाशयः । आर्पयद् व्रतिलिंगं च तस्मै शासनदेवता ॥ ५१६ ॥
तप्यमानं तपस्तीव्रं पूज्यमानं गणैश्च तम् । छद्मस्थोऽन्येश्वरो नाम तं पप्रच्छाऽनिवृर्मतिः ॥ ५१७ ॥
केन त्वं दीक्षितः ? कुत्रोत्पन्नः ? किं वा कुलं तव ? । कुतो वा सूत्रमर्थं च समुपार्जितवानसि ?॥ ५१८ ॥
प्रत्येकबुद्धः स महामुनिराख्यदशेषतः । दध्यौ चेतीश्वरो नूनं दंभेनात्ति प्रजामसौ ॥ ५१९ ॥
मन्ये यादृगनेनोक्तं तादृग्वक्ता जिनोऽपि हि । यद्वाऽपमोहो नेदृक्षं स वदेत्यामि तं ततः ॥ ५२० ॥
प्रव्रज्यामभिनन्दामि सर्वदुःखापहामिति । ध्यात्वैवं स ययौ तत्र न चापश्यज्जिनेश्वरम् ॥ ५२१ ॥
पार्श्वे गणधरस्याथ प्रव्रज्यां स उपाददे । मोहगर्भितवैराग्यः कपिवन्मन्दबुद्धिकः ॥ ५२२ ॥
मोक्षंमासे जिने पर्षद्यासीनो गणभृज्जगौ । यावज्जिनोक्तसूत्रार्थमालापस्तावदित्यभूत् ॥ ५२३ ॥
अप्येकं पृथिवीजीवं विनाशयति यः खलु । असंयतः समाख्यातो जैनेन्द्रे स हि शासने ॥ ५२४ ॥

१ °क्षं प्रा° *D. L.* ॥

ईश्वरोऽचिन्तयच्चैवं जीवा अवनिकायिकाः । सर्वत्रापि विमृद्यन्ते को हि तान् रक्षितुं क्षमः ॥ ५२५ ॥
अश्रद्धेयमिदं वाक्यं लाघवायास्य केवलम् । श्रुत्वाऽप्यदोऽनुतिष्ठेत् क उन्मत्तस्येव भाषितम् ॥ ५२६ ॥
मुक्त्वेदं यद्यसौ किञ्चिच्छ्रामण्यं मध्यपक्षगम् । समाख्याति तदा नूनं लोकः सर्वोऽपि रज्यति ॥ ५२७ ॥
यद्वा हा ! हा ! हतोऽस्मीति नानुतिष्ठाम्यहं यदि । जनोऽपि नानुतिष्ठेत् किं सर्वज्ञैर्भाषितं त्वदः ॥ ५२८ ॥
अर्हद्वाक्यान्यथाकारप्रायश्चित्तं मयाऽधुना । प्राप्यमित्यगमत्तं प्रत्येकबुद्धं महामुनिम् ॥ ५२९ ॥
तस्यापि धर्मव्याख्याने सोऽश्रौषीन्मुनिस्त्यजेत् । पृथिवीकायमुख्यानां समारम्भं त्रिधाऽपि हि ॥ ५३० ॥
ईश्वरोऽचिन्तयत्कोऽमूलाऽऽरभेत तथा ह्यसौ । पृथ्व्यां निषीदत्यश्नाति चाग्निपक्वं [1]पिबत्यपः ॥ ५३१ ॥
आत्मन्यपि विसंवादि तद्वदत्येष कद्वदः । वरं गणधरः सोऽस्तु यद्वा सोऽपि विरुद्धवाक् ॥ ५३२ ॥
अमूभ्यां तदलं द्वाभ्यां धर्मं वक्ष्यामि तं स्वयम् । अविरक्तः सुखसुखमनुष्ठास्यति यं जनः[2] ॥ ५३३ ॥
एवं चिन्तयतस्तस्य मूर्ध्नि विद्युत् पपात खात् । मृत्वा च सप्तमावन्यामुदपादि स नारकः ॥ ५३४ ॥
श्रुतशासनसम्यक्त्वप्रत्यनीकत्वपापजम् । दुःखं तत्र चिरं भुक्त्वा मत्स्यः सोऽब्धाविहाभवत् ॥ ५३५ ॥
भूयोऽगात्सप्तमोर्वीं सोऽभ्येत्य काकः खगोऽभवत् । ततोऽगात् प्रथमावन्यां दुष्टश्वाभ्येत्य चाभवत् ॥ ५३६ ॥
भूयोऽगात्प्रथमावन्यां खरोऽभूदत्र षड्भवान् । ततो मनुष्यः संजज्ञे मूको नाऽभूद्बलेश्वरः ॥ ५३७ ॥

१ पिबेत्पयः C. ॥ २ इत आरभ्य ।अग्रिमसर्गस्थ चिह्नपर्यंतः पाठः नास्ति C प्रतौ ॥

ततो मृत्वा बिडालोऽभूत्ततोऽपि नरकं ययौ । उद्धृत्य शाकिकोऽथाभूत् कुष्ठी कृम्याकुलस्ततः ॥ ५३८ ॥
स पञ्चाशतमब्दानि भक्षितः कृमिभिर्मृतः । अकामनिर्जरायोगाद्देवत्वं प्रत्यपद्यत ॥ ५३९ ॥
ततश्च्युतो नृपः सोऽभून्मृत्वाऽगात्सप्तमावनिम् । नृतिर्यङ्नरकेष्वेवं भ्रान्त्वा गोशालकोऽभवत् ॥ ५४० ॥
एवं पूर्वभवाभ्यासवासनावेशतः स तु । तीर्थकृद्धर्मसाधूनां प्रत्यनीकोऽभवद् भृशम् ॥ ५४१ ॥
इति स्वामिवचः श्रुत्वाऽबुध्यन्त बहवो जनाः । प्राव्रजंश्च भवोद्विग्नाः श्रावकत्वं च केऽप्यधुः ॥ ५४२ ॥
स्वामी तु रक्तातीसारपित्तज्वरवशात् कृशः । गोशाललेश्यया जज्ञे चकार न तु भेषजम् ॥ ५४३ ॥
गोशालतेजसा वीरः षण्मासान्तर्विपत्स्यते । इति लोकप्रवादोऽभूत्तादृगामयदर्शनात् ॥ ५४४ ॥
तं च श्रुत्वा स्वामिशिष्यः सिंहो नामानुरागवान् । गत्वैकान्ते रुरोदोच्चैः क्व धैर्यं तादृशा गिरा ॥ ५४५ ॥
केवलेन प्रभुर्ज्ञात्वा तमाहूयेदमब्रवीत् । जनप्रवादात् किं भीतः साधो ! संतप्यसे हृदि ॥ ५४६ ॥
न ह्यापदा तीर्थकृतो विपद्यन्ते कदाचन । किं न संगमकादिभ्य उपसर्गा वृथाऽभवन् ॥ ५४७ ॥
उवाच सिंहो भगवन् ! यद्यप्येवं तथापि हि । आपदा वोऽखिलः स्वामिञ्जनः संतप्यतेतराम् ॥ ५४८ ॥
मादृशां दुःखशान्त्यै तत् स्वामिन्नादत्स्व भेषजम् । स्वामिनं पीडितं द्रष्टुं न हि क्षणमपि क्षमाः ॥ ५४९ ॥
तस्योपरोधात्स्वाम्यूचे रेवत्या श्रेष्ठिभार्यया । पक्वः कूष्माण्डकटाहो यो मदर्थं तं तु मा ग्रहीः ॥ ५५० ॥

१ °नावश° /. ॥

बीजपूरकटाहोऽस्ति यः पक्को गृहहेतवे । तं गृहीत्वा समागच्छ करिष्ये तेन वो धृतिम् ॥ ५५१ ॥

सिंहोऽगादथ रेवतीगृहमुपादत्त प्रदत्तं तया ।
कल्प्यं भैषजमाददे तत्र ववृषे स्वर्णं च हृष्टैः सुरैः ॥
सिंहानीतमुपास्य भेषजवरं तद्वर्धमानः प्रभुः ।
सद्यः संघचकोरपार्वणशशी प्रापद्वपुःपाटवम् ॥ ५५२ ॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये दशमपर्वणि
ऋषभदत्तदेवानन्दाप्रव्रज्या-जमालिगोशालक-विप्रतिपत्तिविपत्ति-भगवदारोग्यवर्णनो नामाष्टमः सर्गः ॥

## ॥ अथ नवमः सर्गः ॥

इतश्च यः सुदंष्ट्राहिकुमारो नौजुषः प्रभोः । उपसर्गानकृत स क्वचिद् ग्रामेऽभवद्धली ॥ १ ॥
स कृष्याजीविकोऽन्येद्युः सीरेण कष्टुमुर्वराम् । यावत्प्रवृत्तस्तावत्तं श्रीवीरो ग्राममाययौ ॥ २ ॥
स्वामिना तस्य बोधाय प्रेषितो गौतमोऽवदत् । किमिदं क्रियते ? दैवनियुक्तमिति सोऽब्रवीत् ॥ ३ ॥
भूयोऽपि गौतमोऽवोचत् क्षुद्रजीविकयाऽनया । जीवतस्तव किं सौख्यं ? किं वा सुचरितं भवेत् ! ॥४॥
न केवलमिहैवेदं कष्टकृद्भद्र ! कर्म ते । प्राणातिपातभूयिष्ठं कष्टायान्यभवेष्वपि ॥ ५ ॥
कर्मणोऽमुष्य कष्टस्य कष्टं लक्षांशतोऽपि हि । क्रियते धर्मकार्ये चेत्कष्टान्तः स्यात्तदा खलु ॥ ६ ॥
इत्यादि गौतमेनोक्तः स ऊचे साध्वहं त्वया । बोधितोऽस्य भवोद्विग्नं परिव्राजय मां ततः ॥ ७ ॥
प्रबुद्ध इति विज्ञाय गौतमस्तमदीक्षयत् । गन्तुं श्रीवीरपादान्ते समं तेन चचाल च ॥ ८ ॥
पप्रच्छ हालिकर्षिस्तं गन्तव्यं भगवन् ! क नु । गौतमोऽप्यवदत् साधो ! गन्तव्यमुपमद्गुरु ॥ ९ ॥
हालिकोऽप्यब्रवीदेवं न तुल्यः कोऽपि ते ध्रुवम् । तवापि किं गुरुः कोऽपि ! स च स्यात्कीदृशो ननु ? १०

अथाख्यद्गौतमोऽस्तीह मम विश्वगुरुर्गुरुः । चतुस्त्रिंशदतिशयः सर्वज्ञश्चरमो जिनः ॥ ११ ॥
तच्छ्रुत्वा हालिकमुनिः सर्वज्ञे प्रीतिमुद्वहन् । उपार्जयद्बोधिबीजं प्रययौ चानुगौतमम् ॥ ११ ॥
प्रभुं प्रेक्ष्य च संक्रुद्धः सिंहादिभववैरतः । सोऽवोचद्गौतममुनिं भगवन् ! कोऽयमग्रतः ? ॥ १३ ॥
जगाद गौतमोऽसौ मे धर्माचार्यो जिनेश्वरः । सोऽप्यूचे चेद्गुरुस्तेऽसौ तदा नार्थस्त्वयाऽपि मे ॥ १४ ॥
त्वद्दीक्षयाऽप्यलमिति स रजोहरणादिकम् । त्यक्त्वा ययौ निजक्षेत्रे सीरादि पुनराददे ॥ १५ ॥
स्वामिनं गौतमो नत्वा पप्रच्छ भगवन्निदम् । आश्चर्यमेष विद्वेषी लोकानन्देऽपि यत्त्वयि ॥ १६ ॥
प्रतिपन्नं स्वयमपि व्रतं प्रोज्झितवानसौ । युष्मदालोकनादेव कारणं तत्र नाथ ! किम् ? ॥ १७ ॥
मय्यसौ प्रीतिमान् पूर्वं गुरुर्मेऽसावितीरिति । त्वयि नाथ ! झगित्येष द्वेष्यजायत मय्यपि ॥ १८ ॥
स्वाम्यथाऽऽख्यन्मया सिंहो यस्त्रिपृष्ठेन दारितः । क्रोधात् स्फुरंस्त्वया साम्ना शान्तः सारथिना मम १९
तत्प्रभृत्येष मद्द्वेषी जज्ञे स्निग्धः पुनस्त्वयि । तन्मैषयं गौतम ! त्वां बोधिबीजकृतेऽस्य हि ॥ २० ॥
एवमाख्याय भगवान् प्रययौ पोतनं पुरम् । मनोरमाभिधोद्याने तद्बहिः समवासरत् ॥ २१ ॥
प्रसन्नचन्द्रो जिनेन्द्रं वन्दितुं पोतनेश्वरः । समाजगामाश्रौषीच्च देशनां मोहनाशिनीम् ॥ २२ ॥
स्वामिदेशनया बुद्धो भवोद्विग्नः स भूपतिः । बालमप्यात्मजं राज्ये निधाय व्रतमाददे ॥ २३ ॥

॥ २६

१ चात्र *L* ॥ २ ततः *L* ॥

विहरन् स्वामिना सार्धं तप्यमानस्तपः परम् । अजायत स राजर्षिः क्रमात्सूत्रार्थपारगः ॥ २४ ॥
तेनर्षिणाऽपरैश्चापि ऋषिभिः परिवारितः । विहरन् भगवान् वीरो ययौ राजगृहेऽन्यदा ॥ २५ ॥
तत्र द्रष्टुं जगन्नाथमुत्कः सुतसमावृतः । चचाल श्रेणिकोऽश्वेभश्रेणिमण्डितभूतलः ॥ २६ ॥
अग्रानीके तस्य चोभौ नरौ सुमुखदुर्मुखौ । मिथ्यादृष्टावापतन्तौ मिथो नानाकथापरौ ॥ २७ ॥
मार्गे प्रसन्नचन्द्रं तमेकपादप्रतिष्ठितम् । आतापनां प्रकुर्वाणमूर्ध्वबाहुमपश्यताम् ॥ २८ ॥ ( युग्मम् )
तं दृष्ट्वा सुमुखोऽवोचदहो आतापनाजुषः । अस्य स्वर्गोऽपवर्गो वा मुनेर्न खलु दुर्लभः ॥ २९ ॥
कर्मतो नामतश्चापि दुर्मुखः प्रत्यभाषत । प्रसन्नचन्द्रः खल्वेष भूपतिः पोतनेश्वरः ॥ ३० ॥
अस्य धर्मः कुतो येन राज्यभारेऽर्भकः सुतः । नियोजितो वत्सतर इवानसि महीयसि ॥ ३१ ॥
स चास्य सूनुः सचिवैर्दधिवाहनभूभुजा । चम्पानाथेन संभूय राज्यात्प्रच्यावयिष्यते ॥ ३२ ॥
राज्यधर्मः क्षतोऽनेन पत्न्योऽप्यस्य क्वचिद्गताः । अदर्शनीयस्तदसौ धृतपाखंडिदर्शनः ॥ ३३ ॥†
ध्यानपर्वतदम्भोलिमेवमाकर्ण्य तद्वचः । प्रसन्नचन्द्रो राजर्षिः सहसेति व्यचिन्तयत् ॥ ३४ ॥
धिगहो अकृतज्ञास्ते मंत्रिणो ये मया सदा । सत्कृता अपि मत्सूनोर्विभेदमधुना व्यधुः ॥ ३५ ॥
अद्याभविष्यं चेत्तत्राशिक्षयिष्यं भृशं हि तान् । विकल्पैरित्यप्रसन्नः प्रसन्नो व्यस्मरद्व्रतम् ॥ ३६ ॥
स राजमानी मनसा योद्धुं प्रववृते ततः । तत्र च श्रेणिकः प्राप्तो ववन्दे विनयेन तम् ॥ ३७ ॥

अहो प्रसन्नचन्द्रस्य ध्यानावस्थेति चिन्तयन् । श्रेणिकोऽगान्महावीरं नत्वा चैवमभाषत ॥ ३८ ॥
प्रसन्नचन्द्रो राजर्षिर्ध्यानस्थो वन्दितो मया । यदा तदा चेन्म्रियेत ततो गच्छेत् क्व शंस मे ॥ ३९ ॥
सप्तमीं भुवमित्याख्यन्नाथोऽथ श्रेणिकोऽपि हि । दध्यौ न साधोर्नरकस्तन्मया साधु न श्रुतम् ॥ ४० ॥
क्षणान्तरे च भूयोऽपि पप्रच्छ श्रेणिकः प्रभुम् । विपद्यते प्रसन्नर्षिश्चेत्पुनः तत्क्व गच्छति ॥ ४१ ॥
सर्वार्थसिद्धे यातीति शशंस भगवानपि । द्विधा किं व्याकरणमित्यपृच्छच्छ्रेणिकोऽप्यथ ॥ ४२ ॥
स्वाम्यूचे ध्यानभेदेन द्विधा व्याकरणं ह्यदः । तदा हि दुर्मुखगिरा प्रसन्नः कुपितः खलु ॥ ४३ ॥
जातामर्षश्च सामन्तामात्याद्यैः सह चेतसा । युध्यमानस्त्वयाऽवन्दि तदा स नरकोचितः ॥ ४४ ॥
त्वय्यायातेऽत्र सोऽमंस्त यत् क्षीणान्यायुधानि मे । हन्मि शत्रुं शिरस्त्रेणेत्यभिमूर्धं न्यधात्करम् ॥४५॥
कृतलुञ्चं स्पृशन्मौलिं प्रतिबुद्धः स्मरन् व्रतम् । अकार्यं धिङ् मयाऽऽरब्धमित्यादि स्वं निनिन्द सः ॥ ४६ ॥
आलोचितप्रतिक्रान्तः प्रशस्तध्यानमागतः । सर्वार्थसिद्धयोग्योऽभूत्तव प्रश्ने द्वितीयके ॥ ४७ ॥
तत्रान्तरे च प्रसन्नचन्द्रर्षिसविधेऽभवत् । देवदुन्दुभिनिर्घोषमिश्रः कलकलो महान् ॥ ४८ ॥
स्वामिन्! किमिदमित्युक्ते श्रेणिकेनावदद्विभुः । तस्य ध्यानान्तरस्थस्येदानीमजनि केवलम् ॥ ४९ ॥
तस्य केवलिमहिमामिमां कुर्वन्ति नाकिनः । प्रमोदतुमुलस्तेषां दुन्दुभिध्वानवानयम् ॥ ५० ॥

१ °न्म्रियते *D. M.* ॥ २ °ध्यभिमू° *L.* ॥

भूयोऽपि श्रेणिकनृपो बभाषे भगवन्निह । कुत्रेदं केवलज्ञानं व्युच्छेदमुपयास्यति ॥ ५१ ॥
तदाऽऽगाद् ब्रह्मलोकेन्द्रसामानिको महाद्युतिः । विद्युन्माली प्रभुं नन्तुं चतुर्देवीसमन्वितः ॥ ५२ ॥
तं दर्शयन् स्वाम्युवाचोच्छेत्स्यते ह्यत्र केवलम् । भूयोऽपि श्रेणिकोऽपृच्छत् किं स्यादेवेषु केवलम् ? ॥५३॥
स्वाम्यथाख्यदसौ च्युत्वा सप्तमेऽह्नि भविष्यति । ओऽभ्यस्यर्षभदत्तस्य सूनुस्त्वत्पुरवासिनः ॥ ५४ ॥
भावी जंबूाख्यया शिष्यो मच्छिष्यस्य सुधर्मणः । ततो नाऽग्रेसरमसावर्जयिष्यति केवलम् ॥ ५५ ॥
राजाऽपृच्छत्पुनर्नाथमासन्नच्यवनोऽप्यसौ । कस्मान्न मन्दतेजस्को देवा ह्यन्तेऽल्पतेजसः ॥ ५६ ॥
स्वाम्यूचे सांप्रतमयं मन्दतेजाः सुरः खलु । अस्य तेजः पूर्वपुण्यैरत्युत्कृष्टं पुरा ह्यभूत् ॥ ५७ ॥
एवमाख्याय भगवान् सर्वभाषाजुषा गिरा । विदधे दुरितप्रत्यादेशनीं धर्मदेशनाम् ॥ ५८ ॥
तदा कुष्ठगलत्कायः कश्चिदेत्य प्रणम्य च । निषसादोपतीर्थेशमलर्क इव कुट्टिमे ॥ ५९ ॥
ततो भगवतः पादौ निजपूयरसेन सः । निःशंकश्चन्दनेनेव चर्चयामास भूयसा ॥ ६० ॥
तद्वीक्ष्य श्रेणिकः क्रुद्धो दध्यौ वध्योऽयमुत्थितः । पापीयान् यैज्जगद्भर्तर्येवमाशातनापरः ॥ ६१ ॥
अत्रान्तरे जिनेन्द्रेण क्षुते प्रोवाच कुष्ठिकः । म्रियस्वेत्यथ जीवेति श्रेणिकेन क्षुते सति ॥ ६२ ॥
क्षुतेऽभयकुमारेण जीव वा त्वं म्रियस्व वा । कालसौकरिकेणापि क्षुते मा जीव मा मृथाः ॥ ६३ ॥

१ श्रेष्ठ° L. ॥ २ नाग्रेस° C. D. L. ॥ ३ यो ज° L. ॥

नवमः सर्गः

जिनं प्रति म्रियस्वेति वचसा रुषितो नृपः । इतः स्थानादुत्थितोऽसौ ग्राह्य इत्यादिशद्भटान् ॥ ६४ ॥
देशनान्ते महावीरं नत्वा कुष्ठी समुत्थितः । रुरुधे श्रेणिकभटैः किरातैरिव सूकरः ॥ ६५ ॥
स तेषां पश्यतामेव दिव्यरूपधरः क्षणात् । उत्पपाताम्बरे कुर्वन्नर्कबिम्बविडम्बनाम् ॥ ६६ ॥
पत्तिभिः कथिते राज्ञा स कः कुष्ठीति विस्मयात् । श्वो विज्ञप्तः प्रभुस्तस्मै देवः स इति शास्तवान् ॥ ६७ ॥
पुनर्विज्ञपयामास सर्वज्ञमिति भूपतिः । देवः कथमभूदेष कुष्ठी वा केन हेतुना ॥ ६८ ॥
अथोचे भगवानेवमस्ति वत्सेषु विश्रुता । कौशाम्बी नाम पूस्तस्यां शतानीकोऽभवन्नृपः ॥ ६९ ॥
तस्यां नगर्यामेकोऽभून्नामतः सेडुको द्विजः । सीमा सदा दरिद्राणां मूर्खाणामवधिः परः ॥ ७० ॥
गर्भिण्याऽभाणि सोऽन्येद्युर्ब्राह्मण्या सूतिकर्मणे । भट्टानय घृतं मह्यं सखा न ह्यन्यथा व्यथा ॥ ७१ ॥
सोऽप्यूचे तां प्रिये ! नास्ति मम कुत्रापि कौशलम् । येन किंचिल्लभे क्वापि कलाग्राह्या यदीश्वराः ॥ ७२ ॥
उवाच सा च तं भट्ट गच्छ [1]सेवस्व पार्थिवम् । पृथिव्यां पार्थिवादन्यो न कश्चित् कल्पपादपः ॥ ७३ ॥
तथेति प्रतिपद्यासौ नृपं पुष्पफलादिना । प्रवृत्तः सेवितुं विप्रो रत्नेच्छुरिव सागरम् ॥ ७४ ॥
कदाचिदथ कौशाम्बी चम्पेशानामितैर्बलैः । घनर्तुनेव मेघौघैररुध्यत समन्ततः ॥ ७५ ॥
सानीकोऽपि शतानीको मध्येकौशाम्बि तस्थिवान् । प्रतीक्षमाणः समयमन्तर्बिलमिवोरगः ॥ ७६ ॥

१ याचस्व *D. M.* ॥

चंप[illegible] कालेन बहुना सन्नसैनिकः । प्रावृषि स्वाश्रयं यातुं प्रवृत्तो राजहंसवत् ॥ ७७ ॥
तदा पुरुषार्थमुद्याने गतोऽपश्यच्च सेडुकः । तं क्षीणसैन्यं प्रत्यूषे निष्प्रभोडुमिवोडुपम् ॥ ७८ ॥
तूर्णमेत्य शतानीकं व्यजिज्ञपदसाविदम् । याति क्षीणबलस्तेऽरिर्भग्नदंष्ट्र इवोरगः ॥ ७९ ॥
यद्यद्योत्तिष्ठसे तस्मै तदा ग्राह्यः सुखेन सः । बलीयानपि खिन्नः सन्नखिन्नेनाभिभूयते ॥ ८० ॥
तद्वचः साधु मन्वानो राजा सर्वाभिसारतः । निःसृत्य [illegible] *नासीरमक्रमः ॥ ८१ ॥
ततः पश्चादपश्यन्तो नेशुश्चम्पेशसैनिकाः । अचिन्तिततडित्पाते को वीक्षितुमपि क्षमः ॥ ८२ ॥
चम्पाधिपतिरेकांगः कांदिशीकः पलायितः । तस्य हस्त्यश्वकोशादि कौशाम्बीपतिरग्रहीत् ॥ ८३ ॥
हृष्टः प्रविष्टः कौशाम्बीं शतानीको महामनाः । उवाच सेडुकं विप्रं ब्रूहि तुभ्यं ददामि किम् ? ॥ ८४ ॥
विप्रस्तमूचे याचिष्ये पृष्ट्वा निजकुटुम्बिनीम् । पर्यालोचपदं नान्यो गृहिणां गृहिणीं विना ॥ ८५ ॥
भट्टः प्रहृष्टो भट्टिन्यै तदशेषं शशंस सः । चेतसा चिन्तयामास सा चैवं बुद्धिशालिनी ॥ ८६ ॥
यद्यमुना ग्राहयिष्ये नृपाद् ग्रामादिकं तदा । करिष्यत्यपरान् दारान्मदाय विभवः खलु ॥ ८७ ॥
दिनं प्रत्येक आलोचस्तथाऽग्रासनभोजनम् । दीनारो दक्षिणायां च याच्योऽथेत्यन्वशात्पतिम् ॥ ८८ ॥

टि०- * नासीरम् - अग्रसैन्यम् ।

१ °सेन° D ॥

नवमः सर्गः

ययाचे नत्तथा विप्रो राजाऽदात्तद्वदन्निदम् । करंकोऽब्धिमपि प्राप्य गृह्णात्यात्मोचितं पयः ॥ ८९ ॥
प्रत्यहं तत्तथा लेभे प्राप संभाषणं च सः । पुंसां राजप्रसादो हि वितनोति महार्घताम् ॥ ९० ॥
राजमान्योऽयमित्येष लोकैर्नित्यं न्यमंत्र्यत । यस्य प्रसन्नो नृपतिस्तस्य कः स्यान्न सेवकः ॥ ९१ ॥
अग्रे भुक्तं वालयित्वा बुभुजेऽनेकशोऽपि सः । प्रत्यहं दक्षिणालोभाद्धिग्धिग्लोभो द्विजन्मनाम् ॥ ९२ ॥
उपाचीयत विप्रः स विविधैर्दक्षिणाधनैः । प्रासरत् पुत्रपौत्राद्यैः पादैरिव वटद्रुमः ॥ ९३ ॥
स तु नित्यमजीर्णान्नवमनादूर्ध्वगै रसैः । आमैरभूद् दूषितत्वगश्वत्थ इव लाक्षया ॥ ९४ ॥
कुष्ठी क्रमेण संजज्ञे शीर्णघ्राणांघ्रिपाणिकः । तथैवाभुङ्क्त राजाग्रे सोऽतृप्तो हव्यवाडिव ॥ ९५ ॥
एकदा मन्त्रिभिर्भूपो विज्ञप्तो देव ! कुष्ठ्यसौ । संचरिष्णुः कुष्ठरोगो नास्य योग्यमिहाशनम् ॥ ९६ ॥
सन्त्यस्य नीरुजः पुत्रास्तेभ्यः कोऽप्यत्र भोज्यताम् । न्यंगितप्रतिमायां हि स्थाप्यते प्रतिमान्तरम् ॥ ९७ ॥
एवमस्त्विति राज्ञोक्तेऽमात्यैर्विप्रस्तथोदितः । स्वस्थानेऽस्थापयत्पुत्रं गृहे तस्थौ स्वयं पुनः ॥ ९८ ॥
मधुमंडकवत्क्षुद्रमक्षिकाजालमालितः । पुत्रैर्गृहादपि बहिः कुटीरेऽक्षेपि स द्विजः ॥ ९९ ॥
बहिःस्थितस्य तस्याज्ञां पुत्रा अपि न चक्रिरे । दारुपात्रे ददुः किन्तु शुनकस्येव भोजनम् ॥ १०० ॥
जग्मुश्च तं भोजयितुं सजुगुप्साः स्नुषा अपि । निष्ठिवुश्च चलद्ग्रीवं मोटनोत्पुटनासिकाः ॥ १०१ ॥

१ °र्घता° C. M. ॥ २ वमयि° M. ॥ ३ °स्यांगोऽस्° ॥ ४ °सनम् C. ॥

अथ सोऽचिन्तयद्विप्रः श्रीमन्तोऽमी मया कृताः । एभिर्मुक्तोऽस्म्यनादृत्य तीर्णाम्भोभिस्तरण्डवत् ॥१०२॥
तोषयन्ति न वाचाऽपि रोषयन्त्येव माममी । कुष्ठी रुष्टो न संतुष्टो भव्य इत्यनुलापिनः ॥ १०३ ॥
जुगुप्सन्ते यथैते मां जुगुप्स्याः स्युरमी अपि । यथा तथा करिष्यामीत्यालोच्यावोचदात्मजान् ॥ १०४ ॥
उद्विग्नो जीवितस्याहं कुलाचारस्त्वसौ सुताः ! । मुमूर्षुभिः कुटुम्बस्य देयो मन्त्रोक्षितः पशुः ॥ १०५ ॥
पशुरानीयतामेक इत्याऽऽकर्ण्यानुमोदिनः । आनिन्यिरे तेऽथ पशुं पशुवन्मन्दबुद्धयः ॥ १०६ ॥
उद्वर्त्योद्वर्त्य च स्वांगमज्जेन व्याधिवर्तिकाः । तेनाचारि पशुस्तावद्यावत् कुष्ठी बभूव सः ॥ १०७ ॥
ददौ विप्रः स्वपुत्रेभ्यस्तं हत्वा पशुमन्यदा । तदाशयमजानन्तो मुग्धा बुभुजिरे च ते ॥ १०८ ॥
तीर्थं स्वार्थाय यास्यामीत्यापृच्छ्य तनयान् द्विजः । ययावूर्ध्वमुखोऽरण्यं शरण्यमिव चिन्तयन् ॥ १०९ ॥
अत्यन्ततृषितः सोऽटन्नटव्यां पयसे चिरम् । अपश्यत् सुहृदमिव देशे नानाद्रुमे ह्रदम् ॥ ११० ॥
नीरं तीरतरुस्रस्तपत्रपुष्पफलं द्विजः । ग्रीष्ममध्यंदिनार्कांशुक्वथितं क्वाथवत् पपौ ॥ १११ ॥
सोऽपाद्यथा यथा वारि भूयो भूयस्तृषातुरः । तथा तथा विरेकोऽथ तस्याभूत् कृमिभिः सह ॥ ११२ ॥
स नीरुगासीत्कियद्भिरप्यहोभिर्ह्रदाम्भसा । मनोज्ञावयवो जज्ञे वसन्तेनेव पादपः ॥ ११३ ॥
आरोग्यहृष्टो ववले विप्रः क्षिप्रं स्ववेश्मनि । पुंसां वपुर्विशेषोत्थः शृंगारो जन्मभूमिषु ॥ ११४ ॥

नवमः सर्गः

१ न तु तुष्टो L ॥

पुर्यां स प्रविशन् पौरैर्ददृशे जातविस्मयैः । देदीप्यमानो निर्मुक्तनिर्मोक इव पन्नगः ॥ ११५ ॥
पौरैः पृष्टः पुनर्जात इवोल्लाघः कथं न्वसि ? । देवताराधनादस्मीत्याचचक्षे स तु द्विजः ॥ ११६ ॥
स गत्वा स्वगृहेऽपश्यत् स्वपुत्रान् कुष्ठिनो मुदा । मयाऽवज्ञाफलं साधु दत्तमित्यवदच्च तान् ॥ ११७ ॥
सुतास्तमेवमूचुश्च भवता तात ! निर्घृणं । विश्वस्तेषु किमस्मासु द्विषेवेदमनुष्ठितम् ॥ ११८ ॥
लोकैराक्रुश्यमानः स राजन्नागत्य ते पुरम् । आश्रयज्जीविकाद्वारं द्वारपालं निराश्रयः ॥ ११९ ॥
तदाऽत्र वयमायाता द्वाःस्थोऽस्मद्धर्मदेशनाम् । श्रोतुं प्रचलितोऽमुञ्चत्तं विप्रं निजकर्मणि ॥ १२० ॥
द्वारोपविष्टः स द्वारदुर्गाणामग्रतो बलिम् । जन्मादृष्टमिवाभुंक्त यथेष्टं क्षुधितः क्षुधा ॥ १२१ ॥
आकण्ठं परिभुक्तान्नदोषाद् ग्रीष्मोष्मतश्च सः । तदात्यन्तं तृषाऽकारि मरुपान्थ इवाऽऽकुलः ॥ १२२ ॥
नच द्वास्थभिया स्थानं त्यक्त्वा नागात् प्रपादिषु । स तु वारिचराञ्जीवान् धन्यान्मेने तृषातुरः ॥ १२३ ॥
आरटन् वारि वारीति स तृषार्तो व्यपद्यत । इहैव नगरद्वारवाप्यामजनि दर्दुरः ॥ १२४ ॥
विहरन्तो वयं भूयोऽप्यागमामेह पत्तने । लोकोऽस्मद्वन्दनार्थं च प्रचचाल ससंभ्रमः ॥ १२५ ॥
अस्मदागमनोदन्तं श्रुत्वाम्भोहारिणीमुखात् । स भेकोऽचिन्तयदिदं क्वाप्येवं श्रुतपूर्व्यहम् ॥ १२६ ॥
ऊहापोहं ततस्तस्य कुर्वाणस्य मुहुर्मुहुः । स्वप्नस्मरणवज्जातिस्मरणं तत्क्षणादभूत् ॥ १२७ ॥
स दध्यौ दर्दुरश्चैवं द्वारे संस्थाप्य मां पुरा । द्वाःस्थो यं वन्दितुमगात् स आगाद्भगवानिह ॥ १२८ ॥

यथैते यान्ति तं द्रष्टुं लोका यास्याम्यहं तथा। सर्वसाधारणी गंगा न हि कस्यापि पैतृकी ॥ १२९ ॥
ततोऽस्मद्वन्दनाहेतोरुत्प्लुत्योत्प्लुत्य सोऽध्वनि। आयांस्तेऽश्वखुरक्षुण्णो भेकः पंचत्वमाप्तवान् ॥ १३० ॥
दर्दुरांकोऽयमुत्पेदे देवोऽस्मद्भक्तिभावितः। भावना हि फलत्येव विनानुष्ठानमप्यहो ॥ १३१ ॥
इन्द्रः सदस्युवाचेदमुपश्रेणिकमार्हतः। अश्रद्दधानस्तदसौ त्वत्परीक्षार्थमागतः ॥ १३२ ॥
गोशीर्षचन्दनेनायमार्चयच्चरणौ मम। त्वदृष्टिमोहनायान्यत्सर्वं व्यधित वैक्रियम् ॥ १३३ ॥
अथोचे श्रेणिकः स्वामिन्नमंगल्यं प्रभोः क्षुते। एषोऽन्येषां तु मंगल्यामंगल्यानि किमभ्यधः ॥ १३४ ॥
अथाचचक्षे भगवान् किं भवेऽद्यापि तिष्ठसि। शीघ्रं मोक्षं प्रयाहीति मां म्रियस्वेति सोऽवदत् ॥ १३५ ॥
स त्वामवोचज्जीवेति जीवतस्ते यतः सुखम्। नरके नरशार्दूल! मृतस्य हि गतिस्तव ॥ १३६ ॥
जीवन् धर्मं विधत्ते स्याद्विमानेऽनुत्तरे मृतः। जीव म्रियस्व वेत्येवं तेनाभयमभाषत ॥ १३७ ॥
जीवन् पापपरो मृत्वा सप्तमं नरकं व्रजेत्। कालसौकरिकस्तेन प्रोक्तो मा जीव मा मृथाः ॥ १३८ ॥
तच्छ्रुत्वा श्रेणिको नत्वा भगवन्तं व्यजिज्ञपत्। त्वयि नाथे जगन्नाथ! कथं मे नरके गतिः? ॥ १३९ ॥
बभाषे भगवानेवं पुरा त्वमसि भूपते! बद्धायुर्नरके तेन तत्रावश्यं गमिष्यसि ॥ १४० ॥
शुभानामशुभानां वा फलं प्राग्बद्धकर्मणाम्। भोक्तव्यं तद्द्वयमपि नान्यथा कर्तुमीश्महे ॥ १४१ ॥

१ मर्चं *C. L.* ॥ २ चेत्ये *C. L. D.* ॥

आद्यो भाविजिनश्चतुर्विंशतौ त्वं भविष्यसि । पद्मनाभाभिधो राजन्! खेदं मा स्म कृथास्ततः ॥ १४२ ॥
श्रेणिकोऽप्यवदन्नाथ! किमुपायोऽस्ति कोऽपि सः । नरकाद्येन रक्ष्येऽहमन्धकूपादिवान्धलः ॥ १४३ ॥
भगवान् व्याजहारेदं साधुभ्यो भक्तिपूर्वकम् । ब्राह्मण्या चेत् कपिलया भिक्षां दापयसे मुदा ॥ १४४ ॥
कालसौकरिकेणाथ सूनां मोचयसे यदि । तदा ते नरकान्मोक्षो राजञ्जायेत नाऽन्यथा ॥ १४५ ॥
सम्यगित्युपदेशं स हृदि हारमिवोद्वहन् । प्रणम्य श्रीमहावीरं चचाल स्वाश्रयं प्रति ॥ १४६ ॥
अत्रान्तरे परीक्षार्थं दर्दुरांकेन भूपतेः । अकार्यं विदधत्साधुः कैवर्त इव दर्शितः ॥ १४७ ॥
तं दृष्ट्वा प्रवचनस्य मालिन्यं मा स्म भूदिति । निवार्याकार्यतः साम्ना स्वगृहं प्रत्यगान्नृपः ॥ १४८ ॥
स देवो दर्शयामास साध्वीमुदरिणीं पुनः । नृपः शासनभक्तस्तां जुगोप निजवेश्मनि ॥ १४९ ॥
प्रत्यक्षीभूय देवोऽपि तमूचे साधु साधु भोः । सम्यक्त्वाच्चाल्यसे नैव पर्वतः स्वपदादिव ॥ १५० ॥
नृनाथ! यादृशं शक्रः सदसि त्वामवर्णयत् । दृष्टस्तादृश एवासि मिथ्यावाचो न तादृशाः ॥ १५१ ॥
दिवा निर्मितनक्षत्रश्रेणिकं श्रेणिकाय सः । व्यश्राणयत्ततो हारं गोलकद्वितयं तथा ॥ १५२ ॥
योऽमुं संधास्यते हारं त्रुटितं स मरिष्यति । इत्युदीर्य तिरोधत्त स्वप्नदृष्ट इवामरः ॥ १५३ ॥
दिव्यं देव्यै ददौ हारं चेलणायै मनोहरम् । गोलकद्वितयं तत्तु नन्दायै नृपतिर्मुदा ॥ १५४ ॥
दानस्यास्यास्मि योग्येति सेर्ष्यं नन्दा मनस्विनी । आस्फाल्य स्फोटयामास स्तंभे तद्गोलकद्वयम् ॥ १५५ ॥ 

एकस्मात् कुण्डलद्वन्द्वं चन्द्रद्वन्द्वमिवामलम् । देदीप्यमानमन्यस्मात् क्षौमयुग्मं च निःस्वनम् ॥ १५६ ॥
तानि दिव्यानि रत्नानि नन्दा सानन्दमग्रहीत् । अनभ्रवृष्टिवल्लाभो महतां स्यादचिन्तितः ॥ १५७ ॥
राजा ययाचे कपिलां साधुभ्यः श्रद्धयाऽन्विना । भिक्षां प्रयच्छ निर्भिक्षां त्वां करिष्ये धनोच्चयैः ॥१५८॥
कपिलोचे विश्वसे मां सर्वां स्वर्णमयीं यदि । छिनत्सि वा तथाप्येतदकृत्यं न करोम्यहम् ॥ १५९ ॥
कालसौकरिकोऽप्यूचे राज्ञा सूनां विमुञ्च यत् । दास्येऽर्थं बहुमर्थस्य लोभात्त्वमसि सौनिकः ॥ १६० ॥
सूनायां ननु को दोषो ? यया जीवन्ति मानवाः । तां न जातु त्यजामीति कालसौकरिकोऽवदत् ॥ १६१ ॥
सूनाव्यापारमेषोऽत्र करिष्यति कथं न्विति । नृपः क्षिप्त्वाऽन्धकूपे तमहोरात्रमधारयत् ॥ १६२ ॥
अथ विज्ञापयामास गत्वा भगवते नृपः । सोऽत्याजि सौनिकः सूनामहोरात्रमिदं विभो ! ॥१६३॥
सर्वज्ञोऽभिदधे राजन्नन्धकूपेऽपि सोऽवधीत् । शतान् पञ्च महिषाणां स्वयं निर्माय मृन्मयान् ॥ १६४ ॥
तद्गत्वा श्रेणिकोऽपश्यत् स्वयमुद्विविजे ततः । धिगहो मे पुराकर्म नान्यथा भगवद्गिरः ॥ १६५ ॥
श्रीवीरोऽपि ततः स्थानाद्विहरन् सपरिच्छदः । सुरासुरैः सेव्यमानः पृष्ठचम्पापुरीं ययौ ॥ १६६ ॥
सालो राजा महासालो युवराजश्च बान्धवौ । त्रिजगद्बान्धवं वीरं तत्र वन्दितुमेयतुः ॥ १६७ ॥
श्रुत्वा तौ देशनां बुद्धौ जामेयं गागलिं स्वयम् । यशोमतीपिठरयोः सुतं राज्येऽभ्यषिञ्चताम् ॥ १६८ ॥
अथ सालमहासालौ विरक्तौ भववासतः । श्रीमहावीरपादाब्जमूले जगृहतुर्व्रतम् ॥ १६९ ॥

कालान्तरेण विहरन् भगवान् सपरिच्छदः । चतुस्त्रिंशदतिशयो ययौ चम्पां महापुरीम् ॥ १७० ॥
स्वामिनोऽनुज्ञया सालमहासालर्षिसंयुतः । ततः पुरीं पृष्ठचम्पां गौतमो गणभृद्ययौ ॥ १७१ ॥
ववन्दे गौतमं तत्र भक्तितो गागलिर्नृपः । तन्मातापितरावन्ये पौरामात्यादयोऽपि च ॥ १७२ ॥
तत्रासीनः सुरकृते सौवर्णे कमलासने । इन्द्रभूतिश्चतुर्ज्ञानो विदधे धर्मदेशनाम् ॥ १७३ ॥
गागलिः प्रतिबुद्धोऽथ राज्ये न्यस्य निजं सुतम् । दीक्षां गौतमपादान्ते पितृभ्यां सममाददे ॥ १७४ ॥
स तैस्त्रिभिः सालमहासालाभ्यां च समावृतः । चचाल गौतममुनिश्चम्पायां वन्दितुं प्रभुम् ॥ १७५ ॥
अनुगौतममायातां पंचानामपि वर्त्मनि । शुभभाववशात्तेषामुदपद्यत केवलम् ॥ १७६ ॥
प्राप्ताः सर्वेऽपि चम्पायां पुर्यां तत्र जिनेश्वरम् । ते प्रदक्षिणयामासुः प्रणनाम तु गौतमः ॥ १७७ ॥
तीर्थं नत्वाऽथ ते पंच चेलुः केवलिपर्षदि । तानूचे गौतमो हन्त वन्दध्वं परमेश्वरम् ॥ १७८ ॥
स्वाम्यूचे गौतमर्षे ! मा केवल्याशातनां कृथाः । गौतमोऽप्यक्षमयत्तान्मिथ्यादुष्कृतपूर्वकम् ॥ १७९ ॥
खिन्नोऽथ गौतमो दध्यौ न किमुत्पत्स्यते मम । केवलज्ञानमिह च भवे सेत्स्यामि किं न हि ? ॥ १८० ॥
योऽष्टापदे जिनान्नत्वा वसेद्रात्रिं स सिध्यति । भवेऽत्रैवेत्यर्हदुक्तं वक्तॄन् सोऽथास्मरत्सुरान् ॥ १८१ ॥
देवतावाक्प्रत्ययेन तदानीं गौतमो मुनिः । इयेषाष्टापदं गन्तुं तीर्थकृद्वन्दनाकृते ॥ १८२ ॥

---

१ द्वात्री L ॥

तदिच्छां तापसबोधं चार्हन् विज्ञाय भाविनम् । आदिदेशाष्टापदेऽर्हद्वन्दनायाथ गौतमम् ॥ १८३ ॥
इच्छाऽनुरूपस्वाम्याज्ञामुदितो गौतमो मुनिः । वायुवच्चारणलब्ध्या क्षणादष्टापदं ययौ ॥ १८४ ॥
इतश्चाष्टापदं मोक्षहेतुं श्रुत्वा तपस्विनः । कौडिन्यदत्तसेवाला आरोढुं समुपस्थिताः ॥ १८५ ॥
चतुर्थकृत्सदाप्याद्य आर्द्रकन्दादिपारणः । प्रापाऽऽद्यां मेखलां सार्धं पञ्चशत्या तपस्विनाम् ॥ १८६ ॥
द्वितीयः षष्ठकृत्प्राप शुष्ककन्दादिपारणः । द्वितीयां मेखलां सार्धं पञ्चशत्या तपस्विनाम् ॥ १८७ ॥
तृतीयोऽष्टमकृत्प्राप शुष्कसेवालपारणः । तृतीयां मेखलां सार्धं पञ्चशत्या तपस्विनाम् ॥ १८८ ॥
ऊर्ध्वमारोढुमसहास्ते तस्थुर्यावदुन्मुखाः । ददृशुर्गौतमं तावत् स्वर्णाभं पीवराकृतिम् ॥ १८९ ॥
ते मिथः प्रोचिरे शैलं वयमेतं कृशा अपि । न रोढुमीश्महे स्थूल आरोक्ष्यत्येष तत्कथम्? ॥ १९० ॥
एवं तेषु ब्रुवाणेषु गौतमस्तं महाचलम् । समारुरोह जज्ञे चादृश्यः सुर इव क्षणात् ॥ १९१ ॥
तेऽन्योऽन्यं जगदुः शक्तिर्महर्षेरस्य काऽप्यसौ । यद्यायास्यत्यसौ शिष्यीभविष्यामोऽस्य तद्वयम् ॥१९२॥
निश्चित्यैवं तापसास्ते प्रत्यायान्तं स्वबन्धुवत् । आबद्धरणरणकाः प्रतीक्षन्ते स्म सादरम् ॥ १९३ ॥
गौतमोऽपि ययौ चैत्यं भरतेश्वरकारितम् । नन्दीश्वरस्थचैत्याभं चतुर्विंशजिनांकितम् ॥ १९४ ॥
अवन्दिष्टार्हतां तत्र स चतुर्विंशतेरपि । बिंबान्यप्रतिबिम्बानि भक्त्या परमया मुनः ॥ १९५ ॥

१ °पसं श्रो° C. । °पसा श्रो° L. । पसंबो° M. ॥ २ °दिक्षस° L. ॥

निर्गत्य गौतमश्चैत्यात्तलेऽशोकमहातरोः। उपाविशद्वन्द्यमानः सुरासुरनभश्चरैः ॥ १९६ ॥
चक्रे च गौतमस्तेषां यथार्हं धर्मदेशनाम्। संदेहांश्चाच्छिदत् पृष्टस्तर्कितः केवलीति तैः ॥ १९७ ॥
देशनां कुर्वता तेन प्रस्तावादिदमौच्यत। अस्थिचर्मावशिष्टांगाः किटित्किटितसंधयः ॥ १९८ ॥
ग्लानिभाजो ब्रुवन्तोऽपि जीवसत्त्वेन गामिनः। तपोभिरुग्रैरीदृक्षा भवन्ति खलु साधवः ॥ १९९ ॥
तत्तु श्रुत्वा वैश्रवणस्तस्य स्थौल्यं विभावयन्। स्वस्मिन्नपि विसंवादि वचोऽस्येत्यहसन्मनाक् ॥ २०० ॥
इन्द्रभूतिर्मनोज्ञानी ज्ञात्वा तद्भावमब्रवीत्। नांगकार्श्यं प्रमाणं स्यात् किं त्वहो ध्याननिग्रहः ॥ २०१ ॥
तथाहि जम्बूद्वीपेऽस्मिन्महाविदेहभूषणे। विजये पुष्कलावत्यामस्ति पूः पुंडरीकिणी ॥ २०२ ॥
महापद्मो नृपस्तत्र तस्य पद्मावती प्रिया। पुंडरीककंडरीकौ तयोः पुत्रौ बभूवतुः ॥ २०३ ॥
अन्यदा नलिनवनोपवने समुपेयुषाम्। साधूनां सन्निधौ धर्मं महापद्मनृपोऽशृणोत् ॥ २०४ ॥
न्यस्य राज्ये पुंडरीकं महापद्मोऽग्रहीद् व्रतम्। उत्पन्नकेवलः कर्मक्षयान्मोक्षमगात् क्रमात् ॥ २०५ ॥
साधवः पुंडरीकिण्यां तेऽन्यदा पुनरायुः। पुंडरीककंडरीकौ धर्मं शुश्रुवतुस्ततः ॥ २०६ ॥
तत्र भावयतिर्भूत्वा पुंडरीको गृहं ययौ। समक्षं मंत्रिणां चैवं कंडरीकमभाषत ॥ २०७ ॥
इदं वत्स! समादत्स्व राज्यं पैतृकमुच्चकैः। भवाद्भीतो ग्रहीष्यामि दीक्षां तद्भयरक्षिणीम् ॥ २०८ ॥
प्रत्यूचे कंडरीकोऽपि किं पातयसि मां भवे ?। तदहं प्रव्रजिष्यामि तरिष्यामि भवार्णवम् ॥ २०९ ॥

ततो द्विस्त्रिश्च राज्यार्थं राज्ञोक्तं नाकरोद्यदा । तदा व्रतेऽनुजज्ञे स शिष्टश्चैवं हितैषिणा ॥ २१० ॥
दुर्जेयानीन्द्रियाणीह चंचलं च सदा मनः । विकारधाम तारुण्यं प्रमादः सहजो नृणाम् ॥ २११ ॥
परीषहोपसर्गाश्च दुःसहा वत्स तत्त्वया । भाव्यं दृढमतिज्ञेन प्रव्रज्या दुष्करा खलु ॥ २१२ ॥
यदि वा श्रावकधर्मं राज्यं च परिपालय । अतीते यौवने दीक्षामाददीथास्तदोचिताम् ॥ २१३ ॥
कंडरीकोऽप्युवाचैवं सत्यमेतत्तथापि हि । प्रजल्पितं विधातव्यं प्रव्रजिष्यामि निश्चितम् ॥ २१४ ॥
प्राव्राजीत् कंडरीकोऽथ पुंडरीकस्तु भूपतिः । व्रतान्निषिद्धः सचिवैस्तस्थौ भावयतिर्गृहे ॥ २१५ ॥
कंडरीकोऽपि विविधैस्तपोभिः क्लिष्टविग्रहः । सामाचारीपालनतः साधूनामभवत् प्रियः ॥ २१६ ॥
वसन्तसमयेऽन्येद्युर्जृम्भमाणे मनोऽचलत् । महर्षेः कंडरीकस्य चारित्रावरणोदयात् ॥ २१७ ॥
अचिन्तयच्च पर्याप्तं मम प्रव्रज्ययाऽनया । गत्वा राज्यमुपादास्ये भ्रात्रा दत्तं पुराऽपि यत् ॥ २१८ ॥
इत्यागात्पुंडरीकिण्यां स्थित्वोद्याने तरौ क्वचित् । पात्राद्यालम्ब्य हरितस्रस्तरे शीतलेऽलुठत् ॥ २१९ ॥
उद्यानपालनाऽऽत्मानं स राज्ञेऽज्ञापयद् द्रुतम् । सप्रधानो नृपस्तत्राभ्यागत्य तमवन्दत ॥ २२० ॥
वृक्षबद्धोपकरणो हरित्कायस्थ एककः । मन्येऽसौ व्रतनिर्विण्ण इति ज्ञात्वाऽब्रवीन्नृपः ॥ २२१ ॥
भो ! भोः ! सर्वं स्मरथ किं यन्मे वारयतोऽमुना । तदा गृहीतं श्रामण्यं बालेन रभसावशात् ॥ २२२ ॥

इत्युदित्वा पुंडरीकः कंडरीकं तदर्थिने । राज्ये निवेशयामास राज्यचिह्नानि चार्पयत् ॥ २२३ ॥
पुंडरीकनृपस्तस्माद्यतिलिंगान्युपाददे । स्वयमात्तपरिव्रज्यः शुद्धधीर्व्यहरत्ततः ॥ २२४ ॥
भग्नव्रतः कृशो रंक इवाप्तार्थीनि सेवकैः । हस्यमानः कंडरीकश्चुकोप हृदयेऽधिकम् ॥ २२५ ॥
भुञ्जेऽहं प्रथमं तावत्पश्चादेषां प्रहासिनाम् । करिष्यामि वधादीनि चिन्तयन् स गृहे ययौ ॥ २२६ ॥
जघन्यमध्यमोत्कृष्टस्त्रिधाऽऽहारो यदृच्छया । प्रातः कपोतयूनेव तेनाकण्ठमभुज्यत ॥ २२७ ॥
भोगजागरणाद्रात्रावत्याहाराच्च दुर्जरात् । जज्ञे विसूचिका तस्य महत्यरतिरप्यभूत् ॥ २२८ ॥
उत्फुल्लमुदरं तस्य भस्त्रेवानिलपूरिता । निरुद्धः पवनस्तृष्णादाहश्च समभून्महान् ॥ २२९ ॥
भ्रष्टप्रतिज्ञः पापोऽसाविति ध्यात्वा नियोगिभिः । अकारितचिकित्सोऽथ सोऽर्तिमानित्यचिन्तयत् ॥२३०॥
कथंचिद्यद्यमूं रात्रिमत्येष्यामि तदा प्रगे । सकुटुम्बान् हनिष्यामि सर्वानेतान्नियोगिनः ॥ २३१ ॥
एवं च कृष्णलेश्यावान् रौद्रध्यानी व्यपादि सः । उदपाद्यप्रतिष्ठाने नारकः सप्तमावनौ ॥ २३२ ॥
दिष्ट्या चिरेष्टो लब्धो यो धर्मस्तं गुरुसाक्षिकम् । करोमीति पुंडरीकोऽप्यचालीत् सद्गुरुं प्रति ॥ २३३ ॥
समीपे सुगुरोर्गत्वा पुनरादाय स व्रतम् । पारणामष्टमस्यान्ते पुंडरीकमुनिर्व्यधात् ॥ २३४ ॥
अतिवेलैः शीतरूक्षैराहारैः पीडितो मृदुः । भूचारविगलत्पादासृगुद्भूतपरिश्रमः ॥ २३५ ॥

१ भिंनं *L* ॥ २ स गुरुं *D* ॥ ३ नास्ति अयं श्लोकः *C. D. L.* इत्यत्र ॥

यचित्वोपाश्रयं ग्रामे निषण्णस्तृणसंस्तरे। गुर्वन्ते प्रव्रजिष्यामि कदा न्विति विचिन्तयन् ॥ २३६ ॥
विहिताराधनः सम्यक् शुभध्यानपरायणः। पीनांगोऽपि विपन्नः सन् स सर्वार्थमुपेयिवान् ॥ २३७ ॥
( त्रिभिर्विशेषकम् )
तत्पीनत्वं कृशत्वं वा न प्रमाणं तपस्विनाम्। शुभध्यानं हि परमपुरुषार्थनिबन्धनम् ॥ २३८ ॥
एतदर्थं पुंडरीकाध्ययनं गौतमोदितम्। जग्राहैकसंस्थयापि श्रीदसामानिकः सुरः ॥ २३९ ॥
प्रतिपेदे स सम्यक्त्वं नत्वा वैश्रवणः पुनः। स्वाभिप्रायपरिज्ञानान्मुदितः स्वाश्रयं ययौ ॥ २४० ॥
एवं देशनया स्वामी गौतमोऽतीत्य तां निशाम्। प्रभाते चोत्तरन् शैलात्तापसैस्तैरदृश्यत ॥ २४१ ॥
तापसास्तं प्रणम्योचुर्महात्मंस्तपसां निधे!। तव शिष्यीभविष्यामस्त्वमस्माकं गुरुर्भव ॥ २४२ ॥
तानूचे गौतमस्वामी गुरुर्मे परमेश्वरः। सर्वज्ञोऽर्हन्महावीरः स एव गुरुरस्तु वः ॥ २४३ ॥
अथ तानाग्रहपरान् दीक्षयामास गौतमः। सद्यो देवतया तेषां यतिलिंगं समर्पितम् ॥ २४४ ॥
गौतमेन समं चेलुर्गन्तुं ते स्वामिनोऽन्तिके। सह यूथाधिपतिना विन्ध्याद्रौ कुञ्जरा इव ॥ २४५ ॥
पथ्येकस्मिन् सन्निवेशे भिक्षाकाले गणाग्रणीः। किं वः पारणकायेष्टमानयामीत्युवाच तान् ॥ २४६ ॥
तैश्च पायसमित्युक्ते गौतमो लब्धिसंपदा। स्वकुक्षिपूरणमात्रं पात्रे कृत्वा तदानयत् ॥ २४७ ॥
इन्द्रभूतिर्बभाषे तान्निषीदत महर्षयः!। पायसेनामुना यूयं सर्वे कुरुत पारणम् ॥ २४८ ॥

पायसेनेयता किं स्यात्तथापि गुरुरेष नः । एवं विमृश्य ते सर्वे मुनयः समुपाविशन् ॥ २४९ ॥
तान्महानसलब्ध्येन्द्रभूतिः सर्वानभोजयत् । स्वयं तु बुभुजे पश्चात्तेषां जनितविस्मयः ॥ २५० ॥
दिष्ट्या धर्मगुरुर्वीरः प्राप्तोऽस्माभिर्जगद्गुरुः । पितृकल्पो मुनिश्चैष बोधिश्चात्यन्तदुर्लभा ॥ २५१ ॥
सर्वथा कृतपुण्याः स्म इति भावयतामभूत् । भुञ्जानानां केवलं द्राक् तत्र सेवालभक्षिणाम् ॥ २५२ ॥

( युग्मम् )

जज्ञे च प्रातिहार्याणि दत्तादीनां प्रपश्यताम् । कौण्डिन्यादीनां श्रीवीरं केवलज्ञानमुज्ज्वलम् ॥ २५३ ॥
प्रभुं प्रदक्षिणीकृत्य तेऽयुः केवलिपर्षदि । वन्दध्वं स्वामिनमिति तानभाषिष्ट गौतमः ॥ २५४ ॥
केवल्याशातनां मा स्म कार्षीरित्यवदत्प्रभुः । मिथ्यादुष्कृतपूर्वं तान् क्षमयामास गौतमः ॥ २५५ ॥
भूयोऽपि गौतमो दध्यौ सेत्स्याम्यत्र भवे न हि । गुरुकर्माऽहमेते तु धन्या मद्दीक्षिता अपि ॥ २५६ ॥
उत्पेदे केवलज्ञानं येषामेषां महात्मनाम् । एवं विचिन्तयन्तं तं भगवानित्यभाषत ॥ २५७ ॥ (युग्मम्)
किं सुराणां वचस्तथ्यं जिनानामथ गौतम ! । जिनानामिति तेनोक्ते मा कार्षीरधृतिं ततः ॥ २५८ ॥
तृणाद्विदलचर्मोर्णाकटतुल्या भवन्ति हि । स्नेहा गुरुषु शिष्याणां तवोर्णाकटसन्निभः ॥ २५९ ॥
अस्मासु चिरसंसर्गात् स्नेहो दृढतरस्तव । तेन रुद्धं केवलं ते तदभावे भविष्यति ॥ २६० ॥ ॥२८१

१ °पामजनि त्रि° L ॥ २ दिनादी° L ॥

गौतमस्य प्रबोधार्थमन्येषां चानुशिष्टये । व्याकरोद् द्रुमपत्रीयाध्ययनं परमेश्वरः ॥ २६१ ॥
अत्रान्तरे जगद्भर्तुश्चरणोपासकः परः । परिव्राडंबडस्तत्रायायौ छत्री त्रिदंडभृत् ॥ २६२ ॥
स त्रिः प्रदक्षिणीकृत्य प्रणम्य च जिनेश्वरम् । रोमाञ्चितवपुर्भक्त्या रचिताञ्जलिरस्तवीत् ॥ २६३ ॥
तव चेतसि वर्तेऽहमिति वार्ताऽपि दुर्लभा । मच्चित्ते वर्तसे चेत्त्वमलमन्येन केनचित् ॥ २६४ ॥
निगृह्य कोपतः कांश्चित् कांश्चित्तुष्ट्याऽनुगृह्य च । प्रतार्यन्ते मृदुधियः प्रलम्भनपरैः परैः ॥ २६५ ॥
अप्रसन्नात् कथं प्राप्यं फलमेतदसंगतम् । चिन्तामण्यादयः किं न फलन्त्यपि विचेतनाः ? ॥ २६६ ॥
वीतरागसपर्याभिः तवाज्ञापालनं परम् । आज्ञाऽऽराद्धा विराद्धा च शिवाय च भवाय च ॥ २६७ ॥
आकालमियमाज्ञा ते हेयोपादेयगोचरा । आश्रवः सर्वथा हेय उपादेयश्च संवरः ॥ २६८ ॥
आश्रवो भवहेतुः स्यात्संवरो मोक्षकारणम् । इतीयमार्हती मुष्टिरन्यदस्याः प्रपंचनम् ॥ २६९ ॥
इत्याज्ञाराधनपरा अनन्ताः परिनिर्वृताः । निर्वान्ति चान्ये क्वचन निर्वास्यन्ति तथाऽपरे ॥ २७० ॥
हित्वा प्रसादनादैन्यमेकयैव त्वदाज्ञया । सर्वथैव विमुच्यन्ते जन्मिनः कर्मपञ्जरात् ॥ २७१ ॥
एवं जगद्गुरुं स्तुत्वा यथास्थानं निषद्य च । देशनां स्वामिनोऽश्रौषीत् स्ववासीवानिमेषदृक् ॥ २७२ ॥
देशनान्ते प्रभुं नत्वा यावद्राजगृहं प्रति । अचालीदंबडस्तावदित्यूचे स्वामिना स्वयम् ॥ २७३ ॥

१ °डम्मड° C. L. ॥ २ °पर्यापि त° M. । °पर्यास्त° D ॥

तत्र नागरथिपत्न्याः सुलसायास्त्वमादरात् । प्रवृत्तिमस्मदादेशात् पृच्छेः पेशलया गिरा ॥ २७४ ॥
इच्छामीति भणित्वा स व्योम्ना राजगृहं ययौ । सुलसाया गृहद्वारे स्थित्वा चैवमचिन्तयत् ॥ २७५ ॥
सुरासुरनरेन्द्राणां पश्यतां त्रिजगत्पतिः । सुलसापक्षपाती किं ? करिष्ये तत्परीक्षणम् ॥ २७६ ॥
कृत्वा रूपान्तरं सोऽथ जातवैक्रियलब्धिकः । प्रविश्य सुलसागेहे सुधीर्भिक्षामयाचत ॥ २७७ ॥
पात्राय साधवे भिक्षां ददामीति कृताश्रवा । याचमानायापि तस्मै सुलसा न ददौ तदा ॥ २७८ ॥
ततश्च निःसृत्य पुराद् द्वारि प्राग्गोपुरस्य सः । विकृत्य ब्रह्मणो रूपमवतस्थे समाहितः ॥ २७९ ॥
पद्मासनसमासीनश्चतुर्बाहुश्चतुर्मुखः । ब्रह्मसूत्र्यक्षसूत्री च जटामुकुटमण्डितः ॥ २८० ॥
सावित्रीसंयुतो हंसयानो धर्मं दिदेश सः । पौराणां च मनोऽहार्षीत् साक्षाद्ब्रह्मेति मानिनाम् ॥ २८१ ॥
बहिरस्ति स्वयं ब्रह्मेत्याहूताऽपि सखीजनैः । न ययौ सुलसा मिथ्यादृष्टिसंस्तवकातरा ॥ २८२ ॥
[1]अम्बडश्च द्वितीयेऽह्नि याम्यायां गरुडासनः । शंखचक्रगदाशार्ङ्गी तस्थौ गोविन्दरूपभृत् ॥ २८३ ॥
अपि विष्णुप्रवादेन लोकव्यामोहकारिणा । नाऽऽययौ सुलसा तत्र सम्यग्दर्शननिश्चला ॥ २८४ ॥
[2]अंबडोऽथ तृतीयेऽह्नि वारुण्यां वृषवाहनः । चन्द्रचूडो युतो गौर्या कृत्तिवासास्त्रिलोचनः ॥ २८५ ॥

१ अम्मड° *L* । °अम्माड° *C* ॥ २ अम्मडो° *C, L* ॥

भस्मांगरागः खट्वांगी शूलपाणिः पिनाकभृत् । कपाली रुंडमाली च नानागणसमावृतः ॥२८६ ॥
आस्थद्धर्मं हरो भूत्वा पौराणां च मनोऽहरत् । परमश्राविका सा तु तं द्रष्टुमपि नाययौ ॥ २८७ ॥
चतुर्थेऽह्न्युत्तरस्यां स वप्रत्रयशोभितम् । दिव्यं समवसरणं विचक्रे स्फारतोरणम् ॥ २८८ ॥
स्थितं तत्र जिनीभूय श्रुत्वा पौरा विशेषतः । श्रद्धया महत्याऽभ्येयुस्तं ततो धर्मं च शुश्रुवुः ॥ २८९ ॥
एवं सत्यप्यनायातां सुलसामंबडोऽथ ताम् । कंचित् क्षोभयितुं प्रैषीत्कृत्वा सोऽपीत्यवोचत ॥ २९० ॥
सुलसे ! समवसृतो विश्वस्वामी जिनेश्वरः । त्वमेहि भद्रे ! तत्रावान् वन्दितुं किं विलंबसे ? ॥ २९१ ॥
सुलसाऽपि बभाषे तं न खल्वेष जगद्गुरुः । भगवान् श्रीमहावीरश्चतुर्विंशो जिनेश्वरः ॥ २९२ ॥
सोऽपि च प्रत्युवाचैवं मुग्धे ! नन्वेष वर्तते । पंचविंशस्तीर्थंकरः प्रत्यक्षमपि वीक्ष्यताम् ॥ २९३ ॥
सुलसाऽप्यब्रवीज्जातु पंचविंशो जिनो न हि । अयं कार्पटिकः कोऽपि लोकं वञ्चयते कुधीः ॥ २९४ ॥
सोऽप्यूचे मा कृथा भेदं शासनस्य प्रभावना । भद्रे ! भवत्येहि तत्र का ते हानिर्भविष्यति ? ॥ २९५ ॥
अवदत्सुलसाऽप्येवं शासनस्य प्रभावना । नैवं भवत्यलीकेन किं त्वपभ्राजनैव हि ॥ २९६ ॥
अचालितामेवमपि निरीक्ष्य सुलसां स्थिराम् । अंबडश्चिन्तयामास संजातप्रत्ययो हृदि ॥ २९७ ॥

१ "मम्मडो" C. L. ॥ २ अम्मड" C. L. ॥

स्थाने जगद्गुरुरमूं सभायां समभावयत् । अचालि तस्याः सम्यक्त्वं माययाऽपि मया न हि ॥ २९८ ॥
ततः संहृत्य निःशेषं प्रपंचं सुलसागृहे । स्वेनैव रूपेणाविक्षद्दक्षैर्षेधिकीति सः ॥ २९९ ॥
अभ्युत्तस्थौ सुलसा तमूचे च स्वागतं तव । धर्मबन्धो ! जगद्बन्धोर्वीरस्य श्रावकोत्तम !॥ ३०० ॥
प्रक्षालयामास तस्य पादौ च वत्सला । निजानि गृहचैत्यानि वन्दयामास श्रावकैः ॥ ३०१ ॥
स तच्चैत्यानि वन्दित्वा तामवोचत शुद्धधीः । नित्यानित्यानि चैत्यानि त्वं वन्दस्व गिरा मम ॥ ३०२ ॥
ववन्दे भूतलन्यस्तमौलिश्चैत्यानि तानि सा । प्रत्यक्षाणीव पश्यन्ती भक्तिभावितमानसा ॥ ३०३ ॥
स भूयः सुलसामूचे त्वमेका पुण्यवत्यसि । यस्या वार्तां स्वयं स्वामी मन्मुखेनाद्य पृच्छति ॥ ३०४ ॥
आकर्ण्य तद्वचः साऽपि ववन्दे मुदिता प्रभुम् । रोमाञ्चितशरीराऽथ तुष्टाव स्पष्टया गिरा ॥ ३०५ ॥
परीक्षितुमना भूयस्तमूचे चतुरोऽथ सः । ब्रह्मादयोऽत्रावतेरुर्धर्मं च व्याचचक्षिरे ॥ ३०६ ॥
तान् वन्दितुं ययुः पौरास्तेभ्यो धर्मं च शुश्रुवुः । न किं कौतूहलेनापि सुलसे ! गतवत्यसि ? ॥ ३०७ ॥
सुलसाऽपि बभाषे तं जानन्नपि किमज्ञवत् । अल्पस्यैवं महाभाग ! के ब्रह्माद्यास्तपस्विनः ॥३०८ ॥
हिंसितुं शस्त्रभाजो ये स्त्रीभाजः सेवितुं च ताः । कथमाख्यास्यन्ति ते धर्ममधर्मनिरताः स्वयम् ॥ ३०९ ॥ ॥२८९॥

भगवन्तं महावीरं जगदाप्तं निरीक्ष्य च । तद्धर्मं चोरीकृत्य द्रष्टुं तानुत्सहेत कः ? ॥३१० ॥ नवमः सर्गः

साधु साध्विति वदन्नथाम्बडः[1]

स्वं जगाम सदनं प्रमोदभाक् ।

धर्ममार्हतमनिन्द्यमुच्चकै-

रुद्वाह सुलसाऽपि सर्वदा ॥ ३११ ॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये दशमपर्वणि हालिक-प्रसन्नचन्द्र-दर्दुराङ्कदेव-श्रेणिकभावितीर्थंकरत्व-सालमहासाल-गौतमाष्टापदारोहणाम्बड[2]सुलसाचरितवर्णनो नाम नवमः सर्गः ॥



१ °थाम्मडः *C. L.* ॥ २ °गाम्मड° *C. L.* ॥

## ॥ अथ दशमः सर्गः ॥

☼ ☼ ☼

इतश्च पुर्यांश्चम्पायाः सुरासुरसमावृतः । क्रमेण विहरन् प्राप दशार्णविषयं प्रभुः ॥ १ ॥
दशार्णपुरमित्यस्ति नाम्ना तत्र महापुरम् । दशार्णभद्र इत्यासीत्तत्र राजा महर्द्धिकः ॥ २ ॥
सभासीनं तदा सायं तमेत्योचुश्चरा इदम् । वीरो जिनपतिः प्रातः समेष्यति पुरेऽत्र न ॥ ३ ॥
बभार तद्गिरा हृष्टो राजा रोमाञ्चकंचुकम् । विदूरः स्तनितेनेव रत्नांकुरकदम्बकम् ॥ ४ ॥
सभासमक्षमूचे च तया ऋद्धया प्रगे प्रभुम् । वन्दिष्ये न यथा कश्चिद्ववन्दे त्रिजगत्यपि ॥ ५ ॥
इत्युदित्वा च मंत्र्यादीन् विसृज्य सकलानपि । जगामान्तःपुरगृहं दशार्णपुरभूपतिः ॥ ६ ॥
वन्दिष्य एवमेवं च स्तोष्ये प्रातर्जगद्गुरुम् । इति चिन्तापरोऽनैषीत् कथंचिद्यामिनीं स ताम् ॥ ७ ॥
रवावनुदयत्येव स पार्थिवरविस्ततः । आहूय नगराध्यक्षप्रभृतीनेवमादिशत् ॥ ८ ॥
मद्धाम्नः स्वामिसमवसरणस्य तथाऽन्तरे । यथानयोग्यं कर्तव्यं सर्वर्द्ध्या मार्गभूषणम् ॥ ९ ॥

१ °रपतिः L ॥

इतश्च तत्र भगवान् पुराद्बहिरुपाययौ । देवैश्च तत्र समवसरणं [1] व्यरच्यत ॥ १० ॥
तद्राजशासनं तेऽपि राजाऽऽयुक्ताः क्षणाद्दधुः । वचसा भूभुजां सिद्धिर्मनसेव दिवौकसाम् ॥ ११ ॥
अशामि कुंकुमाम्भोभी रजस्तद्राजवर्त्मनः । अकारि तन्मार्गमही पुष्पप्रकरदन्तुरा ॥ १२ ॥
स्थाने स्थाने व्यधीयन्त काञ्चनस्तम्भतोरणाः । मञ्चाश्च सञ्चिताः स्वर्णभाजनश्रेणिशो[2]भिताः ॥ १३ ॥
विचित्राश्चित्रकत्वग्भिश्चीनवासोभिराचिताः । उद्दामराश्चामरैश्च रत्नादर्शैः सुदर्शनाः ॥ १४ ॥
उद्गन्धयो गन्धपुटापुटिकाभिः सहस्रशः । स्तम्भैर्वर्त्माभितो न्यस्तैरबध्यन्त च मालिकाः ॥१५॥ (युग्मम्)
उद्दण्डैर्मण्डपैर्मेघाडम्बरश्रीविडम्बिभिः । मुक्तोच्चूलवतुल्लोचैरेकच्छायं व्यधीयत ॥ १६ ॥
पदे पदे मुमुचिरे धूपघट्यः सपावकाः । निक्षिप्तागुरुकर्पूरधूमांकुरितमण्डपाः ॥ १७ ॥
एवं दिवः खंडमिव कृत्वा मार्गं नियोगिनः । राज्ञे [3]व्यज्ञपयन् स्वामिदर्शनौत्सुक्यधारिणे ॥ १८ ॥
स्नात्वा राजाऽपि दिव्यांगरागः सर्वांगभूषणः । शुचिवस्त्रधरः स्रग्वी गजमारोहदुत्तमम् ॥ १९ ॥
मूर्ध्नि श्वेतातपत्रेण चामराभ्यां च पार्श्वयोः । राजमानो राजवर्यः सुरराज इवाचलत् ॥ २० ॥
महार्घ्यभूषणधरैः सामन्ताद्यैः सहस्रशः । सोऽन्वगम्यत भूपालः स्वैं रूपैरिव वैक्रियैः ॥ २१ ॥
सपत्नमनुचेलुश्च चलचामरराजिताः । पराजितशचीरूपा अन्तःपुरमृगीदृशः ॥ २२ ॥

१ द्राग् *C. L.* ॥ २ °भिनः *L. D.* ॥ °भितः *C.* ॥ ३ विज्ञ° *C. L.* ॥

वन्दिवृन्दैः स्तूयमानो गीयमानश्च गाथकैः । दर्श्यमानस्वविज्ञानो मार्गालंकारकारिभिः ॥ २३ ॥
निरन्तरैर्नृपच्छत्रैर्भवन्नूतनमंडपः । क्रमेण प्राप समवसरणं स महीपतिः ॥ २४ ॥
स त्रिः प्रदक्षिणीकृत्य ववन्दे परमेश्वरम् । आसांचक्रे यथास्थानं चाऽऽस्थाने ऋद्धिगर्वितः ॥ २५ ॥
तस्यर्द्धिगर्वं विज्ञाय तत्प्रबोधनहेतवे । अम्भोमयं विकुर्ववान् विमानं पाकशासनः ॥ २६ ॥
स्फटिकाच्छजलप्रान्तविकटाम्भोजसुन्दरम् । मरालसारसस्वानप्रतिस्वानसमाकुलम् ॥ २७ ॥
सुरद्रुमलताश्रेणिपतत्कुसुमशोभितम् । नीलोत्पलै राजमानमिन्द्रनीलमणीमयैः ॥ २८ ॥
नलिनीषु मरकतमयीषु परिवर्तिभिः । विभ्राजमानमधिकं स्वर्णाम्भोजैर्विकस्वरैः ॥ २९ ॥
लोलकल्लोलमालाभिः पताकामालभारिणम् । जलकान्तविमानं तं शक्रोऽध्यास्त सुरैः सह ॥ ३० ॥
(चतुर्भिः कलापकम्)
चामरैरमरस्त्रीभिर्वीज्यमानः सहस्रशः । गन्धर्वारब्धसंगीतदत्तकर्णो मनाग्मनाक् ॥ ३१ ॥
स्वामिपादपवित्रायां दत्तदृष्टिरधो भुवि । मर्त्यलोकमवातारीदमर्त्याधिपतिस्ततः ॥ ३२ ॥ (युग्मम्)
नालेन मारकतेन राजितेष्वम्बुजन्मसु । सौवर्णेषु न्यस्तपादं सपादमिव पर्वतम् ॥ ३३ ॥
मणीमयदन्तकोशैर्दन्तैरष्टभिरूर्जितम् । देवदूष्यच्छन्नपृष्ठं प्रेष्ठं त्रिदशदन्तिनाम् ॥ ३४ ॥

१ प्रष्ठं L, D । पृष्ठि C. ॥

पूर्वारूढसुरस्त्रीभिर्दत्तहस्तावलम्बनः । मर्त्यलोकावतीर्णोऽथाध्यारुरोह पुरन्दरः ॥३५॥ ( त्रिभिर्विशेषकम् )
आगादथोपसमवसरणं भक्तिभावितः । जिनेन्द्रपादान् वन्दारुर्वृन्दारकशिरोमणिः ॥ ३६ ॥
जलकान्तविमानान्तर्लीलापुष्करिणीषु च । संगीतकानि कमले कमले चाथ जज्ञिरे ॥ ३७ ॥
प्रतिसंगीतकं चेन्द्रानुरूपविभवः सुरः । सामाजिकोऽभवद्दिव्यरूपनेपथ्यसुन्दरः ॥ ३८ ॥
एकैकस्य च देवस्य परिवारो महर्द्धिकः । मघोन इव संजज्ञे विश्वविस्मयकारणम् ॥ ३९ ॥
विमानर्द्ध्या तया शक्रः स्वयमेव विसिष्मिये । का कथा पुनरन्येषां तस्माद्न्यूनसंपदाम् ॥ ४० ॥
तत्र स्थितैर्नरसुरैर्विस्मितैर्वीक्षितो हरिः । प्रभुं पृथ्वीलुलद्धारः प्रणनाम पुनः पुनः ॥ ४१ ॥
दशार्णभद्रः शक्रस्य तया ऋद्ध्याऽथ दृष्टया । नगरर्द्ध्या प्रम्य इव स्तंभितांगोऽभवत् क्षणम् ॥ ४२ ॥
दशार्णभद्रो दध्यौ च विस्मयस्मेरलोचनः । अहो शक्रविमानस्य शोभेयं भुवनोत्तरा ॥ ४३ ॥
अहो रुचिरगात्रत्वं सुरेन्द्रकरिणोऽस्य च । अहो विभवविस्तारः पुरुहूतस्य कोऽप्यसौ ॥ ४४ ॥
स्वसंपदोऽभिमानोऽयं व्यधायि धिगहो मया । मम शक्रस्य चैतद्धि गोष्पदाब्ध्योरिवान्तरम् ॥ ४५ ॥
अमुना ऋद्धिगर्वेण स्वात्मा तुच्छीकृतो मया । कूपभेक इवाभूवं प्रागदृष्टेदृशर्द्धिकः ॥ ४६ ॥
एवं भावयतस्तस्य वैराग्यं गच्छतः शनैः । परिणामः शुभतरो बभूवेत्यल्पकर्मणः ॥ ४७ ॥
ऋद्ध्या यद्यप्यनेनाहं विजितोऽस्मि बिडौजसा । प्रव्रज्याग्रहणादस्य पराजेष्ये तथाऽप्यमुम् ॥ ४८ ॥ ॥ २९० ॥

न केवलं विजेष्येऽमुं व्रतादानेन संप्रति । कर्मारीनपि जेष्यामि भवभ्रमणकारिणः ॥ ४९ ॥
विवेकी चिन्तयित्वैवं दशार्णपुरभूपतिः । तत्रस्थ एव व्यमुचत् किरीटाद्यलंकृतिम् ॥ ५० ॥
दशार्णभद्रः कर्मद्रुमूलानीव समन्ततः । उच्चखानाथ शिरसः पंचभिर्मुष्टिभिः कचान् ॥ ५१ ॥
शक्रे संपश्यमानेऽथ विस्मयस्मेरचक्षुषि । स गत्वा गणभृत्पार्श्वे यतिलिंगमुपाददे ॥ ५२ ॥
गत्वा प्रदक्षिणापूर्वमपूर्वोत्साहसाहसः । दशार्णभद्रश्रमणो जगन्नाथमवन्दत ॥ ५३ ॥
शक्रो बभाषे महात्मन्नहो किमपि पौरुषम् । तवेदमसुनाऽजैषीर्मामप्यन्यस्य का कथा ॥ ५४ ॥
इत्युक्त्वा तं नमस्कृत्य शक्रः स्वस्थानमभ्यगात् । मुनिर्दशार्णभद्रोऽपि सम्यग्व्रतमपालयत् ॥ ५५ ॥
जगन्नाथोऽपि भव्यानामुपकारपरायणः । विजहार ततः स्थानादन्येषु नगरादिषु ॥ ५६ ॥
इतश्च राजगृहस्य शालिग्रामे समाययौ । धन्येत्यभिधया योषित् काचिदुच्छिन्नवंशिका ॥ ५७ ॥
बालं संगमकं नाम स्वसुतं सा सहाऽऽनयत् । कुक्षिजातमपत्यं हि व्यसनेष्वपि दुस्त्यजम् ॥ ५८ ॥
सोऽर्भकस्तत्र पौराणां वत्सरूपाण्यचारयत् । अनुरूपा ह्यसौ रोरबालानां मृदुजीविका ॥ ५९ ॥
अथापरेद्युः संजाते तत्र कस्मिंश्चिदुत्सवे । पायसं संगमोऽपश्यद् भुज्यमानं गृहे गृहे ॥ ६० ॥
गत्वा स्वगेहे जननीं ययाचे सोऽपि पायसम् । साऽप्युवाच दरिद्राऽस्मि मद्गृहे पायसं कुतः ॥ ६१ ॥
बालेनाज्ञतया तेन याच्यमाना मुहुर्मुहुः । स्मरन्ती पूर्वविभवं तारतारं रुरोद सा ॥ ६२ ॥

तस्या रुदितदुःखेनानुविद्धहृदया इव । आगत्य प्रतिवेश्मिन्यः पप्रच्छुर्दुःखकारणम् ॥ ६३ ॥
ताभ्योऽभ्यधत्त सा दुःखकारणं गद्गदाक्षरैः । क्षीराद्यदुश्च तास्तस्यै साऽपचत् पायसं ततः ॥ ६४ ॥
सैकदाऽन्यदायातैर्मुग्धा स्थाले बालस्य तस्य सा । आर्पयत्प्रययौ चान्यगृहं कार्येण केनचित् ॥ ६५ ॥
अत्रान्तरे च कोऽप्यागान्मुनिर्मासमुपोषितः । पारणाय भवोदन्वत्तारणाय स तस्य नौः ॥ ६६ ॥
सोऽचिन्तयदिदं चिन्तामाणिक्यमिव चेतनम् । जंगमः कल्पशाखीव कामधेनुरिवापशुः ॥ ६७ ॥
साधु साधु महासाधुर्मद्भाग्यैरयमाययौ । कुतोऽन्यथा वराकस्य ममेदृक्पात्रसंगमः ॥ ६८ ॥
भाग्योदयेन केनापि ममाद्य समपद्यत । चित्तं वित्तं च पात्रं च त्रिवेणीसंगमो ह्ययम् ॥ ६९ ॥
इति स स्थालमुत्पाट्य पायसं साधवे ददौ । अग्राहानुग्रहकृते तस्य कारुणिको मुनिः ॥ ७० ॥
ययौ च स मुनिर्गेहान्मध्याद्धन्यापि निर्ययौ । मन्ये भुक्तमनेनेति ददौ सा पायसं पुनः ॥ ७१ ॥
तत्पायसमतृप्तः सन्नाकण्ठं बुभुजेऽथ सः । तदजीर्णेन यामिन्यां स्मरन् साधुं व्यपद्यत ॥ ७२ ॥
तेन दानप्रभावेण सोऽथ राजगृहे पुरे । गोभद्रभ्यस्य भार्याया भद्राया उदरेऽभवत् ॥ ७३ ॥
शालिक्षेत्रं सुनिष्पन्नं स्वप्नेऽपश्यच्च सा ततः । भर्तुः शशंस तस्याः स सूनुः स्यादित्यचीकथत् ॥ ७४ ॥
चेद्दानधर्मकर्माणि करोमीति बभार सा । दोहदं तत्तु गोभद्रः पूरयामास भद्रधीः ॥ ७५ ॥
पूर्णे काले ततो भद्रा शुनिर्धौतिलदिग्मुखम् । असूत तनयं रत्नं विदूरगिरिभूरिव ॥ ७६ ॥

इष्टस्वप्नानुसारेण सूनोस्तस्य शुभे दिने । चक्रतुः पितरौ शालिभद्र इत्यभिधां शुभाम् ॥ ७७ ॥
पाल्यमानः स धात्रीभिः पंचभिर्ववृधे क्रमात् । किंचिदूनाष्टवर्षः सन् पित्राऽध्यापितः कलाः ॥ ७८ ॥
संप्राप्तयौवनः सोऽथ युवतीजनवल्लभः । सवयोभिः समं रेमे प्रद्युम्न इव नूतनः ॥ ७९ ॥
तत्पुरश्रेष्ठिनोऽथैत्य कन्या द्वात्रिंशतं निजाः । प्रदातुं शालिभद्राय भद्रानाथं ययाचिरे ॥ ८० ॥
अथ प्रहृष्टो गोभद्रः शालिभद्रेण सादरम् । सर्वलक्षणसंपूर्णाः कन्यकाः पर्यणाययत् ॥ ८१ ॥
शालिभद्रस्ततो रम्ये विमान इव मन्दिरे । विललास समं ताभिः पतिर्दिविषदामिव ॥ ८२ ॥
स विवेदाऽऽनन्दमग्नो न रात्रिं न च वासरम् । तस्यापूरयतां भोगसामग्रीं पितरौ स्वयम् ॥ ८३ ॥
श्रीवीरपादमूलेऽथ गोभद्रो व्रतमग्रहीत् । विधिनाऽनशनं कृत्वा देवलोकं जगाम च ॥ ८४ ॥
अवधिज्ञानतो ज्ञात्वा शालिभद्रं निजात्मजम् । तत्पुण्याऽऽवर्जितः सोऽभूत् पुत्रवात्सल्यतत्परः ॥८५॥
दिव्यानि वस्त्रनेपथ्यादीनि तस्यानुवासरम् । सभार्यस्यार्पयामास कल्पशाखीव सोऽमरः ॥ ८६ ॥
यत्तन्मर्त्योचितं कार्यं भद्रा तत्तदसाधयत् । पूर्वदानप्रभावेण भोगान् सोऽभुंक्त केवलम् ॥ ८७ ॥
वणिग्भिः कैश्चिदन्येद्युर्गृहीत्वा रत्नकम्बलान् । शिश्रिये श्रेणिकस्तांश्च महार्घत्वेन नाग्रहीत् ॥ ८८ ॥
ततस्ते वणिजो जग्मुः शालिभद्रनिकेतनम् । तदुक्तार्घेण तान् भद्राऽप्यग्रहीद्रत्नकम्बलान् ॥ ८९ ॥
मद्योग्यो गृह्यतामेको महामूल्योऽपि कम्बलः । इत्यूचे चेलणादेव्या तदा च श्रेणिको नृपः ॥ ९० ॥

राज्ञाऽप्यर्थैकं मूल्येन कम्बलं वणिजोऽर्थिताः । भद्रा जग्राह तान् सर्वान् कम्बलानिति तेऽवदन् ॥ ९१ ॥
श्रेणिकः प्राहिणोदेकं प्रवीणं पुरुषं ततः । भद्रापार्श्वे मूल्यदानात् कम्बलादानहेतवे ॥ ९२ ॥
याचिता तेन भद्रोचे छित्त्वा तान् रत्नकम्बलान् । शालिभद्रप्रियापादप्रोञ्छनीकृतवत्यहम् ॥ ९३ ॥
कार्यं निष्पद्यते किंचिज्जीर्णैश्चेद्रत्नकम्बलैः । तद्गत्वाऽऽपृच्छ्य राजानमागच्छामून् गृहाण च ॥ ९४ ॥
आख्यद्गत्वा स तद्राज्ञे राज्ञ्यूचे चेल्लणाऽप्यथ । पश्यास्माकं वणिजां च रीरिहेम्नोरिवान्तरम् ॥ ९५ ॥
तमेव पुरुषं प्रेष्य श्रेणिकेन कुतूहलात् । आकारिते शालिभद्रे भद्रोपेत्य व्यजिज्ञपत् ॥ ९६ ॥
बहिर्न हि महीनाथ ! जातु याति ममात्मजः । प्रसादः क्रियतां देव ! तद् गृहागमनेन मे ॥ ९७ ॥
कौतूहलाच्छ्रेणिकोऽपि तत्तथा प्रत्यपद्यत । तं च क्षणं प्रतीक्ष्याथ साऽग्रे भूत्वा गृहं ययौ ॥ ९८ ॥
विचित्रवस्त्रमाणिक्यचित्रकल्पद्रुममयीं ततः । आराजहर्म्यं स्वगृहाद्धट्टशोभां व्यधत्त सा ॥ ९९ ॥
तयाऽऽहूतस्ततो राजा कृतां सद्यः सुरैरिव । विभावयन् हट्टशोभां शालिभद्रगृहं ययौ ॥ १०० ॥
स्वर्णस्तम्भोपरि प्रखदिन्द्रनीलाश्मतोरणम् । मौक्तिकस्वस्तिकश्रेणिदन्तुरद्वारभूतलम् ॥ १०१ ॥
दिव्यवस्त्रकृतोल्लोचं सुगन्धिद्रव्यधूपितम् । भुवि दिव्यविमानानां प्रतिमानमिव स्थितम् ॥ १०२ ॥
तद्विवेश विशामीशो विस्मयस्मेरलोचनः । भूमिकायां चतुर्थ्यां च सिंहासन उपाविशत् ॥ १०३ ॥
सप्तम्यां भुवि भद्रेत्य शालिभद्रमभाषत । इहायातः श्रेणिकोऽस्ति तं द्रष्टुं क्षणमेहि तत् ॥ १०४ ॥

अम्ब ! त्वमेव यं वेत्सि तमर्थं क्रय स्वयम् । किं मया तत्र कर्तव्यं स भद्रामित्यवोचत ॥ १०५ ॥
ततो भद्राऽप्युवाचैवं क्रेतव्यं वस्तु न ह्यदः । किं त्वसौ सर्वलोकानां युष्माकमपि च प्रभुः ॥ १०६ ॥
तच्छ्रुत्वा शालिभद्रोऽपि सविषादमचिन्तयत् । धिक् सांसारिकमैश्वर्यं यन्ममाप्यपरः प्रभुः ॥ १०७ ॥
भोगिभोगैरिवैभिर्मे भोगैरलमतः परम् । दीक्षां मंक्षु ग्रहीष्यामि श्रीवीरचरणान्तिके ॥ १०८ ॥
एवं संवेगयुक्तोऽपि स मातुरुपरोधतः । सभार्योऽभ्येत्य राजानमनमद्विनयान्वितः ॥ १०९ ॥
सस्वजे श्रेणिकनाथे स्वांके सुत इवाऽऽसितः । स्नेहाच्चिकरासि चाऽऽघ्रातः क्षणादश्रूणि सोऽमुचत् ॥ ११० ॥
ततो भद्रा जगादैवं देवायं मुच्यतां यतः । मनुष्यमाल्यगन्धेन मानुषोऽप्येष बाध्यते ॥ १११ ॥
देवभूयं गतः श्रेष्ठी सभार्यस्यास्य यच्छति । दिव्यनेपथ्यवस्त्रांगरागादीन् प्रतिवासरम् ॥ ११२ ॥
ततो राज्ञा विसृष्टः स ययौ सप्तमभूमिकाम् । इहैव भोक्तव्यमिति विज्ञप्तो भद्रया नृपः ॥ ११३ ॥
भद्रादाक्षिण्यतो राजा प्रत्यपद्यत तत्तथा । सद्यः साऽसाधयत्सर्वं श्रीमतां किं न सिध्यति ? ॥ ११४ ॥
सस्नौ स्नानीयतैलाम्बुचूर्णैस्तूर्णं ततो नृपः । अंगुलीयं तदंगुल्या गृहवाप्यां पपात च ॥ ११५ ॥
यावदन्वेषयामास भूपतिस्तदितस्ततः । तावद्भद्राऽऽदिशद्दासीं वाप्यम्भोऽन्यत्र नाय्यताम् ॥ ११६ ॥
तथा कृते तया चित्रदिव्याभरणमध्यगम् । अंगाराभं स्वांगुलीयं दृष्ट्वा राजा विसिष्मिये ॥ ११७ ॥
किमेतदिति राज्ञोक्ता दास्यवोचदिदं त्वहम् । निर्माल्यं शालिभद्रस्य सभार्यस्य निधीयते ॥ ११८ ॥ 

सर्वथा धन्य एवैष धन्योऽहमपि संप्रति । राज्ये यस्येदृशाः सन्ति विमृशन्निति भूपतिः ॥ ११९ ॥
बुभुजे सपरीवारो भूभुजामग्रणीस्ततः । चित्रालंकारवस्त्राद्यैरार्चितश्च गृहं ययौ ॥ १२० ॥
इयेष शालिभद्रोऽपि यावत्संसारमोक्षणम् । अभ्येत्य धर्मसुहृदा विज्ञप्तस्तावदीदृशम् ॥ १२१ ॥
आगाच्चतुर्ज्ञानधरः सुरासुरनमस्कृतः । मूर्तो धर्म इवोद्याने धर्मघोषाभिधो मुनिः ॥ १२२ ॥
शालिभद्रस्ततो हर्षादधिरुह्य रथं ययौ । आचार्यपादान् वन्दित्वा साधूंश्चोपाविशत्पुरः ॥ १२३ ॥
स सूरिर्देशनां कुर्वंस्तत्वा तेनेत्यपृच्छ्यत । भगवन् ! कर्मणा केन प्रभुरन्यो न जायते ? ॥ १२४ ॥
भगवानप्युवाचैवं दीक्षां गृह्णन्ति ये जनाः । अशेषस्यापि जगतः स्वामिभावं भजन्ति ते ॥ १२५ ॥
यद्येवं नाथ ! तद्गत्वा निजामापृच्छ्य मातरम् । ग्रहीष्यामि व्रतमिति शालिभद्रो व्यजिज्ञपत् ॥ १२६ ॥
न प्रमादो विधातव्य इत्युक्तः सूरिणा ततः । शालिभद्रो गृहं गत्वा भद्रां नत्वेत्यभाषत ॥ १२७ ॥
धर्मः श्रीधर्मघोषस्य सूरेरद्य मुखाम्बुजात् । विश्वदुःखविमोक्षस्योपायभूतो मया श्रुतः ॥ १२८ ॥
अकार्षीः साधु वत्स ! पितुस्तस्यासि नन्दनः । प्रशशंसेति भद्रापि शालिभद्रं प्रमोदतः ॥ १२९ ॥
सोऽप्यवोचदिदं मातरेवं चेत्तत्प्रसीद मे । ग्रहीष्यामि व्रतमहं ननु तस्य पितुः सुतः ॥ १३० ॥
साऽप्यवोचदिदं वत्स ! युक्तस्तेऽसौ व्रतोद्यमः । किं त्वत्र लोहचणकाश्चर्वणीया निरन्तरम् ॥ १३१ ॥
सुकुमारः प्रकृत्याऽपि दिव्यैर्भोगैश्च लालितः । स्यन्दनं तर्णक इव कथं त्वं वक्ष्यसि व्रतम् ? ॥ १३२ ॥

शालिभद्रोऽप्युवाचैवं पुमांसो भोगलालिताः । असहा व्रतकष्टानां कातरा एव नेतरे ॥ १३३ ॥
त्यज भोगान् क्रमान्मर्त्यमाल्यगन्धान् सहस्व च । इत्यभ्यासाद् व्रतं वत्स ! गृह्णीया इत्युवाच सा ॥ १३४ ॥
शालिभद्रस्ततो भद्रावचनं प्रतिपद्य तत् । भार्यामेकां तूलिकां च मुञ्चति स्म दिने दिने ॥ १३५ ॥
इतश्च तस्मिन्नगरे धन्यो नाम महाधनः । अभवच्छालिभद्रस्य कनिष्ठभगिनीपतिः ॥ १३६ ॥
शालिभद्रस्वसा साश्रुः स्नपयन्ती च तं तदा । किं रोदिषीति तेनोक्ता जगादेति सगद्गदम् ॥ १३७ ॥
व्रतं गृहीतुं मे भ्राता त्यजत्येकां दिने दिने । भार्यां च तूलिकां चाहं हेतुना तेन रोदिमि ॥ १३८ ॥
य एवं कुरुते फेरुरिव भीरुस्तपस्व्यसौ । हीनसत्त्वस्तव भ्रातेत्यूचे धन्यः सनर्मकम् ॥ १३९ ॥
सुकरं चेद् व्रतं नाथ क्रियते किं न हि स्वयम् । एवं सहासमन्याभिर्भार्याभिर्जगदेऽथ सः ॥ १४० ॥
धन्योऽप्यूचे व्रते विघ्नो भवत्यस्ताश्च पुण्यतः । अनुमत्योऽद्य मेऽभूवन् प्रव्रजिष्यामि तद् द्रुतम् ॥ १४१ ॥
ता अप्यूचुः प्रसीदेदमस्माभिर्नर्मणोदितम् । मा स्म त्याक्षीः प्रियोऽस्मांश्च मनस्विन्नित्यलालिताः ॥ १४२ ॥
अनित्यं स्त्रीधनाद्येतत्प्रोज्झ्य नित्यपदेच्छया । अवश्यं प्रव्रजिष्यामीत्यालपन् धन्य उत्थितः ॥ १४३ ॥
त्वामनु प्रव्रजिष्याम एवमुक्तवतीश्च ताः । अन्वमन्यत धन्योऽपि धन्यंमन्यो महामनाः ॥ १४४ ॥
इतश्च वैभारगिरौ श्रीवीरः समवासरत् । विदाञ्चकार तं सद्यो धन्यो धर्मसुहृद्गिरा ॥ १४५ ॥
दत्तदानः सदारः सोऽप्यारुह्य शिबिकां ततः । भवभीतो महावीरचरणौ शरणं ययौ ॥ १४६ ॥

सदारः सोऽग्रहीद्दीक्षां ततो भगवदन्तिके । तच्छ्रुत्वा शालिभद्रोऽपि [1]जितंमन्यः प्रतत्वरे ॥ १४७ ॥
सोऽन्वीयमानस्तदनु श्रेणिकेन महीभुजा । उपेत्य श्रीमहावीरपादमूलेऽग्रहीद् व्रतम् ॥ १४८ ॥
ततः सपरिवारोऽपि स्वामी सिद्धार्थनन्दनः । विहरन्नन्यतोऽगच्छत् सयूथ इव हस्तिराट् ॥ १४९ ॥
धन्यश्च शालिभद्रश्च तावभूतां बहुश्रुतौ । महत्तपश्च तेपाते खड्गधारासहोदरम् ॥ १५० ॥
पक्षान्मासाद् द्विमासात्त्रिमास्या मासचतुष्टयात् । शरीरनिरपेक्षौ तौ चक्रतुः पारणं मुनी ॥ १५१ ॥
तपसा समजायेतां निर्मांसरुधिरांगकौ । चर्मभस्त्रोपमौ धन्यशालिभद्रमहामुनी ॥ १५२ ॥
अन्येद्युः श्रीमहावीरस्वामिना [2]सहितौ मुनी । आजग्मतू राजगृहं पुरं जन्मभुवं निजाम् ॥ १५३ ॥
ततः समवसरणस्थितं नन्तुं जगत्पतिम् । श्रद्धातिशययोगेनाच्छिन्नमीयुर्जनाः पुरात् ॥ १५४ ॥
मासपारणके धन्यशालिभद्रावुभावपि । काले विहर्तुं भिक्षार्थं भगवन्तं प्रणेमतुः ॥ १५५ ॥
मातृपार्श्वात्पा[3]रणं तेऽद्येत्युक्तः स्वामिना ततः । इच्छामीति भणन् शालिभद्रो धन्ययुतो ययौ ॥ १५६ ॥
गत्वा भद्रागृहद्वारि तावुभावपि तस्थतुः । तपःक्षामतया तौ च न केनाप्युपलक्षितौ ॥ १५७ ॥
श्रीवीरं शालिभद्रं च धन्यमप्यत्र वन्दितुम् । यामीति व्याकुला भद्राऽप्यज्ञासीदुत्सुका न तौ ॥ १५८ ॥
क्षणमेकमवस्थाय तत्र तौ जग्मतुस्ततः । महर्षी नगरद्वारप्रतोल्याऽथ निरीयतुः ॥ १५९ ॥

१ जितम° C. L. ॥ २ सह तौ L. ॥ ३ °रणा L. ॥

तदाऽऽयान्ती पुरे तस्मिन् विक्रेतुं दधिसर्पिषी । शालिभद्रस्य प्राग्जन्ममाता धन्याऽभवत्पुरः ॥ १६० ॥
शालिभद्रं च सा प्रेक्ष्य संजातप्रस्रवस्तनी । वन्दित्वा चरणौ भक्त्या द्वाभ्यामपि ददौ दधि ॥ १६१ ॥
श्रीवीरस्यान्तिके गत्वा तदालोच्य कृताञ्जलिः । शालिभद्रोऽवदत् स्वामिन् ! मातृतः पारणं कथम् ? ॥१६२॥
सर्वज्ञोऽप्याचचक्षेऽथ शालिभद्रमहामुनेः । प्राग्जन्ममातरं धन्यामन्यदप्यन्यजन्मजम् ॥ १६३ ॥
कृत्वा पारणकं दध्नाऽऽपृच्छय च स्वामिनं ततः । वैभाराद्रिं ययौ शालिभद्रो धन्यसमन्वितः ॥ १६४ ॥
शिलातले शालिभद्रः सधन्यः प्रतिलेखिते । पादपोपगमं नाम तत्रानशनमाश्रयत् ॥ १६५ ॥
तदा च भद्रा तन्माता श्रेणिकश्च महीपतिः । आजग्मतुर्भक्तियुक्तौ श्रीवीरचरणान्तिके ॥ १६६ ॥
ततो भद्राऽवदद्धन्यशालिभद्रौ क्व तौ मुनी । भिक्षार्थं नागतौ कस्मादस्मद्वेश्म ? जगत्पते ! ॥ १६७ ॥
सर्वज्ञोऽपि बभाषे तौ त्वद्वेश्मनि गतौ मुनी । ज्ञातौ न तु भवत्येहागमनव्यग्रचित्तया ॥ १६८ ॥
प्राग्जन्ममाता त्वत्सूनोर्धन्या यान्ती पुरं प्रति । ददौ दधि तयोस्तेन पारणं चक्रतुश्च तौ ॥ १६९ ॥
उभावपि महासत्त्वौ सत्वरौ भवमुज्झितुम् । वैभारपर्वते गत्वाऽनशनं तौ प्रचक्रतुः ॥ १७० ॥
श्रेणिकेन समं भद्रा वैभाराद्रिं ययौ ततः । तथास्थितावपश्यच्च तावश्मघटिताविव ॥ १७१ ॥
तत्कष्टमथ पश्यन्ती स्मरन्ती तत्सुखानि च । साऽरोदीद्रोदयन्तीव वैभाराद्रिं प्रतिस्वनैः ॥ १७२ ॥
आयातोऽपि गृहं वत्स ! मयका स्वल्पभाग्यया । न ज्ञातोऽसि प्रमादेनाप्रसादं मा कृथा मयि ॥ १७३ ॥

यद्यपि त्यक्तवानस्त्वं तथाऽपि निजदर्शनात् । आनन्दयिष्यसि दृशौ पुरेत्यासीन्मनोरथः ॥ १७४ ॥
आरम्भेणामुना पुत्र ! शरीरत्यागहेतुना । मनोरथं तमपि मे भङ्क्तुमस्युद्यतोऽधुना ॥ १७५ ॥
प्रारब्धं यत्तपस्तत्र न मे विघ्नीभवाम्यहम् । किं त्वेतत्कर्कशतरं शिलातल[1]मिवोभव ॥ १७६ ॥
अथोचे श्रेणिको हर्षस्थाने किं नाम रोदिषि ? । ईदृग्यस्याः सुतः स्त्रीषु सैका त्वं पुत्रवत्यसि ॥ १७७ ॥
तत्त्वज्ञोऽयं महासत्त्वस्त्यक्त्वा तृणमिव श्रियम् । प्रपेदे स्वामिनः पादान् साक्षादिव परं पदम् ॥ १७८॥
असौ जगत्स्वामिशिष्यानुरूपं तप्यते तपः । मुधाऽनुतप्यते मुग्धे ! किं त्वया स्त्रीस्वभावतः ॥ १७९ ॥
भद्रैवं बोधिता राज्ञा वन्दित्वा तौ महामुनी । विमनस्का निजं धाम जगाम श्रेणिकस्तथा ॥ १८० ॥

उभौ तौ मुनीन्द्रौ प्रपन्नावसानौ ।
विमानेऽथ सर्वार्थसिद्धाभिधाने ॥
अभूतां प्रभूतप्रमोदाब्धिमग्नौ ।
त्रयस्त्रिंशदब्ध्यायुषौ देववर्यौ ॥ १८१ ॥

इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये दशमपर्वणि दशार्णभद्र-शालिभद्र-धन्यक-चरितवर्णनो नाम दशमः सर्गः ॥

१ मिवाभवम् M ॥

## ॥ अथ एकादशः सर्गः ॥

इतश्च भगवान् वीरो लोकानुग्रहकाम्यया । व्यहार्षीन्नगरग्रामाकरद्रोणमुखादिषु ॥ १ ॥
इतश्च राजगृहस्य वैभारगिरिकन्दरे । चौरो लोहखुराख्योऽभूद्रौद्रो रस इवांगवान् ॥ २ ॥
स तु राजगृहे नित्यं पौराणामुत्सवादिषु । लब्ध्वा छिद्राणि विदधे पिशाचवदुपद्रवम् ॥ ३ ॥
आददानस्ततो द्रव्यं भुञ्जानश्च परस्त्रियः । भांडागारं निशान्तं वा निजं मेने स तत्पुरम् ॥ ४ ॥
चौर्यमेवाभवत्तस्य प्रीत्यै वृत्तिर्न चापरा । अपास्य कव्यं क्रव्यादा भक्ष्यैस्तृप्यन्ति नापरैः ॥ ५ ॥
तस्यानुरूपो रूपेण चेष्टया च सुतोऽभवत् । भार्यायां रोहिणीनाम्न्यां रौहिणेयोऽभिधानतः ॥ ६ ॥
स्वमृत्युसमये प्राप्ते पित्राऽऽहूयेत्यभाषि सः । यद्यवश्यं करोषि त्वमुपदेशं ददामि तत् ॥ ७ ॥
अवश्यमेव कर्तव्यमादिष्टं भवतां मया । कः पितुः पातयेदाज्ञां पृथिव्यामित्युवाच सः ॥ ८ ॥

१ °स्तरा° L ॥ २ °त्यभाष्यत D ॥

प्रहृष्टो वचसा तेन चौरो लोहखुरस्ततः । पाणिना संस्पृशन् पुत्रमभाषिष्टेति निष्ठुरम् ॥ ९ ॥
योऽसौ समवसरणे स्थितः सुरविनिर्मिते । विधत्ते देशनां वीरो मा श्रौषीस्तस्य भाषितम् ॥ १० ॥
अन्यत्तु स्वेच्छया वत्स! कुर्यास्त्वमनिर्यन्त्रितः । उपदिश्येति पंचत्वं प्राप लोहखुरस्ततः ॥ ११ ॥
मृतकार्यं पितुः कृत्वा रौहिणेयो निरन्तरम् । चकार चौरिकां लोहखुरोऽपर इवोद्धतः ॥ १२ ॥
पालयन् पितुरादेशं जीवितव्यमिवाऽऽत्मनः । स्वदासेरमिवामुष्णात् स राजगृहपत्तनम् ॥ १३ ॥
तदा च नगरग्रामाकरेषु विहरन् क्रमात् । उग्रव्रतमहासाधुसहस्रपरिवारितः ॥ १४ ॥
सुरैः सञ्चार्यमाणेषु स्वर्णाम्भोजेषु चारुषु । न्यस्यन् पदानि तत्राऽऽगाद्वीरश्चरमतीर्थकृत् ॥ १५ ॥ (युग्मम्)
वैमानिकैर्ज्योतिषिकैरसुरैर्व्यन्तरैरपि । सुरैः समवसरणं चक्रे जिनपतेस्ततः ॥ १६ ॥
आयोजनविसर्पिण्या सर्वभाषानुयातया । भारत्या भगवान् वीरः प्रारेभे धर्मदेशनाम् ॥ १७ ॥
तदानीं रौहिणेयोऽपि गच्छन् राजगृहं प्रति । मार्गान्तराले समवसरणाभ्यर्णमाययौ ॥ १८ ॥
एवं स चिन्तयामास यद्यऽनेन व्रजामि चेत् । शृणोमि वीरवचनं तदाऽऽज्ञा भज्यते पितुः ॥ १९ ॥
न चान्यो विद्यते पन्था भवत्वेवं विमृश्य सः । कर्णौ पिधाय पाणिभ्यां द्रुतं राजगृहं ययौ ॥ २० ॥
तस्यैवमन्वहमपि यातायातकृतोऽन्यदा । उपसमवसरणं पादेऽभज्यत कंटकः ॥ २१ ॥

१-२ °खरस्त° *L.* ॥ ३ उग्रतपः म° *L.* ॥ चतुर्दश *M.* ॥ ४ तत् *D.* ॥ ५ पुनः *C.* ॥

औत्सुक्यगमनाद्गाढमग्नं पादे स कंटकम् । अनुद्धृत्य समुद्धर्तुं न शशाक क्रमात्क्रमम् ॥ २२ ॥
नास्त्युपायोऽपरः कोऽपीत्याकृष्य श्रवणात्करम् । कर्षन् कंटकमश्रौषीदिति विश्वगुरोर्गिरम् ॥ २३ ॥
महीतलास्पर्शिपादा निर्निमेषविलोचनाः । अम्लानमाल्या निःस्वेदनीरजोऽङ्गाः सुरा इति ॥ २४ ॥
बहु श्रुतमिदं धिग्धिगित्याशूद्धृतकंटकः । पिधाय पाणिना कर्णं तथैवापससार सः ॥ २५ ॥
अथान्वहं मुष्यमाणे पत्तने तेन दस्युना । उपेत्य श्रेणिकं श्रेष्ठिश्रेष्ठा व्यज्ञपयन्निति ॥ २६ ॥
त्वयि शासति देवान्यस्म भयं द्रविणं तु नः । आकृष्य गृह्यते चौरैरदृष्टैश्चेटकैरिव ॥ २७ ॥
बन्धूनामिव तेषां तु गृहीतः पीडया ततः । सकोपाटोपमित्यूचे नृपतिर्दण्डपाशिकम् ॥ २८ ॥
किं चौरीभूय दायादीभूय वा मम वेतनम् । गृह्णासि ? चौरैर्गृह्यन्ते यदेते त्वदुपेक्षितैः ॥ २९ ॥
सोऽप्यूचे देव ! कोऽप्येष चौरः पौरान् विलुम्पति । रौहिणेयाह्वयो धर्तुं दृष्टोऽपि न हि शक्यते ॥ ३० ॥
विद्युदुत्क्षिप्तकरणेनोत्प्लुत्य स प्लवंगवत् । गेहाद्गृहं ततो वप्रमुल्लंघयति हेलया ॥ ३१ ॥
मार्गेण यामस्तन्मार्गं यावत्तावत्स नेक्ष्यते । त्यक्तो ह्येकक्रमेणापि शतेन त्यज्यते क्रमैः ॥ ३२ ॥
न तं हन्तुं न वा धर्तुमहं शक्नोमि तस्करम् । गृह्णातु तदिमां देवो दाण्डपाशिकतां निजाम् ॥ ३३ ॥
नृपेणोल्लासितैकभ्रूसंज्ञया भाषितस्ततः । [3]कुमारोऽभयकुमारस्तमूचे दण्डपाशिकम् ॥ ३४ ॥

१ °भग्नं L. M. ॥ २ °त्य कंटकम् L. ॥ ३ अमात्योऽभ° M. ॥

चतुरंगचमूं सज्जीकृत्य मुञ्च बहिः पुरात् । यदान्तः प्रविशेच्चौरः पत्तनं वेष्टयेस्तदा ॥ ३५ ॥
अन्तश्च त्रासितो विद्युदुत्क्षिप्तकरणेन सः । पतिष्यति बहिः सैन्ये वागुरायां कुरंगवत् ॥ ३६ ॥
प्रतिभूभिरिवाऽऽलीनो निजपादैस्ततश्च सः । ग्रहीतव्यो महादस्युरप्रमत्तैः पदातिभिः ॥ ३७ ॥
तथेत्यादेशमादाय निर्ययौ दण्डपाशिकः । तथैव च चमूं सज्जां प्रच्छन्नं निर्ममे सुधीः ॥ ३८ ॥
तद्दिने रौहिणेयोऽपि ग्रामान्तरसमागमात् । अजानानः पुरीं रुद्धां वारीं गज इवाविशत् ॥ ३९ ॥
तैरुपायैस्ततो धृत्वा बद्ध्वा च स मलिम्लुचः । आनीय नृपतेर्दण्डपाशिकेन समर्पितः ॥ ४० ॥
यथा न्याय्यं सभां प्राणमस्तनां निग्रहस्तथा । निगृह्णनामसौ तस्मादित्यादिक्षन्महीपतिः ॥ ४१ ॥
अलोप्त्रः प्राप्त इत्येष न हि निग्रहमर्हति । विचार्य निग्रहीतव्य इत्युवाचाभयस्ततः ॥ ४२ ॥
अथ पप्रच्छ तं राजा कुत्यः कीदृशजीविकः । कुतो हेतोरिहाऽऽयातो रौहिणेयः स चासि किम् ? ॥ ४३ ॥
स्वनामशंकितः सोऽपि प्रत्युवाचेति भूपतिम् । शालिग्रामे दुर्गचण्डाभिधानोऽहं कुटुम्बिकः ॥ ४४ ॥
प्रयोजनवशेनेहायातः सञ्जातकौतुकात् । एकदेवकुले रात्रिं महतीमस्मि च स्थितः ॥ ४५ ॥
स्वधाम गच्छन्नारक्षैराक्षिप्तो राक्षसैरिव । अलंघयमहं वप्रं प्राणभीर्महती हि भीः ॥ ४६ ॥
मध्यारक्षविनिर्मुक्तो बाह्यारक्षगणेष्वहम् । कैवर्तहस्तविस्रस्तो जाले मत्स्य इवापतम् ॥ ४७ ॥

१ त्वादि C. L. ॥

ततो निरपराधोऽपि बद्ध्वा चौर इवाधुना । अहमेभिरिहाऽऽनीतो नीतिसार ! विचारय ॥ ४८ ॥
ततस्तं भूपतिर्गुप्तं प्रेषयामास तत्क्षणात् । तत्प्रवृत्तिज्ञानहेतोस्तत्र ग्रामे च पूरुषम् ॥ ४९ ॥
सोऽग्रेऽपि ग्राहितो ग्रामः संकेतं तेन दस्युना । चौराणामपि केषांचिच्चित्रमायतिचिन्तनम् ॥ ५० ॥
तत्स्वरूपं राजपुंसा पृष्टो ग्रामोऽब्रवीदिदम् । दुर्गचण्डोऽत्र वास्तव्यः परं ग्रामान्तरं गतः ॥ ५१ ॥
तत्रार्थे तेन विज्ञप्ते दध्यौ श्रेणिकसूरिदम् । दंभस्य सुकृतस्याहो प्रमाप्यन्तं न गच्छति ॥ ५२ ॥
अभयोऽसज्जयदथ प्रासादं सप्तभूमिकम् । महार्घ्यरत्नखचितं विमानमिव नाकिनाम् ॥ ५३ ॥
श्रियाऽप्सरायमाणाभी रमणीभिरलंकृतः । दिवोऽमरावतीखंडमिव भ्रष्टमतर्कि सः ॥ ५४ ॥
गन्धर्ववर्गप्रारब्धसंगीतकमहोत्सवः । सोऽभादकस्मादुद्भूतगन्धर्वनगरश्रियम् ॥ ५५ ॥
ततोऽभयो मद्यपानमूढं चौरं विधाय तम् । परिधाप्य देवदूष्ये अधितल्पमशाययत् ॥ ५६ ॥
मदे परिणते यावदुदस्थात्तावदैक्षत । सोऽकस्माद्विस्मयकरीमपूर्वां दिव्यसंपदम् ॥ ५७ ॥
अत्रान्तरेऽभयादिष्टैर्नरनारीगणैस्ततः । उदचारि जय जगन्नन्देत्यादिकमंगलम् ॥ ५८ ॥
अस्मिन्महाविमाने त्वमुत्पन्नस्त्रिदशोऽधुना । अस्माकं स्वामिभूतोऽसि त्वदीयाः किंकरा वयम् ॥ ५९ ॥
अप्सरोभिः सहैताभी रमस्व स्वैरमिन्द्रवत् । इत्यादि चतुरं चाटुगर्भमूचे स तैस्ततः ॥ ६० ॥

१ जयनंदे° L ॥

जातः सुरः किमस्मीति दध्यौ यावत्स तस्करः । संगीतकार्थं नाथस्तैः प्रदत्तः समहस्तकः ॥ ६१ ॥
उपेत्य पुंसा केनापि स्वर्णदण्डभृता ततः । सहसा भोः ! किमारब्धमेतदेवमभाष्यत ॥ ६२ ॥
ततः प्रतिबभाषे तैः प्रतीहार ! निजप्रभोः । प्रदर्शयितुमारब्धं स्वकं विज्ञानकौशलम् ॥ ६३ ॥
सोऽप्युवाच स्वनाथस्य दर्श्यतां निजकौशलम् । देवलोकसमाचारः किं त्वसौ कार्यतामिति ॥ ६४ ॥
तैरुक्तं कीदृगाचार इति श्रुत्वा स पूरुषः । साक्षेपमित्यभाषिष्ट किमेतदपि विस्मृतम् ? ॥ ६५ ॥
य इहोत्पद्यते देवः स स्वे सुकृतदुष्कृते । आख्याति प्राक्तने स्वर्गभोगाननुभवेत्ततः ॥ ६६ ॥
विस्मृतं स्वामिलाभेन सर्वमेतत्प्रसीद नः । देवलोकस्थितिर्देव ! कार्यतामिति तेऽवदन् ॥ ६७ ॥
स रौहिणेयमित्यूचे निजे हन्त शुभाशुभे । प्राक्तने शंस नः स्वर्गभोगान् भुंक्ष्व ततः परम् ॥ ६८ ॥
ततः सोऽचिन्तयद्दस्युः किमेतत्सत्यमीदृशम् । मां ज्ञातुमभयेनैष प्रपंचो रचितोऽथवा ॥ ६९ ॥
ज्ञेयं कथमिदमिति ध्यायता तेन संस्मृतम् । कंटकोद्धरणकालाकर्णितं भगवद्वचः ॥ ७० ॥
देवस्वरूपं श्रीवीरात् श्रुतं चेत् संवदिष्यति । तत्सत्यं कथयिष्यामि करिष्याम्यन्यथोत्तरम् ॥ ७१ ॥
इति बुद्ध्या स तानीक्षांचक्रे क्षितितलस्पृशः । प्रस्वेदमलिनान्म्लानमाल्यान्निमिषदीक्षणान् ॥ ७२ ॥
तत्सर्वं कपटं ज्ञात्वाऽचिन्तयद्दस्युरुत्तरम् । तेनोचे कथ्यतां देवलोकः सर्वोऽप्यमुत्सुकः ॥ ७३ ॥

१ °तः C. । २ °जः° C, L ॥ ३ °राख्याते M. ॥

रौहिणेयस्ततोऽवादीन्मया पूर्वत्र जन्मनि । अदीयत सुपात्रेभ्यो दानं चैत्यानि चक्रिरे ॥ ७४ ॥
प्रत्यष्ठाप्यन्त बिम्बानि पूजितान्यष्टधाऽर्चया । विहितास्तीर्थयात्राश्च गुरवः पर्युपासिताः ॥ ७५ ॥
इत्यादि सदनुष्ठानं मया कृतमिति ब्रुवन् । ऊचे दण्डभृता शंस दुश्चरित्रमपि स्वकम् ॥ ७६ ॥
रौहिणेयोऽप्युवाचैवं साधुसंसर्गशालिना । कदाचिदप्याचरितं किंचिन्नाशोभनं मया ॥ ७७ ॥
व्याजहार प्रतिहारो जन्म नैकस्वभावतः । याति तत्कथ्यतां चौर्यपारदारिकतादिकम् ॥ ७८ ॥
रौहिणेयोऽभ्यधत्तैवं किमेवंविधचेष्टितः । स्वर्लोकं प्राप्नुयादन्धः किमारोहति पर्वतम् ? ॥ ७९ ॥
गत्वा ततस्तैस्तत्सर्वमभयाय निवेदितम् । अभयेन च विज्ञप्तं श्रेणिकस्य महीपतेः ॥ ८० ॥
एवंविधैरुपायैर्यश्चौरो ज्ञातुं न शक्यते । स चौरोऽपि विमोक्तव्यः शक्या नीतिर्न लंघितुम् ॥ ८१ ॥
इति राजगिराऽमुञ्चद्रौहिणेयमथाभयः । वंच्यन्ते वंचनादक्षैर्दक्षा अपि कदाचन ॥ ८२ ॥
ततः सोऽचिन्तयच्चौरो धिगादेशं पितुर्मम । वंचितोऽस्मि चिरं येन भगवद्वचनामृतात् ॥ ८३ ॥
नाऽऽगमिष्यत् प्रभुवचो यदि मे कर्णकोटरम् । तदा विविधमारेणागमिष्यं यमगोचरम् ॥ ८४ ॥
अनिच्छयापि हि तदा गृहीतं भगवद्वचः । मम जीवातवे जातं भैषज्यमिव रोगिणः ॥ ८५ ॥
त्यक्त्वाऽर्हद्वचनं हा धिक् चौरवाचि रतिर्मया । आम्राण्यपास्य निम्बेषु काकेनेव चिरं कृता ॥ ८६ ॥
उपदेशैकदेशोऽपि यदीयः फलतीदृशम् । तस्योपदेशः सामस्त्यात् सेवितः किं करिष्यति ? ॥ ८७ ॥

एवं विमृश्य मनसा ययौ भगवतोऽन्तिकं । प्रणम्य चरणौ भक्त्या रौहिणेयो व्यजिज्ञपत् ॥ ८८ ॥
भवाब्धौ प्राणिनां घोरविपन्नक्रकुलाकुले । महापोतायते ते गीरायोजनविसर्पिणी ॥ ८९ ॥
निषिद्धस्त्वद्वचः श्रोतुमनाप्तेनाऽऽप्तमानिना । इयत्कालमहं पित्रा वंचितस्त्रिजगद्गुरो ! ॥ ९० ॥
त्रैलोक्यनाथ ! ते धन्याः श्रद्दधानाः पिबन्ति ये । भवद्वचनपीयूषं कर्णाञ्जलिपुटैः सदा ॥ ९१ ॥
अहं तु पापोऽशुश्रुषुर्भवतो भगवन् ! वचः । पिधाय कर्णौ हा कष्टमिदं स्थानमलंघयम् ॥ ९२ ॥
एकदाऽनिच्छताऽप्येकं श्रुतं युष्मद्वचो मया । तेन मंत्राक्षरेणेव रक्षितो राजराक्षसात् ॥ ९३ ॥
यथाऽहं मरणात्त्रातस्तथा त्रायस्व नाथ ! माम् । संसारसागरावर्ते निमज्जन्तं जगत्पते ! ॥ ९४ ॥
ततस्तत्कृपया स्वामी निर्वाणपददायिनीम् । विशुद्धां विदधे साधु साधुधर्मस्य देशनाम् ॥ ९५ ॥
ततः प्रबुद्धः प्रणमन् रौहिणेयोऽब्रवीदिदम् । यतिधर्मस्य योग्योऽस्मि न वेत्यादिश्यतां ? प्रभो ! ॥ ९६ ॥
योग्योऽसीति स्वामिनोक्तो ग्रहीष्यामि विभो ! व्रतम् । परं किंचिद्वदिष्यामि श्रेणिकेनेत्युवाच सः ॥९७॥
निर्विकल्पं निर्विशंकं स्ववक्तव्यमुदीरय । इत्युक्तः श्रेणिकनृपेणोचे लोहखुरात्मजः ॥ ९८ ॥
इह देव ! भवद्भिर्यः श्रुतोऽहं लोकवार्तया । स एष रौहिणेयोऽस्मि भवत्पत्तनमोषकः ॥ ९९ ॥
भगवद्वचसैकेन दुर्लंघ्या लंघिता मया । प्रज्ञाऽभयकुमारस्य तरण्डेनेव निम्नगा ॥ १०० ॥

---

१ तस्य *M.* ॥

अशेषमेतन्मुषितं पत्तनं भवतो यथा । नान्वेषणीयः कोऽप्यन्यस्तस्करो राजभास्कर ! ॥ १०१ ॥
कमपि प्रेषय यथा तल्लोप्त्रं दर्शयाम्यहम् । करिष्ये सफलं जन्म ततः प्रव्रज्यया निजम् ॥ १०२ ॥
अभयोऽपि समुत्थाय श्रेणिकादेशतः स्वयम् । कौतुकात्पौरलोकश्च सहागात्तेन दस्युना ॥ १०३ ॥
ततो गिरिणदीकुञ्जश्मशानादिषु तद्धनम् । स्थगितं दर्शयामास चौरः श्रेणिकसूनवे ॥ १०४ ॥
अभयोऽपि हि यद्यस्य तत्तस्य धनमार्पयत् । नीतिज्ञानामलोभानां मन्त्रिणां नापरा स्थितिः ॥ १०५ ॥
परमार्थं कथयित्वा प्रबोध्य निजमानुषान् । श्रद्धालुर्भगवत्पार्श्वे रौहिणेयः समाययौ ॥ १०६ ॥
अथ श्रेणिकराजेन कृतनिष्क्रमणोत्सवः । स जग्राह परिव्रज्यां पार्श्वे श्रीवीरपादयोः ॥ १०७ ॥
ततश्चतुर्थादारभ्य षण्मासीं यावदुज्ज्वलम् । विनिर्ममे तपःकर्म कर्मनिर्मूलनाय सः ॥ १०८ ॥
तपोभिः कर्शितः कृत्वा भावसंलेखनां च सः । श्रीवीरमापृच्छ्य गिरौ पादपोपगमं व्यधात् ॥ १०९ ॥
शुभध्यानः स्मरन् पंचपरमेष्ठिनमस्क्रियाम् । त्यक्त्वा देहं जगाम द्यां रौहिणेयो महामुनिः ॥ ११० ॥
ततोऽपि भगवान् कर्तुं तीर्थकृत्कर्मनिर्जराम् । विजहार वृतो देवैः कोटिसंख्यैर्जघन्यतः ॥ १११ ॥
कानपि श्रावकीचक्रे यतीचक्रे च कानपि । धर्मदेशनया राजामात्यप्रभृतिकान् प्रभुः ॥ ११२ ॥
इतश्च श्रेणिको राजा तस्मिन् राजगृहे पुरे । सम्यक्त्वं धारयन् सम्यग्नीत्या राज्यमपालयत् ॥ ११३ ॥

अन्यदोज्[1]जयिनीपुर्याश्चण्डप्रद्योतभूपतिः । चलितः सर्वसामग्र्या रोद्धुं राजगृहं पुरम् ॥ ११४ ॥
प्रद्योतो बद्धमुकुटाश्चान्ये भूपाश्चतुर्दश । तत्रायान्तो जनैर्दृष्टाः परमाधार्मिका इव ॥ ११५ ॥
पादूपदप्लुतैरश्वैः पाटयन्निव मेदिनीम् । आगच्छन् प्रणिधिभ्योऽथ शुश्रुवे श्रेणिकेन सः ॥ ११६ ॥
श्रेणिकोऽचिन्तयत् किंचित्प्रद्योतोऽत्र समापतन् । क्रूरग्रह इव क्रुद्धः कार्यो हतबलः कथम् ? ॥ ११७ ॥
ततोऽभयकुमारस्यौत्पत्तिक्यादिधियां निधेः । नृपतिर्मुखमैक्षिष्ट सुधामधुरया दृशा ॥ ११८ ॥
यथार्थनामा राजानमभयोऽथ व्यजिज्ञपत् । का चिन्तोज्जयिनीशोऽद्य भवेद्युद्धातिथिर्मम ॥ ११९ ॥
यदि वा बुद्धिसाध्येऽर्थे शस्त्राशस्त्रिकथा वृथा । बुद्धिमेव प्रयोक्ष्ये तद् बुद्धिर्हि जयकामधुक् ॥ १२० ॥
अथ बाह्येऽरिसैन्यानामावासस्थानभूमिषु । लोहसंपुटमध्यस्थान् दीनारान् स न्यखीखनत् ॥ १२१ ॥
प्रद्योतनृपतेः सैन्यैस्ततो राजगृहं पुरम् । पर्यवेष्ट्यत भूगोलः पयोधिसलिलैरिव ॥ १२२ ॥
अथेत्थं प्रेषयामास लेखं प्रद्योतभूपतेः । अभयो गुप्तपुरुषैः परुषेतरभाषिभिः ॥ १२३ ॥
शिवादेवीचेल्लणयोर्भेदं नेक्षे मनागपि । तन्मान्योऽसि शिवादेवीसंबन्धेनापि सर्वदा ॥ १२४ ॥
तेनावन्तीश ! वच्मि त्वामेकान्तहितवांछया । सर्वे श्रेणिकराजेन भेदितास्तव भूभुजः ॥ १२५ ॥
दीनाराः प्रेषिताः सन्ति तेभ्यस्तान् कर्तुमात्मसात् । ते तानादाय बद्ध्वा त्वामर्पयिष्यन्ति मत्पितुः १२६

१ *C*, *L* प्रतौ सर्वत्र 'उज्जयनी' इत्येव प्रयोगः अस्ति ॥

तदावासेषु दीनारा निखाताः सन्ति तत्कुले । खानयित्वा पश्य को वा दीपे सत्यमिमीक्षते ? ॥ १२७ ॥
विदित्वैवं स भूपस्यैकस्यावासमचीखनत् । लब्धास्तत्र च दीनारास्तान् दृष्ट्वा स पलायितः ॥ १२८ ॥
नष्टे तत्र च तत्सैन्यं विलोड्याब्धिमिवाखिलम् । हस्त्यश्वाद्याददे सारं मगधेन्द्रः समन्ततः ॥ १२९ ॥
नासारूढेन जीवेन वायुवाजेन वाजिना । ततः प्रद्योतनृपतिः कथंचित् स्वां पुरीं ययौ ॥ १३० ॥
नृपा ये बद्धमुकुटा ये चान्येऽपि महारथाः । तेऽपि नेशुः काकनाशं हतं सैन्यं त्वनायकम् ॥ १३१ ॥
असंयतलुलत्केशैश्छत्रशून्यैश्च मौलिभिः । राजानमनुयान्तस्तेऽप्यायुरुज्जयिनीं पुरीम् ॥ १३२ ॥
अभयस्यैव मायेयं वयं नेदृशकारिणः । प्रत्यायितः सशपथं तैरथोज्जयिनीपतिः ॥ १३३ ॥
कदाचिदूचेऽवन्तीशो मध्येसभममर्षणः । योऽर्पयत्यभयं बद्ध्वा मम संपत्स्यते स किम् ॥ १३४ ॥
पताकं हस्तमुत्क्षिप्य काप्येका गणिका ततः । व्यजिज्ञपदवन्तीशमलमस्मीह कर्मणि ॥ १३५ ॥
तामादिदेशावन्तीशो यद्येवमनुतिष्ठ तत् । करोम्यर्थादिसाहाय्यं ब्रूहि किं तव संप्रति ? ॥ १३६ ॥
सा च दध्यौ यदभयो नोपायैर्गृह्यतेऽपरैः । धर्मच्छद्म तदादाय साधयामि समीहितम् ॥ १३७ ॥
अयाचत ततश्च द्वे द्वितीयवयसौ स्त्रियौ । ते तदैवार्पयद्राजा ददौ द्रव्यं च पुष्कलम् ॥ १३८ ॥
कृतादराः प्रतिदिनमुपास्योपास्य संयतीः । बभूवुरुत्कटप्रज्ञास्तास्तिस्रोऽपि बहुश्रुताः ॥ १३९ ॥

१ °ष्ट्वाशुप° C L । °ष्ट्वा च प° D ॥ २ °लायत L ॥ ३ °याब्धि° C । °काब्धि° L ॥ ४ °युवेगेन D ॥ ५ हेतुना C ॥

तास्तिस्रोऽपि ततो जग्मुः श्रेणिकालंकृतं पुरम् । जगत्त्रयीं वंचयितुं मायाया इव मूर्तयः ॥ १४० ॥
बाह्योद्याने कृतावासा सा पणस्त्रीमतल्लिका । पत्तनान्तर्ययौ चैत्यपरिपाटीचिकीर्षया ॥ १४१ ॥
सा विभूत्याऽनिशायिन्या चैत्ये नृपतिकारिते । प्रविवेश समं ताभ्यां कृत्वा नैषेधिकीत्रयम् ॥ १४२ ॥
मालवकौशिकीमुख्यग्रामरागजुषा गिरा । देवं वन्दितुमारेभे सपर्यां विरचय्य सा ॥ १४३ ॥
तत्राभयकुमारोऽपि ययौ देवं विवन्दिषुः । अथ चाऽऽर्हतकुलीनां तां वन्दमानामुदैक्षत ॥ १४४ ॥
देवदर्शनविघ्नोऽस्या मा भूत्प्रविशता मया । द्वार्येवैवाभयस्तस्थौ मंडपान्तर्विवेश न ॥ १४५ ॥
प्रणिधानस्तुतिं कृत्वा सा मुक्ताशुक्तिमुद्रया । यावदुत्तस्थुषी तावदभयोऽभ्याजगाम ताम् ॥ १४६ ॥
तादृशीं भावनां तस्यास्तं वेषं प्रशमं च तम् । अभयो वर्णयामास सानन्दं च जगाद ताम् ॥ १४७ ॥
दिष्ट्या भद्रेऽधुना त्वादृक्साधर्मिकसमागमः । साधर्मिकात्परो बन्धुर्न संसारे विवेकिनाम् ॥ १४८ ॥
का त्वं ? किमागमः ? का वाऽऽवासभूरिमके च के । यकाभ्यां स्वातिराधाभ्यामिन्दुलेखेव शोभसे १४९
व्याजहाराथ सा व्याजश्राविकाऽवन्तिवासिनः । महेभ्यवणिजः पाणिगृहीती विधवा त्वहम् ॥ १५० ॥
इमे च मम पुत्रस्य कलत्रे कालधर्मतः । विच्छायभूते विधवे भग्नवृक्षलते इव ॥ १५१ ॥
व्रतार्थं पृच्छतः स्मैते उभे अपि तदैव माम् । विपन्नपतिकानां हि सतीनां शरणं व्रतम् ॥ १५२ ॥

१ न्त° C. L ॥

मयाऽप्युक्ते (क्तं) ग्रहीष्यामि निर्वीराऽहमपि व्रतम्। गार्हस्थ्यस्य फलं किं तु गृह्यतां तीर्थयात्रया ॥ १५३ ॥
व्रते हि भावतः पूजा युज्यते द्रव्यतो न तु । । इत्यहं तीर्थयात्रार्थमेताभ्यां सह निर्गता ॥ १५४ ॥
अथेत्थमभयोऽवोचदतिथीभवताद्य नः । आतिथेयं सतीर्थ्यानां तीर्थादप्यतिपावनम् ॥ १५५ ॥
प्रत्युवाचाभयं साऽपि युक्तमाह भवान् परम् । कृततीर्थोपवासाऽहं भवाम्यद्यातिथिः कथम् ॥ १५६ ॥
अथ तन्निष्ठया हृष्टोऽभयस्तामवदत् पुनः । अवश्यं मम तत्प्रातरागन्तव्यं निकेतनम् ॥ १५७ ॥
साऽप्यूचे यत्क्षणेनापि जन्मिनो जन्म पूर्यते । अहं प्रातरिदं कर्त्राऽस्मीति जल्पेत्कथं सुधीः ? ॥ १५८ ॥
अस्त्विदानीमियं भूयः श्वो निमंत्र्येति चिन्तयन् । तां विसृज्याभयश्चैत्यं वन्दित्वा स्वगृहं ययौ ॥ १५९ ॥
तां निमंत्र्याभयः प्रातर्गृहचैत्यान्यवन्दयत् । भोजयामास च प्राज्यवस्त्रदानादि च व्यधात् ॥ १६० ॥
निमंत्रितस्तयाऽन्येद्युर्मितीभूयाभयोऽप्यगात् । साधर्मिकोपरोधेन किं न कुर्वन्ति तादृशाः ? ॥ १६१ ॥
तया च विविधैर्भोज्यैरभयोऽकारि भोजनम् । चन्द्रहाससुरामिश्रपानकानि च पायितः ॥ १६२ ॥
भुक्तोत्थितश्च सुष्वाप तत्कालं श्रेणिकात्मजः । आदिमा मद्यपानस्य निद्रा सहचरी खलु ॥ १६३ ॥
तं रथेन स्थाने स्थाने स्थापितैश्चापरै रथैः । अवन्तीं प्रापयामास दुर्लक्ष्यच्छद्मसद्म सा ॥ १६४ ॥
ततोऽभयान्वेषणाय श्रेणिकेन नियोजिताः । स्थाने स्थाने मार्गयन्तस्तत्राप्यैयुर्गवेषकाः ॥ १६५ ॥

१ 'श्वोप्येयु' *M.* ॥

किमिहाभय आयात ? इत्युक्ता तैरुवाच सा। इहाभयः समायातः परं यातस्तदैव हि ॥ १६६ ॥
वचनप्रत्ययात्तस्या अन्यत्रेयुर्गवेषकाः। स्थाने स्थाने स्थापिताश्वैः साऽप्यवन्तीं समाययौ ॥ १६७ ॥
सा प्रचंडाभयं चंडप्रद्योतायाऽऽर्पयत्ततः। अभयानयनोपायस्वरूपं च व्यजिज्ञपत् ॥ १६८ ॥
तां प्रद्योतोऽप्युवाचैवं न साधु विहितं त्वया। यदमुं धर्मविश्रब्धं त्वं धर्मच्छद्मनाऽऽनयः ॥ १६९ ॥
कथासप्ततिसंशंसी मार्जार्येव शुकोऽनया। नीतिज्ञोऽपि गृहीतोऽसि जगादेत्यभयं च सः ॥ १७० ॥
अभयोऽप्यब्रवीदेवं त्वमेव मतिमानसि। यस्यैवंविधया बुद्ध्या राजधर्मः प्रवर्धते ॥ १७१ ॥
लज्जितः कुपितश्चाथ चंडप्रद्योतभूपतिः। राजहंसमिवाक्षैप्सीदभयं काष्ठपञ्जरे ॥ १७२ ॥
अग्निभीरुरथो देवी शिवा नलगिरिः करी। लोहजंघो लेखवाहो राज्ये रत्नानि तस्य तु ॥ १७३ ॥
लोहजंघं नृपः प्रैषीद् भृगुकच्छे मुहुर्मुहुः। तद्गताऽऽगतसंक्लिष्टास्तत्रत्या इत्यसूत्रयन् ॥ १७४ ॥
आयात्ययं दिनेनापि पंचविंशतियोजनीम्। असकृद्व्याहरत्यस्मान् हन्मः संप्रत्यमुं ततः ॥ १७५ ॥
ते विमृश्येत्यदुस्तस्य शम्बले विषमोदकान्। तद्वस्त्राशम्बलं चान्यत् समन्तादप्यपाहरन् ॥ १७६ ॥
वर्त्म किंयदप्युल्लंघ्य नदीरोधसि शम्बलम्। तद्भोक्तुमवतस्थे सोऽभूवन्नशकुनान्यथ ॥ १७७ ॥
शकुनज्ञस्तु सोऽभुक्त्वोत्थाय दूरं ययौ ततः। क्षुधितो भोक्तुकामोऽभूद्वारितः शकुनैः पुनः ॥ १७८ ॥

१ सो भूव C. L. ॥ २ नाल्लया C । नान्यथा L. ॥

दूरं गत्वा भोक्तुकामः शकुनैर्वारितः पुनः । ततो गत्वा स तत्सर्वं प्रद्योतस्य न्यवेदयत् ॥ १७९ ॥
ततो राज्ञा समाहूय तत्पृष्टः श्रेणिकात्मजः । पाथेयभस्त्रामाघ्राय जगाद मतिमानिदम् ॥ १८० ॥
अस्ति दृष्टिविषोऽत्राहिर्द्रव्यसंयोगसंभवः । असौ दग्धो भवेन्नूनं भस्त्रामुद्घाटयेद्यदि ॥ १८१ ॥
ततः पराङ्मुखोऽरण्ये मोच्य इत्यभयोदिते । तथैव मुमुचे सद्यो दग्धा वृक्षा मृतश्च सः ॥ १८२ ॥
विना बन्धनमोक्षं त्वं वरं याचस्व मामिति । नृपेणोक्तोऽभयोऽवादीन्न्यासीभूतोऽस्तु मे वरः ॥ १८३ ॥
इतश्च चंडप्रद्योतराजस्य श्रीरिवोदधेः । अभूद्वासवदत्तेति सुताऽङ्गारवतीभवा ॥ १८४ ॥
धात्रीजनैर्लाल्यमाना वर्धमाना क्रमेण सा । राज्यलक्ष्मीरिव साक्षाद्रेमे राजगृहांगणे ॥ १८५ ॥
सर्वलक्षणसंपूर्णां विनयादिगुणान्विताम् । पुत्रादप्यधिकां मेने राजा तामतिवत्सलः ॥ १८६ ॥
आत्मानुरूपगुर्वन्ते साऽध्यैष्ट सकलाः कलाः । गान्धर्ववेद एवैकोऽवाशिष्यत गुरुं विना ॥ १८७ ॥
राजाऽपृच्छच्च सचिवं बहुदृष्टं बहुश्रुतम् । भावी को नाम दुहितुर्गान्धर्वाध्यापने गुरुः ॥ १८८ ॥
प्रायेण राजपुत्रीणां गतानां पतिवेश्मनि । पत्युर्विनोदे गान्धर्वकलैव ह्युपयोगिनी ॥ १८९ ॥
मन्त्री प्रोवाच गान्धर्वधुरीणानां शिरोमणिः । संप्रत्युदयनो राजा मूर्तिरन्यैव तुम्बरोः ॥ १९० ॥
श्रूयते तस्य गान्धर्वकला काऽप्यतिशायिनी । गीतेन मोहयित्वा यो वने बध्नाति सिन्धुरान् ॥ १९१ ॥

१ °राम्बु° *C. L.* । २ °णोक्तो *D. M.* ॥

स गायति वने गत्वा गजास्तद्गीतमोहिताः । अपि बन्धं न जानन्ति पीतस्वादुरसा इव ॥ १९२ ॥

गीतोपायेन स यथा वने बध्नाति सिन्धुरान् । तथा तस्याप्युपायोऽस्ति बन्धेऽत्रानयनेऽपि च ॥१९३ ॥

कार्यस्तत्र [1]किलिञ्जैश्च वने सत्य इव द्विपः । कुर्वन् यन्त्रप्रयोगेण क्रिया गत्यासनादिकाः ॥ १९४ ॥

[2]किलिञ्जहस्तिमध्ये च भटाः स्थास्यन्ति शस्त्रिणः । ते गजं चलयिष्यन्ति [3]भेत्स्यन्ति च त एव तम् १९५

बद्ध्वा चैवं वत्सराज इहानीतस्तवाऽऽज्ञया । कन्यां वासवदत्तां ते गान्धर्वं शिक्षयिष्यति ॥ १९६ ॥

साधु साध्विति राज्ञाऽनुमतो मन्त्र्यपि तं तथा । अकारयद्गजं सत्यगजादप्यधिकं गुणैः ॥ १९७ ॥

दन्तघातकरोत्क्षेपबृंहितप्रसरादिभिः । तं कुञ्जरं वनचरा विदाञ्चक्रुरकृत्रिमम् ॥ १९८ ॥

वनेचरास्तं करिणमाख्यन्नुदयनाय ते । तद्बन्धार्थं वने तस्मिन् ययावुदयनोऽपि हि ॥ १९९ ॥

दूरे मुक्त्वा परीवारं परिक्रामञ्छनैः शनैः । शकुनान्वेषक इव वनान्तः प्रविवेश सः ॥ २०० ॥

मायाकरटिनस्तस्य समीपमुपसृत्य च । जगावुदयनस्तारमधरीकृतकिन्नरः ॥ २०१ ॥

जगावुदयनो गीतं सुधास्वादु यथा यथा । तथा तथाऽन्तःपुरुषाः स्तिमिताङ्गं गजं व्यधुः ॥ २०२ ॥

कौशाम्बीशोऽपि तं नागं मन्वानो गीतमोहितम् । शनैः शनैरभ्यसर्पत्तिमिरे संचरन्निव ॥ २०३ ॥

स्तब्धोऽयं मम गीतेनेत्युपसृत्य स पार्थिवः । उत्प्लुत्येभं तमारोहद्विहंग इव पादपम् ॥ २०४ ॥

१-२ कलिं° *C. L.* ॥ ३ वत्स्यंति *C* । भत्स्यन्ति *C* । भेत्स्यन्ति *D* ॥

प्रद्योताऽऽयुक्तसुभटा निःसृत्य द्विरदोदरात् । पातयित्वा गजस्कंधाद्वत्सराजमबन्धयन् ॥ २०५ ॥
एकाकी च निरस्त्रश्च विश्वस्तश्च शतैर्भटैः । नाकार्षीत् पौरुषं रुद्धः कुक्कुरैरिव सूकरः ॥ २०६ ॥
ऊचे च चण्डप्रद्योतो वत्सराजं भटार्पितम् । मत्पुत्रीं शिक्षयैकाक्षीं त्वं गान्धर्वकलां निजाम् ॥ २०७ ॥
मत्कन्याऽध्यापनेन त्वं सुखं तिष्ठ मदोकसि । अन्यथा तव बद्धस्य मदधीनं हि जीवितम् ॥ २०८ ॥
दध्यावुदयनोऽप्येवं कन्यामध्यापयाम्यहम् । कालं क्षिपामि जीवन् हि नरो भद्राणि पश्यति ॥ २०९ ॥
इति चेतसि निश्चित्य तत्प्रद्योतस्य शासनम् । अनुमेने वत्सराजः स पुमान् यो हि कालवित् ॥ २१० ॥
ऊचे च चंडप्रद्योतः काणा हि दुहिता मम । मा जातु तां निरीक्षेथाः सा हि लज्जिष्यतेऽन्यथा ॥ २११ ॥
इत्युक्त्वाऽन्तःपुरे गत्वा तनयामप्युवाच सः । गान्धर्वगुरुरायातो न वीक्ष्यः कुष्ठ्ययं यतः ॥ २१२ ॥
वत्सराजोऽपि गान्धर्वं तां तथैवाध्यजीगपत् । प्रद्योतवंचितौ तौ तु मिथो ददृशतुर्न तु ॥ २१३ ॥
पश्याम्यमुमिति ध्यायन्त्यन्यदाऽवन्तिनाथसूः । मनःशून्याऽन्यथापाठीन्मनोऽधीनं हि चेष्टितम् ॥ २१४ ॥
वत्सराजस्तदाऽवन्तिराजपुत्रीमतर्जयत् । विनाशयसि किं शास्त्रं काणे ! दुःशिक्षितासि किम् ? ॥२१५॥
सा तिरस्कारकुपिता वत्सराजमदोऽवदत् । किं काणामभिधत्से मां कुष्ठिनं स्वं न पश्यसि ? ॥ २१६ ॥
दध्यौ चैवं वत्सराजः कुष्ठभाग् यादृगस्म्यहम् । काणापि तादृगेवैषा पश्यामि तदिमां खलु ॥ २१७ ॥
इत्यपासारयत् काण्डपटं स धिषणापटुः । ददर्श मेघनिर्मुक्तामिन्दुलेखामिवाथ ताम् ॥ २१८ ॥ ॥ ३१७

तं च वासवदत्ताऽपि सद्यः स्फारितलोचना । सर्वांगसुभगं साक्षादिवाद्राक्षीन्मनोभुवम् ॥ २१९ ॥
दृष्ट्वा वासवदत्ता तं वत्सराजोऽपि तां तदा । परस्परानुरागर्द्धिसूचकं चक्रतुः स्मितम् ॥ २२० ॥
प्रद्योतपुत्री प्रोवाच धिग्धिक् पित्राऽस्मि वंचिता । कुहूतमिस्रेन्दुमिव याऽपश्यं त्वां न सुन्दर ! ॥२२१॥
कलाचार्य ! कलाः सम्यग्यदपि संक्रामितास्त्वया । तावन्मेऽपि गुणिन्याः सन्तु भर्ता त्वमेव मे ॥ २२२ ॥
वत्सराजोऽवदद्भद्रे ! त्वत्पित्रैवास्मि वंचितः । काणेत्यन्तरितां कृत्वा त्वां पश्यन्नस्मि वारितः ॥ २२३ ॥
कान्ते ! तदावयोर्योगो भवत्वत्रैव तस्थुषोः । समये त्वां हरिष्यामि वैनतेयः सुधामिव ॥ २२४ ॥
स्वर्धदूत्येन वैदग्धीबन्धुरं जल्पतोरिति । मनोयोगस्पर्द्धयेव वपुर्योगोऽप्यभूत्तयोः ॥ २२५ ॥
दासी वासवदत्ताया धात्री विश्रम्भभाजनम् । एका काञ्चनमालैव विवेद चरितं तयोः ॥ २२६ ॥
एकयैवोपास्यमानौ दास्या काञ्चनमालया । केनाप्यज्ञातदाम्पत्यौ तौ कालमतिनिन्यतुः ॥ २२७ ॥
अन्यदाऽऽलानमुन्मूल्य पातयित्वा निषादिनौ । स्वैरं नलगिरिर्भ्राम्यन् क्षोभयामास नागरान् ॥ २२८ ॥
असाववशगो हस्ती वशं नेयः कथं न्विति । राज्ञा पृष्टोऽभयोऽशंसद्गायतूदयनो नृपः ॥ २२९ ॥
गीतं नलगिरेरग्रे कुर्वित्युक्तोऽथ भूभुजा । जगावुदयनस्तत्र समं वासवदत्तया ॥ २३० ॥
तद्गीताकर्णनाऽऽक्षिप्तो बद्धो नलगिरिः करी । पुनर्ददौ वरं राजा न्यासीचक्रेऽभयस्तथा ॥ २३१ ॥

१ नैव L ॥

एकादश सर्गः

अन्यदोद्यापनिकयोद्यानं प्रत्यचलन्नृपः । सान्तःपुरपरीवारः पौरैः सह महर्द्धिभिः ॥ २३२ ॥
तदा च वत्सराजस्य मोक्षोपायं विचिन्तयन् । मार्गं परिश्रमन्नासीन्मंत्री योगन्धरायणः ॥ २३३ ॥
स्वबुद्धिविभवोष्माणं हृदन्तर्धर्तुमक्षमः । स पपाठ यन्मनसि प्रायस्तद्धि वचस्यपि ॥ २३४ ॥
यदि तां चैव तां चैव तां चैवायतलोचनाम् । न हरामि नृपस्यार्थे नाहं योगन्धरायणः ॥ २३५ ॥
गच्छंश्च चंडप्रद्योतस्तस्य वाचं ससौष्ठवाम् । आकर्ण्य तं निरैक्षिष्ट दुष्कटाक्षेण चक्षुषा ॥ २३६ ॥
योगन्धरायणोऽप्याशु परेषामिंगितादिभिः । भावज्ञोऽवन्तिनृपतिं विवेद कुपितं तदा ॥ २३७ ॥
कौशाम्बीपतिगृध्रत्वमपाकर्तुं स आत्मनः । प्रत्युत्पन्नधियां धुर्य इदमौपयिकं व्यधात् ॥ २३८ ॥
मुक्त्वा संव्यानमूर्ध्वस्थः प्रेतानिविकृताकृतिः । मूत्रयन् व्यञ्जयामास भूताविष्टत्वमात्मनः ॥ २३९ ॥
पिशाचकी कश्चिदसाविति ज्ञात्वा नृपोऽपि हि । सद्यः कोपं निजग्राह निषादीव मतंगजम् ॥ २४० ॥
ततश्च चण्डप्रद्योतो गत्वोद्यानेऽनवद्यवाक् । गान्धर्वगोष्ठीमारेभे स्मरद्विपमहौषधम् ॥ २४१ ॥
गान्धर्वकौशलं द्रष्टुं नवं प्रद्योतभूपतिः । आह्वद्वासवदत्तां च वत्सराजं च कौतुकी ॥ २४२ ॥
ऊचे प्रद्योततनयां वत्सराजः शुभानने ! । आरुह्येभीं वेगवतीं गन्तुं कालोऽयमावयोः ॥ २४३ ॥
सद्यो जितमरुद्वेगां ततो वेगवतीमिभीम् । आनाययदवन्तीशदुहितोदयनाज्ञया ॥ २४४ ॥
कक्षायां बध्यमानायां सा ररास च हस्तिनी । श्रुत्वा तद्रसितं चैवमन्धमौहूर्तिकोऽवदत् ॥ २४५ ॥ ॥ ३१९ ॥

कक्षायां बध्यमानायां यथा रसति हस्तिनी । योजनानां शतं गत्वा प्राणत्यागं करिष्यति ॥ २४६ ॥
वसन्तको हस्तिपकोऽभवादुदयनाज्ञया । घनत्रो मूत्रघटिकाः करिण्याः पार्श्वयोर्द्वयोः ॥ २४७ ॥
वत्सराजो घोषवतीपाणिः प्रद्योतनन्दना । काञ्चनमाला वसन्तश्चारोहंस्तमथ द्विपीम् ॥ २४८ ॥
योगन्धरायणोऽप्येत्य नुनोद करसंज्ञया । याहि याहीत्युदयनं सोऽपि गच्छन्नदोऽवदत् ॥ २४९ ॥
वासवदत्ता काञ्चनमाला चैव वसन्तकः । वेगवती घोषवती वत्सराजश्च यान्त्यमी ॥ २५० ॥
प्रेरयन् वारणवधू वत्सराजोऽतिरंहसा । आत्मानं ज्ञापयन्नेवं नात्यजत्क्षत्रियव्रतम् ॥ २५१ ॥
प्रद्योतोऽपि गतं ज्ञात्वोदयनं पंचभिः सह । करौ जघर्षाक्षसूने पाशकान् पातयन्निव ॥ २५२ ॥
अवन्तीशो नलगिरिं सन्नाह्यासह्यविक्रमः । निषादिभिर्महायोधैरास्थितं पृष्ठतोऽमुचत् ॥ २५३ ॥
पञ्चविंशतियोजन्यामतीतायां स कुञ्जरः । अदर्शीयानुदयनेनादृश्यत भयंकरः ॥ २५४ ॥
ततो मूत्रघटीमेकां स्फोटयित्वा महीतले । तथैव प्रेरयामासोदयनस्तां करेणुकाम् ॥ २५५ ॥
गजोऽपि तद्घटीमूत्रं जिघ्रन् क्षणमिवास्थित । कष्टेन प्रेर्यमाणस्तु प्रससार पुनस्तथा ॥ २५६ ॥
मार्गे मूत्रघटीरन्या अपि तावति तावति । स्फोटं स्फोटं नलगिरेर्वत्सराजोऽरुणद्गतिम् ॥ २५७ ॥
योजनानां शतं गत्वा कौशाम्बीं प्रविवेश सः । परिश्रान्ता तदा सा च व्यपद्यत करेणुका ॥ २५८ ॥
यावच्च मूत्रमाजिघ्रन् प्रससार न वारणः । कौशाम्बीपतिसेनाऽपि तावद्योद्धुमढौकत ॥ २५९ ॥ ॥ ३२० ॥

निषादिनो नलगिरिं वालयित्वा ततश्च ते। [1]पथा यथागतेनैव पुनरुज्जयिनीं ययुः॥ २६०॥
कटकोपक्रमं कुर्वन् प्रद्योतः कुलमन्त्रिभिः। भक्तैः कोपकृतान्तोऽपि युक्तिपूर्वमवार्यत॥ २६१॥
वराय यस्मै कस्मैचिद्देयाऽवश्यं हि कन्यका। तद्वत्सराजादधिकं कं जामातरमाप्स्यसि॥ २६२॥
भेजे वासवदत्ता तं स्वयमेव स्वयंवरा। स्वामिंस्त्वद्दुहितुः पुण्यैरुचितः सोऽभवद्वरः॥ २६३॥
तदलं कटकारम्भेणानुमन्यस्व तं वरम्। यतो वासवदत्तायाः स कौमारहरोऽभवत्॥ २६४॥
इति तैर्बोधितो राजा वत्सराजाय संमदात्। प्रैषीज्जामातृभावार्हं वस्तुजातं विधेयवित्॥ २६५॥
अभूदवन्त्यामन्येद्युर्निर्विच्छेदं प्रदीपनम्। पृष्टश्च तत्प्रतीकारं प्रद्योतेनाभयोऽवदत्॥ २६६॥
विषस्येव विषं वह्नेर्वह्निरेव यदौषधम्। तदन्यः क्रियतां वह्निर्यथा शाम्येत्प्रदीपनम्॥ २६७॥
तत्तथा विदधे [2]राजाऽशाम्यत्तच्च प्रदीपनम्। तृतीयं च वरं सोऽदान्न्यासीचक्रेऽभयश्च तम्॥ २६८॥
अशिवं महदन्येद्युरुज्जयिन्यां समुत्थितम्। तत्प्रशान्त्यै नरेन्द्रेण पृष्ट इत्यभयोऽब्रवीत्॥ २६९॥
आगच्छन्त्वन्तरास्थानं देव्यः सर्वा विभूषिताः। युष्माञ्जयति या दृष्ट्या कथनीया तु सा मम॥ २७०॥
तथैव विदधे [3]राज्ञा राज्ञ्योऽन्या विजिता दृशा। देव्या तु शिवया राजा कथितं चाभयाय तत्॥ २७१॥

---

१ यथा *C. L.* ॥ २ राज्ञा *D. M.* ॥ ३ राजा *L.* ॥

अभाषताभयोऽप्येवं महाराज्ञी शिवा स्वयम् । करोतु कूरबलिना भूतानामर्चनं निशि ॥ २७२ ॥
यद्यद् भूतं शिवारूपेणोत्तिष्ठत्फेत्काराऽऽस्यते । तत्तस्य मुखे देव्या क्षेप्यः कूरबलिः स्वयम् ॥ २७३ ॥
विदधे शिवया तच्चाशिवशान्तिर्बभूव च । तुष्टं चादाद्वरं राजा ययाचे चाभयोऽप्यदः ॥ २७४ ॥
स्थितो नलगिरौ [1]मिंठीभूते त्वयि शिवांकगः । अहं विशाम्यग्निभीरुरथदारुकृतां चिताम् ॥ २७५ ॥
ततो विषण्णः प्रद्योतो वरं दातुमशक्नुवन् । विससर्जाञ्जलिं कृत्वा कुमारं मगधेशितुः ॥ २७६ ॥
आशुश्रावाभयोऽप्येवं त्वयाऽऽनीतश्छलादहम् । दिवा रटन्तं पूर्मध्ये त्वां तु नेष्याम्यसावहम् ॥ २७७ ॥
ततोऽभयकुमारोऽगात् क्रमाद्राजगृहे पुरे । कथमप्यवतस्थे च कंचित्कालं महामतिः ॥ २७८ ॥
गृहीत्वा गणिकापुत्र्यौ रूपवत्यावथाभयः । वणिग्वेषोऽगादवन्त्यां राजमार्गेऽग्रहीद् गृहम् ॥ २७९ ॥
प्रद्योतेनेक्षिते ते च दारिके पथि गच्छता । ताभ्यां च सविलासाभ्यां प्रद्योतोऽपि निरीक्षितः ॥ २८० ॥
प्रद्योतेन गृहे गत्वा प्रेषिता रागिणा ततः । दूत्यनुनयन्ती ताभ्यां क्रुद्धाभ्यामपहस्तिता ॥ २८१ ॥
द्वितीयस्मिन्नपि दिनेऽर्थयमाना नृपाय सा । ताभ्यां शनैः सरोषाभ्यामथामन्यत दूतिका ॥ २८२ ॥
तृतीयेऽप्यह्न्यनिर्वेदादेत्य ते याचिते तया । अवोचतां सदाचारो भ्राता नावेष रक्षति ॥ २८३ ॥
ततो बहिर्गतेऽमुष्मिन् सप्तमेऽह्नि समागते । इहायातु नृपश्छन्नस्ततः संगो भविष्यति ॥ २८४ ॥

१ मेंठी° C । मेढी° L ॥

अथाभयेन प्रद्योतसदृगेकः पुमान्निजः । उन्मत्तो विदधे तस्य प्रद्योत इति नाम च ॥ २८५ ॥
ईदृशोऽयं मम भ्राता भ्राम्यतीतस्ततस्ततः । रक्षितव्यो मया हा किं करोमीत्यवदज्जने ॥ २८६ ॥
तं वैद्यसद्म नयनच्छद्मना प्रत्यहं बहिः । रटन्तं मञ्चकारूढं निनायाऽऽर्तमिवाभयः ॥ २८७ ॥
नीयमानश्च तेनोच्चैः स उन्मत्तश्चतुष्पथे । प्रद्योतोऽहं ह्रियेऽनेनेत्युदश्रुवदनोऽरटत् ॥ २८८ ॥
सङ्केतेऽह्नि नृपोऽप्यागात्तत्र प्रच्छन्नमेककः । कामान्धः सिन्धुर इव बद्धश्चाभयपूरुषैः ॥ २८९ ॥
नीयतेऽसौ वैद्यवेश्मेत्यभयेनाभिभाषिणा । पर्यङ्केन समं जह्रे पुरान्तः स रटन् दिवा ॥ २९० ॥
क्रोशे क्रोशे पुरो मुक्तै रथैरथ सुवाजिभिः । पुरे राजगृहेऽनैषीत् प्रद्योतमभयोऽभयः ॥ २९१ ॥
ततो निनाय प्रद्योतं श्रेणिकस्य पुरोऽभयः । दधावे खड्गमाकृष्य तं प्रति श्रेणिको नृपः ॥ २९२ ॥
अथाभयकुमारेण बोधितो मगधेश्वरः । संमान्य वस्त्राभरणैः प्रद्योतं व्यसृजन्मुदा ॥ २९३ ॥
अन्यदा गणभृद्देवसुधर्मस्वामिनोऽन्तिके । प्रव्रज्यामग्रहीत् कोऽपि विरक्तः काष्ठभारिकः ॥ २९४ ॥
विहरन् स पुरे पौरैः पूर्वावस्थाऽनुवादिभिः । अभर्त्स्यतोपाहस्यतागर्ह्यतापि पदे पदे ॥ २९५ ॥
नावज्ञां सोढुमीशोऽथ ततो विहर्तुमन्यतः । इति व्यज्ञपयत् स श्रीसुधर्मस्वामिनं गुरुम् ॥ २९६ ॥
सुधर्मस्वामिनाऽन्यत्र विहारक्रमहेतवे । आपृच्छ्यताभयः पृच्छन् ज्ञापितस्तच्च कारणम् ॥ २९७ ॥

१ ३मन्यमं L ॥ २ पुरा L ॥

दिनमेकं प्रतीक्षध्वमूर्ध्वं यत्प्रतिभाति वः । तद्विधत्तेत्यथाचिष्ट प्रणम्य श्रेणिकात्मजः ॥ २९८ ॥
सोऽथ राजकुलात् कृष्ट्वा रत्नकोटित्रयीं बहिः । दास्याम्येतामेत लोकाः ! पटहेनेत्यघोषयत् ॥ २९९ ॥
ततश्चैयुर्जनाः[1] सर्वेऽप्यवोचदभयोऽप्यदः । जलाग्निस्त्रीविवर्जको यस्तस्य रत्नोच्चयोऽस्त्वयम् ॥ ३०० ॥
लोकोत्तरमिदं लोकः स्वामिन् ! किं कर्तुमीश्वरः ? । इति तेष्वाभाषमाणेष्वभयोऽपीत्यभाषत ॥ ३०१ ॥
यदि वो नेदृशः कश्चिद्रत्नकोटित्रयं ततः । जलाग्निस्त्रीमुचः काष्ठभारिणोऽस्तु महामुनेः ॥ ३०२ ॥
सम्यगीदृगयं साधुः पात्रदानस्य युज्यते । मुधाऽसौ हसितोऽस्माभिरिति तैर्जगदेऽभयः ॥ ३०३ ॥
अस्य भर्त्सोपहासादि न कर्तव्यमतः परम् । आदिष्टमभयेनैवं प्रतिपद्य ययुर्जनाः ॥ ३०४ ॥
एवं बुद्धिमहाम्भोधिः पितृभक्तिपरोऽभयः । निरीहो धर्मसंसक्तो राज्यमन्वशिषत्पितुः ॥ ३०५ ॥
वर्तमानः स्वयं धर्मे स प्रजा अप्यवर्तयत् । प्रजानां च पशूनां च गोपायत्ताः प्रवृत्तयः ॥ ३०६ ॥
राजचक्रे जजागार यथा द्वादशधा स्थिते । तथा श्रावकधर्मेऽपि सोऽप्रमद्वरमानसः ॥ ३०७ ॥
बहिरंगान्यथाऽजैषीद् दुर्जयानपि विद्विषः । अन्तरंगानपि तथा स लोकद्वयसाधकः ॥ ३०८ ॥
तमूचे श्रेणिकोऽन्येद्युर्वत्स ! राज्यं त्वमाश्रय । अहं श्रयिष्ये श्रीवीरशुश्रूषासुखमन्वहम् ॥ ३०९ ॥
पिताज्ञाभंगसंसारभीरुरित्यभयोऽब्रवीत् । यदादिशथ तत्साधु प्रतीक्षध्वं क्षणं परम् ॥ ३१० ॥

---

१ °तश्चेयुर्जे° *C. L. M.* ॥

इतश्च भगवान् वीरः प्रव्राज्योदायनं नृपम् । मरुमंडलतस्तत्राभ्यागत्य समवासरत् ॥ ३११ ॥
दिष्ट्याऽद्य भगवानागादिति हृष्टोऽभयोऽपि हि । गत्वा नत्वा भगवन्तं भक्तिमानेवमस्तवीत् ॥ ३१२ ॥
सत्त्वस्यैकान्तनित्यत्वे कृतनाशाकृतागमौ । स्यातामेकान्तनाशेऽपि कृतनाशाकृतागमौ ॥ ३१३ ॥
आत्मन्येकान्तनित्ये स्यान्न भोगः सुखदुःखयोः । एकान्तानित्यरूपेऽपि न भोगः सुखदुःखयोः ॥ ३१४ ॥
पुण्यपापे बन्धमोक्षौ न नित्यैकान्तदर्शने । पुण्यपापे बन्धमोक्षौ नानित्यैकान्तदर्शने ॥ ३१५ ॥
क्रमाक्रमाभ्यां नित्यानां युज्यतेऽर्थक्रिया न हि । एकान्तक्षणिकत्वेऽपि युज्यतेऽर्थक्रिया न हि ॥ ३१६ ॥
यदा तु नित्यानित्यत्वरूपता वस्तुनो भवेत् । यथाऽऽत्थ भगवन्नैव तदा दोषोऽस्ति कश्चन ॥ ३१७ ॥
गुडो हि कफहेतुः स्यान्नागरं पित्तकारणम् । द्वयात्मनि न दोषोऽस्ति गुडनागरभेषजे ॥ ३१८ ॥
द्वयं विरुद्धं नैकत्रासत्प्रमाणप्रसिद्धितः । विरुद्धवर्णयोगो हि दृष्टो मेचकवस्तुषु ॥ ३१९ ॥
विज्ञानस्यैकमाकारं नानाऽऽकारकरम्बितम् । इच्छंस्तथागतः प्राज्ञो नानेकान्तं प्रतिक्षिपेत् ॥ ३२० ॥
चित्रमेकमनेकं च रूपं प्रामाणिकं वदन् । यौगो वैशेषिको वाऽपि नानेकान्तं प्रतिक्षिपेत् ॥ ३२१ ॥
इच्छन् प्रधानं सत्त्वाद्यैर्विरुद्धैर्गुम्फितं गुणैः । सांख्यः संख्यावतां मुख्यो नानेकान्तं प्रतिक्षिपेत् ॥ ३२२ ॥
विमतिः संमतिर्वापि चार्वाकस्य न मृग्यते । परलोकात्ममोक्षेषु यस्य मुह्यति शेमुषी ॥ ३२३ ॥
तेनोत्पादव्ययस्थेमसंभिन्नं गोरसादिवत् । त्वदुपज्ञं कृतधियः प्रपन्ना वस्तु वस्तु सत् ॥ ३२४ ॥

इति स्तुत्वा पुनर्नत्वा पप्रच्छ परमेश्वरम् । राजर्षिः कोऽन्तिमोऽथाख्यत् स्वामी नृपमुदायनम् ॥ ३२५ ॥
अपृच्छदभयो भूयः कोऽयं स्वामिन्नुदायनः । उदायनस्य चरितं ततश्चाकथयत्प्रभुः ॥ ३२६ ॥
सिन्धुसौवीरदेशेऽस्ति पुरं वीतभयाह्वयम् । तत्रोदायननामाऽभूदवनीशो महाभुजः ॥ ३२७ ॥
वीतभयादिनगरत्रिषष्टित्रिशतीप्रभुः । सिन्धुसौवीरप्रभृतिनीवृत्षोडशकेश्वरः ॥ ३२८ ॥
महासेनादिकदशकिरीटिनृपनायकः । अन्येषामपि विनेता विजय्यासीन्महीतले ॥ ३२९ ॥
सम्यग्दर्शनपूतात्मा कृततीर्थप्रभावना । प्रभावतीति तस्याभूत् पत्नी नाम्ना प्रभावती ॥ ३३० ॥
तस्य प्रभावतीजन्मा यौवराज्यधुरंधरः । जज्ञेऽभीचिः सुतः श्रेष्ठो भागिनेयश्च केश्यभूत् ॥ ३३१ ॥
इतश्च पुरि चंपायामाजन्म स्त्रीषु लंपटः । नाम्ना कुमारनन्दीति स्वर्णकारोऽभवद्धनी ॥ ३३२ ॥
यां यां कन्यां चारुरूपामपश्यदशृणोदपि । स्वर्णपंचशतीं दत्त्वा तां तां परिणिनाय सः ॥ ३३३ ॥
शतानि पंच पत्नीनां बभूवुस्तस्य च क्रमात् । स ईर्ष्यालुरेकस्तम्भे सौधे ताभिररंस्त च ॥ ३३४ ॥
नागिलो नामधेयेन सुहृत्तस्यातिवल्लभः । श्रमणोपासकः शुद्धपंचाणुव्रतधार्यभूत् ॥ ३३५ ॥
एकदा तु पंचशैलद्वीपस्थे व्यन्तरस्त्रियौ । प्रास्थिषातां नन्दीश्वरयात्रायै शक्रशासनात् ॥ ३३६ ॥
तत्पतिः पंचशैलेशो विद्युन्माली तदा च्युतः । ते दध्यतुश्च व्युद्ग्राह्यः कोऽप्य नौ यः पतिर्भवेत् ॥ ३३७ ॥
ततस्ताभ्यां प्रयान्तीभ्यां पत्नीनां पंचभिः शतैः । कुमारनन्दी विलसंश्चम्पापुर्यामदृश्यत ॥ ३३८ ॥

तत्समीपेऽवतीर्णे ते व्युद्ग्राहार्थं पतीच्छया । कुमारनन्यपि प्रोचे ते दृष्ट्वा के युवामिति ॥ ३३९ ॥
कथयामासतुस्ते च देव्यावावां मनुष्यक ! । नाम्ना हासा प्रहासा च ते पश्यन्मोहमाप सः ॥ ३४० ॥
लब्धसंज्ञोऽर्थयांचक्रे ते रिरंसुः स हेमकृत् । तेऽथोचतुः समागच्छेर्द्वीपे त्वं पंचशैलके ॥ ३४१ ॥
इत्युक्त्वोत्पतिते ते तु स्वर्णकारोऽपि भूभुजे । दत्त्वा सुवर्णं पटहाघोषणामित्यकारयत् ॥ ३४२ ॥
नेता यः पंचशैले मां द्रव्यकोटिं स लप्स्यते । एकश्च स्थविरो धृत्वा पटहं धनमाददे ॥ ३४३ ॥
स्थविरः कारयित्वा च यानपात्रमपूरयत् । भूयसा पथ्यदनेन पुत्रेभ्यस्तु धनं ददौ ॥ ३४४ ॥
कुमारान्वितः सार्धं यानपात्रस्थोऽब्धिवर्त्मनि । गत्वा स दूरमित्यूचे स्थविरः पश्य नन्वितः ॥ ३४५ ॥
अब्धिकूले शैलपादजातोऽयं दृश्यते वटः । तदस्मिन् विलगेर्यासि यानपात्रमधो यदा ॥ ३४६ ॥
पंचशैलादिहैष्यन्ति भारुण्डास्त्रिपदाः खगाः । तेषु सुप्तेषु चैकस्य कस्याप्यंह्रौ तु मध्यमे ॥ ३४७ ॥
गाढं बद्ध्वा पटेन स्वं विलगेर्दृढमुष्टिना । प्रातरुड्डीनभारुण्डैः पंचशैलं त्वमाप्स्यसि ॥ ३४८ ॥ (युग्मम्)
ततः परं यानपात्रं महावर्ते विनंक्ष्यति । अविलग्नो वटे हन्त त्वमप्येवं विनंक्ष्यसि ॥ ३४९ ॥
स स्वर्णकृत्तथा चक्रे निन्ये तत्र च पक्षिणा । दृष्टस्ताभ्यां तद्दृष्ट्या च स विशेषमरज्यत ॥ ३५० ॥
ताभ्यां चोचेऽमुनाऽङ्गेन नावां भोग्ये तवानघ ! । अग्निप्रवेशादिना तत् पंचशैलाधिपो भव ॥ ३५१ ॥

---

१ होढोप L ॥ २ बाढं L ॥

किं करोमि क्व यामीति भाषमाणः स हेमकृत् । ताभ्यां पाणिपुटे कृत्वा चम्पोद्याने व्यमुच्यत ॥ ३५२ ॥
स चोपलक्ष्य लोकेन पृष्ट आख्यन्निजां कथाम् । स्मरन् हासां प्रहासां च प्रारेभेऽथाग्निसाधनम् ॥ ३५३ ॥
स नागिलेन सुहृदा नैवं गदितोऽभवत् । मरणं युज्यते नैवं तव कापुरुषोचितम् ॥ ३५४ ॥
दुष्प्रापं मानुषं जन्म तुच्छभोगफलार्जनात् । मा नैषीस्तन्मुधा प्रेप्सेत् को रत्नेन वराटिकाम् ?॥ ३५५ ॥
भोगार्थो वाऽसि चेद्धर्मं तथाप्यार्हतमाश्रयेः । स ह्यर्थकामयोः कामधेनुः स्वर्मोक्षदोऽपि सः ॥ ३५६ ॥
स एवं वार्यमाणोऽपि नागिलेन निदानतः । इंगिनीमरणं कृत्वा पंचशैलाधिपोऽभवत् ॥ ३५७ ॥
नागिलोऽपि स्वमित्रस्य तेनापंडितमृत्युना । आसाद्य सद्यो निर्वेदं परिव्रज्यामुपाददे ॥ ३५८ ॥
प्रव्रज्यां पालयन्मृत्वा देवोऽभूदच्युते च सः । ददर्शावधिना तं च सुहृदं पंचशैलगम् ॥ ३५९ ॥
श्रीनन्दीश्वरयात्रायां प्रस्थितानां दिवौकसाम् । हासाप्रहासे चलिते पुरो गातुं तदाज्ञया ॥ ३६० ॥
पटहग्रहणे ताभ्यां विद्युन्माली प्रवर्तितः । ऊचे ममापि किं नाम कश्चिदादेशदः प्रभुः ॥ ३६१ ॥
इत्यहंकारहुंकारमुखरास्यस्य तस्य तु । मूर्तं कर्मेवाऽऽभियोग्यं पटहो व्यलगद्गले ॥ ३६२ ॥
हस्तपादादिवदंगे पटहः सहभूरिव । तेनोत्तारयितुं शेके ह्रीमता न कथंचन ॥ ३६३ ॥
ऊचे हासाप्रहासाभ्यां कर्मेदमिहजन्मिनाम् । मा त्रपिष्ठाः प्रतिष्ठस्व वाद्योऽवश्यं त्वयाऽऽनकः ॥ ३६४ ॥
ततो हासाप्रहासाभ्यां गायन्तीभ्यां समन्वितः । पटहं वादयन् सोऽगात् पुरतस्त्रिदिवौकसाम् ॥ ३६५ ॥

स नागिलचरो देवो यात्रायां यान् ददर्श च । हासाप्रहासयोर्वृन्दे तमानकधरं सुरम् ॥ ३६६ ॥
तं विद्युन्मालिनं दृष्ट्वा पुरः पटहवादकम् । अवधेः सुहृदं ज्ञात्वाऽभिभाषितुमुपासरत् ॥ ३६७ ॥
तस्य चांगप्रभालोकमुलूक इव भास्वतः । सोढुं दूरादप्यशक्तः पलायनमनाटयत् ॥ ३६८ ॥
सायाह्नार्क इव तेजः स्वं संहृत्याच्युतामरः । विद्युन्मालिनमित्यूचे पश्य जानासि मां न किम् ? ॥३६९॥
देवः पाटहिकोऽप्येवमुवाच ननु कोऽस्म्यहम् । यन्महर्द्धीन् जानामि देवानिन्द्रादिकानपि ॥ ३७० ॥
अथ श्रावकरूपं तद्विरचय्याच्युतामरः । ज्ञाप्याप्रहासामरणं तथैवं प्रत्यबोधयत् ॥ ३७१ ॥
सखे ! मदुपदेशेनाऽऽर्हतं धर्ममनाश्रयन् । अग्निमृत्युं तदाऽकार्षीः पतंग इव मूढधीः ॥ ३७२ ॥
अहं तु जिनधर्मज्ञः प्रव्रज्यां पालयन्मृतः । तदावयोरभूदीदृगुदर्कः स्वस्वकर्मणः ॥ ३७३ ॥
ततो निर्वेदमापन्नं पंचशैलेश्वरं सुरम् । यदन्नं किं करोमीति नागिलस्त्रिदशोऽवदत् ॥ ३७४ ॥
गार्हस्थ्यचित्रशालायां कायोत्सर्गेण तस्थुषः । प्रभोर्भावयतेर्मूर्तिं महावीरस्य कारयेः ॥ ३७५ ॥
अर्हतः प्रतिमायां हि कारितायां सखे ! तव । उत्पत्स्यते भवेऽन्यस्मिन् बोधिबीजं महाफलम् ॥ ३७६ ॥
रागद्वेषमोहजितां प्रतिमां श्रीमदर्हताम् । यः कारयेत्तस्य हि स्याद्धर्मः स्वर्गापवर्गदः ॥ ३७७ ॥
*जिनार्चाकारकाणां न कुजन्म कुगतिर्न च । न दारिद्र्यं न दौर्भाग्यं न चान्यदपि कुत्सितम् ॥ ३७८ ॥

टि०- * अर्चा- प्रतिमा ।

विद्युन्माल्यपि तस्याऽऽज्ञामुररीकृत्य सत्वरः । क्षत्रियकुंडग्रामेऽस्मानपश्यत् प्रतिमास्थितान् ॥ ३७९ ॥
गत्वा महाहिमवति छित्त्वा गोशीर्षचन्दनम् । अस्मन्मूर्तिं यथादृष्टां सालंकारां चकार सः ॥ ३८० ॥
जात्येन चन्दनेनाथ स्वयंघटितसंपुटे । प्रतिमां तां स चिक्षेप निधानमिव *तद्धनः ॥ ३८१ ॥
तदा चैकस्य पोतस्य षण्मास्युत्पातयोगतः । भ्रमतोऽगात् पयोराशौ विद्युन्माली ददर्श तम् ॥ ३८२ ॥
तमुत्पातं स संहृत्य सद्यः सांयात्रिकाय तम् । समुद्गं प्रतिमागर्भं कथयित्वा समार्पयत् ॥ ३८३ ॥
ऊचे च तं स्वस्ति तुभ्यमियृया निरुपद्रवम् । सिन्धुसौवीरविषये त्वं वीतभयपत्तनम् ॥ ३८४ ॥
ततश्चतुष्पथे स्थित्वा कुर्वीथा इत्थ घोषणाम् । देवाधिदेवप्रतिमा गृह्यतां गृह्यतामिति ॥ ३८५ ॥
सांयात्रिकोऽपि तत्कालं प्रतिमायाः प्रभावतः । नदीमिव नदीनाथमुत्तीर्य तटमासदत् ॥ ३८६ ॥
सिन्धुसौवीरदेशेऽथ गत्वा वीतभये पुरे । स्थित्वा चतुष्पथे चक्रे तथैवाघोषणां स ताम् ॥ ३८७ ॥
तापसभक्तस्तत्रागादुदायननृपः स्वयम् । त्रिदंडिनो द्विजन्मानस्तापसाश्चापरेऽपि च ॥ ३८८ ॥
विष्णुं ब्रह्माणमीशानमिष्टं देवमथापरम् । स्मृत्वा लोकाः कुठारेणाजघ्नुस्तं काष्ठसंपुटम् ॥ ३८९ ॥
तत्र स्वरुचि लोकेन मुच्यमाना निरन्तरम् । आयसा अप्यभज्यन्त कुठारास्त्रापुषा इव ॥ ३९० ॥
इत्याश्चर्यप्रसक्तस्य राज्ञो दिनमुखादपि । ललाटंतपतपनो मध्याह्नसमयोऽभवत् ॥ ३९१ ॥

---

टि० — * तद्धनः — कृपणः ।

भोजनातिक्रमं ज्ञात्वा राज्ञो राज्ञी प्रभावती । आह्वातुमादिशच्चेटीं पतिभक्तोचितं ह्यदः ॥ ३९२ ॥
राज्ञाऽपि द्रष्टुमाश्चर्यं तदाऽऽज्ञप्ता प्रभावती । तत्रागात्तदपृच्छच्च राजाऽप्यकथयत्तथा ॥ ३९३ ॥
ऊचे च राज्ञी देवाधिदेवा ब्रह्मादयो न हि । देवाधिदेवो भगवानेकोऽर्हन् परमेश्वरः ॥ ३९४ ॥
तदर्हत्प्रतिमैवेह भविष्यति न संशयः । ब्रह्मादिनामस्मरणात् प्रदत्ते दर्शनं न सा ॥ ३९५ ॥
एषाऽहं दर्शयिष्यामि प्रतिमामर्हतः प्रभोः । तन्नामस्मरणादेव लोकाः ! पश्यत कौतुकम् ॥ ३९६ ॥
ततश्च संपुटं यक्षकर्दमेनाभिषिच्य तम् । पुष्पाञ्जलिक्षेपपूर्वं प्रणम्योचे प्रभावती ॥ ३९७ ॥
गतरागद्वेषमोहः प्रातिहार्याष्टकाञ्चितः । देवाधिदेवः सर्वज्ञोऽर्हन् देयाद्दर्शनं मम ॥ ३९८ ॥
इति देव्यां ब्रुवाणायां प्रतिमास्थानसंपुटः । स व्यदालीत् स्वयमपि प्रगे कमलकोशवत् ॥ ३९९ ॥
गोशीर्षचन्दनमयी तदन्तर्देवनिर्मिता । अम्लानमाल्या सर्वांगसंपूर्णा प्रतिमैक्ष्यत ॥ ४०० ॥
तदाऽर्हच्छासनस्याभूदतिमात्रं प्रभावना । प्रभावत्यपि तां नत्वा प्रतिमामस्तवीदिति ॥ ४०१ ॥
सौमदर्शन सर्वज्ञापुनर्भव ! जगद्गुरो ! । अर्हन् ! भव्यजनानन्द ! विश्वचिन्तामणे ! जय ॥ ४०२ ॥
सांयात्रिकं तं सत्कृत्य प्रभावत्यपि बन्धुवत् । अन्तरन्तःपुरं निन्ये प्रतिमां रचितोत्सवा ॥ ४०३ ॥
कारयित्वा चैत्यगृहं प्रतिमां न्यस्य तत्र च । त्रिसंध्यं पूजयामास स्नानपूर्वं प्रभावती ॥ ४०४ ॥
तामन्यदाऽर्चामर्चित्वा प्रमोदेन प्रभावती । पत्या समेता संगीतमविगीतं प्रचक्रमे ॥ ४०५ ॥

तत्त्वौघानुगतश्रव्यं व्यक्तव्यंजनधातुकम् । व्यक्तस्वरं व्यक्तरागं राजा वीणामवादयत् ॥ ४०६ ॥
व्यक्तांगहारकरणं सर्वांगाभिनयोज्ज्वलम् । ननर्त देव्यपि प्रीता लास्यं तांडवपूर्वकम् ॥ ४०७ ॥
राजाऽन्यदा प्रभावत्या न ददर्श शिरः क्षणात् । नृत्यंतं तत्कबन्धं तु ददर्शाजिकबन्धयत् ॥ ४०८ ॥
अरिष्टदर्शनेन द्राक् क्षुभितस्य महीपतेः । तदोपसर्पच्छिद्रस्येवागलत् कम्बिका करात् ॥ ४०९ ॥
अकांडतांडवच्छेदकुपिता राज्ञ्यथावदत् । नालच्युताऽस्मि किमहं वादनाद्विरतोऽसि यत् ॥ ४१० ॥
इत्थं पुनः पुनः पृष्टः कम्बिकापातकारणम् । तत्तथाऽऽख्यन्महीपालो बलीयान् स्त्रीग्रहः खलु ॥ ४११ ॥
राज्ञ्यूचे दुर्निमित्तेनामुनाऽल्पायुरहं प्रिय ! । आजन्मार्हद्धर्मवत्या मृत्युरप्यस्तु नास्ति भीः ॥ ४१२ ॥
प्रत्युताऽऽनन्दहेतुर्मे दुर्निमित्तस्य दर्शनम् । तज्ज्ञापनाय भवति यत्सर्वविरतौ मम ॥ ४१३ ॥
इत्युक्त्वाऽन्तपुरं राज्ञी ययावविकृतशया । अर्हद्धर्माविद्धकर्णो राजा तु व्यमनायत ॥ ४१४ ॥
अन्यदा च कृतस्नानशौचा देवी प्रभावती । देवार्चावसरेऽर्हाणि दास्या वासांस्यनाययत् ॥ ४१५ ॥
भाव्यनिष्टवशात्तानि राज्ञी रक्तान्युदैक्षत । समयेऽस्मिन्ननर्हाणि अमूनीति चुकोप च ॥ ४१६ ॥
कोपात्प्रभावती दासीमादर्शेन जघान ताम् । तावताऽपि विपेदे सा मृत्योर्हि विषमा गतिः ॥ ४१७ ॥
तत्कालमुज्ज्वलान्येव वसनानि प्रभावती । ददर्शाचिन्तयच्चैवं धिङ्मया खण्डितं व्रतम् ॥ ४१८ ॥

१ तालीघा° *M.* ॥

पंचेन्द्रियस्यान्यस्यापि वधो नरककारणम् । किं पुनः स्त्रीविघातोऽयं श्रेयस्तस्माद्व्रतं मम ॥ ४१९ ॥
दुर्निमित्तं तदाचख्यौ राज्ञे राज्ञी प्रभावती । दासीवधमहापापवैराग्यं च कृताञ्जलिः ॥ ४२० ॥
इति चाभ्यर्थयांचक्रे स्वामिन्नल्पायुरस्म्यहम् । अनुजानीहि मां सर्वविरत्यै नाथ ! संप्रति ॥ ४२१ ॥
अमौलिं मां त्वमद्राक्षीरद्राक्षमधुना त्वहम् । वस्त्रवर्णपरावर्तमनिमित्तद्वयं ह्यदः ॥ ४२२ ॥
अनिमित्तद्वयाऽऽख्याताल्पायुषः समयोचिते । प्रव्रज्याग्रहणे मेऽद्य प्रत्यूहं नाथ ! मा कृथाः ॥ ४२३ ॥
एवमुक्तः सनिर्बन्धमभ्यधाद्वसुधाधवः । अनुतिष्ठ महादेवि ! यत्तुभ्यमभिरोचते ॥ ४२४ ॥
देवत्वमाप्तया देवि ! बोधनीयस्त्वया त्वहम् । स्वर्गसौख्यान्तरायोऽपि सोढव्यो मत्कृते क्षणम् ॥ ४२५ ॥
ततश्च सर्वविरतिं प्रपद्यानशनं तथा । साऽभूद्विपद्य प्रथमे कल्पे देवो महर्द्धिकः ॥ ४२६ ॥
देवाधिदेवप्रतिमां तामन्तःपुरचैत्यगाम् । तथैव देवदत्ताऽऽख्या कुब्जिका दास्यपूजयत् ॥ ४२७ ॥
प्रभावत्यमरेणाथ बोध्यमानोऽप्युदायनः । नाबुध्यतावधेर्ज्ञात्वा तूपायोऽयं व्यधीयत ॥ ४२८ ॥
तापसीभूय सोऽन्येद्युर्नृसद्मोदायनं नृपम् । दिव्यामृतफलापूर्णपात्रपाणिरुपाययौ ॥ ४२९ ॥
तापसश्चोपदामूच्च सुवर्णं सुरभीति तम् । राजा तापसभक्तत्वात्तापसं बहुमानयत् ॥ ४३० ॥
पवित्रमाण्यतिकर्पूरगन्धानीष्टाहृतानि च । फलान्याद परानन्दबीजानीवावनीपतिः ॥ ४३१ ॥
त्वया प्राप्तान्यपूर्वाणि कीदृशानि फलान्यहो ? । स्थानं दर्शय तन्मह्यमपृच्छदिति तं नृपः ॥ ४३२ ॥

तपस्व्युचे पुरस्तस्य विद्यते नातिदूरतः । आश्रमो दृष्टिविश्रामः स ईदृक्फलजन्मभूः ॥ ४३३ ॥
तमाश्रमं दर्शयेति ब्रुवाणं नृपतिं सुरः । स्वशक्त्यैकाकिनं कृत्वा विद्यां दातुमिवानयत् ॥ ४३४ ॥
किंचिद्गत्वा विचक्रे च तादृक्फलमनोरमम् । अनेकतापसाकीर्णमुद्यानं नन्दनोपमम् ॥ ४३५ ॥
तापसानां वनमिदं भक्तस्तेष्वस्मि तेन मे । पूरिष्यते फलेच्छेति दधावे कपिवन्नृपः ॥ ४३६ ॥
सक्रोधमथ धावद्भिस्तैर्मा यातापसैर्नृपः । क्रुश्यमानस्तस्करवत् पलायिष्टाविनष्टधीः ॥ ४३७ ॥
पलायमानश्चापश्यदसौ साधून्[illegible] । शरणं प्रतिपेदे तान्मा भैषीरिति भाषिणः ॥ ४३८ ॥
आश्वासितस्तैर्नृपतिः स्वस्थीभूयेत्यचिन्तयत् । वंचितोऽस्मि धिगाजन्म तापसैः क्रूरकर्मभिः ॥ ४३९ ॥
साधुभिः सोऽन्वशास्येवं धर्मो हि शरणं भवे । धर्मार्थी च परीक्षेत देवं धर्मं गुरुं सुधीः ॥ ४४० ॥
देवोऽष्टादशभिर्दोषैर्मुक्तो धर्मो दयाऽन्वितः । गुरुश्च ब्रह्मचार्येव निरारम्भपरिग्रहः ॥ ४४१ ॥
एवमाद्युपदेशेन प्रत्यबुध्यत पार्थिवः । जिनधर्मश्च तस्याभूद् हृद्युत्कीर्ण इव स्थिरः ॥ ४४२ ॥
प्रत्यक्षीभूय देवोऽर्हद्धर्मे संस्थाप्य पार्थिवम् । तिरोदधे पार्थिवोऽथ स्वमास्थानीस्थमैक्षत ॥ ४४३ ॥
देवतत्त्वगुरुतत्त्वधर्मतत्त्वाधिवासितः । तदाप्रभृत्यभूत्सम्यगुदायनमहीपतिः ॥ ४४४ ॥
इतश्च गान्धारदेशजन्मा गान्धारनामकः । शाश्वतीरर्हत्प्रतिमा वैताढ्येऽगाद्विवन्दिषुः ॥ ४४५ ॥
वैताढ्यमूले तस्थौ चोपवासैस्तद्दिदृक्षया । तुष्टा शासनदेवी च तदीप्सितमपूरयत् ॥ ४४६ ॥

कृतकृत्यं च तं देवी वैताढ्यस्य तलेऽमुचत् । ददौ चाष्टोत्तरं तस्मै कामदं गुलिकाशतम् ॥ ४४७ ॥
क्षिप्त्वैकां गुलिकां वक्त्रे स दध्यौ वन्दिषीय यत् । देवाधिदेवप्रतिमां श्रीवीतभयपत्तने ॥ ४४८ ॥
इति चिन्तासममपि सोऽथ वीतभयं ययौ । देवाधिदेवप्रतिमां तेन कुब्जाऽप्यवन्दयत् ॥ ४४९ ॥
शरीरापाटवं चाभूद्गान्धारस्यापरेऽहनि । तं च प्रतिजजागार कुब्जाऽर्हद्धर्मवत्सला ॥ ४५० ॥
गान्धारोऽपि स्वमासन्नमवसानं विदन् सुधीः । कुब्जायै गुलिकाः प्रादात्प्रव्रज्यां स्वयमाददे ॥ ४५१ ॥
रूपार्थिनी कुरूपा सा क्षिप्त्वैकां गुलिकां मुखे । उपपादभवेवाभूद् द्राग्दिव्याकारधारिणी ॥ ४५२ ॥
सुवर्णवर्णसर्वांगा साऽभूद् गुलिकया तया । ततोऽभ्यधत्त सर्वोऽपि सुवर्णगुलिकेति ताम् ॥ ४५३ ॥
साऽथ द्वितीयां गुलिकां मुखे कृत्वेत्यचिन्तयत् । वृथैव रूपमीदृङ् मेऽनुरूपश्चेत् पतिर्न हि ॥ ४५४ ॥
पितेव मेऽयं नृपतिः पत्तयोऽस्यापरे नृपाः । तच्चंडशासनश्चंडप्रद्योतोऽस्तु पतिर्मम ॥ ४५५ ॥
प्रद्योताग्रे च तद्रूपं वर्णयामास देवता । प्रद्योतोऽपि हि कुब्जायाः प्रार्थने दूतमादिशत् ॥ ४५६ ॥
गत्वा तामर्थयांचक्रे दूतस्तं साऽप्यदोऽवदत् । प्रद्योतं दर्शयाथाऽऽख्यात्प्रद्योताय तथैव सः ॥ ४५७ ॥
तदैवैरावणारूढवासवश्रियमाश्रयन् । आरूढोऽनिलवेगेभं निशि प्रद्योत आययौ ॥ ४५८ ॥
तस्मै यथा सा रुरुचे तस्यै सोऽपि तदा तथा । प्रद्योतोऽथावदत्कुब्जामब्जाक्ष्येह्येहि मत्पुरीम् ॥ ४५९ ॥
कुब्जाऽब्रवीन्न जीवामि यां विना क्षणमप्यहम् । देवाधिदेवप्रतिमां तां मुक्त्वा यामि न क्वचित् ॥ ४६० ॥

प्रतिमायाः प्रतिकृतिरमुष्यास्तन्नृप ! त्वया । आनेतव्या यथा सेह मुच्यते नीयते त्वसौ ॥ ४६१ ॥
इति तत्प्रतिमारूपं निरूप्यावन्तिपार्थिवः । रजनीं तां तया रेमे रजन्यन्ते पुनर्ययौ ॥ ४६२ ॥
प्रद्योतोऽथ गतोऽवन्त्यां यथादृष्टामकारयत् । देवाधिदेवप्रतिमां जात्यश्रीखंडदारुणा ॥ ४६३ ॥
अपृच्छच्च महामात्यान् कारितेयं मया नवा । देवाधिदेवप्रतिमा प्रतिष्ठास्यति को न्विमाम् ॥ ४६४ ॥
अवोचन्मंत्रिणः स्वामिन् ! कौशाम्बीत्यस्ति पूर्वरा । तत्रान्वर्थाभिधानोऽभूज्जितशत्रुर्महीपतिः ॥ ४६५ ॥
पुरोधास्तस्य निःशेषविद्यास्थानाब्धिपारगः । काश्यपो नाम विप्रोऽभूत्तस्य जाया पुनर्यशाः ॥ ४६६ ॥
कपिलो नाम पुत्रोऽभूत्तयोस्तस्मिञ्छिशावपि । काश्यपः प्राप पंचत्वमनाथः कपिलोऽभवत् ॥ ४६७ ॥
राजाऽनादृत्य तं बालं काश्यपस्य पदेऽपरम् । द्विजन्मानं न्यधात् कीदृगन्वयो योग्यतां विना ॥ ४६८ ॥
आदित्यकिरणास्पृष्टशरीरश्छत्रसंपदा । नृत्यत्तुरंगाऽऽरूढोऽथ पुरे बभ्राम स द्विजः ॥ ४६९ ॥
तं दृष्ट्वा कपिलमाता स्मरन्ती पतिसंपदम् । रुरोद मन्दभाग्यानां ह्यसुखे रोदनं सखा ॥ ४७० ॥
कपिलोऽपि रुरोदोच्चै रुदतीं प्रेक्ष्य मातरम् । शोकः संक्रामति ह्याप्ते दर्पणे प्रतिबिम्बवत् ॥ ४७१ ॥
नेत्राभ्यामश्रुमुग्वक्त्रं द्विधारमिव धारकम् । उन्नास्य मातुः कपिलोऽवदत् किमिति रोदिषि ? ॥ ४७२ ॥
जगाद सा यथा ह्येष द्विजमा संपदोदयी । तथाऽभवत्तव पिता स्मृत्वा तज्जात ! रोदिमि ॥ ४७३ ॥

१ निनायाथ *M.* ॥ २ °गान्नाशे *C* । °गम्नायो *D. M.* ॥ ३ वारिजम् *L.* ॥

त्वत्पितुः श्रीर्धनेनाऽस्ताऽनुपार्जितगुणे त्वयि । पितुः श्रियो न रक्ष्यन्त तनयैरपि निर्गुणैः ॥ ४७४ ॥
जजल्प कपिलो मातस्तदधीये गुणार्थ्यहम् । साऽवदन्मत्सरी सर्वोऽप्यत्र कोऽध्यापयिष्यति ? ॥ ४७५ ॥
यद्येवमपि ते बुद्धिः श्रावस्तीं व्रज तत्पुरीम् । तत्रास्ति त्वत्पितुर्मित्रमिन्द्रदत्त इति द्विजः ॥ ४७६ ॥
विद्यार्थिनं पुत्रमिव त्वामायातं स सर्ववित् । प्रीतः पितृसमं वत्स ! कलापूर्णं करिष्यति ॥ ४७७ ॥
गत्वेन्द्रदत्तं कपिलो नत्वा च स्वमजिज्ञपत् । उवाच चाध्यापय मां तातान्यः शरणं न मे ॥ ४७८ ॥
उपाध्यायोऽप्यभिदधे भ्रातुष्पुत्रोऽसि मे खलु । विद्यामनोरथेनैवं न पिता हेपितस्त्वया ॥ ४७९ ॥
वच्मि किं त्वहमातिथ्येऽप्यशक्तो निष्परिग्रहः । अध्यस्मद्वागतस्येह क नु ते नित्यभोजनम् ॥ ४८० ॥
अभोजनस्य च व्यर्थ एव पाठमनोरथः । विना हि भोजनं वत्स मुरजोऽपि न गुंजति ॥ ४८१ ॥
कपिलोऽप्यलपत्तात ! भोजनं भावि भिक्षया । भिक्षां देहीति सिद्धं हि मौञ्जीबन्धाद् द्विजन्मनाम् ४८२
हस्त्यारूढोऽप्यग्रजन्मा भिक्षमाणो न लज्जते । भिक्षाचरश्च राजेव नाधीनः कस्यचित् क्वचित् ॥ ४८३ ॥
इन्द्रदत्तोऽवदद्वत्स ! भिक्षा श्रेष्ठा तपस्यताम् । तवैकदाऽप्यलब्धायां तस्यामध्ययनं कुतः ? ॥ ४८४ ॥
इत्युक्त्वा स द्विजो बालं तमालम्ब्य स्वबाहुना । शालिभद्रमहेभ्यस्य सद्यः सदनमासदत् ॥ ४८५ ॥
ॐ भूर्भुवः स्वरित्यादि गायत्रीमुच्चकैः पठन् । अजिज्ञपद् द्विजन्मानमात्मानं स बहिःस्थितः ॥ ४८६ ॥

१ नैव L ॥

इभ्योऽप्याहूय तं विप्रमूचे किं याचसे ननु । स ययाचे बटोरस्य प्रत्यहं देहि भोजनम् ॥ ४८७ ॥
इभ्योऽपि प्रतिपेदे तद् भुक्त्वा भुक्त्वाऽथ[1] तद्गृहे । उपेन्द्रदत्तं कपिलोऽधिजगे प्रतिवासरम् ॥ ४८८ ॥
शालिभद्रगृहे भोक्तुं कपिलस्य गतस्य तु । सर्वदा युवदास्येका विशिष्टं पर्यवेषयत् ॥ ४८९ ॥
युवा च हास्यशीलश्च स तस्यामन्वरज्यत । स्त्रीसन्निधानं यूनां हि मन्मथद्रुमदोहदम् ॥ ४९० ॥
साऽपि तस्मिन्नभूद्रक्ता रेमाते च क्रमेण तौ । दास्यप्यन्यमनिच्छन्ती रहस्यूचे तमन्यदा ॥ ४९१ ॥
त्वमेव प्राणनाथो मे किं तु निःस्वोऽस्यतो नरम् । प्राणयात्रार्थमपरं भजे सोऽप्यन्वमन्यत ॥ ४९२ ॥
अन्येद्युश्च पुरे तस्मिन् दासीनामुत्सवोऽभवत् । सापि दास्याप निर्वेदं पुष्पपत्रादिचिन्तया ॥ ४९३ ॥
तां निर्वेदवतीं दृष्ट्वा कपिलः स्माह सुन्दरि ! । किं दृश्यसे विवर्णास्या हिमालीढेव पद्मिनी ॥ ४९४ ॥
साऽख्यन्महोऽद्य दासीनां पुष्पपत्रादि नास्ति मे । विगोपिष्यामि मध्ये च दासीनां का गतिर्मम ॥ ४९५ ॥
तद्दुःखव्यन्तरावेशविवशः कपिलोऽपि हि । अधृत्या मौनमालम्ब्य तस्थौ दास्यप्यदोऽवदत् ॥ ४९६ ॥
मा विषीद धनोऽत्रास्ति श्रेष्ठी तं च निशात्यये । प्रबोधयति यस्तस्मै स्वर्णमाषौ ददाति सः ॥ ४९७ ॥
गच्छेस्त्वमविभातायां विभावर्यां तदोकसि । कल्याणिनेय ! कल्याणं पठेरकठिनोक्तिभिः ॥ ४९८ ॥
तथेति प्रतिपेदानं कपिलं प्रजिघाय सा । तस्यामेव तमस्विन्यां निशीथे धनसद्मनि ॥ ४९९ ॥

१ °क्त्वा तु D. ॥

आरक्षैः स व्रजन् वेगात् पुरवर्त्मन्यसंचरे । धृत्वा चोरधियाऽबन्धि चोरचर्या हि तादृशी ॥ ५०० ॥
स प्रसेनजितो राज्ञः पुरः प्रातरनीयत । पृष्टश्च कथयामास स्वर्णमाषकथां तथा ॥ ५०१ ॥
राजाऽपि तत्तथा श्रुत्वा कृपावारितरंगितः । तं स्माह हं हो ? याचस्व यच्छाम्येव यदिच्छसि ॥ ५०२ ॥
विमृश्य मार्गयिष्यामीत्युक्त्वाऽशोकवनान्तरे । गत्वा योगीवैकमना भूत्वा चाचिन्तयद् द्विजः ॥ ५०३ ॥
द्विमाष्या स्यान्न वस्त्रादि तत्सुवर्णशतं नृपात् । याचे याचितलाभे हि याचना किं तनीयसी ॥ ५०४ ॥
न स्यात्स्वर्णशतेनापि प्रक्रिया वाहनादिका । याचे स्वर्णसहस्रं तदिष्टार्थप्राप्तिवेतनम् ॥ ५०५ ॥
सहस्रेणापि मेऽपत्यविवाहाद्युत्सवः कुतः । इति लक्षमहं याचे याचनाचतुरोऽस्मि हि ॥ ५०६ ॥
लक्षेणापि सुहृद्बन्धुदीनाद्युद्धरणं कुतः । कोटिं कोटिशतं कोटिसहस्रं वा तदर्थये ॥ ५०७ ॥
एवं चिन्तयतस्तस्य शुभकर्मोदयादभूत् । इति धीः सुपरीणामा धीर्हि कर्मानुसारिणी ॥ ५०८ ॥
अपि माषद्वयप्राप्तौ यः संतोषोऽभवन्मम । सोऽद्य कोटेरपि प्राप्तौ मां तद्भीत इवामुचत् ॥ ५०९ ॥
विद्यार्थमागतस्येह मम दुर्व्यसनं ह्यदः । सागरं गन्तुकामस्य हिमवद्गमनोपमम् ॥ ५१० ॥
ज्ञानदानं मयि गुरोः स्थले कमलरोपणम् । यद्दास्यामपि दासत्वमकार्षमकुलोचितम् ॥ ५११ ॥
तदलं विषयैरेभिरिति संवेगमाप्तवान् । उत्पन्नजातिस्मरणः स्वयंबुद्धो बभूव सः ॥ ५१२ ॥

---

१ 'वसरोऽस्ति हि L ॥

मूर्धजान्मूर्ध्न उद्धृत्य स्वयं देवतयाऽर्पितम् । रजोहरणवदनवस्त्रिकादिकमाददे ॥ ५१३ ॥
राजानं स गतो राज्ञाऽपृच्छीति किमचिन्तयः? । स्वमनोरथविस्तारमथाऽऽख्यायाब्रवीदिति ॥ ५१४ ॥
यथा लाभस्तथा लोभो लाभाल्लोभः प्रवर्धते । द्विमाष्या चिन्तितं कार्यं कोट्याऽपि न हि निष्ठितम् ५१५
राजाऽपि विस्मितः प्रोचे कोटीरपि ददाम्यहम् । भुंक्ष्व भोगान् व्रतं मुंच न व्रते प्रतिभूस्तव ॥ ५१६ ॥
कपिलोऽप्यब्रवीदर्थै राजन्नलमनर्थदैः । निर्ग्रन्थीभूतवानस्मि धर्मलाभोऽस्तु भद्र ! ते ॥ ५१७ ॥
इत्युक्त्वा कपिलमुनिस्ततो निर्गत्य निर्ममः । निरीहो निरहंकारो विजहार वसुन्धराम् ॥ ५१८ ॥
एवं व्रतं पालयतः कपिलस्य महामुनेः । षण्मासपर्यायेणाभूत् केवलज्ञानमुज्ज्वलम् ॥ ५१९ ॥
इतश्चासीद्राजगृहनगरस्यान्तरालगा । अष्टादशयोजनानुप्रमाणा दारुणाटवी ॥ ५२० ॥
तत्र [1]चेक्कडदासाख्या बलभद्रादयोऽभवन् । शतानि पञ्च चौरास्तान् बोधार्हान् कपिलोऽबुधत् ॥ ५२१ ॥
चौराणामुपकाराय तेषां च स महामुनिः । अभ्यागात्तामरण्यानीं शरण्यः सर्वजन्मिनाम् ॥ ५२२ ॥
एकश्च चौरो वृक्षाग्रमधिरूढः प्लवंगवत् । ददर्श दूरादायातं कपिलं श्रमणोत्तमम् ॥ ५२३ ॥
स चौरोऽचिन्तयत् कोऽयमागच्छत्यभिभूय नः । तमाख्यदिति सेनान्ये सेनान्यं सोऽप्युपाययौ ॥५२४॥
दिष्ट्या क्रीडनमायातमिति सेनापतिर्ब्रुवन् । नृत्य नृत्य श्रमणकेत्यज्ञ आज्ञापयन्मुनिम् ॥ ५२५ ॥

१ च कड° M. ॥

कपिलर्षिरदोऽवादीद्वादको नास्ति कश्चन । वाद्यं विना कुतो वृत्तं[1] न कार्यं कारणं विना ॥ ५२६ ॥
तालवाद्यमथाकार्षुश्चौराः पञ्च शतान्यपि । कपिलोऽपि ननर्तोच्चैर्जगौ च श्रुतिशर्मदम् ॥ ५२७ ॥
दुःखानुभवभूयिष्ठे किं भवेऽस्मिन्नशाश्वते । भवेत्तत्कर्म येनाहं गच्छेयं न हि दुर्गतिम् ॥ ५२८ ॥
इत्यादिका ध्रुवाः पञ्च शतानि कपिलो जगौ । सर्वाः प्राकृतबन्धेन श्रव्यरागेण बन्धुराः ॥ ५२९ ॥
ध्रुवासु गीयमानासु कपिलेन महर्षिणा । ते चौराः प्रत्यबुध्यन्त कस्यांचित्कश्चिदेव च ॥ ५३० ॥
ततः शतानि पञ्चापि चौराणां स महामुनिः । पर्यव्राजयदेतद्धि दृष्टं तज्ज्ञानचक्षुषा ॥ ५३१ ॥
पुरे राजगृहे देवाधिदेवाज्ञां[2] प्रगृह्य सः । ब्रह्मर्षिः कपिलोऽत्रैव त्वत्पुरीमस्ति पावयन् ॥ ५३२ ॥
केवल्येष स्वयंबुद्धः श्वेताम्बरशिरोमणिः । कर्ता प्रतिष्ठां कोऽप्येष पुण्यानामुदयस्तव ॥ ५३३ ॥
ततश्चावन्तिनाथेन प्रार्थितः कपिलो मुनिः । प्रत्यष्ठात् प्रतिमां मंत्रपूतचूर्णानि निक्षिपन् ॥ ५३४ ॥
चर्चयित्वाऽर्चयित्वा च दोर्भ्यामुद्धृत्य पार्थिवः । तां तद्गतो धनमिव हृद्द्वारे प्रतिमां दधौ ॥ ५३५ ॥
न्यधादनिलवेगस्य स्कन्धे तां प्रतिमां नृपः । तदन्तरासनिकवदारूढोऽधारयत् स्वयम् ॥ ५३६ ॥
दिव्याभियोगयानेभ्योऽप्यतिवेगेन दन्तिना । गत्वा वीतभये दास्यै प्रतिमां तां समार्पयत् ॥ ५३७ ॥
साऽपि तां प्रतिमां चैत्ये न्यस्यादाय पुरातनीम् । आगाद्दासीं प्रतिमां च नृपोऽप्यारोपयद् द्विपम् ॥५३८॥

---

१ नृत्तं *L. D.* ॥ २ देवाभि° *M.* ॥

राजाऽपि गजमारुह्यावन्तीं प्राप यथा द्रुतम् । समागमेवाभिमुखं यथा सा पुर्यलक्ष्यत ॥ ५३९ ॥
वणिजो विदिशापुर्यां भायलस्वामिनोऽन्यदा । गोशीर्षकाष्ठप्रतिमा विद्युन्मालिप्रकाशिता ॥ ५४० ॥
राज्ञा कुब्जिकया चापि पूजनाय समर्पिता । तयोस्तदपि वह्वेतद्विषयासक्तयोः सदा ॥ ५४१ ॥ (युग्मम्)
अन्यदा भायलोऽद्राक्षीत्तेजोराशी इवाङ्गिनौ । हस्तविन्यस्तपूजोपकरणौ पुरुषावुभौ ॥ ५४२ ॥
तौ दृष्ट्वा दृष्टिसुखदावाजन्मसुहृदाविव । कौ युवामिति पप्रच्छ भायलोऽशंसतां च तौ ॥ ५४३ ॥
आवां नागकुमारौ भोः ! पातालभवनालयौ । नाम्ना कंबलशबलौ धरणेन्द्रस्य शासनात् ॥ ५४४ ॥
देवाधिदेवप्रतिमां विद्युन्मालिकृतामिमाम् । आयावोऽर्चयितुं चैत्यमेवमर्चोपहारिणौ ॥ ५४५ ॥ (युग्मम्)
अस्या हि विदिशानद्या ह्रदमध्येन वर्त्मना । मज्जनोन्मज्जने नित्यमावां कुर्वोऽत्र हंसवत् ॥ ५४६ ॥
भायलः स्माह पाताले युवां स्वभवनानि मे । गृहीतभगवद्बिम्बस्याद्य दर्शयतं सुरौ ! ॥ ५४७ ॥
शाश्वतीः प्रतिमास्तत्र वन्दितुं मे मनोरथः । स पूर्यतां प्रसादाद्वां न मुधा देवदर्शनम् ॥ ५४८ ॥
ताभ्यां प्रपन्न च तथा तत्र तेनैव वर्त्मना । औत्सुक्यादर्धरचितपूजोऽनीयत भायलः ॥ ५४९ ॥
ववन्दे शाश्वतीरर्हत्प्रतिमास्तत्र भायलः । तं चोचे धरणस्तोषात् प्रसादो याच्यतामिति ॥ ५५० ॥
भायलः स्माह मन्नाम सर्वत्र ज्ञायते यथा । तथास्तु नामस्थैमैव पुरुषाणां हि पौरुषम् ॥ ५५१ ॥

१ मि तेनैव L. ॥

धरणेन्द्रोऽप्युवाचैवं चंडप्रद्योतभूपतिः । देवकीयपुरं तत्र त्वन्नाम्ना कारयिष्यति ॥ ५५२ ॥
कृतार्धपूजस्त्वायासीरिति कालेन गच्छता । गुप्तैव मिथ्यादृग्भिः सा प्रतिमा पूजयिष्यते ॥ ५५३ ॥
तस्याः प्रतिकृतिस्तैश्च बहिः संस्थापयिष्यते । आदित्यो भायलस्वामिनामाऽयमिति वादिभिः ॥ ५५४ ॥
ततश्च भायलस्वामिसूर्य इत्यखिलो जनः । पूजयिष्यति दंभोऽपि सुप्रयुक्तो न निष्फलः ॥ ५५५ ॥
अभ्यधाद्भायलोऽप्येवमाः पापोऽस्मि धिगेन माम् । अन्तरितं तापतितमशिवं मत्कृतं यदः ॥ ५५६ ॥
देवाधिदेवप्रतिमाप्रतिकृत्या दुराशयैः मम नाम्नाऽऽदित्य इति कृत्वा यत्पूजयिष्यते ॥ ५५७ ॥
धरणोऽप्यभ्यधान्मा गाः शुचं किं क्रियतेऽनघ ! । एतद्धि दुःषमाकाललीलायितमनुज्ज्वलम् ॥ ५५८ ॥
ततो नागकुमाराभ्यां यथा तेनैव तत्क्षणम् । नीत्वाऽमुच्यत तत्रैव स्वप्नदर्शीव भायलः ॥ ५५९ ॥
[1]इतश्च नगरे वीतभये राजाऽप्युदायनः । नित्यकर्मरतः प्रातर्देवताऽऽवसथं ययौ ॥ ५६० ॥
ददर्श चाग्रे प्रतिमां म्लानमाल्यामुदायनः । अचिन्तयच्च काऽप्यन्या प्रतिमेयं न सा पुनः ॥ ५६१ ॥
आरोपितानि तस्यां पुष्पाण्यहन्यपरेऽपि हि । तत्कालावचितानीवादृश्यन्त किमिदं हहा ॥ ५६२ ॥
स्तंभलग्ना सदैवास्थादिह पाञ्चालिकेव या । सा दासी देवदत्तापि विलीनेव न दृश्यते ॥ ५६३ ॥
निदाघे मरुवारीव नष्टश्च करिणां मदः । तदागादनिलवेगो नियतं गन्धसिन्धुरः ॥ ५६४ ॥

१ °न्याहि° L ॥ २ प्रातश्च L ॥

आगत्यानिलवेगेन नूनं प्रद्योतभूपतिः । प्रतिमां देवदत्तां च निशि चौर इवाहरत् ॥ ५६५ ॥
उदायनोऽपि प्रद्योतं तत्क्षणादभ्यषेणयत् । वादयन् क्ष्मां हयखुरैर्जयभंभामिवापराम् ॥ ५६६ ॥
दशाथ बद्धमुकुटा राजानोऽपि तमन्वगुः । एकादशापि ते चाभान् रुद्रा इव महौजसः ॥ ५६७ ॥
अथोदायनसैन्यानां मरुपक्षां जांगलक्षितौ । आसन् पयायमानार्करोचिर्भ्यो मरीचिकाः ॥ ५६८ ॥
आस्फलन्तो मिथो भूमौ लुठन्तोऽपि च सैनिकाः । तृषा न किंचिदद्राक्षुर्दिवसेऽपि हि घूकवत् ॥ ५६९ ॥
सद्यः प्रभावतीदेवं तदाऽस्मार्षीदुदायनः । स्मरति व्यसने प्राप्ते को वा नैवेष्टदेवताम् ॥ ५७० ॥
स्मृतमात्रोपस्थितेन तेन देवेन वारिणा । त्रिपुष्कराण्यपूर्यन्त प्रमोदेन च सैनिकाः ॥ ५७१ ॥
कटकं सुस्थितं चाभूत् पायं पायं पयस्तदा । विनाऽप्यन्नेन जीव्येत जीवनीयं विना न तु ॥ ५७२ ॥
ततः प्रभावतीदेवो जगाम निजमालयम् । राजा वीतभयेशोऽपि प्रापदुज्जयिनीं पुरीम् ॥ ५७३ ॥
तत्रोदायनराजस्यावन्तिनाथस्य चाचिरात् । मिथो कृतमुखेनाभूद्रथसंगरसंगरः ॥ ५७४ ॥
उदायनोऽथारुरोह धन्वी सांग्रामिकं रथम् । वादयामास मौर्वीं च रणतूरमिवापरम् ॥ ५७५ ॥
प्रद्योतोऽपि हि विज्ञाय रथाजय्यमुदायनम् । आरूढोऽनिलवेगेभं का प्रतिज्ञा बलीयसि ॥ ५७६ ॥
उदायनोऽपि तं दृष्ट्वा गजारूढमदोऽवदत् । पाप्मन्नसत्यसंधोऽसि तथापि न भवस्यरे ॥ ५७७ ॥

इत्युक्त्वा मंडलिकया भ्रमयन् स्वरथं रयात्। सोऽप्यानुदायनो योद्धुं स्मयमानोऽभ्यढौकत ॥ ५७८ ॥
शिलीमुखैः सूचिमुखैर्धनुर्धरधुरन्धरः। विव्याधानिलवेगस्य विष्वक् पादतलानि सः ॥ ५७९ ॥
बर्हिःशलाकासंपूर्णपतद्ग्रहमुखोपमैः। चरणैर्गन्तुमसहस्तद्द्विपोऽभूत् पपात च ॥ ५८० ॥
उदायनेन प्रद्योतः पातयित्वाऽथ कुञ्जरात्। हस्तेन जगृहे बद्ध्वा यशोराशिरिवोच्चकैः ॥ ५८१ ॥
ललाटेऽङ्कं न्यधाद्दासीपतिरित्यक्षरैरथ। उदायनोऽवन्तिपतेः स्वां प्रशास्तिं नवामिव ॥ ५८२ ॥
तमंकितं दासमिव कृत्वा वीतभयेश्वरः। तद्दिव्यप्रतिमारत्नमानेतुं विदिशां ययौ ॥ ५८३ ॥
पूजयित्वा च नत्वा च तां दिव्यां प्रतिमां नृपः। उपाददातुमुपाक्रंस्त गिरिवन्न चचाल सा ॥ ५८४ ॥
देवाधिदेवमर्चित्वा सविशेषमुदायनः। उवाच किमभाग्यं मे यन्नैषि परमेश्वरः (र!) ॥ ५८५ ॥
देवोऽप्युवाच मा शोचीर्यद्वीतभयपत्तनम्। पांशुवृष्ट्या स्थलं भावि तन्नैष्यामि महाशय! ॥ ५८६ ॥
देवतादेशमासाद्योदायनोऽपि न्यवर्तत। प्रयाणवारणी प्रावृडन्तराले बभूव च ॥ ५८७ ॥
तत्रैव शिबिरं राजा न्यधात्पत्तनसन्निभम्। निवसन्ति हि राजानो यत्र तत्रापि पत्तनम् ॥ ५८८ ॥
तस्थुः कृत्वा धूलिवप्रं तद्रक्षार्थं नृपा दश। ततस्तच्छिबिरं जज्ञे नाम्ना दशपुरं पुरम् ॥ ५८९ ॥
उदायनोऽपि प्रद्योतं रणात्तं भोजनादिना। अपश्यदात्मानमिव क्षत्रधर्मोऽयमीदृशः ॥ ५९० ॥

१ °कयत् *D* ॥ २ बर्हिः श° *D. M.* ॥

आते पर्युषणापर्वण्यन्यदोदायनोऽकुल । उपवासं स हि श्राद्धस्तस्य देवस्य शासनात् ॥ ५९१ ॥
सूदोऽथापृच्छत्प्रद्योतं किमद्य नृप ! भोक्ष्यसे ? । तच्छ्रुत्वाऽवन्तिनाथोऽपि क्षोभादिदमचिन्तयत् ॥ ५९२॥
प्रश्नो ह्यकृतपूर्वोऽयमद्य क्षेमावहो न मे । उपहासवचो ह्येतद्वधबन्धादिसूचकम् ॥ ५९३ ॥
सूपकारमपृच्छच्च किमद्य प्रश्नकारणम् ? । विद्याकृष्टेव रसवत्यागाद्धि समये सदा ॥ ५९४ ॥
सूदोऽप्यकथयद्राजन्नद्य पर्युषणोत्सवः । उपोषितोऽस्ति नः स्वामी सान्तःपुरपरिच्छदः ॥ ५९५ ॥
राजार्थं या रसवती भोजितोऽसि तया सदा । अधुना तु त्वदर्थं तां करिष्यामीति पृच्छ्यसे ॥ ५९६ ॥
प्रद्योतः स्माह हे सूदोपवासोऽद्यास्तु मेऽपि हि । ज्ञापितं साधु पर्वेदं श्रावकौ पितरौ मम ॥ ५९७ ॥
सूदोऽप्युदायनायाऽऽख्यत्तत्प्रद्योतस्य भाषितम् । उदायनोऽवददसौ धूर्तो जानामि वैशिकम् ॥ ५९८ ॥
यादृशे तादृशे वाऽस्मिन् कारागारनिवासिनि । न मे साध्वी पर्युषणेत्यमुं चत्तमुदायनः ॥ ५९९ ॥
प्रद्योतं क्षमयामास पर्वोचितमुदायनः । पट्टबन्धं च विदधे तस्य भालांकगोपनम् ॥ ६०० ॥
पट्टबन्धस्तदाद्यासीद्राज्ञां वैभवसूचकः । किरीटमेव ते पूर्वं बबन्धुर्मौलिमंडनम् ॥ ६०१ ॥
प्रद्योतायावन्तिदेशमुदायननृपो ददौ । वर्षारात्रे त्वतिक्रान्ते स्वयं वीतभयं ययौ ॥ ६०२ ॥
शिबिरे तत्र वणिजस्तस्थिवांसस्तथैव हि । तैरेव वसमानं तज्जातं दशपुरं पुरम् ॥ ६०३ ॥
प्रद्योतोऽपि वीतभयप्रतिमायै विशुद्धधीः । शासनेन दशपुरं दत्त्वाऽवन्तिपुरीमगात् ॥ ६०४ ॥

अन्येद्युर्विदिशां गत्वा भायलस्वामिनामकम् । देवकीयं पुरं चक्रे नाऽन्यथा धरणोदितम् ॥ ६०५ ॥
विद्युन्मालिकृतायै च प्रतिमायै महीपतिः । प्रददौ द्वादश ग्रामसहस्रान् शासनेन सः ॥ ६०६ ॥
अत्रान्तरे वीतभयस्थितं नृपमुदायनम् । एत्य प्रभावतीदेवः स्नेहेन प्रत्यबोधयत् ॥ ६०७ ॥
इहापि याऽस्ति प्रतिमा जीवतः स्वामिनो नवा । सापि राजन्नसामान्यप्रभावात्तीर्थमुत्तमम् ॥ ६०८ ॥
ब्रह्मर्षिणा केवलिना कपिलेन महात्मना । श्वेताम्बरेण प्रतिमा ह्यसौ राजन् ! प्रतिष्ठिता ॥ ६०९ ॥
अग्रेतनी च प्रतिमा प्रतिमेयमपि त्वया । पूज्याऽथ सर्वविरतिरपि ग्राह्या महाफला ॥ ६१० ॥
उदायनोऽपि तद्वाचं प्रतिपेदे तथैव ताम् । तन्मनःकदलीमेघः स देवोऽपि तिरोदधे ॥ ६११ ॥
ततश्चान्येद्युरुद्युक्तो धर्मे राजाप्युदायनः । जग्राह पौषधौकस्थः पाक्षिकं पौषधव्रतम् ॥ ६१२ ॥
रात्रिजागरणे तस्य शुभध्यानेन तस्थुषः । ईदृगध्यवसायोऽभूद्विवेकस्य सहोदरः ॥ ६१३ ॥
धन्यास्ते नगरग्रामा ये श्रीवीरेण पाविताः । राजादयोऽपि ते धन्या यैर्धर्मोऽश्रावि तन्मुखात् ॥ ६१४ ॥
तत्पादपद्मसान्निध्यात्प्रतिबोधमवाप्य ये । गृहिधर्मं द्वादशधा शिश्रियुः कृतिनो हि ते ॥ ६१५ ॥
तत्प्रसादाच्च ये सर्वविरतिं प्रतिपेदिरे । ते श्लाघ्या वन्दनीयास्ते तेभ्यो नित्यं नमो नमः ॥ ६१६ ॥
स्वामी वीतभयमपि विहारेण पुनाति चेत् । तत्पादमूले प्रव्रज्यामादाय स्यां तदा कृती ॥ ६१७ ॥

१ जीवंत° C. M. ॥

वयं चाभय ! तज्ज्ञात्वा तदनुग्रहकाम्यया । चम्पापुर्याः प्रचलिताः समवासार्ष्म तत्पुरे ॥ ६१८ ॥
अस्मान् प्रणम्य श्रुत्वा च देशनां गतवान् गृहे । एवं स चिन्तयामास स्वविवेकगुणोचितम् ॥ ६१९ ॥
सूनवेऽभीचये राज्यं प्रेतेच्छुश्चेद्ददाम्यहम् । संसारनाटकनटस्तन्मयैष कृतो भवेत् ॥ ६२० ॥
उशन्ति नरकान्तं हि राज्यं नीतिविदोऽपि च । तत्सूनवे न दास्येऽहं दास्ये चेत्तस मद्धितः ॥ ६२१ ॥
इति केशिनि जामेये राज्यश्रियमुदायनः । सद्यः संक्रमयामास तेजोऽर्कं इव पावके ॥ ६२२ ॥
जीवन्तस्वामिदेवाय पूजार्थमथ पार्थिवः । शासनेन ददौ भूरि ग्रामाकरपुरादिकम् ॥ ६२३ ॥
ततः केशिनरेन्द्रेण कृतनिष्क्रमणोत्सवः । अस्मत्पार्श्वे परिव्रज्यामुदायन उपात्तवान् ॥ ६२४ ॥
स तपोभिः षष्ठाष्टमदशमद्वादशादिभिः । अनाहारादपि कर्मैव स्वमात्मानमशोषयत् ॥ ६२५ ॥

तृणमिव परिहृत्य राज्यलक्ष्मीं श्रामण्यं प्रतिपन्नवान् विशुद्धम् ।
इत्यभयकुमार ! कीर्तितस्ते चरमो राजर्षिरुदायनाख्यः ॥ ६२६ ॥

॥ इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये दशमपर्वणि रौहिणेयचरिता-भयकुमारापहारोदायनचरित-प्रद्योतबन्धनोदायनप्रव्रज्यावर्णनो नामैकादशः सर्गः ॥

१ नास्ति अयं श्लोकः L प्रतौ ॥

# ॥ अथ द्वादशः सर्गः ॥

अपृच्छदभयो भूयः प्रणम्य परमेश्वरम् । उदायनस्य राजर्षेः क उदर्को भविष्यति ? ॥ १ ॥
प्रकृष्टतीर्थकृत्कर्मनिर्जरानिरतस्ततः । कथयामास भगवानिति श्रीज्ञातनन्दनः ॥ २ ॥
एकदोदायनमुनेः पृथ्व्यां विहरतः सतः । उत्पत्स्यते महाव्याधिरकालापथ्यभोजनैः ॥ ३ ॥
अनवद्याशनैर्वैद्यैः सोऽन्यदा वक्ष्यते मुनिः । भुंक्ष्व देहनिरीहोऽपि गुणरत्नोदधे ! दधि ॥ ४ ॥
विहरिष्यत्यथो गोष्ठेषूदायनमहामुनिः । सुलभा दधिभिक्षा हि तत्र दोषविवर्जिता ॥ ५ ॥
अन्यदोदायनो वीतभयं यास्यति पत्तनम् । भूभुजा भागिनेयेन केशिना समधिष्ठितम् ॥ ६ ॥
ज्ञात्वोदायनमायातं केश्यमात्यैर्भणिष्यते । निर्विण्णस्तपसामेष नियतं तव मातुलः ॥ ७ ॥
ऋद्धं राज्यं चैन्द्रपदं त्यक्त्वाऽनुशयं दधत् । नूनं राज्यार्थमेवाऽऽगाद्विश्वसीर्मा स्म सर्वथा ॥ ८ ॥
केशी वक्ष्यत्यसौ राज्यं गृह्णात्वद्यापि कोऽस्म्यहम् । गोपालस्य हि कः कोपो धनं गृह्णाति चेद्धनी ॥ ९ ॥
वक्ष्यन्ति मन्त्रिणः पुण्यैस्तव राज्यमुपस्थितम् । प्रदत्तं न हि केनापि राजधर्मोऽपि नेदृशः ॥ १० ॥

पितुर्भ्रातुर्मातुलाद्वा सुहृदो वाऽपरादपि । प्रसह्याप्याहरेद्राज्यं तद्दत्तं को हि मुञ्चति ॥ ११ ॥
तैरेवमुदितोऽत्यर्थं त्यक्त्वा भक्तिमुदायने । केशी प्रक्ष्यति किं कार्यं ? दापयिष्यन्ति ते विषम् ॥ १२ ॥
विषेण संस्कृत्य दधि पशुपालिकयैकया । केशी दापयिता तस्मै परप्रेर्यस्य का मतिः ? ॥ १३ ॥
तद्विषं देवता हृत्वा मुनिमेवं भणिष्यति । सविषो दधिलाभस्ते मा कृथास्तद्दधिस्पृहाम् ॥ १४ ॥
ततः परिहृते दध्नि रोगो वर्धिष्यते मुनेः । व्याधयो हि विजृम्भन्ते छलमासाद्य भूतवत् ॥ १५ ॥
रोगनिग्रहणार्थं स पुनरादास्यते दधि । विषापहारं त्रीन् वारान् देवता सा करिष्यति ॥ १६ ॥
अन्यदा तु प्रमादेन तद्विषं देवताऽपि सा । न हरिष्यत्यथ मुनिः सविषं दधि सोऽत्स्यति ॥ १७ ॥
ततश्चैतन्यचौरीभिर्विषवीचीभिरात्मनः । ज्ञातावसानोऽनशनं महर्षिः स प्रपत्स्यते ॥ १८ ॥
त्रिंशद्दिनीमनशनं पालयित्वा समाधिना । उत्पन्नकेवलज्ञानो विपद्य शिवमेष्यति ॥ १९ ॥
उदायने शिवगते देवता पुनरेयुषी । ज्ञात्वा तादृक्कालरात्रिरिव कोपमुपेष्यति ॥ २० ॥
कोपाच्च सा वीतभयं पूरयिष्यति पांशुभिः । तदादि पांशुवृष्टिं च करिष्यति निरन्तरम् ॥ २१ ॥
तदैव प्रतिमा साऽपि कपिलर्षिप्रतिष्ठिता । भविष्यति महाभाग ! निधानमिव भूगता ॥ २२ ॥
शय्यातरं कुंभकारमुदायनमहामुनेः । अनागसं ततो हर्त्री देवता पांशुवर्षिणी ॥ २३ ॥

१ तत्तरम् L. ॥ २ मोक्ष्यते L ॥

सिनपल्ल्यां च तं नीत्वा तत्रास्मैव हि देवता । कुंभकारकृतमिति तत्र स्थानं करिष्यति ॥ २४ ॥
पुनरप्यभयोऽपृच्छत् प्रणम्य परमेश्वरम् । उदायनकुमारस्याभीचेः का भाविनी गतिः ॥ २५ ॥
स्वाम्याख्यत् केशिने राज्यं प्रदत्तवति वप्तरि । स हि प्रभावतीसूनुरभीचिश्चिन्तयिष्यति ॥ २६ ॥
मयि सत्यपि भक्तेऽपि पुत्रे राज्याधिकारिणि । तातोऽदात् केशिने राज्यं राज्यर्णमिव धारयन् ॥ २७ ॥
विवेको मत्पितुः कोऽयं भगिनीनन्दनाय यत् । केशिनेऽदाददो राज्यं हन्त काराधिकारिणे ॥ २८ ॥
तातः प्रभुर्मे स स्वैरं यदिच्छति करोतु तत् । केशिनोऽद्य कथं सेवां करिष्ये तत्सुतोऽस्मि हि ॥ २९ ॥
इति पित्राऽभिभूतः सोऽभिगमिष्यति कूणिकम् । अभिमानधनां श्रेयान् विदेशो हि पराभवे ॥ ३० ॥
अथ मातृष्वसेयेन कूणिकेन सगौरवम् । वीक्ष्यमाणः सदाऽभीचिः सुखं स्थास्यति तत्र च ॥ ३१ ॥
श्रमणोपासकः सम्यग्जीवाजीवादितत्त्ववित् । अभीचिः श्रावकधर्मं यथावत् पालयिष्यति ॥ ३२ ॥
गृहिधर्मं समा बह्वीः पालयन्नप्यखंडितम् । पराभवं स्मरन् वैरं न स हास्यत्युदायने ॥ ३३ ॥
कृत्वा संलेखनां सम्यक् पाक्षिकानशनेन सः । पितृवैरमनालोच्य मृत्वा भाव्यसुरोत्तमः ॥ ३४ ॥
एवं पल्योपमं तत्र परिपाल्यायुरात्मनः । महाविदेहप्राप्याभीचिजीवः शिवंगमी ॥ ३५ ॥
पृच्छति स्माभयोऽथैवं कपिलर्षिप्रतिष्ठिता । प्रकाशमेष्यति कदा प्रतिमा परमेश्वर ! ॥ ३६ ॥
स्वाम्याख्याति स्म सौराष्ट्रलाटगुर्जरसीमनि । क्रमेण नगरं भावि नाम्नाऽणहिलपाटकम् ॥ ३७ ॥

आर्यभूमेः शिरोरत्नं कल्याणानां निकेतनम्। एकातपत्रार्हद्धर्मं तद्धि तीर्थं भविष्यति ॥ ३८ ॥
चैत्येषु रत्नमय्योऽर्हत्प्रतिमास्तत्र निर्मलाः। नन्दीश्वरादिप्रतिमाकथां नेष्यन्ति सत्यताम् ॥ ३९ ॥
भासुरस्वर्णकलशश्रेण्यलंकृतमौलिभिः। रोचिष्यते च तच्चैत्यैर्विश्रान्ततपनैरिव ॥ ४० ॥
श्रमणोपासकस्तत्र प्रायेण सकलो जनः। कृतातिथिसंविभागो भोजनाय यतिष्यते ॥ ४१ ॥
परसंपद्यनीर्ष्यालुः संतुष्टश्च स्वसंपदा। पात्रेषु दानशीलश्च तत्र लोको भविष्यति ॥ ४२ ॥
श्राद्धाश्च धनिनस्तत्रालकायामिव गुह्यकाः। वप्स्यन्ति द्रविणं सप्तक्षेत्र्यामत्यन्तमार्हताः ॥ ४३ ॥
परस्वपरदारेषु सर्वः कोऽपि पराङ्मुखः। भावी तस्मिन् पुरे लोकः सुषमाकालभूरिव ॥ ४४ ॥
अस्मन्निर्वाणतो वर्षशतान्यभय षोडश। नवषष्टिश्च यास्यन्ति यदा तत्र पुरे तदा ॥ ४५ ॥
कुमारपालो भूपालश्चौलुक्यकुलचन्द्रमाः। भविष्यति महाबाहुः प्रचण्डाखण्डशासनः ॥ ४६ ॥
स महात्मा धर्मदानयुद्धवीरः प्रजां निजाम्। ऋद्धिं नेष्यति परमां पितेव परिपालयन् ॥ ४७ ॥
ऋजुरप्यतिचतुरः शान्तोऽप्याज्ञादिवस्पतिः। क्षमावानप्यधृष्यश्च स चिरं क्ष्मामविष्यति ॥ ४८ ॥
स आत्मसदृशं लोकं धर्मनिष्ठं करिष्यति। विद्यापूर्णमुपाध्याय इवान्तेवासिनं हितः ॥ ४९ ॥
शरण्यः शरणेच्छूनां परनारीसहोदरः। प्राणेभ्योऽपि धनेभ्योऽपि स धर्मं बहु मंस्यते ॥ ५० ॥
पराक्रमेण धर्मेण दानेन दययाऽऽज्ञया। अन्यैश्च पुरुषगुणैः सोऽद्वितीयो भविष्यति ॥ ५१ ॥

स कौबेरीमातुरुष्कमैन्द्रीमात्रिदशापगम् । याम्यामाविन्ध्यमावार्धि पश्चिमां साधयिष्यति ॥ ५२ ॥
अन्यदा वज्रशाखायां मुनिचन्द्रकुलोद्भवम् । आचार्यं हेमचन्द्रं स द्रक्ष्यति क्षितिनायकः ॥ ५३ ॥
तद्दर्शनात्प्रमुदितः केकीवाऽम्बुददर्शनात् । तं मुनिं वन्दितुं नित्यं स भद्रात्मा त्वरिष्यते ॥ ५४ ॥
तस्य सूरेर्जिनचैत्ये कुर्वतो धर्मदेशनाम् । राजा सश्रावकामात्यो वन्दनाय गमिष्यति ॥ ५५ ॥
तत्र देवं नमस्कृत्य स तत्त्वमविदन्नपि । वन्दिष्यते तमाचार्यं भावशुद्धेन चेतसा ॥ ५६ ॥
स श्रुत्वा तन्मुखात्प्रीत्या विशुद्धां धर्मदेशनाम् । अणुव्रतानि सम्यक्त्वपूर्वकाणि प्रपत्स्यते ॥ ५७ ॥
स प्राप्तबोधो भविता श्रावकाचारपारगः । आस्थानेऽपि स्थितो धर्मगोष्ठ्या स्वं रमयिष्यति ॥ ५८ ॥
अन्नशाकफलादीनां नियमांश्च विशेषतः । आदास्यते सस्पृहं स प्रायेण ब्रह्मचर्यकृत् ॥ ५९ ॥
साधारणस्त्रीर्न परं स सुधीर्वर्जयिष्यति । धर्मपत्नीरपि ब्रह्म चरितुं बोधयिष्यति ॥ ६० ॥
मुनेस्तस्योपदेशेन जीवाजीवादितत्त्ववित् । आचार्य इव सोऽन्येषामपि बोधिं प्रदास्यति ॥ ६१ ॥
येऽर्हद्धर्मद्विषः केऽपि पांडुरोहद्विजादयः । तेऽपि तस्याऽऽज्ञया गर्भश्रावका इव भाविनः ॥ ६२ ॥
अपूजितेषु चैत्येषु गुरुष्वप्रणतेषु च । न भोक्ष्यते स धर्मज्ञः प्रपन्नश्रावकव्रतः ॥ ६३ ॥
अपुत्रमृतपुंसां स द्रविणं न ग्रहीष्यति । विवेकस्य फलं ह्येतदतृप्ता ह्यविवेकिनः ॥ ६४ ॥

१ सुविशुद्धेन *L.* ॥ २ °रागद्वि° *C. L.* । °रांगाद्वि° *D.* ॥ ३ °तयः *L. D.* ॥ ४ °विका *C. L.* ॥

॥ ३५३ ॥

पाण्डुप्रभृतिभिरपि या त्यक्ता मृगया न हि । स स्वयं त्यक्ष्यति जनः सर्वोऽपि च तदाज्ञया ॥ ६५ ॥
हिंसानिषेधके तस्मिन् दूरेऽस्तु मृगयाऽऽदिकम् । अपि मत्कुणयूकादि नान्त्यजोऽपि हनिष्यति ॥ ६६ ॥
तस्मिन्निषिद्धपापर्द्धावरण्ये मृगजातयः । सदाप्यविघ्नरोमन्था भाविन्यो गोष्ठधेनुवत् ॥ ६७ ॥
जलचरस्थलचरखचराणां स देहिनाम् । रक्षिष्यति सदा मारिं शासने पाकशासनः ॥ ६८ ॥
ये चाऽऽजन्मापि मांसादास्ते मांसस्य कथामपि । दुःस्वप्नमिव तस्याज्ञावशान्नेष्यंति विस्मृतिम् ॥ ६९ ॥
दशार्हैर्न परित्यक्तं यत्पुरा श्रावकैरपि । तन्मद्यमनवद्यात्मा स सर्वत्र निरोत्स्यति ॥ ७० ॥
स तथा मद्यसन्धानं निरोत्स्यति महीतले । न यथा मद्यभाण्डानि घटयिष्यति चक्र्यपि ॥ ७१ ॥
मद्यपानां सदा मद्यव्यसनक्षीणसंपदाम् । तदाज्ञात्यक्तमद्यानां प्रभविष्यन्ति संपदः ॥ ७२ ॥
नलादिभिरपि क्ष्मापैर्द्यूतं त्यक्तं न यत्पुरा । तस्य स्ववैरिण इव नामाप्युन्मूलयिष्यति ॥ ७३ ॥
पारापतपणक्रीडाकुक्कुटायोधनान्यपि । न भविष्यन्ति मेदिन्यां तस्योदयिनि शासने ॥ ७४ ॥
स प्रायेण प्रतिग्राममपि निःसीमवैभवः । करिष्यति महीमेतां जिनायतनमण्डिताम् ॥ ७५ ॥
प्रतिग्रामं प्रतिपुरमासमुद्रं महीतले । रथयात्रोत्सवं सोऽर्हत्प्रतिमानां करिष्यति ॥ ७६ ॥
दायं दायं द्रविणानि विरचय्यानृणं जगत् । अंकयिष्यति मेदिन्यां स संवत्सरमात्मनः ॥ ७७ ॥

१ °दीन् *D.* ॥

प्रतिमां पांशुगुप्तां तां कपिलर्षिप्रतिष्ठिताम्। एकदा श्रोष्यति कथाप्रसंगे स गुरोर्मुखात् ॥ ७८ ॥
पांशुस्थलं खानयित्वा प्रतिमां विश्वपावनीम्। आनेष्यामीति स तदा करिष्यति मनोरथम् ॥ ७९ ॥
तदैव मनउत्साहं निमित्तान्यपराण्यपि। ज्ञात्वा निश्चेष्यते राजा प्रतिमां हस्तगामिनीम् ॥ ८० ॥
ततो गुरुमनुज्ञाप्य नियोज्यायुक्तपूरुषान्। प्रारप्स्यते खानयितुं स्थलं वीतभयस्य तत् ॥ ८१ ॥
सत्त्वेन तस्य परमार्हतस्य पृथिवीपतेः। करिष्यति च सांनिध्यं तदा शासनदेवता ॥ ८२ ॥
राज्ञः कुमारपालस्य तस्य पुण्येन भूयसा। खन्यमाने स्थले मंक्षु प्रतिमाऽऽविर्भविष्यति ॥ ८३ ॥
तदा तस्यै प्रतिमायै यदुदायनभूभुजा। ग्रामाणां शासनं दत्तं तदप्याविर्भविष्यति ॥ ८४ ॥
नृपायुक्तास्तां प्रतिमां प्राचामपि नवामिव। रथमारोपयिष्यन्ति पूजयित्वा यथाविधि ॥ ८५ ॥
पूजाप्रकारेषु पथि जायमानेष्वनेकशः। क्रियमाणेष्वहोरात्रं संगीतेषु निरन्तरम् ॥ ८६ ॥
तालिकारासकेषूच्चैर्भवत्सु ग्रामयोषिताम्। पंचशब्देष्वातोद्येषु वाद्यमानेषु संमदात् ॥ ८७ ॥
पक्षद्वये चामरेषूत्पतत्सु च पतत्सु च। नेष्यन्ति प्रतिमां तां चाऽऽयुक्ताः पत्तनसीमनि ॥ ८८ ॥

(त्रिभिर्विशेषकम्)

सान्तःपुरपरीवारश्चतुरंगचमूवृतः। सकलं संघमादाय राजा तामभियास्यति ॥ ८९ ॥
स्वयं रथात्समुत्तार्य गजेन्द्रमधिरोप्य च। प्रवेशयिष्यति पुरे प्रतिमां तां स भूपतिः ॥ ९० ॥

उपस्वभवनं क्रीडाभवने संनिवेश्य ताम् । कुमारपालो विधिवत्त्रिसन्ध्यं पूजयिष्यति ॥ ९१ ॥
प्रतिमायास्तथा तस्या वाचयित्वा स शासनम् । उदायनेन यद्दत्तं तत्प्रमाणीकरिष्यति ॥ ९२ ॥
प्रतिमायाः स्थापनार्थं तस्यास्तत्रैव पार्थिवः । प्रासादं स्फटिकमयममायः कारयिष्यति ॥ ९३ ॥
प्रासादोऽष्टापदस्येव युवराजः स कारितः । जनयिष्यति संभाव्यो विस्मयं जगतोऽपि हि ॥ ९४ ॥
स भूपतिः प्रतिमया तत्र स्थापितया तया । एधिष्यते प्रतापेन ऋद्ध्या निःश्रेयसेन च ॥ ९५ ॥
देवभक्त्या गुरुभक्त्या त्वत्पितुः सदृशोऽभय ! । कुमारपालो भूपालः स भविष्यति भारते ॥ ९६ ॥
इति श्रुत्वा नमस्कृत्य भगवन्तमथाभयः । उपश्रेणिकमागत्य वक्तुमेवं प्रचक्रमे ॥ ९७ ॥
भवामि तात ! राजा चेदृषिर्न स्यामहं तदा । श्रीवीरोऽन्तिमराजर्षिं यदशंसदुदायनम् ॥ ९८ ॥
श्रीवीरं स्वामिनं प्राप्य प्राप्य त्वत्पुत्रतामपि । नोच्छेत्स्ये भवदुःखं चेन्मत्तः कोऽन्योऽधमस्ततः ॥ ९९ ॥
नाम्नाऽहमभयस्तात सभयोऽस्मि भवात् पुनः । भुवनाभयदं वीरं तच्छ्रयामि समादिश ॥ १०० ॥
तदलं मम राज्येनाभिमानसुखहेतुना । यतः सन्तोषसाराणि सौख्यान्याहुर्महर्षयः ॥ १०१ ॥
निर्बन्धादुच्यमानोऽपि न यदा राज्यमग्रहीत् । तदाऽभयो व्रतायानुजज्ञे राज्ञा प्रमोदतः ॥ १०२ ॥
राज्यं तृणमिव त्यक्त्वा संतोषसुखसद्म सः । दीक्षां चरमतीर्थेशवीरपादान्तिकेऽग्रहीत् ॥ १०३ ॥
आत्तव्रते सत्यभयेऽनुज्ञाप्य श्रेणिकं नृपम् । श्रीमहावीरपादान्ते नन्दाऽपि व्रतमग्रहीत् ॥ १०४ ॥

परिव्रजन्त्या त्वभयं नन्दया कुंडलद्वयम् । क्षौमद्वयं च तद्दिव्यं दत्तं हल्लविहल्लयोः ॥ १०५ ॥
भव्यानां प्रतिबोधाय ततश्च भगवानपि । सुरासुरैः सेव्यमानो विजहार वसुन्धराम् ॥ १०६ ॥
विविधाभिग्रहैः पूर्वं पालयित्वा चिरं व्रतम् । मृत्वा सर्वार्थसिद्धेऽभूदभयः प्रवरः सुरः ॥ १०७ ॥
तदा श्रीवीरपादाब्जमूले प्रव्रजितेऽभये । इति संचिन्तयामास शुद्धधीर्मगधाधिपः ॥ १०८ ॥
अभयो हि कुमारेषु समस्तगुणभूरभूत् । व्रतमादाय सुकृती स तु स्वार्थमसाधयत् ॥ १०९ ॥
कुमारे कुत्रचिद्दोष्मत्यायुष्मति वपुष्मति । राज्यमारोपयिष्यामि क्रमो ह्येष महीभुजाम् ॥ ११० ॥
सगुणो निर्गुणो वापि पुत्रोऽर्हः पितृसंपदाम् । सगुणः स्याद्यदि तदा पुण्यं हि पितुरुज्ज्वलम् ॥ १११ ॥
विनाऽभयकुमारेण मनोविश्रामधाम मे । कूणिको गुणवानेष राज्यमर्हति नापरः ॥ ११२ ॥
निश्चित्य कूणिकं राज्ये सोऽदाद्धल्लविहल्लयोः । हारमष्टादशचक्रं गजं सेचनकं च तम् ॥ ११३ ॥
अत्रान्तरे कुमारोऽपि मंत्रयामास कूणिकः । कालादिभिः स्वसदृशैर्दशभिर्भ्रातृभिः सह ॥ ११४ ॥
जरन्नपि पिताऽस्माकं राज्यस्य न हि तृप्यति । पुत्रे हि कवचहरे राज्ञोऽधिकुरुते व्रतम् ॥ ११५ ॥
वरं वरीयानभयः श्रियमौज्झद्युवाऽपि यः । न तु तातो विषयान्धः स्वां जरां यो न पश्यति ॥ ११६ ॥
तदद्य पितरं बद्ध्वा राज्यं स्वसमयोचितम् । गृह्णीमो नापवादोऽत्र विवेकविकलो हि सः ॥ ११७ ॥

कृत्वैकादशधा राज्यं भ्रातरो भुंज्महे वयम् । पिता तु वृद्धस्तदनु जीवत्वब्दशतान्यपि ॥ ११८ ॥
इति ते दुर्धियः सर्वे विश्वस्तं पितरं निजम् । बबन्धुर्दुरपत्यं हि गृहजातो विषद्रुमः ॥ ११९ ॥
शुकवत्पञ्जरेऽक्षैप्सीत् कूणिकः श्रेणिकं ततः । विशेषोऽयं पुनर्भक्तपाने अपि ददौ न हि ॥ १२० ॥
पूर्वाह्णे चापराह्णे च कूणिकः पूर्ववैरतः । पितुः कशाघातशतं पापोऽदादनुवासरम् ॥ १२१ ॥
अधिसेहे श्रेणिकस्तां दुर्दशां दैवढौकिताम् । दन्तावलः समर्थोऽपि वारीबद्धः करोतु किम् ॥ १२२ ॥
निकषा श्रेणिकं गन्तुं कूणिकोऽदान्न कस्यचित् । केवलं मातृदाक्षिण्याच्चेलणां न न्यवारयत् ॥ १२३ ॥
चेलणाऽपि प्रतिदिनं सुरया शतधौतया । सद्यःस्नातेवाऽऽर्द्रकेशीभूयोपश्रेणिकं ययौ ॥ १२४ ॥
कुल्माषपिण्डिकां चैकां केशान्तः पुष्पदामवत् । प्रक्षिप्य चेलणाऽनैषीत् पतिभक्ता तदन्तिके ॥ १२५ ॥
पत्ये कुल्माषपिण्डीं तां प्रच्छन्नां चेलणा ददौ । प्राप्य तामपि दुःप्रापां स मेने दिव्यभोज्यवत् ॥ १२६ ॥
चकार श्रेणिकः प्राणयात्रां पिण्डिकया तया । बुभुक्षालक्षणो रोगो विनाऽन्नं खलु मृत्यवे ॥ १२७ ॥
शतधौतसुराबिन्दून् केशपाशाच्च चेलणा । अपातयत् पतिभक्ता सह नेत्राश्रुबिन्दुभिः ॥ १२८ ॥
श्रेणिकोऽपि सुराबिन्दून् पततः पिबति स्म तान् । चातको मेघमुक्ताम्बुबिन्दूनिव पिपासितः ॥ १२९ ॥
बिन्दुमात्रपीतयाऽपि श्रेणिकः सुरया तया । न विवेद कशाघातांस्तृषया नाप्यपीड्यत ॥ १३० ॥
इत्थं च श्रेणिकं बद्ध्वा कुर्वतो राज्यमुत्कटम् । कूणिकस्य पद्मावत्यां पत्न्यां सूनुरजायत ॥ १३१ ॥

वर्धापिकास्तदाऽऽयाताः कूणिको दासचेटिकाः । वस्त्राभरणसंछन्नाश्चक्रे कल्पलतोपमाः ॥ १३२ ॥
स्वयं चान्तःपुरे गत्वा पाणिभ्यां पुत्रमाददे । अभात्तत्पाणिपद्मस्थः स पोतो हंसपोतवत् ॥ १३३ ॥
कूणिकस्तं सुतं पश्यन्नयनाम्भोजभास्करम् । उन्मुद्रपरमानन्दः श्लोकमेवं तदाऽपठत् ॥ १३४ ॥
अंगादंगात्संभवसि हृदयादभिजायसे । आत्मैव पुत्रनामाऽसि[1] तज्जीव शरदां शतम् ॥ १३५ ॥
भूयो भूयः पठन्नेवं विशश्राम न कूणिकः । तच्छ्लोकच्छद्मना हर्षं हृद्यमान्तं वमन्निव ॥ १३६ ॥
कुमारभृत्यां दक्षाभिर्वृद्धस्त्रीभिरथार्भकः । अमोच्यरिष्टशय्यायामादाय नृपतेः करात् ॥ १३७ ॥
चक्रे च नृपतिः सूनोर्जन्मकर्ममहोत्सवम् । याचकेभ्यो द्विजादिभ्यो ददद्दानं यथारुचि ॥ १३८ ॥
उदायीति ददौ नाम तस्य सूनोश्च कूणिकः । उत्सवेनातिमहता सुदिनीकुर्वता दिनम् ॥ १३९ ॥
अथोदायिकुमारोऽपि स्वर्णच्छायो दिने दिने । वृद्धिं जगामोपवने शाखीवाऽऽरक्षकैर्वृतः ॥ १४० ॥
तेन कट्यधिरूढेन कुमारेण निरन्तरम् । दधौ सशालभञ्जीकस्तम्भशोभां महीपतिः ॥ १४१ ॥
उल्लापयन् कुमारं तं लल्लमन्मनया गिरा । राजाऽपि वक्तुमज्ञस्य शिशोः श्रियमशिश्रियत् ॥ १४२ ॥
आसने शयने याने भोजनेऽपि तमर्भकम् । न मुमोच कराद्राजा मंगल्यामिव मुद्रिकाम् ॥ १४३ ॥
आसाञ्चक्रेऽन्यदा भोक्तुं राजा श्रेणिकनन्दनः । वामोरुमस्तके न्यस्योदायिनं पुत्रवत्सलः ॥ १४४ ॥

१ जातोऽसि *M*. ॥

अर्धभुक्ते कूणिके च मूत्रयामास सोऽर्भकः। पपात सर्पिर्धारेव मूत्रधारा च भोजने ॥ १४५ ॥
सूनोर्मा वेगभंगोऽभूदिति श्रेणिकसूर्नृपः। न जानु चालयामास पुत्रवात्सल्यमीदृशम् ॥ १४६ ॥
मूत्रप्लावितमन्नं च स्वयमुत्सार्य पाणिना। तथैव बुभुजे पुत्रप्रेम्णैतदपि शर्मणे ॥ १४७ ॥
पप्रच्छ चेलणां तत्रोपविष्टामथ कूणिकः। मातरेवं सुतः प्रेयानभूत्कस्यचिदस्ति वा ? ॥ १४८ ॥
चेलणाऽवोचदाः पाप! मूर्खट! कुलपांसन!। न जानासि यथाऽभूस्त्वं पितुरत्यन्तवल्लभः ॥ १४९ ॥
दुर्दोहृदेन ज्ञातोऽसि पितुर्वैरी तदा मया। स्त्रीणामापन्नसत्त्वानां यथागर्भं हि दोहृदाः ॥ १५० ॥
गर्भस्थितमपि ज्ञात्वा त्वामरे पितृवैरिणम्। गर्भशातनमारंभि मया पतिशिवेच्छया ॥ १५१ ॥
तथापि न विलीनोऽसि तैस्तैः शातौषधैरपि। किं तु प्रत्युत पुष्टोऽसि सर्वं पथ्यं बलीयसाम् ॥ १५२ ॥
तव पित्रा च मे तादृगप्यपूरि मनोरथः। कदा द्रक्ष्याम्यहं पुत्रवक्त्रमित्याशयो भृशम् ॥ १५३ ॥
पितुर्वैरीति निश्चित्य त्वं जातोऽपि मयोज्झितः। आनीतोऽसि पुनः पित्रा यत्नात् स्वमिव जीवितम् ॥ १५४ ॥
तदा कुक्कुटिकापिच्छविद्धैका च तवांगुलिः। कृमिपूयाकुलाऽत्यंतमभूदरतिदायिनी ॥ १५५ ॥
त्वत्पिताऽधान्मुखे क्षिप्तां तादृशीमपि तेंऽगुलिम्। तावदेव सुखं तेऽभूद्यावद्वक्त्रांतरंगुली ॥ १५६ ॥
एवं येनासि पित्रा त्वं रे दुर्ललित! लालितः। कृते प्रतिकृतं तस्याऽकारि काराप्रवेशनम् ॥ १५७ ॥

---
१ °यद् L. ॥

कूणिकोऽप्यब्रवीन्मह्यं तातः किं गुडमोदकान्। प्रैषीद्धल्लविहल्लाभ्यां पुनः किं खंडमोदकान्॥ १५८॥
चेल्लणाऽऽख्यत्पितृद्वेषीत्यनिष्टस्त्वं ममाऽभवः। मयैव दापितास्तुभ्यं तन्मूढ! गुडमोदकाः॥ १५९॥
कूणिकः स्माह धिग्धिङ्मामविमृश्य विधायिनम्। राज्यं न्यासार्पितमिवार्पयिष्यामि पुनः पितुः॥ १६०॥
इत्यर्धभुक्तेऽप्याचम्य धात्र्याः पुत्रं समर्प्य च। उदस्थात्कूणिकस्तातसमीपे गन्तुमुत्सुकः॥ १६१॥
पितृपादेषु निगडान् भंक्ष्यामीति विचिन्तयन्। लोहदंडं गृहीत्वा सोऽभिश्रेणिकमधावत॥ १६२॥
उपश्रेणिकमादिष्टा यामिकाः पूर्वसंस्तुताः। दृष्ट्वा कूणिकमायान्तमिति व्याजहुराकुलाः॥ १६३॥
साक्षाद्दंडधर इव लोहदंडधरः पुरः। द्रुतमभ्येति ते सूनुर्न विद्मः किं करिष्यति?॥॥ १६४॥
श्रेणिकश्चिन्तयामास जिघांसुर्नूनमेष माम्। अन्यदाऽगात् कशाहस्तो दंडहस्तोऽधुनैति तु॥ १६५॥
न वेद्मि मां कुमारेण मारयिष्यति केनचित्। तस्मादनागतेऽप्यस्मिन्मरणं शरणं मम॥ १६६॥
इति तालपुटविषं जिह्वाग्रे श्रेणिको ददौ। प्रस्थानस्था इवाग्रेऽपि तत्प्राणाश्च द्रुतं ययुः॥ १६७॥
आगाच्च कूणिको यावत् परासुं तावदयतः। ददर्श पितरं वक्ष आघ्नानः पूच्चकार च॥ १६८॥
विललाप च हा! तातपादाः! कर्मभिरीदृशैः। अद्वैतीयीक एवैष पापोऽहमभवं भुवि॥ १६९॥
क्षमयिष्याम्यहं तातपादानिति मनोरथः। यन्मे नाऽपूरि तत्पापतमोऽहमधुना पुनः॥ १७०॥

१ °दार्थं [illegible]॥

आस्तां प्रसादवचनं तिरस्कारवचोऽपि हि । त्वदीयं नाहमश्रौषमभूद् दुर्दैवमन्तरा ॥ १७१ ॥
भूगुपातेन शस्त्रेण वह्निना पयसाऽपि वा । तदात्मानं निगृह्णामि युक्तं मत्कर्मणो ह्यदः ॥ १७२ ॥
इति शोकामयग्रस्तो मुमूर्षुरपि कूणिकः । मंत्रिभिर्बोधितोऽकार्षीच्छ्रेणिकस्यांगसंस्कृतिम् ॥ १७३ ॥
शोकेन भूयसा राजयक्ष्मणेव दिने दिने । क्षीयमाणं नृपं प्रेक्ष्य मंत्रिणोऽचिन्तयन्नदः ॥ १७४ ॥
नूनं विपत्स्यते शोकाद्राजा राज्यं च नंक्ष्यति । पितृभक्त्यपदेशेन तद्व्यासंगोऽस्य सूत्र्यताम् ॥ १७५ ॥
इति जीर्णे ताम्रपत्रेऽक्षराणि लिलिखुः स्वयम् । पिंडादि दत्तं पुत्रेण मृतोऽपि लभते पिता ॥ १७६ ॥
अवाचयंश्च राज्ञोऽग्रे राजाऽपि हि पितुः स्वयम् । तद्वञ्चितोऽदात् पिण्डादि पिण्डदानं तदाद्यभूत् ॥१७७॥
भुंक्ते पिता विपन्नोऽपि मद्दत्तमिति मूढधीः । राजा शोकं शनैरौज्झज्ज्वरीव रसविक्रियाम् ॥ १७८ ॥
पितुः शय्याऽऽसनादीनि पश्यंस्तु पुनः पुनः । सिंहावलोकनन्यायाच्छोकः कूणिकमभ्यगात् ॥ १७९ ॥
गडूचीस्तंबवच्छोके प्रोन्मीलति मुहुर्मुहुः । राजा राजगृहे स्थातुमभूद् भृशमनीश्वरः ॥ १८० ॥
करिष्ये पुरमन्यत्रेत्यादिदेश विशांपतिः । शस्तभूशोधनायाथ वास्तुविद्याविशारदान् ॥ १८१ ॥
ते च वास्तुविदः शस्तां पश्यन्तः सर्वतो भुवम् । प्रदेशेऽद्राक्षुरेकत्र महान्तं चंपकद्रुमम् ॥ १८२ ॥
ऊचुश्च नायमुद्याने दृश्यते नेह सारणिः नायमावालवलयी तथाऽप्यस्याद्भुता लिपिः ॥ १८३ ॥

१ पात्रे C, L, D ॥

अहो बहुलशाखत्वमहो पत्रलताऽद्भुना । अहो कुसुमसंपत्तिरहो कुसुमसौरभम् ॥ १८४ ॥
अहो च्छायैकातपत्र्यमातपत्राभिभावुकम् । अहो विश्रामयोग्यत्वमहो सर्वं किमप्यदः ॥ १८५ ॥
निसर्गरमणीयोऽयं यथा श्रीधाम चंपकः । तथाऽत्र नगरमपि भविष्यति न संशयः ॥ १८६ ॥
चंपकेन श्रियः सत्यंकारेणैवोपशोभितम् । स्थानं पुरीनिवेशार्हं ते तथाऽऽख्यन्महीभुजे ॥ १८७ ॥
चंपकस्याभिधानेन चंपेति नगरीं नृपः । वेगादकारयत् सिद्धिर्वचसाहि महीभुजाम् ॥ १८८ ॥
ततश्च पुर्यां चंपायां गत्वा सबलवाहनः । महीमिमां श्रेणिकसूर्भ्रातृभिः सहितोऽन्वशात् ॥ १८९ ॥
अथ सेचनकारूढौ दिव्यकुंडलमंडितौ । दिव्यहारांशुकधरौ भूगतौ स्वर्गिणाविव ॥ १९० ॥
अत्यद्भुतश्रियौ हल्लविहल्लौ निजदेवरौ । दृष्ट्वा पद्मावती दध्यौ स्वस्य स्त्रीत्वस्य सन्निभम् ॥ १९१ ॥
हारकुंडलवासोभिर्दिव्यैः सेचनकेन च । विना हि मन्यते राज्यं नेत्रहीनमिवाऽऽननम् ॥ १९२ ॥
ततो हल्लविहल्लाभ्यां तान्याहर्तुं कृताग्रहा । बभाण कूणिकं राज्ञी कूणिकोऽप्येवमभ्यधात् ॥१९३ ॥
पितृदत्तं वस्त्वनयोर्नाहर्तुं युज्यते मम । विशेषेण प्रसादार्हाविमौ ताते दिवं गते ॥ १९४ ॥
तस्याश्चात्याग्रहाद्राजा मेने हारादियाचनम् । स्त्रीग्रहः खलु मत्कोटग्रहादपि विशिष्यते ॥ १९५ ॥
अन्यस्मिंश्च दिने हल्लविहल्लौ पृथिवीपतिः । ययाचे स्यत्कसौत्रास्नहारादिचतुष्टयम् ॥ १९६ ॥
प्रमाणमादेश इति प्रतिपद्य गृहं गतौ । आ(अ)मंत्रयेतां तावित्थं बुद्धिमन्तावुभावपि ॥ १९७ ॥ ॥३६३॥

न शोभनोऽस्याभिप्रायः किमनेन प्रयोजनम् । यथाधोऽन्यश्च कुर्यापि श्रियः सर्वाश्च दोष्मताम् ॥ १९८ ॥
इति निश्चित्य तौ सान्तःपुरौ सेचनकद्विपम् । हारादीन्यप्युपादाय वैशाल्यां निशि जग्मतुः ॥ १९९ ॥
मातामहश्चेटकस्तौ परिरभ्य समागतौ । स्नेहेन प्रतिपत्त्या च ददर्श युवराजवत् ॥ २०० ॥
वैशाल्यां च गतौ ज्ञात्वा तौ प्रतारितधूर्नवत् । हस्तविन्यस्तचिबुकश्चिन्तयामास कूणिकः ॥ २०१ ॥
न मे हस्त्यादिरत्नानि न च तौ भ्रातरावपि । जातोऽहमुभयभ्रष्टः स्त्रीप्रधानतया खलु ॥ २०२ ॥
भवतु व्यसने प्राप्तेऽमुष्मिंस्तौ नाऽऽनयामि चेत् । पराभवसहिष्णोर्मे वणिजश्च किमन्तरम् ॥ २०३ ॥
अनुशिष्य ततो दूतं वैशाल्यामुपचेटकम् । प्रैषीद् भ्रात्रोर्मार्गणाय रत्नान्यादाय जग्मुषोः ॥ २०४ ॥
दूतोऽपि पुर्यां वैशाल्यां गत्वा चेटकपर्षदि । प्रणम्य चेटकं स्थाने चाऽऽसित्वोचे ससौष्ठवः ॥ २०५ ॥
इह नंष्ट्वा समायातौ रत्नैः सह गजादिभिः । कुमारौ हल्लविहल्लौ कूणिकस्य समर्पय ॥ २०६ ॥
अनर्पयन्निमौ राज्यभ्रंशमासादयिष्यसि । कीलिकार्थे देवकुलं न भ्रंशयितुमर्हसि ॥ २०७ ॥
चेटकोऽवोचदन्योऽपि नार्प्यते शरणागतः । दौहित्रौ किं पुनरिमौ विश्वस्तौ पुत्रवत्प्रियौ ॥ २०८ ॥
दूतोऽब्रवीच्छरण्यस्त्वं न चार्पयसि चेदिमौ । तद्रत्नान्यनयोर्हृत्वा राजन्मत्स्वामिनेऽर्पय ॥ २०९ ॥
चेटकः स्माह धर्मोऽयं समानो राजरंकयोः अन्यस्य वित्तं न ह्यन्यो दातुमीशीत जातुचित् ॥ २१० ॥
न प्रसह्य न वा साम्नाऽनयोर्गृह्णामि किंचन । धर्मपात्रं हि दौहित्रौ दानार्हौ मे विशेषतः ॥ २११ ॥

दूतोऽप्यागत्य चंपायां तां गिरं चेटकोदिताम्। आख्यत् स्वस्वामिनः क्रोधवह्निवात्यामनाकुलः ॥ २१२ ॥
कूणिकोऽपि हि तत्कालं जयभंभामवीवदत्। सिंहा इव पराक्षेपं न सहन्ते महौजसः ॥ २१३ ॥
[1]सैन्यान्यनन्यसामान्यतेजसस्तस्य भूपतेः। सद्यः सर्वाभिसारेण सज्जीभूयावतस्थिरे ॥ २१४ ॥
कालादयः कुमाराश्च दशापि हि महाबलाः। पुरो बभूवुः संनह्य सर्वसन्नहनेन ते ॥ २१५ ॥
सहस्राणि त्रीणि गजास्तावन्तो वाजिनोऽपि हि। तावन्तश्च रथाः कोट्यस्तिस्रोऽपि च पदातयः ॥ २१६ ॥
तेषां दशानां प्रत्येकं कुमाराणामिदं बलम्। एतावत्कूणिकस्यापि प्रभुत्वं त्वतिरिच्यते ॥ २१७ ॥ (युग्मम्)
सैन्यैरेतावता गच्छंश्चंपेशश्चेटकं प्रति। तिरयामास धरणिं तरणिं च रजोभरैः ॥ २१८ ॥
चेटकोऽप्यमितैः सैन्यैः कूणिकायाभ्यषेणयत्। राजभिर्बद्धमुकुटैरष्टादशभिरावृतः ॥ २१९ ॥
द्विपास्त्रीणि सहस्राणि तावन्तश्च तुरंगमाः। तावन्तश्च रथास्तिस्रः कोटयश्च पदातयः ॥ २२० ॥
अष्टादशानां प्रत्येकं राज्ञां बलमदोऽभवत्। तत्तुल्यसंख्यं नृपतेश्चेटकस्याप्यभूद्बलम् ॥ २२१ ॥
स्वदेशसीम्नि गत्वाऽस्थाच्चेटकः सेनया तया। दुर्भेदं सागरव्यूहं रचयामास चोच्चकैः ॥ २२२ ॥
चंपाधिपोऽपि तत्रागाच्चम्वा प्रागुक्तसंख्यया। चक्रे च गरुडव्यूहमभेद्यं परसेनया ॥ २२३ ॥
रणतूर्याणि घोराणि सैन्ययोरुभयोरपि। रोदःकुक्षिंभरिध्वानान्यताड्यन्त सहस्रशः ॥ २२४ ॥

१ सेनाभ्योऽन° L. ॥

कीर्तिस्तंभैरिवोत्तब्धैः[1] खटीधवलितैः खरैः। संशप्तकाश्च संचेरुर्द्वयोरपि हि सैन्ययोः ॥ २२५ ॥
कूणिकस्य बले कालः कुमारो बलनायकः। आदावपि प्रववृते योद्धुं चेटकसेनया ॥ २२६ ॥
युयुधे सादिना सादी निषादी च निषादिना। रथी च रथिना पत्तिः पत्तिना च बलद्वये ॥ २२७ ॥
स्तंबेरमैस्तुरंगैश्च कुन्तघातनिपातितैः। अजायत तदा शैलगंडशैलवतीव भूः ॥ २२८ ॥
रथैर्भग्नैर्हतैर्वीरैः समरे रुधिराऽऽपगाः। सान्तरीपा इव साऽऽक्रभीमानुषा इव चाऽऽबभुः ॥ २२९ ॥
स्फुरद्भिरसिभिर्वीरकुञ्जराणां रणाजिरे। असिपत्त्रवनमिव प्रादुर्भूतमदृश्यत ॥ २३० ॥
असिच्छिन्नैरुच्छलद्भिर्वीराणां पाणिपंकजैः। कौणपाः पूरयामासुरवतंसकुतूहलम् ॥ २३१ ॥
स्वान् रुंडानपि युद्धायाऽऽदिशन्त इव हुंकृतैः। पेतुर्भटानां मूर्धानः खड्गधाराभिराहताः ॥ २३२ ॥
इत्थं च सागरव्यूहं कालः पोत इवांबुधिम्। अवगाह्य ययौ पारमिव चेटकसन्निधिम् ॥ २३३ ॥
कालं कालमिवाऽकालेऽप्यायान्तं प्रेक्ष्य चेटकः। चिन्तयामास केनापि नैष वज्रमिवाऽस्खलि ॥ २३४ ॥
अभ्यापतन्तं तदिमं रणसागरमन्दरम्। क्षणादपि निगृह्णामि दैवतेन पतत्त्रिणा ॥ २३५ ॥
इति दिव्येषुणा वैरिप्राणसर्वस्वदस्युना। प्रहृत्य चेटकः कालं प्रापयामास पंचताम् ॥ २३६ ॥
तदा चास्तमुपेयाय भास्वान् कालकुमारवत्। शुचेव चंपेशबलं तमसा जग्रसे जगत् ॥ २३७ ॥

---

१ °रथोत्तब्धैः C । °रिवोत्कुचैः L. ॥

युद्धं विसृज्य चंपेशबलं जाग्रदवास्थित । निद्रा ह्यभक्तभार्याणामिव वैरवतां कुतः ॥ २३८ ॥
चेटकस्य पुनः सैन्ये वीरा वीरजयन्तिकाम् । कुर्वन्तो जयवादित्रवादनेनात्यगुर्निशाम् ॥ २३९ ॥
चंपानाथेनाभिषिक्तं सेनानीत्वेऽपरेऽहनि । महाकालं कालमिव मारयामास चेटकः ॥ २४० ॥
अष्टौ सेनापतीनन्यानपि श्रेणिकनन्दनान् । एकैकमहन्येकैकस्मिन् पूर्ववच्चेटकोऽवधीत् ॥ २४१ ॥
भ्रातृष्वात्मसमानेषु कालादिषु दशस्वपि । चेटकेन हतेष्वेवं चंपापतिरचिन्तयत् ॥ २४२ ॥
देवतायाः प्रसादेन जैत्रैकेनापि पत्रिणा । न ह्यार्यचेटको जय्यो मर्त्यैः कोटिमितैरपि ॥ २४३ ॥
प्रभावं चेटकस्याऽमुं मया हा धिगजानता । मयैव निधनं नीता देवाभा भ्रातरो दश ॥ २४४ ॥
बभूव या गतिस्तेषां भविष्यति ममापि सा । युज्यते नापसर्तुं च दृष्टभ्रातृवधस्य मे ॥ २४५ ॥
तद्देवतां समाराध्य तत्प्रभावाज्जयाम्यरिम् । दिव्यप्रभावो दिव्येन प्रभावेण हि बाध्यते ॥ २४६ ॥
उपायमिति निश्चित्य कृत्वा च हृदि देवताम् । तस्थावष्टमभक्तेन राजा श्रेणिकनन्दनः ॥ २४७ ॥
पूर्वजन्मसंगतेन तुष्टौ तत्तपसापि च । शक्रश्च चमरेन्द्रश्च तत्कालं तमुपेयतुः ॥ २४८ ॥
ऊचाते तौ च देवेन्द्रासुरेन्द्रौ भोः किमिच्छसि ? । सोऽप्यूचे यदि तुष्टौ स्थश्चेटकस्तन्निहन्यताम् ॥२४९॥
शक्रो भूयोऽप्यभाषिष्टाऽपरं किमपि याच्यताम् । साधर्मिकश्चेटको मे तं निहन्मि न जातुचित् ॥ २५० ॥
तथापि देहरक्षां ते करिष्यामि महीपते ! । यथा न जीयसे तेन सोऽब्रवीदेवमस्त्विति ॥ २५१ ॥

चमरेन्द्रोऽप्यथ महाशिलाकंटकमाहवम् । अन्यं च रथमुशलं जैत्रं कर्तुममन्यत ॥ २५२ ॥
आद्ये शिलासन्निभः स्यात् पतितः कर्करोऽपि हि । कंटकोऽपि च जायेत महाशस्त्राधिकः खलु ॥ २५३ ॥
द्वितीये रथमुशले भ्राम्यतो भ्रमकं विना । परितः पिष्यते ताभ्यां वैरिसैन्यं रणोत्थितम् ॥ २५४ ॥
सुरेन्द्रश्चासुरेन्द्रश्च नरेन्द्रश्चापि कूणिकः । ततस्त्रयो युयुधिरे सह चेटकसेनया ॥ २५५ ॥
पौत्रोऽथ नागरथिनो द्वादशव्रतपालकः । सम्यग्दृष्टिः षष्ठभोजी सदा भवविरक्तधीः ॥ २५६ ॥
राजाभियोगतः षष्ठभक्तान्तेऽपि कृताष्टमः । श्रीचेटकक्षितीशेन स्वयमत्यर्थमर्थितः ॥ २५७ ॥
संग्रामे रथमुशले दुःसहे तादृशेऽपि हि । प्राविशद्वरुणो नाम सेनानीः सत्यसंगरः २५८ (त्रिभिर्विशेषकम्)
स चंपापतिसेनान्यं रणहेतोः समाक्षिपत् । प्रससार महासारो रथेनाऽसत्वररंहसा ॥ २५९ ॥
तौ संमुखीभूतरथौ ढुढौकाते रणेच्छया । वैरायमाणौ भूमिष्ठभानुस्वर्भानुभीषणौ ॥ २६० ॥
चंपापतेश्चमूनाथो वरुणं रणमार्गणम् । प्रहर प्रहरेत्युच्चैर्व्याजहार पुरःस्थितम् ॥ २६१ ॥
वरुणः स्माह हे धीमन् ! श्रावकस्यास्ति मे व्रतम् । अनिघ्नते न प्रहारं करवै वैरिणेऽपि हि ॥ २६२ ॥
साधु साधु महासत्त्वेत्युक्त्वा चंपेशसैन्यपः । मुमोच बाणं वरुणो विविधे तेन मर्मणि ॥ २६३ ॥
ततः कूणिकसेनान्यं वरुणोऽरुणलोचनः । एकेनैव प्रहारेण निनाय यमसद्मनि ॥ २६४ ॥

१ भ्रमकं /. ॥

गाढप्रहारविधुरो निःसृत्य वरुणो रणात् । तृणसंस्तरमास्तीर्य निषद्येदमचिन्तयत् ॥ २६५ ॥
सर्वात्मना शरीरेण स्वामिकार्यमनुष्ठितम् । इदानीमन्तकालो मे स्वार्थस्यावसरः खलु ॥ २६६ ॥
अर्हद्भट्टारकाः सर्वे सिद्धाः सर्वे च साधवः । केवल्युपज्ञो धर्मश्च भूयासुः शरणं मम ॥ २६७ ॥
क्षमयामि सर्वाञ्जीवान् सर्वे क्षाम्यन्तु ते मयि । मैत्री मे सर्वभूतेषु वैरं मम न केनचित् ॥ २६८ ॥
मामकीनं न किमपि न वाऽहमपि कस्यचित् । ममकारमकार्षं यं तमपि व्युत्सृजाम्यहम् ॥ २६९ ॥
कानि कानि न मूढोऽहं पापस्थानान्यसेविषि । तन्मिथ्या दुष्कृतं मेऽस्तु गतरागस्य संप्रति ॥ २७० ॥
देवत्वमर्त्यत्वतिर्यक्त्वनारकत्वेषु यन्मया । कृतं दुष्कर्म तद्गर्हे श्रीवीरोऽर्हन् गतिर्मम ॥ २७१ ॥
एवमाराधनां कृत्वा प्रत्याचख्यौ चतुर्विधम् । आहारमथ दध्यौ च नमस्कारं समाहितः ॥ २७२ ॥
तदा च वरुणस्यैकः सुहृन्मिथ्यादृगाहवात् । बहिर्भूत्वोपवरुणमागत्यैवमवोचत ॥ २७३ ॥
वयस्य ! तव सौहार्दक्रीतोऽहमपि संप्रति । त्वदासेवितमध्वानं प्रपन्नोऽस्म्यविदन्नपि ॥ २७४ ॥
नमस्कारपरावर्ती धर्मध्यानपरायणः । समाधिमरणं प्राप्य सौधर्मे वरुणो ययौ ॥ २७५ ॥
तद्विमानेऽरुणाभाख्ये चतुःपल्योपमप्रमम् । पूरयित्वायुरुत्पद्य विदेहेषु स सेत्स्यति ॥ २७६ ॥
अज्ञानसेवितेनापि वरुणस्य तु वर्त्मना । विपद्य तत्सुहृद् भूयो मनुष्यः सुकुलेऽभवत् ॥ २७७ ॥
विदेहेषु मनुष्यत्वं पुनरासाद्य सत्कुले । मुक्तिमार्गं समाराध्य स मोक्षपदमाप्स्यति ॥ २७८ ॥ ॥ ३६९ ॥

हते च वरुणेऽभूवंश्चेटकस्य चमूभटाः । युद्धाय द्विगुणोत्साहाः काण्डस्पृष्टवराहवत् ॥ २७९ ॥
गणराजसनाथैस्तैश्चेटकस्य चमूभटैः । अकुट्टि कूणिकचमूर्दंशद्भिरधरं रुषा ॥ २८० ॥
क्षुभ्यमानं बलं दृष्ट्वा स्वकीयमथ कूणिकः । लोष्टाहतः सिंह इव क्रोधोद्धुतमधावत ॥ २८१ ॥
सरसीव रणे क्रीडन् कूणिको वीरकुञ्जरः । दिशो दिशि परबलं पद्मखंडमिवाक्षिपत् ॥ २८२ ॥
कूणिकं दुर्जयं ज्ञात्वा चेटकोऽथात्यमर्षणः । तं दिव्यं मार्गणं शौर्यधनो धनुषि सन्दधे ॥ २८३ ॥
इतश्च वज्रकवचं कूणिकस्य पुरो हरिः । व्यधत्त चमरेन्द्रस्तु पृष्ठे सन्नाहमायसम् २८४ ॥
चापमाकर्णमाकृष्य वैशालीपतिनाऽप्यथ । स मुक्तः सायको वज्रवर्मणा स्खलितोऽन्तरा ॥ २८५ ॥
अमोघस्यापि बाणस्य तस्य मोघत्वदर्शनात् । चमूभटाश्चेटकस्य पुण्यक्षयममंसत ॥ २८६ ॥
द्वितीयं नाऽमुचद्बाणं सत्यसन्धस्तु चेटकः । अपसृत्य द्वितीयस्मिन् दिने तद्वदयुध्यत ॥ २८७ ॥
तथैव मोघबाणोऽभूद् द्वितीयेऽह्न्यपि चेटकः । एवं दिने दिने युद्धमतिघोरमभूत्तयोः ॥ २८८ ॥
लक्षाशीत्याऽधिका कोटिर्भटानां पक्षयोर्द्वयोः । विपेदे या सोदपादि तिर्यक्षु नरकेषु च ॥ २८९ ॥
नंष्ट्वा स्वस्वपुरं यात्सु गणराजेषु चेटकः । प्रणश्य प्राविशत् पुर्यां कूणिकोऽपि रुरोध ताम् ॥ २९० ॥
तदा सेचनकारूढौ चंपेशस्याखिलं बलम् । वीरौ हल्लविहल्लौ तौ रात्रावभिबभूवतुः ॥ २९१ ॥
न प्रहर्तुं नवा धर्तुं स हस्ती स्वमहस्तिवत् । केनाप्यशाकि चंपेशशिबिरे सौप्तिकागतः ॥ २९२ ॥

मारयित्वा मारयित्वा निशि हल्लविहल्लयोः । क्षेमेण गच्छतोर्मंत्रिमंडलीं स्माऽऽह कूणिकः ॥ २९३ ॥
आभ्यां विद्रुतमस्माकं प्रायेण सकलं बलम् । तद् ब्रूत क इहोपायो जये हल्लविहल्लयोः ॥ २९४ ॥
मंत्रिणोऽप्यूचिरे तौ हि जेतुं शक्यौ न केनचित् । अधिरूढौ हि यावत्तं हस्तिनं नरहस्तिनौ ॥ २९५ ॥
तस्मात्तस्यैव करिणो वधाय प्रयतामहे । खादिरांगारसंपूर्णां कार्यतां पथि खातिका ॥ २९६ ॥
छादयित्वा च वारीव दुर्लक्ष्या सा करिष्यते । तस्यां सेचनको वेगादभिधावन् पतिष्यति ॥ २९७ ॥
चंपेशोऽकारयदथ खादिरांगारपूरिताम् । खातिकामुपरिच्छन्नां तदागमनवर्त्मनि ॥ २९८ ॥
अथ हल्लविहल्लावप्यवस्कन्दकृते निशि । निरीयतुः सेचनकाधिरूढौ जितकाशिनौ[1] ॥ २९९ ॥
अंगारखातिकोपान्तमेत्य सेचनकोऽपि हि । तां विभंगेन विज्ञाय तस्थौ धृतममानयन् ॥ ३०० ॥
ततो हल्लविहल्लाभ्यामिति निर्भर्त्सितः करी । पशुरस्यकृतज्ञोऽसि कातरो यदभू रणात् ॥ ३०१ ॥
विदेशगमनं बन्धुत्यागश्च त्वत्कृते कृतः । अस्मिन्दुर्व्यसने क्षिप्तस्त्वत्कृते ह्यार्यचेटकः ॥ ३०२ ॥
वरं श्वा पोषितः श्रेयान् भक्तः स्वामिनि यः सदा । न तु त्वं प्राणवाल्लभ्याद्योऽस्मत्कार्यमुपेक्षसे ॥ ३०३ ॥
इति निर्भर्त्सितो हस्ती कुमारौ निजपृष्ठतः । वेगादुत्तारयामास भक्तंमन्यो बलादपि ॥ ३०४ ॥
स्वयं तु तस्मिन्नंगारगर्ते झम्पां ददौ करी । सद्यो विपद्य चाद्यायामुत्पेदे नरकावनौ ॥ ३०५ ॥

१ जितम° *D* ॥

कुमारौ दध्यतुर्धिग्धिगावाभ्यां किमनुष्ठितम् । पशुत्वमावयोर्व्यक्तं न तु सेचनकः पशुः ॥ ३०६ ॥
आर्यपादा यस्य कृते क्षिप्ता दुर्व्यसने चिरम् । तं स्वयं निधनं नीत्वा जीवावोऽद्यापि दुर्धियौ ॥ ३०७ ॥
आर्यसैन्यस्य महतो नाशप्रतिभुवाविव । अकृष्वाहि वृथा नाशं नीतो बन्धुरबन्धुनाम् ॥ ३०८ ॥
तदाऽद्य जीवितुं युक्तं जीवावश्चेदनः परम् । शिष्यीभूयार्हतो वीरस्वामिनः खलु नान्यथा ॥ ३०९ ॥
तदा शासनदेव्या तौ भावश्रमणतां गतौ । नीतौ श्रीवीरपादान्ते परिवव्रजतुर्द्रुतम् ॥ ३१० ॥
तदा च प्रव्रजितयोरपि हल्लविहल्लयोः । अशोकचन्द्रो वैशालीमादातुमशक्नन्न हि ॥ ३११ ॥
एवं सति च चंपेशः प्रतिज्ञामकृतेदृशीम् । प्रतिज्ञया पौरुषं हि दोष्मतां भृशमेधते ॥ ३१२ ॥
न खनामि पुरीमेतां खरयुक्तहलेन चेत् । तदाऽहं भृगुपातेनाग्निप्रवेशेन वा म्रिये ॥ ३१३ ॥
कृतसन्धोऽपि वैशालीं पुरीं भंक्तुमनीश्वरः । खेदमासादयामास कूणिकः क्रमयोगतः ॥ ३१४ ॥
तदा चाशोकचन्द्रस्य खिन्नस्य गगनस्थिता । देव्याख्यदीदृशं दृष्ट्वा श्रमणे कूलवालके ॥ ३१५ ॥
"गनियं चे मागधियं शमने कुलवालके । लभिज्ज कूणि एलाए तो वेशालिं गहिस्सिदि ॥ ३१६ ॥
आकाशदेवतावाचमिमामाकर्ण्य कूणिकः । बभाण सद्यः सञ्जातजयप्रत्याशयोच्छ्वसन् ॥ ३१७ ॥
बालकानां हि भाषा या भाषा या योषितामपि । औत्पातिकी च भाषा या सा वै भवति नाऽन्यथा ॥३१८॥
तत्क्वास्ति श्रमणः कूलवालकः प्राप्स्यते कथम् । ? पण्यांगना मागधिकाभिधाना विद्यते क वा ?॥३१९॥

तच्छ्रुत्वा मंत्रिणः प्रोचुस्तवैव पुरि विद्यते । वेश्या मागधिका देव ! न विद्मः कूलवालकम् ॥ ३२० ॥
तदैव मुक्त्वा सैन्यार्धं वैशालीरोधहेतवे । सैन्यार्धेन ययौ चंपां चंपापतिरिलापतिः ॥ ३२१ ॥
पण्यांगनां मागधिकां मगधाधिपनन्दनः । आह्वास्त गतमात्रोऽपि त्वरितं वरमंत्रिवत् ॥ ३२२ ॥
आदिदेश च भद्रे ! त्वं धीमती त्वं कलावती । त्वया ह्यनेकपुंसां धीराजन्माप्युपजीविता ॥ ३२३ ॥
सफलीकुरु मत्कार्ये तद्वैशिककलां निजाम् । रमयित्वा पतित्वेन श्रमणं कूलवालकम् ॥ ३२४ ॥
करोम्येवमिति च सा प्रपेदाना मनस्विनी । चंपानाथेन सच्चक्रे वस्त्रालंकरणादिना ॥ ३२५ ॥
विसृष्टा च गृहं गत्वा विमृश्य च धियां निधिः । तदैव मूर्त्ता मायेव सा मायाश्राविकाऽभवत् ॥ ३२६ ॥
सा गर्भश्राविकाभासा गुरुभिर्मे यथाविधि । अपि द्वादशधा लोके दर्शयामास सत्यवत् ॥ ३२७ ॥
चैत्यपूजादिनिरतां धर्मश्रवणतत्पराम् । ऋज्वाशयाश्च विविदुराचार्याः श्राविकेति ताम् ॥ ३२८ ॥
सान्यदाऽपृच्छदाचार्यान् कः साधुः कूलवालकः । तद्भावमविदन्तश्च कथयन्ति स्म तेऽप्यदः ॥ ३२९ ॥
धर्मज्ञे ! पंचधाऽऽचारनिरतो मुनिपुंगवः । एकोऽस्ति तस्य च क्षुल्ल एकः कपिरिवास्थिरः ॥ ३३० ॥
सामाचारीपरिभ्रष्टो वारणास्मारणादिभिः । नोद्यमानो याति रोषं स तु क्षुल्लोऽतिदुर्नयः ॥ ३३१ ॥
गुरुस्तु तस्य क्षुल्लस्य दुःश्रवामपि सादरः । आचारशिक्षां प्रददौ यदुक्तमिदमागमे ॥ ३३२ ॥
"परो रुष्यतु वा मा वा विषवत्प्रतिभातु वा । भाषितव्या हिता भाषा स्वपक्षगुणकारिणी" ॥ ३३३ ॥

न कर्कशां न मधुरां गुरोः शिक्षाममंस्त सः । लघुकर्मणि शिष्ये हि प्रभवन्ति गुरोर्गिरः ॥ ३३४ ॥
विहरन्तोऽन्यदाचार्यास्ते [1]गिरेर्नगरं ययुः । उज्जयन्तं चारुरुहुः सह क्षुल्लेन तेन तु ॥ ३३५ ॥
क्षुल्लेन देवं वन्दित्वा गुरोरुत्तरतो गिरेः । मुमुचे गंडपाषाणः पेषणाय दुरात्मना ॥ ३३६ ॥
श्रुत्वा खडखडाशब्दं गुरुराकुञ्चितेक्षणः । आलुलोके समश्मानं पतन्तं पविगोलवत् ॥ ३३७ ॥
चक्रे च विततं जंघे स ग्रावाऽपि तदन्तरे । निरियायापदः प्रायः प्रभवन्ति न धीमति ॥ ३३८ ॥
शशाप च गुरुः क्षुल्लं कुपितस्तेन कर्मणा । स्त्रीसकाशादरे पाप ! व्रतभंगमवाप्स्यसि ॥ ३३९ ॥
क्षुल्लोऽब्रवीद्गुरो ! शापं करिष्यामि तवान्यथा । तत्र वत्स्याम्यरण्येऽहं यत्र द्रक्ष्यामि न स्त्रियम् ॥ ३४० ॥
इति सद्यो गुरुं त्यक्त्वा मर्यादामिव दुर्मतिः । निर्मानुषामरण्यानीं स शार्दूल इवाविशत् ॥ ३४१ ॥
गिरिकूलंकषामूले स्थितः प्रतिमया सदा । स मासादर्धमासाद्वा पथिकादरपारयत् ॥ ३४२ ॥
एवं कूलंकषामूले मुनेस्तस्य तपस्यतः । प्रावृट् प्रादुर्बभूवाब्दविलासितनभस्तला ॥ ३४३ ॥
रसोद्रेकेण लुंपन्त्य उभे कूले कुले इव । नद्य उन्मार्गगामिन्यो बभूवुः कुलटा इव ॥ ३४४ ॥
क्षुल्लाधिष्ठितकूलायामुत्पूरायां सरित्यथ । दध्यौ तद्देवता भक्ता शासने श्रीमदर्हताम् ॥ ३४५ ॥
कूलस्थितो मुनिरयं कूलद्रुम इवाधुना । नेष्यते वारिपूरेण यदुपेक्षां करोम्यहम् ॥ ३४६ ॥

॥ ३७४

[1] गिरिन° B.

ततो गिरिणदीदेव्या निजं कूलं दिशाऽन्यया । प्रावर्ति यत्र तत्रापि क्षेममेव तपोजुषाम् ॥ ३४७ ॥
कूलवालक इत्याख्या तदा तस्य मुनेरभूत् । सांप्रतं वर्ततेऽमुत्र प्रदेशे स महातपाः ॥ ३४८ ॥
कृतकृत्येव सा सद्यः स्मयमानेक्षणा ययौ । कूलवालकविज्ञानात् फलितच्छद्मपादपा ॥ ३४९ ॥
वन्दमानाऽथ चैत्यानि तीर्थयात्राच्छलेन सा । तमुद्देशमुपेयाय यत्रर्षिः कूलवालकः ॥ ३५० ॥
वन्दित्वा तं मुनिवरं सा मायाश्राविकाऽवदत् । उज्जयन्तादितीर्थानि वन्दयेऽहं मुने ! त्वया ॥ ३५१ ॥
कायोत्सर्गं मुनिर्मुक्त्वा धर्मलाभाशिषं ददौ । तीर्थान्यवन्दतापृच्छच्चाऽऽगतासि कुतः शुभे ? ॥ ३५२ ॥
साऽऽख्यन्महर्षे ! चंपाया आगां तीर्थानि वन्दितुम् । तीर्थेभ्यः परमं तीर्थमिह यूयं च वन्दिताः ॥ ३५३ ॥
तदस्मदीयं पाथेयं भिक्षादोषविवर्जितम् । आदाय पारणं कृत्वा महर्षेऽनुगृहाण ! माम् ॥ ३५४ ॥
भक्तिभावनया तस्या मुनिरार्द्रमनाः स तु । जगाम भिक्षामादातुं तत्सार्थेऽनर्थसद्मनि ॥ ३५५ ॥
ददिरे च स्वयं तस्मै कूटश्राविकया तया । पुरा संयोजितद्रव्या मोदका मोदमानया ॥ ३५६ ॥
अभूत्प्राशितमात्रैस्तैर्मोदकैः सोऽतिसारकी । रसवीर्यविपाको हि द्रव्याणां जातु नान्यथा ॥ ३५७ ॥
अतिसारेण स ग्लानो महर्षिरभवत्तथा । संवरीतुं क्षीणबलो यथाङ्गान्यपि नाशकत् ॥ ३५८ ॥
तं च मागधिका प्रोचे समयस्मृतवैशिका । कृतपारणकोऽसि त्वं मदनुग्रहकाम्यया ॥ ३५९ ॥
स्वामिन्मदीयपाथेयप्राशनादप्यनन्तरम् । प्राप्तोऽसि दुर्दशामेवं धिग्मां पापतरंगिणीम् ॥ ३६० ॥

त्वामेकाकिनं मुक्त्वा प्राप्तमेनावर्ती दशाम् । न गन्तुमुत्सहेते मे पादौ निगडिताविव ॥ ३६१ ॥
इत्युक्त्वा सा स्थिता तत्रोपससर्प क्षणे क्षणे । उद्वर्तयितुमंगानि प्रदातुं भेषजानि च ॥ ३६२ ॥
उद्वर्तनादिकं तस्य तथा मागधिका व्यधात् । यथा तं कारयामास सर्वांगस्पर्शमात्मनः ॥ ३६३ ॥
उल्लाघः स शनैश्चक्रे तया शुश्रूषमाणया । चंपकेनांशुकमिव तद्भक्त्या चाध्यवास्यत ॥ ३६४ ॥
कटाक्षवीक्षणैस्तस्या अंगस्पर्शप्रवृक्तिभिः । मुनेस्तस्याचलच्चित्तं स्त्रीसंगे हि कियत्तपः ॥ ३६५ ॥
मुनेर्मागधिकायाश्च मिथः शय्यासनादिभिः । दम्पतिव्यवहारोऽभूदतिव्यक्तो दिने दिने ॥ ३६६ ॥
निन्ये च मागधिकया चंपायां कूलवालकः । नारीणां किंकर इव कामान्धः किं करोति न ? ॥ ३६७ ॥
चंपेशाय शशंसे च देवार्थं कूलवालकः । पतीकृत्य मयाऽऽनीतः किं करोतु समादिश ॥ ३६८ ॥
आदिदेश विशामीशोऽप्यादरात् कूलवालकम् । यथा भज्येत वैशाली मंक्षु भिक्षो ! तथा कुरु ॥ ३६९ ॥
प्रतिश्रुत्य नृपादेशं धीनिधिः कूलवालकः । जगाम लिंगिरूपेण वैशालीमस्खलगतिः ॥ ३७० ॥
चंपानाथोऽपि तत्कालं वैशालीमखिलैर्बलैः । रुरोध रुद्धामग्रेऽपि जयप्रत्याशयोत्सुकः ॥ ३७१ ॥
द्रव्याणि द्रष्टुमारेभे पुर्यां मागधिकापतिः । श्रीमुनिसुव्रतस्वामिस्तूपमेकं ददर्श च ॥ ३७२ ॥
सोऽचिन्तयच्च तं दृष्ट्वा प्रतिष्ठालग्नमस्य हि । बलीयस्तत्प्रभावेण निश्चितं पूर्न भज्यते ॥ ३७३ ॥

शोपाचरच्च *D.* ॥

द्वादशः सर्गः

॥ ३७६

केनाप्यौपयिकेनेदं स्तूपमुत्थाप्यते यदि । तदा भज्येत वैशाली नाऽन्यथा वज्रिणाऽपि हि ॥ ३७४ ॥
चिन्तयन्निति बभ्राम वैशाल्यां कूलवालकः । अपृच्छ्यत च तल्लोकैः पुरीरोधकदर्थितैः ॥ ३७५ ॥
वयं भदन्त ! श्रान्ताः स्मः पुरीरोधेन विद्विषा । यदि वेत्सि तदाऽऽख्याहि कदोद्वेष्टो भविष्यति ? ॥ ३७६ ॥
सोऽवदद्वेद्म्यहं सम्यग्यावत् स्तूपमिहास्त्यदः । नगर्यास्तावदुद्वेष्टो न भविष्यति हे जनाः ! ॥ ३७७ ॥
स्तूपेऽस्मिन् भज्यमानेऽपि भावी प्रत्यय एष वः । द्विट्सैन्यं वार्द्धिवेलेवाकस्मादपसरिष्यति ॥ ३७८ ॥
उत्कीलिते समन्तात्तु स्तूपे स्वस्त्यस्तु वो जनाः । कुलम्न स्थापितमिदं मा मोहमिह यात भोः ॥ ३७९ ॥
तं स्तूपं भंक्तुमारेभे धूर्त्तधीवञ्चितो जनः । सुखप्रतार्यः प्रायेण सर्वोऽपि व्यसनार्दितः ॥ ३८० ॥
भंक्तुमारब्धमात्रेऽपि स्तूपे मागधक्ष्मापतिः । गत्वाऽपसारयामास द्विक्रोशीमथ कूणिकम् ॥ ३८१ ॥
उत्पन्नप्रत्ययो लोकस्तं स्तूपं कूपभेकधीः । कूर्मन्यासशिलं यावन्निर्मूलमुदमूलयत् ॥ ३८२ ॥
बभञ्ज द्वादशाब्दान्ते वैशालीं कूणिकस्ततः । स्तूपस्यैव प्रभावोऽभूत् पुरा हि दुरतिक्रमः ॥ ३८३ ॥
विरराम तदा चंपावैशालीनाथयो रणः । एतस्यामवसर्पिण्यामीदृशो न कदाऽप्यभूत् ॥ ३८४ ॥
भाणयामास वैशालीपतिं चंपापतिस्तदा । आर्य चेटक पूज्योऽसि किं करोमि तव प्रियम् ? ॥ ३८५ ॥
चेटकोऽपि विषण्णात्मा कूणिकं प्रत्यभाणयत् । जयोत्सवोत्सुकोऽपि त्वं विलंब्य प्रविशेः पुरीम् ॥ ३८६ ॥

१ "थम" L ॥

दूतेन चेटकवचस्याख्याते कूणिकोऽपि हि । किं याचितमिति ह्रीणस्तथैव प्रत्यपद्यत ॥ ३८७ ॥
इतश्च सत्यकिर्नाम सुज्येष्ठासूनुर्नभश्चरः । दौहित्रश्चेटकस्यागाच्चिन्तयामास चेति सः ॥ ३८८ ॥
मातामहप्रजामेतां लुंट्यमानामरातिभिः । कथं प्रेक्ष्यामि तदिमां नयाम्यन्यत्र कुत्रचित् ॥ ३८९ ॥
इति तन्नगरीलोकं सर्वमुत्पाट्य विद्यया । निनाय नीलवत्यद्रौ लालयन् पुष्पदामवत् ॥ ३९० ॥
अथ मृत्युश्रियमिव बद्ध्वाऽयःपुत्रिकां गले । चेटकोऽनशनं कृत्वाऽविक्षदस्ताघवारिणि ॥ ३९१ ॥
स मज्जन् धरणेन्द्रेण समीक्ष्य भवने निजे । निन्ये साधर्मिक इति मृत्युनाऽत्रुटितायुषाम् ॥ ३९२ ॥
धरणेन श्लाघ्यमानधर्मध्यानो महामनाः । तस्थौ मृत्योरचकितश्चेटकः प्राघुणादिव ॥ ३९३ ॥
अर्हत्सिद्धसाधुधर्मान्मंगल्यान्मंगलात्मनः । लोकोत्तमांश्च चतुरश्चतुरः सोऽस्मरत् स्वयम् ॥ ३९४ ॥
जीवाजीवादितत्त्वोपदेशकाः परमेश्वराः । बोधिप्रदाः स्वयंबुद्धा अर्हन्तः शरणं मम ॥ ३९५ ॥
ध्यानाग्निदग्धकर्माणस्तेजोरूपा अनश्वराः । अनन्तकेवलज्ञानाः सिद्धाश्च शरणं मम ॥ ३९६ ॥
निरीहा निरहंकारा निर्ममाः समचेतसः । महाव्रतधरा धीराः साधवः शरणं मम ॥ ३९७ ॥
अहिंसासूनृतास्तेयब्रह्माकिंचनतामयः । केवल्युपज्ञः परमो धर्मश्च शरणं मम ॥ ३९८ ॥
अपि जन्मशतैर्यद्यदपराद्धं शरीरिषु । त्रिविधं त्रिविधेनापि तन्निन्दामि समाहितः ॥ ३९९ ॥
गृहिधर्मं द्वादशधा मया पालयता कृता । ये केचिदप्यतीचारास्तान् सर्वान् व्युत्सृजाम्यहम् ॥ ४०० ॥

क्रोधमानमायालोभाभिभूतेन मया सदा । कृतं यच्च हिंसाऽऽदि तत्त्रिधापि धिगस्तु मे ॥ ४०१ ॥
एवमाराधनां कृत्वा नमस्कारपरायणः । विपद्य चेटकः स्वर्गसुखभाजनतां ययौ ॥ ४०२ ॥
अशोकचन्द्रोऽपि पुरीं तां हलैर्युक्तरासभैः । खेटयित्वा क्षेत्रमिव स्वां प्रतिज्ञामपूरयत् ॥ ४०३ ॥
तीर्त्वा प्रतिज्ञां चंपेशो दुस्तरामापगामिव । जगाम चंपानगरीमुत्सवेन गरीयसा ॥ ४०४ ॥
अन्यदा पावयन् पृथ्वीं विहारेण जगद्गुरुः । जगाम चंपां श्रीवीरस्तत्रैव समवासरत् ॥ ४०५ ॥
श्रीवीरस्वामिनः पार्श्वे तत्र कालादिमातरः । विरक्ताः सूनुनिधनात् प्राव्रजञ्छ्रेणिकप्रियाः ॥ ४०६ ॥
त्रैलोक्यसंशयच्छेदकारकं परमेश्वरम् । वन्दितुं तत्र समवसरणे कूणिकोऽभ्यगात् ॥ ४०७ ॥
नत्वा नाथं यथास्थानमुपविश्याथ कूणिकः । पप्रच्छ लब्धावसरः शिरस्यारचिताञ्जलिः ॥ ४०८ ॥
आजन्माप्यपरित्यक्तकामभोगा भवन्ति ये । कां नाम ते गतिं यान्ति चक्रिणः परमेश्वर ! ॥ ४०९ ॥
स्वाम्याख्यात्ते हि गच्छन्ति सप्तमीं नरकावनिम् । पप्रच्छ कूणिको भूयो भाविनी मम का गतिः ? ॥ ४१० ॥
आचख्यौ भगवान् षष्ठीं नरकोर्वीं गमिष्यसि । कूणिकः स्माह किमहं न हि यास्यामि सप्तमीम् ॥ ४११ ॥
भगवानप्युवाचैवं चक्रवर्त्येव न ह्यसि । सति धर्मिणि धर्मा हि चिन्त्यन्ते श्रेणिकात्मज ! ॥ ४१२ ॥
अपृच्छत् कूणिकः किं न चक्र्यहं परमेश्वर ! । ममापि चक्रितुल्याऽस्ति चतुरंगा वरूथिनी ॥ ४१३ ॥

१ "स्वर" C, L॥

स्वाम्यूचे तव रत्नानि चक्रादीनि न सन्ति भोः ! । विनैकेनापि रत्नेन चक्रभृन्नाम दुर्धरम् ॥ ४१४ ॥
तच्छ्रुत्वोत्थाय चंपेशो महाऽहंकारपर्वतः । एकेन्द्रियाणि लौहानि महारत्नान्यकारयत् ॥ ४१५ ॥
पद्मावतीं स स्त्रीरत्नं रत्नानीभादिकान्यपि । सोऽल्पधीः कल्पयामास मनोरथकदर्थितः ॥ ४१६ ॥
साधयन् भरतक्षेत्रं कूणिकोऽसह्यविक्रमः । क्रमेण वैताढ्यगुहां तमिस्रामासदद्बलैः ॥ ४१७ ॥
अनात्मज्ञः स उन्मत्त इव दुर्दैवदूषितः । गुहाद्वारकपाटानि दंडेन त्रिरताडयत् ॥ ४१८ ॥
कृतमालामरः प्रोचे तद्गुहाद्वाररक्षकः । मुमूर्षुः कोऽयमाहन्ति गुहाद्वारमनात्मवित् ॥ ४१९ ॥
कूणिकोऽप्यवदत् किं मां जिगीषुं वेत्सि नागतम् ? । अशोकचन्द्रनामाऽहमुत्पन्नश्चक्रवर्त्यहो ॥ ४२० ॥
कृतमालामरः स्माह चक्रिणो द्वादशाभवन् । अप्रार्थितप्रार्थकोऽसि बुध्यस्व स्वस्ति तेऽस्तु भोः ॥ ४२१ ॥
कूणिकोऽपि बभाणैवमहं चक्री त्रयोदशः । उत्पन्नः कृतपुण्योऽस्मि पुण्यैः किं नाम दुर्लभम् ॥ ४२२ ॥
पराक्रमं न मे वेत्सि कृतमाल ! गुहामिमाम् । कुरुष्व विततद्वारामन्यथा न भवस्यहो ॥ ४२३ ॥
आधिदैविकदोषात्तमिवासंबद्धभाषिणम् । कूणिकं कृतमालो द्राग्रोषादकृत भस्मसात् ॥ ४२४ ॥
अशोकचन्द्रो राजैवं विपद्य नरकावनिम् । षष्ठीमियाय वचनं ह्यर्हतां जातु नान्यथा ॥ ४२५ ॥
आलेख्यशेषतां प्राप्ते कूणिके तु तदात्मजम् । सर्वे प्रधानपुरुषा राज्ये न्यधुरुदायिनम् ॥ ४२६ ॥
उदाय्यपि प्रजां न्याय्यवर्त्मना पर्यपालयत् । अखंडशासनः पृथ्व्यां प्रथयन् जैनशासनम् ॥ ४२७ ॥

तस्य स्थानस्थितस्यापि प्रतापसवितुर्द्विषः । तेजोऽसह्याः प्रविविशुर्धूकवद्गिरिगह्वरे ॥ ४२८ ॥
धर्मदानयुद्धभेदैस्तस्य वीरत्वमद्भुतम् । निदर्शनतया जज्ञे भूतसद्भाविभूभुजाम् ॥ ४२९ ॥
कदाऽपि तस्य नोत्पेदे भयं स्वपरचक्रजम् । बिभाय स पुनर्नित्यं श्रावकव्रतखंडनात् ॥ ४३० ॥
चतुःपर्व्यां चतुर्थादितपसा शुद्धिमुद्वहन् । सामायिकस्थस्तस्थौ स स्वस्थः पौषधसद्मनि ॥ ४३१ ॥
अर्हन्देवो गुरुः साधुरिति तस्य दिवानिशम् । मंत्राक्षरमिव ध्येयं हृदयादुत्ततार न ॥ ४३२ ॥
अखंडिताज्ञस्त्रिखंडां दयावानपि सर्वदा । शशास जगतीमेतामुदाय्युदयभाङ्नृपः ॥ ४३३ ॥
श्रीवीरस्वामिनो धर्मदेशनाममृतोपमाम् । आचम्याचम्य स सुधीरात्मानं पर्यपावयत् ॥ ४३४ ॥
एवमाकेवलज्ञानोत्पत्तेर्विहरतो महीम् । बभूवेति परीवारः स्वामिनश्चरमार्हतः ॥ ४३५ ॥
समजायन्त साधूनां सहस्राणि चतुर्दश । षट्त्रिंशत्तु सहस्राणि साध्वीनां शान्तचेतसाम् ॥ ४३६ ॥
चतुर्दशपूर्वभृतां श्रमणानां शतत्रयम् । त्रयोदशशत्यवधिज्ञानिनां सप्तशत्यथ ॥ ४३७ ॥
वैक्रियलब्ध्यनुत्तरगतिकेवलिनां पुनः । मनोविदां पंचशती वादिनां तु चतुःशती ॥ ४३८ ॥
श्रावकाणां तु लक्षैकैकोनषष्टिसहस्रयुक् । श्राविकाणां तु त्रिलक्षी साष्टादशसहस्रिका ॥ ४३९ ॥

यातेषु गौतमसुधर्ममुनीन्द्रवर्जं ।
मोक्षश्रियं गणधरेषु नवस्वथोच्चैः ॥
स्वामी सुरासुरनभश्चरसेव्यमान- ।
पादो जगाम भगवान्नगरीमपापाम् ॥ ४४० ॥

॥ इत्याचार्यश्रीहेमचन्द्रसूरिविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये दशमपर्वणि भाविकुमारपालदेवचरिता-भयप्रव्रज्या-कूणिकचरितो-दायिराज्य-श्रीमहावीरकेवलिविहारवर्णनो नाम द्वादशः सर्गः ॥

# ॥ अथ त्रयोदशः सर्गः ॥

अथ तत्र सुराश्चक्रुर्वप्रत्रितयभूषितम् । रम्यं समवसरणं स्वामिनो देशनासदः ॥ १ ॥
ज्ञात्वा निजायुःपर्यन्तमन्तिमां देशनां प्रभुः । कर्तुं तस्मिन्नुपाविक्षत् सुरासुरनिषेवितः ॥ २ ॥
स्वामिनं समवसृतं ज्ञात्वाऽपापापुरीपतिः । हस्तिपालः समागत्य नत्वा च समुपाविशत् ॥ ३ ॥
शुश्रूषमाणास्तत्रास्थुर्यथास्थानं सुरादयः । एत्य नत्वा सहस्राक्ष इति स्वामिनमस्तवीत् ॥ ४ ॥
धर्माधर्मौ विना नाङ्गं विनाङ्गेन मुखं कुतः । मुखाद्विना न वक्तृत्वं तच्छास्तारः परे कथम् ॥ ५ ॥
अदेहस्य जगत्सर्गे प्रवृत्तिरपि नोचिता । न च प्रयोजनं किंचित् स्वातन्त्र्यान्न पराऽऽज्ञया ॥ ६ ॥
क्रीडया चेत्प्रवर्तेत रागवान् स्यात्कुमारवत् । कृपयाऽथ सृजेत्तर्हि सुख्येव सकलं सृजेत् ॥ ७ ॥
दुःखदौर्गत्यदुर्योनिजन्मादिक्लेशविह्वलम् । जनं तु सृजतस्तस्य कृपालोः का कृपालुता ॥ ८ ॥
कर्मापेक्षः स चेत्तर्हि न स्वतन्त्रोऽस्मदादिवत् । कर्मजन्ये च वैचित्र्ये किमनेन शिखण्डिना ॥ ९ ॥
अथ स्वभावतो वृत्तिरवितर्क्या महेशितुः । परीक्षकाणां तर्ह्येष परीक्षाक्षेपडिंडिमः ॥ १० ॥

सर्वभावेषु कर्तृत्वं ज्ञातृत्वं यदि संमतम् । मतं नः सन्ति सर्वज्ञा मुक्ताः कायभृतोऽपि च ॥ ११ ॥
सृष्टिवादकुहेवाकमुन्मुच्येत्यप्रमाणकम् । त्वच्छासने रमन्ते ते येषां नाथ प्रसीदसि ॥ १२ ॥
इति स्तुत्वा सुनासीरे स्थितेऽपापापुरीपतिः । हस्तिपालनृपोऽप्येवं वीरस्वामिनमस्तवीत् ॥ १३ ॥
न परं नाम मृद्वेव कठोरमपि किंचन । विशेषज्ञाय विज्ञप्यं स्वामिने स्वान्तशुद्धये ॥ १४ ॥
न पक्षिपशुसिंहादिवाहनाऽऽसीनविग्रहः । न नेत्रवक्त्रगात्रादिविकारविकृताकृतिः ॥ १५ ॥
न शूलचापचक्रादिशस्त्राङ्ककरपल्लवः । नाङ्गनाकमनीयाङ्गपरिष्वङ्गपरायणः ॥ १६ ॥
न गर्हणीयचरितप्रकंपितमहाजनः । न प्रकोपप्रसादादिविडम्बितनरामरः ॥ १७ ॥
न जगज्जननस्थेमविनाशविहितादरः । न लास्यहास्यगीतादिविप्लवोपप्लुतस्थितिः ॥ १८ ॥
तदेवं सर्वदेवेभ्यः सर्वथा त्वं विलक्षणः । देवत्वेन प्रतिष्ठाप्यः कथं नाम परीक्षकैः ? ॥ १९ ॥
अनुश्रोतःसरत्पर्णतृणकाष्ठादि युक्तिमत् । प्रतिश्रोतःश्रयद्वस्तु कया युक्त्या प्रतीयताम् ॥ २० ॥
अथवाऽलं मन्दबुद्धिपरीक्षकपरीक्षणैः । ममापि कृतमेतेन वैयात्येन जगत्प्रभो ! ॥ २१ ॥
यदेव सर्वसंसारिजन्तुरूपविलक्षणम् । परीक्षन्तां कृतधियस्तदेव तव लक्षणम् ॥ २२ ॥
क्रोधलोभभयाक्रान्तं जगदस्माद्विलक्षणः । न गोचरो मृदुधियां वीतराग ! कथंचन ॥ २३ ॥
एवं स्तुत्वा हस्तिपाल विरतेऽर्हन्नपश्चिमः । अपश्चिमामित्यकरोद्भगवान् धर्मदेशनाम् ॥ २४ ॥

पुमर्था इह चत्वारः कामार्थौ तत्र जन्मिनाम् । अर्थभूतौ नामधेयादनर्थौ परमार्थतः ॥ २५ ॥
अर्थस्तु मोक्ष एवैको धर्मस्तस्य च कारणम् । संयमादिर्दशविधः संसाराम्भोधितारणः ॥ २६ ॥
अनन्तदुःखः संसारो मोक्षोऽनन्तसुखः पुनः । तयोस्त्यागपरिप्राप्तिहेतुर्धर्मं विना न हि ॥ २७ ॥
मार्गं श्रितो यथा दूरं क्रमात् पंगुरपि व्रजेत् । धर्मस्थो घनकर्माऽपि तथा मोक्षमवाप्नुयात् ॥ २८ ॥
एवं च देशनां कृत्वा विरते त्रिजगद्गुरौ । मण्डलेशः पुण्यपालः प्रभुं नत्वा व्यजिज्ञपत् ॥ २९ ॥
स्वामिन् स्वप्ना मयाऽद्याष्टौ दृष्टास्तत्र गजः कपिः । क्षीरद्रुः काकसिंहाब्जबीजकुंभा इमे क्रमात् ॥ ३० ॥
तदाख्याहि फलं तेषां भीतोऽस्मि भगवन्नहम् । इति पृष्टो जगन्नाथो व्याचकारेति तत्फलम् ॥ ३१ ॥
विवेकतौर्ग्याद् भूत्वाऽपि हस्तितुल्या अतः परम् । वत्स्यन्ति श्रावका लुब्धाः क्षणिकर्द्धिसुखे गृहे ॥ ३२ ॥
न दौस्थ्ये परचक्रे वा प्रव्रजिष्यन्त्युपस्थिते । आत्तामपि परिव्रज्यां त्यक्ष्यन्ति च कुसंगतः ॥ ३३ ॥
विरलाः पालयिष्यन्ति कुसंगेऽपि व्रतं खलु । इदं गजस्वप्नफलं कपिस्वप्नफलं त्वदः ॥ ३४ ॥
प्रायः कपिसमा लोलपरिणामाऽल्पसत्त्वकाः । आचार्यमुख्या गच्छस्थाः प्रमादं गामिनो व्रते ॥ ३५ ॥
ते विपर्यासयिष्यन्ति धर्मस्थानितरानपि । भाविनो विरला एव धर्मोद्योगपराः पुनः ॥ ३६ ॥
धर्मश्लथेषु ये शिक्षां प्रदास्यन्त्यप्रमादिनः । ते तैरुपहसिष्यन्ते ग्राम्यैर्ग्रामस्थपौरवत् ॥ ३७ ॥
इत्थं प्रवचनाऽवज्ञाऽतः परं हि भविष्यति । प्लवंगमस्वप्नफलमिदं जानीहि पार्थिव ! ॥ ३८ ॥ ॥ ३८५

क्षीरद्रुतुल्याः सुक्षेत्रे दातारः शासनार्चकाः । श्रावकास्ते तु रोत्स्यन्ते लिंगिभिर्वंचनापरैः ॥ ३९ ॥
तेषां च प्रतिभास्यन्ति सिंहसत्त्वभृतोऽपि हि । महर्षयः सारमेया इवासारमनिस्पृशाम् ॥ ४० ॥
आदास्यन्ते सुविहितविहारक्षेत्रपद्धतिम् । लिंगिनो बब्बूलसमाः क्षीरद्रुफलमीदृशाम् ॥ ४१ ॥
धृष्टस्वभावा मुनयः प्रायो धर्मार्थिनोऽपि हि । रंस्यन्ते न हि गच्छेषु दीर्घिकांभःस्विव द्विकाः ॥ ४२ ॥
ततोऽन्यगच्छिकैः सूरिप्रमुखैर्वंचनापरैः । मृगतृष्णानिभैः सार्धं चलिष्यन्ति जडाशयाः ॥ ४३ ॥
न युक्तमेभिर्गमनमिति तत्रोपदेशकान् । बाधिष्यन्ते नितान्तं ते काकस्वप्नफलं त्वदः ॥ ४४ ॥
सिंहतुल्यं जिनमतं जातिस्मृत्याद्यनुज्झितम् । विपत्स्यतेऽस्मिन् भरतवने धर्मज्ञवर्जिते ॥ ४५ ॥
न कुतीर्थिकनिर्यंचोऽभिभविष्यन्ति जातु तत् । स्वोत्पन्नाः कृमिवत्किं तु लिंगिनोऽशुद्धबुद्धयः ॥ ४६ ॥
लिंगिनोऽपि प्राक्प्रभावात् श्वापदाभैः कुतीर्थिकैः । न जात्वभिभविष्यन्ते सिंहस्वप्नफलं त्वदः ॥ ४७ ॥
अब्जाकरेष्वंबुजानि सुगन्धीनीव देहिनः । धार्मिका न भविष्यन्ति संजाताः सुकुलेष्वपि ॥ ४८ ॥
अपि धर्मपरा भूत्वा भविष्यन्ति कुसंगतः । ग्रामावकरकोत्पन्नगर्दभाब्जवदन्यथा ॥ ४९ ॥
कुदेशे कुकुले जाता धर्मस्था अपि भाविनः । हीना इत्यनुपादेयाः पद्मस्वप्नफलं त्वदः ॥ ५० ॥
यथा फलायाबीजानि बीजबुद्ध्योखरे वपेत् । तथा वप्स्यन्त्यकल्पानि कुपात्रे कल्पबुद्धितः ॥ ५१ ॥
यद्वा घुणाक्षरन्यायाद्यथा कोऽपि कृषीवलः । अबीजान्तर्गतं बीजं वपेत् क्षेत्रे निराशयः ॥ ५२ ॥

अकल्पान्तर्गतं कल्पमज्ञानाः श्रावकास्तथा । पात्रे दानं करिष्यन्ति बीजस्वप्नफलं स्वदः ॥ ५३ ॥
क्षमादिगुणपद्मांकाः सुचरित्राम्बुपूरिताः । रहःस्था भाविनः कुम्भा इव स्तोका महर्षयः ॥ ५४ ॥
श्लथाचारचरित्राश्च कलशा मलिना इव । यत्र तत्र भविष्यन्ति बहवो लिंगिनः पुनः ॥ ५५ ॥
समत्सराः करिष्यन्ति कलहं ते महर्षिभिः । उभयेषामपि तेषां साम्यं लोके भविष्यति ॥ ५६ ॥
गीतार्था लिंगिनश्च स्युः साम्येन व्यवहारिणः । जनेन ग्रहिलेनैवाग्रहिलग्रहिलो नृपः ॥ ५७ ॥
तथाहि पृथिवीपुर्यां पूर्णो नाम महीपतिः । सुबुद्धिस्तस्य चामात्यो निधानं बुद्धिसंपदः ॥ ५८ ॥
कालं तेनागमिष्यन्तं पृष्टोऽन्येद्युः सुबुद्धिना । लोकदेवोऽभिधानेन नैमित्तिकवरोऽवदत् ॥ ५९ ॥
मासादनन्तरं मेघो वर्षिता तज्जलं पुनः । यः पास्यति स सर्वोऽपि ग्रहग्रस्तो भविष्यति ॥ ६० ॥
कियत्यपि गते काले सुवृष्टिश्च भविष्यति । पुनः सज्जा भविष्यन्ति तत्पयःपानतो जनाः ॥ ६१ ॥
राज्ञे मंत्री तदाचख्यौ राजाऽप्यानकताडनात् । आख्यापयज्जने वारिसंग्रहार्थमथाऽऽदिशत् ॥ ६२ ॥
सर्वोऽपि हि तथा चक्रे ववर्षान्येऽह्नि चाम्बुदः । कियत्यपि गते काले संगृहीताम्बु निष्ठितम् ॥ ६३ ॥
अक्षीणसंग्रहाम्भस्कौ राजामात्यौ तु तौ विना । तदाम्बु लोकाः सामन्तप्रमुखाश्च पपुस्ततः ॥ ६४ ॥
तत्पानाद् ग्रहिलाः सर्वे ननृतुर्जहसुर्जगुः । स्वैरं विचेष्टिरेऽन्यत्र विना तौ राजमंत्रिणौ ॥ ६५ ॥
राजामात्यौ विसदृशौ सामन्ताद्या निरीक्ष्य ते । मंत्रयाञ्चक्रिरे नूनं ग्रहिलौ राजमंत्रिणौ ॥ ६६ ॥

अस्मद्विलक्षणाचाराविमकावपसार्य तत् । अपरौ स्थापयिष्यामः स्वोचितौ राजमंत्रिणौ ॥ ६७ ॥
मंत्री ज्ञात्वेति तन्मंत्रं नृपायाख्यन्नृपोऽवदत् । आत्मरक्षा कथं कार्या तेभ्यो छन्दं हि राजवत् ॥ ६८ ॥
मंत्र्यूचे ग्रहिलीभूय स्थातव्यं ग्रहिलैः सह । त्राणोपायो न कोऽप्यन्य इदं हि समयोचितम् ॥ ६९ ॥
कृत्रिमं ग्रहिलीभूय ततस्तौ राजमंत्रिणौ । तेषां मध्ये वर्त्तेते रक्षन्तौ निजसंपदम् ॥ ७० ॥
ततः सुसमये जाते शुभवृष्टौ नवोदके । पीते सर्वेऽभवन् स्वस्था मूलप्रकृतिधारिणः ॥ ७१ ॥
एवं च दुःषमाकाले गीतार्था लिंगिभिः सह । सदृशीभूय वर्त्स्यंति भाविस्वसमयेच्छवः ॥ ७२ ॥
इति श्रुत्वा स्वप्नफलं पुण्यपालो महामनाः । प्रबुद्धः प्राव्रजत्तत्र क्रमान्मोक्षमियाय च ॥ ७३ ॥
भगवन्तं प्रणम्याथ गणभृद्गौतमोऽभ्यधात् । तृतीयारकपर्यन्ते भगवानृषभोऽभवत् ॥ ७४ ॥
त्रयोविंशतिरर्हन्तस्तुरीयारेऽजितादयः । अभवन्नवसर्पिण्यां यावद्यूयं जगद्गुरो ! ॥ ७५ ॥
अतः परं पंचमारे दुःषमानामनि प्रभो ! । यद्भविष्यति तच्छंस प्रसीद परमेश्वर ! ॥ ७६ ॥
स्वाम्याख्यान्मम निर्वाणादतीतैर्वत्सरैस्त्रिभिः । सार्धाष्टमाससहितैः पंचमारः प्रवेक्ष्यति ॥ ७७ ॥
मन्निर्वाणाद्गतेष्वब्दशतेष्वेकोनविंशतौ । चतुर्दशाब्द्यां च म्लेच्छकुले चैत्राष्टमीदिने ॥ ७८ ॥
विष्टौ भावी नृपः कल्की स रुद्रोऽथ चतुर्मुखः । नामत्रयेण विख्यातः पाटलीपुत्रपत्तने ॥ ७९ ॥

---

१ मुत्था *C. L.* ॥ २ °मोऽरः *L.* ॥

तदा च मथुरापुर्यामकस्माद्रामकृष्णयोः । निपतिष्यत्यायतनं वाताहतजरद्रुवत् ॥ ८० ॥
क्रोधमानमायालोभाः सदा काष्ठे घुणा इव । नैसर्गिका भविष्यन्ति तस्मिन् क्रूरतराशये ॥ ८१ ॥
चौरा राजविरोधो राड्भयं गन्धरसक्षयः । दुर्भिक्षमीत्यवृष्टी च भविष्यन्ति तदा खलु ॥ ८२ ॥
कुमारोऽष्टादशाब्दानि तावन्त्येव च डामरी । ततः परं प्रचंडात्मा राजा कल्की भविष्यति ॥ ८३ ॥
नगरे पर्यटंस्तत्र पंच स्तूपान्निरीक्ष्य स: । परिप्रक्ष्यति पार्श्वस्थान् केनैते कारिता इति ॥ ८४ ॥
कथयिष्यन्ति तेऽप्येवं पुराऽऽसीद्विश्वविश्रुतः । नन्दो नाम क्षितिपतिर्धनैर्धनदसन्निभः ॥ ८५ ॥
हिरण्यमस्ति स्तूपेषु तेनेह निहितं बहु । नाऽऽदातुं तत्क्षमः कोपि बभूव पृथिवीपतिः ॥ ८६ ॥
कल्किराजस्तदाकर्ण्य भूरिलोभो निसर्गतः । खानयिष्यति तान् स्तूपान् हिरण्यं च ग्रहीष्यति ॥ ८७ ॥
सर्वतोऽपि पुरं तत्र सोऽर्थार्थी खानयिष्यति । अखिलांश्च महीपालांस्तृणवद्गणयिष्यति ॥ ८८ ॥
कल्किना खान्यमानायास्तदा च स्वपुरावनेः । नाम्ना लवणदेवी गौरुत्थास्यति शिलामयी ॥ ८९ ॥
चतुष्पथेऽवस्थिता सा भिक्षार्थमटतो मुनीन् । तत्पातिहार्यात्कूर्गाग्रभागेणावघट्टयिष्यति ॥ ९० ॥
स्थविराश्च वदिष्यन्ति भाविनं सूचयत्यसौ । जलोपसर्गमत्यन्तं तत् क्वापि व्रजताऽन्यतः ॥ ९१ ॥
श्रुत्वा तत्केऽपि यास्यन्ति विहारेण महर्षयः । अन्ये तु भक्तवस्त्रादिलुब्धा वक्ष्यन्त्यदः खलु ॥ ९२ ॥

१ तत्काल $L$ ॥

कालात्कर्मवशाद् भावि शुभं वा यदि वाऽशुभम् । कस्तन्निषेधितुमलं भूष्णुर्जिष्णुरपि स्वयम् ॥ ९३॥
ततः पाखंडिनः सर्वान् कल्की याचिष्यते करम् । तं च तस्मै प्रदास्यन्ति ते सारंभपरिग्रहाः ॥ ९४ ॥
अन्यैः पाखंडिभिर्दत्तः करो यूयं न दत्थ किम् ?। इति ब्रुवाणो लुब्धात्मा स साधूनपि रोत्स्यते ॥ ९५ ॥
साधवस्तं वदिष्यन्ति राजन् ! वयमकिंचनाः । भिक्षाभुजो धर्मलाभं विना किं दद्महे तव ? ॥ ९६ ॥
पुराणेषूक्तमस्त्येवं ब्रह्मनिष्ठांस्तपोधनान् । रक्षंस्तत्पुण्यषष्ठांशभाग्भवेदवनीपतिः ॥ ९७ ॥
अस्माद् दुष्कर्मणस्तस्माद्विरमावनिशासन ! । व्यवसायोऽशुभायायं पुरे राष्ट्रे च सर्वथा ॥९८॥
एवं मुनिवचः श्रुत्वा कल्की कोपिष्यति द्रुतम् । उद्भ्रूकुटिः करालास्यः कृतान्त इव भीषणः ॥ ९९ ॥
किमरे ! मर्तुकामोऽसि मर्त्याधम ! मुनीनपि । याचसेऽर्थं वक्ष्यतीति ततस्तं पुरदेवता ॥ १०० ॥
देवतावचसा तेन सिंहनादेन दन्तिवत् । भीतः कल्की नतिपूर्वं तान् साधून् क्षमयिष्यति ॥ १०१ ॥
भविष्यन्ति च भूयांसस्तदोत्पाता भयंकराः । अन्वहं कल्किराजस्य नगरक्षयसूचकाः ॥ १०२ ॥
अहोरात्रान् सप्तदश वर्षिष्यत्यथ वारिदः । गंगाप्रवाहश्चोद्धूत्य तत्पुरं प्लावयिष्यति ॥ १०३ ॥
तत्राऽऽचार्यः प्रातिपदः कोऽपि संघजनोऽपि च । पूर्लोकः कोऽपि कल्की च स्थास्यन्ति स्थलमूर्धनि ॥ १०४
गंगाप्रवाहपयसा परितोऽपि प्रसारिणा । यास्यन्ति निधनं सद्यो बहवः पुरवासिनः ॥ १०५ ॥
जलोपसर्गे विरते नन्दद्रव्येण तेन तु । कल्किराजः पुनरपि करिष्यति नवं पुरम् ॥ १०६ ॥

भविष्यन्त्यायतनानि विहरिष्यन्ति साधवः । वर्षिष्यति च कालेऽब्दः सस्यनिष्पत्तिकारणम् ॥ १०७ ॥
द्रम्मेण कुंभलाभेऽपि सस्यं न क्रेष्यते जनः । पंचाशदब्दीमेवं च सुभिक्षं भावि कल्किनि ॥ १०८ ॥
आसन्नमृत्युर्भूयोऽपि कल्की पाखंडिनोऽखिलान् । त्याजयिष्यति लिंगानि व्युपद्रोष्यति चोच्चकैः ॥१०९॥
ससंघं च प्रातिपदं न्यस्य गोवाटके तदा । याचिष्यते स भिक्षायाः षष्ठं भागं दुराशयः ॥ ११० ॥
संघः शक्राऽऽराधनाय कायोत्सर्गं करिष्यति । शासनदेव्यो वक्ष्यन्ति कल्किन् ! क्षेमाय न त्वदः ॥ १११ ॥
संघस्य कायोत्सर्गानुभावेन चलितासनः । वृद्धद्विजवपुर्भूत्वा शक्रस्तत्राऽऽगमिष्यति ॥ ११२ ॥
महासिंहासनासीनं कल्किनं पर्षदि स्थितम् । शक्रो वक्ष्यति किं त्वेते निरुद्धाः साधवस्त्वया ? ॥ ११३ ॥
कल्की भाषिष्यते शक्रं मत्पुरे निवसन्त्यमी । न मे करं तु यच्छन्ति भिक्षाषष्ठांशमप्यहो ॥ ११४ ॥
पाखंडाः करदाः सर्वे ममाभूवन्नमी तु न । दुर्नयेष्वेव बलाद्दापयितुं निरुद्धास्तेन वाटके ॥ ११५ ॥
तं जल्पिष्यति शक्रोऽपि नैनेषामस्ति किंचन । भिक्षांशमपि दास्यन्ति न कस्यापि कदाऽप्यमी ॥ ११६ ॥
भिक्षुभ्यो याचमानस्त्वं भिक्षांशं लज्जसे न किम् । तन्मुंचामूनन्यथा ते भाव्यनर्थो महान् खलु ॥ ११७ ॥
कुप्यन्निति गिरा कल्की वदिष्यत्यपरे भटाः ! । कंठे धृत्वा द्विजममुमपसारयत द्रुतम् ॥ ११८ ॥
इत्युक्ते कल्किनं कल्कपर्वतं पाकशासनः । चपेटाताडनात् सद्यो भस्मराशीकरिष्यति ॥ ११९ ॥
षडशीतिं वत्सराणामायुः संपूर्य कल्किराट् । नारको नरकावन्यां दुरन्तायां भविष्यति ॥ १२० ॥ ॥ ३९१

अनुशिष्याऽऽर्हतं धर्मं दत्ताख्यं कल्किनः सुतम् । राज्ये निवेश्य वन्दित्वा संघं शक्रो गमिष्यति ॥ १२१ ॥
पितुः पापफलं घोरं शक्रशिक्षां च संस्मरन् । दत्तः करिष्यति महीमर्हच्चैत्यविभूषिताम् ॥ १२२ ॥
पंचमारकपर्यन्तं यावदेवमतः परम् । प्रवृत्तिर्जिनधर्मस्य भविष्यति निरन्तरा । १२३ ॥
इदं हि भरतक्षेत्रं ग्रामाकरपुराऽऽकुलम् । धनधान्याऽऽचितमर्हत्कालेऽभूत्स्वर्गसन्निभम् ॥ १२४ ॥
ग्रामा नगरवत्स्वर्गसमानि नगराणि च । कुटुंबिनो नृपसमा नृपा वैश्रवणोपमाः ॥ १२५ ॥
आचार्याश्चन्द्रमस्तुल्याः पितरो देवतासमाः । श्वश्रवश्च जननीतुल्याः श्वशुराः पितृसन्निभाः ॥ १२६ ॥
सत्यशौचपरो धर्मोऽधर्मज्ञो विनयप्रियः । गुरुदेवार्चकः स्वस्त्रीसंतुष्टश्च तदा जनः ॥ १२७ ॥
अथाभूत्तं च विज्ञानं विद्या शीलं कुलं तथा । परचक्रेतिदस्युभ्योऽभूच्च भीर्न करो नवः ॥ १२८ ॥
अर्हद्भक्ताश्च राजानोऽवगीताश्च कुतीर्थिकाः । बभूवुरुपसर्गादीन्याश्चर्याणि दशापि च ॥ १२९ ॥
अतः परं दुःषमायां कषायैर्लुप्तधर्मधीः । भावी लोकोऽपमर्यादोऽत्युदकक्षेत्रभूरिव ॥ १३० ॥
यथा यथा यास्यति च कालो लोकस्तथा तथा । कुतीर्थिमोहितमतिर्भाव्यहिंसादिवर्जितः ॥ १३१ ॥
ग्रामाः श्मशानवत्प्रेतलोकवन्नगराणि च । कुटुंबिनश्चेटसमा यमदंडसमा नृपाः ॥ १३२ ॥
लुब्धा नृपतयो भृत्यान् ग्रहीष्यन्ति धनं निजान् । तद्भृत्याश्च जनमिति मात्स्यो न्यायः प्रवर्त्स्यति १३३
येऽन्त्यास्ते भाविनो मध्ये ये मध्यास्तेऽन्तिमाः क्रमात् । देशाश्च दोलायिष्यन्ते नावोऽसितपटा इव ॥१३४॥

त्रयोदशः सर्गः

चौर्यचौराः पीडयिष्यंत्युर्वीं भूपाः करेण तु । श्रेण्यो भूतग्रहप्राया लंचालुब्धा नियोगिनः ॥ १३५ ॥
भावी ¹विरोधः स्वजने जनः स्वार्थैकतत्परः । परार्थविमुखः सत्यलज्जादाक्षिण्यवर्जितः ॥ १३६ ॥
गुरूनाराधयिष्यन्ति शिष्याः शिष्येषु तेऽपि हि । श्रुतज्ञानोपदेशं न प्रदास्यन्ति कथंचन ॥ १३७ ॥
एवं गुरुकुलवासः क्रमादपगमिष्यति । मन्दा धीर्भाविनी धर्मे बहुसत्त्वाऽऽकुला च भूः ॥ १३८ ॥
न साक्षाद्भाविनो देवा विमंस्यन्ते सुताः पितॄन् । सर्पीभूताः स्नुषाः श्वश्र्वः कालरात्रिसमाः पुनः ॥१३९॥
दृग्विकारैः स्मितैर्जल्पैर्विलासैरपरैरपि । वेश्यामनुकरिष्यन्ति त्यक्तलज्जाः कुलस्त्रियः ॥ १४० ॥
श्रावकश्राविकाहानिश्चतुर्धा धर्मसंक्षयः । साधूनामथ साध्वीनां पर्वस्वप्यनिमंत्रणम् ॥ १४१ ॥
कूटतुला कूटमानं शाठ्यं धर्मेऽपि भावि च । सन्तो दुःस्थीभविष्यंन्ति सुस्थाः स्थास्यन्ति दुर्जनाः ॥१४२॥
मणिमंत्रौषधीतंत्रविज्ञानानां धनायुषाम् । फलपुष्परसानां च रूपस्य वपुरुन्नतेः ॥ १४३ ॥
धर्माणां शुभभावानां चान्येषां पंचमे त्वरे । हानिर्भविष्यति ततोऽप्यरे षष्ठेऽधिकं खलु ॥ १४४ ॥
क्रमादेवं क्षीयमाणपुण्ये काले प्रसर्पति । धर्मे धीर्भाविनी यस्य सफलं तस्य जीवितम् ॥ १४५ ॥
आचार्यो दुःप्रसहाख्यः फल्गुश्रीरिति साध्व्यपि । श्रावको ²नायिलो नाम सत्यश्री श्राविका पुनः ॥१४६॥
विमलवाहन इति राजमंत्री सुमुखाभिधः । अपश्चिमा भाविनोऽमी दुःषमायां हि भारते ॥ १४७ ॥

विरोधी *C. L. M.* ॥ २ नायिलो *L* । नागिलो *M* ॥

रत्निद्वयप्रमाणांगा विंशत्यब्दायुषश्च ते । तपो दुष्प्रसहादीनां चतुर्णां षष्ठमुत्कटम् ॥ १४८ ॥
दशवैकालिकसूत्रः स चतुर्दशपूर्ववित् । प्रबोधयिष्यति संघं तीर्थं दुष्प्रसहावधि ॥ १४९ ॥
ततोऽर्वाग्वर्त्स्यति धर्मो धर्मो नास्तीति यः पुनः । वदिष्यति स संघेन कर्तव्यः संघतो बहिः ॥ १५० ॥
द्वादशाब्दीं गृहे नीत्वाऽष्टाब्दीं दुष्प्रसहो व्रते । पर्यन्तेऽष्टमभक्तेन सौधर्मं कल्पमेष्यति ॥ १५१ ॥
पूर्वाह्णेऽथ चरित्रस्य समुच्छेदो भविष्यति । मध्याह्ने राजधर्मस्यापराह्णे जातवेदसः ॥ १५२ ॥
इत्थं च दुःषमा वर्षसहस्राण्येकविंशतिः । एकान्तदुःषमाकालोऽप्येवंमानो भविष्यति ॥ १५३ ॥
धर्मतत्त्वे प्रणष्टेऽथ हाहाभूतो भविष्यति । पशुवन्मातृपुत्रादिव्यवस्थावर्जितो जनः ॥ १५४ ॥
परुषाः पांशुभूयांसोऽनिष्टा वास्यन्ति वायवः । दिशश्च धूमायिष्यन्ति भीषणाश्च दिवानिशम् ॥ १५५ ॥
इन्दुः स्रक्ष्यत्यतिशीतं तप्स्यत्यत्युष्णमर्यमा । अतिशीतोष्णाभिहतो लोकः क्लेशमवाप्स्यति ॥ १५६ ॥
तदा च विरसा मेघाः क्षारमेघाम्लमेघकाः । विषाग्न्यशनिमेघाश्च वर्षिष्यन्त्यात्मसन्निभम् ॥ १५७ ॥
येन भावी कासः श्वासः शूलं कुष्ठं जलोदरम् । ज्वरः शिरोऽर्तिरन्येऽपि मनुष्याणां महाऽऽमयाः ॥१५८॥
दुःखं स्थास्यन्ति तिर्यञ्चो जलस्थलखचारिणः । भावी क्षेत्रवनारामलतातरुतृणक्षयः ॥ १५९ ॥
वैताढ्यऋषभकूटगंगासिन्धूर्विमुच्य च । समीभविष्यत्यखिलं गिरिगर्ताऽऽपगादिकम् ॥ १६० ॥

१ मुत्कटः D ॥

अंगारमर्मराभा भूर्भस्मरूपा भविष्यति । कदाचिद् धूलिबहुला कदाचित्सान्द्रकर्दमा ॥ १६१ ॥
रत्निमानपुरुषांगा दुर्वर्णा निष्ठुरोक्तयः । रोगार्ताः कोपना उच्चघाटाश्चिपिटनासिकाः ॥ १६२ ॥
निर्लज्जा वस्त्ररहिता भविष्यन्ति नराः स्त्रियः । आयुर्विंशतिरब्दानि नृणां स्त्रीणां तु षोडश ॥ १६३ ॥
गर्भं वक्ष्यति षड्वर्षा स्त्री दुःखप्रसवा तदा । स्थविरा षोडशाब्दा च भूयिष्ठसुतनप्तृका ॥ १६४ ॥
भाविनो बिलवासाश्च गिरौ वैताढ्यनामनि । द्वासप्ततिर्नद्युभयतटभूषु बिलानि तु ॥ १६५ ॥
कूले कूले कूलिनीनां बिलानि नव तत्र च । तिर्यञ्चस्तु भविष्यन्ति बीजमात्रतयैव हि ॥ १६६ ॥
पललाहारनिरता नृशंसा निर्विवेककाः । तदानीं च भविष्यन्ति मनुष्याद्या अशोभनः ॥ १६७ ॥
तदा रथपथमात्रं गंगासिन्धुनदीजलम् । प्रवक्ष्यति चलन्मत्स्यकच्छपादिभिराचितम् ॥ १६८ ॥
तत्रेत्य निशि मत्स्यादीन् कृष्ट्वा मोक्ष्यन्ति च स्थले । दिवा सूर्यत्विषा पक्वान् खादिष्यन्ति निशाऽन्तरे
एवं सदाऽपि भोक्ष्यन्ते यद्ध्यादि तदा न हि । न पुष्पं न फलं नान्नं न च शय्याऽऽसनादिकम् ॥ १७० ॥
भरतैरवतेष्वेवं दशस्वपि हि दुःषमा । तथाऽतिदुःषमाऽप्येकविंशत्यब्दसहस्रिका ॥ १७१ ॥
अरौ याववसर्पिण्यामन्त्योपान्त्यावुभौ च तौ । उत्सर्पिण्यां स्वकीयानुभावावाद्यद्वितीयकौ ॥ १७२ ॥
उत्सर्पिण्यां दुःषमदुःषमान्तसमयेऽम्बुदाः । भाविनः पञ्च सप्ताहवर्षिणस्ते पृथक् पृथक् ॥ १७३ ॥
तत्राद्यः पुष्करो नाम महीं निर्वापयिष्यति । द्वितीयः क्षीरमेघाख्यो धान्यान्युत्पादयिष्यति ॥ १७४ ॥

तृतीयो घृतमेघाख्यः स्नेहं संजनयिष्यति । तुर्यस्त्वमृतमेघाख्य ओषध्यादि करिष्यति ॥ १७५ ॥
पृथ्व्यादीनां रसं कर्ता रसमेघश्च पंचमः । पंचत्रिंशद्दिनीं वृष्टिर्भाविनी सौम्यदुर्दिना ॥ १७६ ॥
द्रुमौषधिलतावल्लीहरितादि निरीक्ष्य च । बिलेभ्यो निःसरिष्यन्ति मुदिता बिलवासिनः ॥ १७७ ॥
ते वक्ष्यन्ति भरतभूरभूत् पुष्पफलादिभृत् । भक्ष्यं नाऽतः परं मांसं त्याज्यो मांसादकश्च यः ॥ १७८ ॥
यथा यथैष्यति कालो वर्त्स्यन्ति हि तथा तथा । रूपसंहननायूंषि धान्यादीनि च भारते ॥ १७९ ॥
भविष्यन्ति सुखा वाता ऋतवः सलिलानि च । तिर्यञ्चश्च मनुष्याश्च गतरोगाः क्रमेण च ॥ १८० ॥
दुःषमान्ते भविष्यन्ति मध्येभाग्भरतावनि । कुलकराः सप्त तत्राऽऽदिमो विमलवाहनः ॥ १८१ ॥
सुदामा संगमश्चापि सुपार्श्वश्च चतुर्थकः । दत्तश्च सुमुखश्चैव संमुचिश्चेति ते क्रमात् ॥ १८२ ॥
तत्र जातिस्मरः पूर्वो नाम्ना विमलवाहनः । निवेशयिष्यति ग्रामपुरादीन् राज्यहेतवे ॥ १८३ ॥
संग्रहीष्यति गोगजाऽश्वाद्यथ व्यञ्जयिष्यति । शिल्पानि व्यवहारं च लिपीश्च गणितादि च ॥ १८४ ॥
उत्पन्ने दुग्धदध्यादौ सस्येषु ज्वलनेऽपि च । हितकामी स प्रजानां रन्धनाद्युपदेक्ष्यति ॥ १८५ ॥
दुःषमायामतीतायां शतद्वारे महापुरे । भद्रानाम्न्यां महादेव्यां संमुचेः पृथिवीपतेः ॥ १८६ ॥
नन्दनः श्रेणिकजीवो भविष्यत्यादितीर्थकृत् । पद्मनाभाभिधस्तुल्यो जन्ममानादिना मम ॥ १८७ ॥

१ °कामः L । °कारी M ॥

अतः परं पूर्ववच्च भविष्यन्ति जिनेश्वराः। प्रातिलोम्येन पूर्वार्हत्समाः सर्वेऽप्यमी क्रमात् ॥ १८८ ॥
तत्र श्रेणिकराड्जीवः पद्मनाभो जिनेश्वरः। सुपार्श्वजीवो भगवान् शूरदेवो द्वितीयकः ॥ १८९ ॥
तृतीयः पोट्टिलजीवः सुपार्श्वो जिनपुंगवः। जीवो दृढायुषस्तुर्यस्तीर्थनाथः स्वयंप्रभुः ॥ १९० ॥
कार्तिकस्य जीवः सर्वानुभूतिरिति पंचमः। जीवः शंखस्य षष्ठोऽर्हन् देवश्रुतोऽभिधानतः ॥ १९१ ॥
सप्तमो नन्दजीवस्तु जिनेन्द्र उदयाह्वयः। सुनन्दजीवोऽष्टमोऽर्हन् पेढाल इति नामतः ॥ १९२ ॥
नवमः केकसीजीवो जिनेन्द्रः पोट्टिलाभिधः। दशमो [1]रेवलिजीवः शतकीर्तिर्जिनेश्वरः ॥ १९३ ॥
अर्हन् सत्यकिजीवश्चैकादशः सुव्रताभिधः। द्वादशोऽर्हन्नममाख्यो जीवः कृष्णस्य शार्ङ्गिणः ॥ १९४ ॥
बलदेवस्य जीवोऽर्हन्निष्कषायस्त्रयोदशः। जिनेन्द्रो रोहिणीजीवो निष्पुलाकश्चतुर्दशः ॥ १९५ ॥
निर्ममः सुलसाजीवो जिनः पंचदशः पुनः। षोडशो रेवतीजीवश्चित्रगुप्तोऽभिधानतः ॥ १९६ ॥
गवालिजीवः समाधिर्नाम्ना सप्तदशो जिनः। जीवस्तु गार्गलेरष्टादशोऽर्हन् संवराभिधः ॥ १९७ ॥
द्वीपायनजीवस्त्वेकोनविंशोऽर्हन् यशोधरः। विजयो विंशतितमः कर्णजीवो जिनेश्वरः ॥ १९८ ॥
एकविंशो जिनो मल्लो यः पुरा नारदोऽभवत्। अंबडस्य पुनर्जीवो द्वाविंशो देवतीर्थकृत् ॥ १९९ ॥
त्रयोविंशोऽनन्तवीर्यो जीवो द्वारमदस्य तु। स्वातिजीवश्चतुर्विंशो भद्रकृन्नाम तीर्थकृत् ॥ २०० ॥

१ रेवति ८।

दीर्घदन्तो गूढदन्तः शुद्धदन्तस्तृतीयकः। तथा श्रीचन्द्रः श्रीभूतिः श्रीसोमः पद्म इत्यपि ॥ २०१ ॥
महापद्मो दशमाख्यस्तथा विमल इत्यपि। विमलवाहनोऽरिष्टो भाविनोऽमी च चक्रिणः॥ २०२ ॥(युग्मम्)
नन्दिश्च नन्दिमित्रश्च तथा सुन्दरबाहुकः। महाबाहुरतिबलो महाबलबलावपि ॥ २०३ ॥
द्विपृष्ठश्च त्रिपृष्ठश्च नवाऽमी अर्धचक्रिणः। चटत्प्रकर्षा रामाश्च तत्र प्रथमको बलः ॥ २०४ ॥
जयन्तोऽथाजितो धर्मः सुप्रभश्च सुदर्शनः। आनन्दो नन्दनः पद्मस्तथा संकर्षणोऽन्तिमः ॥ २०५ ॥
प्रत्यर्धचक्रिणश्चैते तिलको लोहजंघकः। वज्रजंघः केसरी च बलिः प्रह्लाद इत्यपि ॥ २०६ ॥
तथाऽपराजितो भीमः सुग्रीवो नवमः पुनः। इत्युत्सर्पिण्यां त्रिषष्टिः शलाकापुरुषा अमी ॥ २०७ ॥
इत्युक्तवन्तं श्रीवीरं सुधर्मा गणभृद्वरः। पप्रच्छ केवलादित्यः किं कुत्रोच्छेदमेष्यति ? ॥ २०८ ॥
स्वाम्यथाऽऽख्यन्मम मोक्षाद्गते काले कियत्यपि। जंबूनाम्नस्तव शिष्यात् परं भावि न केवलम्॥ २०९ ॥
उच्छिन्ने केवले भावी न मनःपर्ययोऽपि हि। पुलाकलब्धिश्च नचावधिश्च परमो न हि ॥ २१० ॥
क्षपकोपशमश्रेण्यौ न च नाऽऽहारकं वपुः। जिनकल्पो न हि न हि संयमत्रितयं तथा ॥ २११ ॥
शिष्यः सेत्स्यति ते जंबूः स चतुर्दशपूर्वभृत्। जंबूशिष्यः प्रभवश्च भविता सर्वपूर्वभृत् ॥ २१२ ॥
शय्यंभवस्तु तच्छिष्यो द्वादशांगी भविष्यति। दशवैकालिकग्रन्थं स्रक्ष्यत्युद्धृत्य स श्रुतात्॥ २१३ ॥
तस्य शिष्यो यशोभद्रो भविता सर्वपूर्वभृत्। संभूतभद्रबाहू च तच्छिष्यौ सर्वपूर्विणौ ॥ २१४ ॥

स्थूलभद्रोऽथ संभूतान्तेवासी सर्वपूर्वभृत् । ततोऽन्तिमा चतुःपूर्वी व्युच्छेदमुपयास्यति ॥ २१५ ॥
महागिरिसुहस्त्याद्या वज्रान्ता दशपूर्विणः । ततः परं भविष्यन्ति तीर्थस्यास्य प्रवर्तकाः ॥ २१६ ॥
एवमाख्याय समवसरणान्निर्ययौ प्रभुः । हस्तिपालनरेन्द्रस्य शुल्कशालां जगाम च ॥ २१७ ॥
स्वामी तद्दिनयामिन्यां विदित्वा मोक्षमात्मनः । दध्याववहो गौतमस्य मयि स्नेहो निरत्ययः ॥ २१८ ॥
स एव केवलज्ञानप्रत्यूहोऽस्य महात्मनः । स छेद्य इति विज्ञाय निजगादेति गौतमम् ॥ २१९ ॥
देवशर्मा द्विजो ग्रामे परस्मिन्नस्ति स त्वया । बोधं प्राप्स्यति तद्धेतोस्तत्र त्वं गच्छ गौतम ! ॥ २२० ॥
यथाऽऽदिशति मे स्वामीत्युदित्वा च प्रणम्य च । जगाम गौतममुनिस्तथा चक्रे प्रभोर्वचः ॥ २२१ ॥
तदा च कार्तिकदर्शनिशायाः पश्चिमे क्षणे । स्वातिऋक्षे वर्तमाने कृतषष्ठो जगद्गुरुः ॥ २२२ ॥
कल्याणफलपाकानि पंचपंचाशतं तथा । तावन्त्यघविपाकानि जगावध्ययनानि तु ॥ २२३ ॥
षट्त्रिंशतमप्रश्नव्याकरणान्यभिधाय च । प्रधानं नामाध्ययनं जगद्गुरुर्भावयत् ॥ २२४ ॥
स्वामिनो मोक्षसमयं विज्ञायाऽऽसनकंपनः । सुरासुरेन्द्रास्तत्रेयुः सर्वेपि सपरिच्छदाः ॥ २२५ ॥
सहस्राक्षोऽश्रुपूर्णाक्षः प्रणम्याऽथ जगद्गुरुम् । विरचय्यांजलिं मूर्ध्नि ससंभ्रममदोऽवदत् ॥ २२६ ॥
गर्भे जन्मनि दीक्षायां केवले च तव प्रभो ! । हस्तोत्तरर्क्षमधुना तद्गन्ता भस्मकग्रहः ॥ २२७ ॥
विपद्यमानस्य जन्मऋक्षं क्रामन् स दुर्ग्रहः । बाधिष्यते ते सन्तानं सहस्रे शरदामुभे ॥ २२८ ॥

प्रतिपालय तन्नाथ ! यस्य संक्रमणक्षणम् । स यथा त्वत्प्रभावेण विफलो भवति ग्रहः ॥ २२९ ॥
कुस्वप्नाः कुशकुनानि दुर्ग्रहा यान्ति शान्तताम् । अन्येषामपि सर्वेषां हृदि त्वां धारयन्ति ये ॥ २३० ॥
किं पुनर्यत्र साक्षात्त्वं स्वामिन् ! समवतिष्ठसे । प्रसीद तत् क्षणं तिष्ठ दुर्ग्रहोपशमोऽस्तु तत् ॥ २३१ ॥
स्वाम्यथोचे न कोऽप्यायुः शक्र ! सन्धातुमीश्वरः । विदन्नपि वदस्येवं किं तीर्थप्रेममोहितः ॥ २३२ ॥
प्रवर्तनाद् दुःषमायास्तीर्थबाधा भविष्यति । भवितव्यताऽनुसाराद्भस्मकस्योदयोऽप्यभूत् ॥ २३३ ॥
वज्रिणं बोधयित्वैवं सार्धषण्मासवर्जिताम् । त्रिंशदब्दीं केवलित्वे परिपाल्य जगद्गुरुः ॥ २३४ ॥
पर्यङ्कासननिषण्णो योगे कायस्य बादरे । स्थितो वाङ्मनसयोगावरौत्सीदथ बादरौ ॥ २३५ ॥
सूक्ष्मं च वपुषो योगमास्थाय परमेश्वरः । रुरोध बादरं काययोगं योगविचक्षणः ॥ २३६ ॥
तौ च सूक्ष्मौ वाङ्मनसयोगावप्यरुणत्प्रभुः । इति सूक्ष्मक्रियं शुक्लध्यानं चक्रे तृतीयकम् ॥ २३७ ॥
अपि सूक्ष्मं तनूयोगं विनिरुध्य जगद्गुरुः । समुच्छिन्नक्रियं शुक्लध्यानं तुर्यं दधावथ ॥ २३८ ॥
पंचह्रस्वाक्षरोच्चारमितकालेन तेन तु । ध्यानेन तुर्येण तुर्यपुमर्थान्यभिचारिणा ॥ २३९ ॥
एरंडबीजवद्बन्धाभावादूर्ध्वगतिः प्रभुः । पथा स्वभावऋजुना मोक्षमेकमु(उ)पाययौ ॥ २४० ॥
नारकाणामपि तदा क्षणमेकमभूत् सुखम् । न ये सुखलवस्यापि कदाचिदपि भाजनम् ॥ २४१ ॥
वत्सरोऽभूत्तदा चन्द्रो मासस्तु प्रीतिवर्धनः । नन्दिवर्धनकः पक्षोऽग्निवेशो नाम वासरः ॥ २४२ ॥ ॥४००

सोऽन्येन नाम्नोपशमो देवानन्दा तु सा निशा । नैर्ऋतीत्यन्यनाम्ना तु लवोऽर्च्य इति संज्ञया ॥ २४३ ॥
प्राणः शुक्लाभिधानश्च स्तोकः सिद्धाभिधानकः । सर्वार्थसिद्धो मुहूर्तो नागाख्यं करणं पुनः ॥ २४४ ॥
तदानीं च समुत्पन्ना नाम्ना कुंथुरनुद्धरा । अस्पंदा सा न दृग्ग्राह्या स्पन्दमाना तु दृश्यते ॥ २४५ ॥
संयमोऽतः परं भावी दुष्पाल इति चिन्तया । तां दृष्ट्वा साधवः साध्व्यो बहवोऽनशनं व्यधुः ॥ २४६ ॥
निर्वाणे स्वामिनि ज्ञानदीपके द्रव्यदीपकान् । तदानीं रचयामासुः सर्वेऽपि पृथिवीभुजः ॥ २४७ ॥
तदाप्रभृति लोकेऽपि पर्व दीपोत्सवाभिधम् । सर्वतो दीपकरणात्तस्यां रात्रौ प्रवर्तते ॥ २४८ ॥
जगद्गुरोर्वपुर्नत्वा बाष्पाविलदृशः सुराः । अदूरे तस्थुरथ ते शोचन्तः स्वमनाथकम् ॥ २४९ ॥
शक्रोऽथ धैर्यमालंब्य नन्दनादिवनाहृतैः । गोशीर्षचन्दनैधोभिरेकान्तेऽरचयच्चिताम् ॥ २५० ॥
क्षीरोदसागरांभोभिर्वपुरस्नपयत् प्रभोः । विलिलेप च दिव्येनांगरागेण स्वयं हरिः ॥ २५१ ॥
[1]आमोच्य वाससी दिव्ये शक्रः स्वामिवपुः स्वयम् । उदध्रे नयनांभोभिर्भूयोऽपि स्नपयन्निव ॥ २५२ ॥
विमानवरकल्पायां शिबिकायां प्रभोर्वपुः । शक्रो न्यधाद् दृश्यमानः सास्रदृग्भिः सुरासुरैः ॥ २५३ ॥
स्वामिशासनवन्मूर्ध्ना तां स्वामिशिबिकामथ । कथंचिद्रुद्धशोकः समुद्दधार पुरन्दरः ॥ २५४ ॥
ववृषुस्तत्र पुष्पाणि दिव्यानि त्रिदिवौकसः । व्याहरन्तो जय जयेत्युच्चैर्वन्दिवृन्दवत् ॥ २५५ ॥

---

१ अमोच्य *C, L, D* ॥

सुराः स्वनयनांभोजपयोभिः पुनरुक्तया । गन्धांबुवृष्ट्या परितः सिषिचुर्वसुधातलम् ॥ २५६ ॥
जगुस्तारं च गन्धर्वा गन्धर्वा इव चामराः । स्मारं स्मारं स्वामिगुणानुद्गृणन्तो मुहुर्मुहुः ॥ २५७ ॥
मृदंगपणवादीनि वाद्यानि शतशो दृढम् । शुमदस्ताडयामासुर्निजोरःस्थलवच्छुचा ॥ २५८ ॥
स्वामिनः शिबिकाऽग्रे च ननृतुः सुरयोषितः । स्खलच्चारीकरणाः शोकान्नर्तक्योऽभिनवा इव ॥ २५९ ॥
दिव्यैर्दुकूलैर्हाराद्यैर्भूषणैः पुष्पदामभिः । आनर्चुः शिबिकां भर्तुश्चतुर्विधदिवौकसः ॥ २६० ॥
श्रावकाः श्राविकाश्चापि भक्तिशोकसमाकुलाः । विदधू रासकगीत रुदितं च सहैव हि ॥ २६१ ॥
तदा साधुषु साध्वीषु चात्यन्तं विदधे पदम् । शोकः कोकनदस्वकाल्यग्रे निद्रेव भूयसी ॥ २६२ ॥
ततश्चितायां निदधे स्वामिनोऽङ्गं पुरन्दरः । विदीर्यमाणहृदय इवाऽऽर्त्तः शोकशंकुना ॥ २६३ ॥
अग्निमग्निकुमाराश्च चितामध्ये विचक्रिरे । तद्दीपनं विचक्रुश्च वायुं वायुकुमारकाः ॥ २६४ ॥
गन्धधूपान् घृतमधुकुंभांश्च शतशोऽपरे । ज्वलन्त्यां तत्र चित्यायां चिक्षिपुस्त्रिदिवौकसः ॥ २६५ ॥
मांसादिषु प्रदग्धेषु क्षीरोदादाहृतैर्जलैः । चितां विध्यापयामासुर्मेघिनि स्तनितामराः ॥ २६६ ॥
शक्रेशानावूर्ध्वदंष्ट्रे दक्षिणादक्षिणे ततः । अधोदंष्ट्रे तु चमरबली जगृहतुः प्रभोः ॥ २६७ ॥
इन्द्रास्त्वन्ये सुराश्चान्यान्दन्तानस्थीनि च प्रभोः । जगृहुस्तच्चिताभस्म नरास्तु शिवकांक्षिणः ॥ २६८ ॥
तस्याश्चितायाः स्थानेऽथ स्थाने कल्याणसंपदाम् । अमरा रचयामासुः स्तूपं रत्नमयं परम् ॥ २६९ ॥

निर्वाण[1]महमेवं ते कृत्वा भर्तुः सुरा ययुः । नन्दीश्वरे विदधुश्चाष्टाह्निकां शाश्वतार्हताम् ॥ २७० ॥
गत्वा स्वः स्वविमानान्तर्माणवस्तम्भमूर्धसु । वृत्तवज्रसमुद्गेषु स्वामिदंष्ट्रा न्यधुः सुराः ॥ २७१ ॥
गार्हस्थ्ये त्रिंशदब्दी द्विचत्वारिंशत्समा व्रते । इति द्वासप्ततिर्वर्षाण्यायुर्वीरप्रभोरभूत् ॥ २७२ ॥
श्रीपार्श्वनाथनिर्वाणात् सार्धे वर्षशतद्वये । गते श्रीवीरनाथस्य निर्वाणं समजायत ॥ २७३ ॥
इतश्च देवशर्माणं बोधयित्वा निवृत्तवान् । शुश्राव गौतमः स्वामिनिर्वाणं सुरवार्तया ॥ २७४ ॥
गौतमस्वाम्यथोत्ताम्यंश्चिन्तयामास चेतसि । एकस्याह्नः कृते भर्त्रा किमहं प्रेषितोऽस्मि हा ! ॥ २७५ ॥
जगन्नाथमियत्कालं सेवित्वाऽन्ते न दृष्टवान् । अधन्यः सर्वथाऽस्म्येष धन्यास्ते तत्र ये स्थिताः ॥ २७६ ॥
गौतम ! त्वं वज्रमयो वज्रादप्यधिकोऽसि वा । श्रुत्वाऽपि स्वामिनिर्वाणं शतधा यन्न दीर्यसे ॥ २७७ ॥
यद्वाऽऽदितोऽपि भ्रान्तोऽहं यद्रागं रागवर्जिते । ममत्वं निर्ममे चास्मिन् कृतवानीदृशे प्रभौ ॥ २७८ ॥
रागद्वेषप्रभृतयः किं चामी भवहेतवः । हेतुना तेन च त्यक्तास्तेनापि परमेष्ठिना ॥ २७९ ॥
ईदृशे निर्ममे नाथे ममत्वेन ममाऽप्यलम् । ममत्वं सममत्वेऽपि मुनीनां न हि युज्यते ॥ २८० ॥
एवं शुक्लध्यानपरः क्षपकश्रेणिभाक् क्षणात् । घातिकर्मक्षयात्प्राप केवलं गौतमो मुनिः ॥ २८१ ॥
तत्र द्वादशवत्सरीं क्षितितले भव्यान् प्रबोध्योच्चकैः, स्वामीवामलकेवलर्द्धिरमरैरभ्यर्चितो गौतमः ।

१ °महिमानं L ॥

गत्वा राजगृहे पुरे क्षतभवोपग्राहिकर्मा प्रभु-र्भूत्वा मासमुपोषितः पदमगादक्षीणशर्मास्पदम् ॥ २८२ ॥
मुक्ते तत्र च पंचमो गणधरो लब्ध्वा सुधर्मप्रभु-र्ज्ञानं पंचममन्वशाच्चिरतरं धर्मं जनान् क्ष्मातले ।
प्राप्तो राजगृहाभिधाननगरे निःशेषमप्यन्यदा, जंबूस्वामिमुनेरथ नमनयं संघं निजं निर्ममे ॥ २८३ ॥
तस्मिन्नेव पुरे सुधर्मगणभृत्क्षीणाष्टकर्मा क्रमा-त्तुर्यध्यानधरोऽपुनर्भवमगादद्वैतसौख्यं पदम् ।
पश्चादन्तिमकेवली क्षितितले श्रीवीरमार्गाग्रणी-र्धर्मं भव्यजनान् प्रबोध्य सुचिरं जंबूप्रभुश्चान्यदा ॥२८४॥

त्रैलोक्येऽपि हि सात्त्विकेष्वनवधेः प्राग्जन्ममोक्षावधि ।
श्रीमद्वीरजिनेश्वरस्य चरितं को वक्तुमीशोऽखिलम् ॥
अस्ताघस्य तथापि हि प्रवचनाम्भोधेर्गृहीत्वा लवं
किंचित्कीर्तितमीदृशं ननु मया स्वान्योपकारेच्छया ॥ २८५ ॥

॥ इत्याचार्यश्रीहेमचन्द्रसूरिविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये दशमपर्वणि श्रीमहावीरनिर्वाणगमन-वर्णनो नाम त्रयोदशः सर्गः ॥

## समाप्तं चेदं दशमं पर्व[1][2]

१ परिपूर्णमिदं D ॥ २ पर्वणि परिपूर्णमिदं त्रिषष्टिशलाका पुरुषचरितं महाकाव्यमिति L ॥

# अथ प्रशस्तिः[1]

शिष्यो जंबूमहामुनेः प्रभव इत्यासीदमुष्यापि च ।
श्रीशय्यंभव इत्यमुष्य च यशोभद्राभिधानो मुनिः॥
संभूतो मुनिभद्रबाहुरिति च द्वौ तस्य शिष्योत्तमौ ।
संभूतस्य च पादपद्ममधुलिट् श्रीस्थूलभद्राह्वयः ॥ १ ॥
वंशक्रमागतचतुर्दशपूर्वरत्न-कोशस्य तस्य दशपूर्वधरो महर्षिः ।
नाम्ना महागिरिरिति स्थिरतागिरीन्द्रो, ज्येष्ठोऽन्तिषत्समजनिष्ट विशिष्टलब्धिः ॥ २ ॥
शिष्योऽन्यो दशपूर्वभृन्मुनिवृषो, नाम्ना सुहस्तीत्यभू-
द्यत्पादांबुजसेवनात्समुदित-प्राज्यप्रबोधर्द्धिकः ॥
चक्रे संप्रतिपार्थिवः प्रतिपुर-ग्रामाकरं भारते ।
ऽस्मिन्नर्द्धे जिनचैत्यमंडितमिला-पृष्ठं समन्तादपि ॥ ३ ॥

१ नास्ति C. L. D. प्रतिषु प्रशस्तिः॥

अजनि सुस्थितसुप्रतिबुद्ध इत्यभिधयाऽऽर्यसुहस्तिमहामुनेः ।
शमधनो दशपूर्वधरोऽनिघ-द्रुवमहातरुभञ्जनकुञ्जरः ॥ ४ ॥

महर्षिसंसेवितपादसन्निधेः, प्रचारभागाल्लवणोदसागरम् ।
महान् गणः कोटिक इत्यभूत्ततो, गंगाप्रवाहो हिमवद्गिरेरिव ॥ ५ ॥

तस्मिन् गणे कतिपयेष्वपि यातवत्सु, साधूत्तमेषु चरमो दशपूर्वधारी।
उद्दामतुंबवनपत्तनवज्रस्वामि-वज्रं महामुनिरजायत वज्रसूरिः ॥ ६ ॥

दुर्भिक्षे समुपस्थिते प्रलयवद्भीमत्वभाज्यन्यदा ।
भीतं न्यस्य महर्षिसंघमभितो, विद्यावदानः पटे ॥
योऽभ्युद्धृत्य करांबुजेन नभसा, पुर्यामनैषीन्महा- ।
पुर्यां मंक्षु सुभिक्षधामनि तपोधाम्नामसीम्नां निधिः ॥ ७ ॥

तस्माद्वज्राभिधा शाखाऽभूत् कोटिकगणद्रुमे । उच्चनागरिकामुख्यशाखात्रितयसोदरा ॥ ८ ॥
तस्यां च वज्रशाखायां निलीनमुनिषट्पदः । पुष्पगुच्छायितो गच्छश्चन्द्र इत्याख्ययाऽभवत् ॥ ९ ॥

धर्मध्यानसुधासुधांशुरमल-ग्रन्थार्थरत्नाकरो, भव्यांभोरुहभास्करः स्मरकरि-प्रोन्माथकंठीरवः ।
गच्छे तत्र बभूव संयमधनः, कारुण्यराशिर्यशो-भद्रः सूरिरपूरि येन भुवनं, शुभ्रैर्यशोभिर्निजैः ॥ १० ॥
श्रीमन्नेमिजिनेन्द्रपावितशिर-स्यद्रौ स संलेखनां, कृत्वाऽऽदौ प्रतिपद्य चानशनं, प्रान्ते शुभध्यानभाक् ॥
तिष्ठन् शान्तमनास्त्रयोदशदिना-न्याहारमुक्तो मुनिः पूर्वं सद्‌र्षिसंयमकथाः, सत्यापयामासिवान्॥ ११ ॥

श्रीमान्प्रद्युम्नसूरिः, समजनि जनिता-नेकभव्यप्रबोध-।
स्तच्छिष्यो विश्वविश्व-प्रथितगुणगणः, प्रावृडंभोदवद्यः ॥
प्रीणाति स्माखिलक्ष्मां, प्रवचनजलधे-रुद्धृतैरर्थनीरै-
रानल्प स्थानकानि, श्रुतिविषयसुधा-सारसद्रुंचि विष्वक् ॥ १२ ॥
सर्वग्रन्थरहस्यरत्नमुकुरः, कल्याणवल्लीतरुः ।
कारुण्यामृतसागरः प्रवचन-व्योमांगणाहस्करः ॥
चारित्रादिकरत्नरोहणगिरिः, क्ष्मां पावयन् धर्मराट्
सेनानीर्गुणसेनसूरिरभव-च्छिष्यस्तदीयस्ततः ॥ १३ ॥

शिष्यस्तस्य च तीर्थमेकमवनेः, पावित्र्यकृज्जंगमं ।
स्याद्वादत्रिदशापगाहिमगिरि-र्विश्वप्रबोधार्यमा ॥
कृत्वा स्थानकवृत्तिशान्तिचरिते, प्राप्तः प्रसिद्धिं परां ।
सूरिर्भूरितपःप्रभाववसतिः, श्रीदेवचन्द्रोऽभवत् ॥ १४ ॥

आचार्यो हेमचन्द्रोऽभूत्तत्पादांबुजषट्पदः । तत्प्रसादादधिगतज्ञानसंपन्महोदयः ॥ १५ ॥

जिष्णुश्चेदिदशार्णमालवमहाराष्ट्रापरान्तं कुरून् ।
सिन्धूनन्यतमांश्च दुर्गविषयान्, दोर्वीर्यशक्त्या हरिः ॥
चौलुक्यः परमार्हतो विनयवान्, श्रीमूलराजान्वयी ।
तं नत्वेति कुमारपालपृथिवी-पालोऽब्रवीदेकदा ॥ १६ ॥

पापर्द्धिद्यूतमद्य-प्रभृति किमपि यन्नारकायुर्निमित्तं ।
तत्सर्वं निर्निमित्तोपकृतिकृतधियां, प्राप्य युष्माकमाज्ञाम् ॥
स्वामिन्नुर्व्यां निषिद्धं, धनमसुतमृत-स्याथ मुक्तं तथार्ह- ।
चैत्यैरुत्तंसिता भू-रभवमिति समः, संप्रतेः संप्रतीह ॥ १७ ॥

पूर्वं पूर्वजसिद्धराजनृपतेर्भक्तिस्पृशो याच्ञया, सांगं व्याकरणं सुवृत्तिसुगमं चक्रुर्भवन्तः पुरा ॥
मद्धेतोरथ योगशास्त्रममलं लोकाय च द्व्याश्रय- छन्दोऽलंकृतिनामसंग्रहमुखान्यन्यानि शास्त्राण्यपि ॥१८॥

लोकोपकारकरणे स्वयमेव यूयं, सज्जाः स्थ यद्यपि तथाप्यहमर्थयेऽदः ।
मादृग्जनस्य परिबोधकृते शलाका-पुंसां प्रकाशयत वृत्तमपि त्रिषष्टेः ॥ १९ ॥

तस्योपरोधादिति हेमचन्द्रा-चार्यः शलाकापुरुषेतिवृत्तम् ।
धर्मोपदेशैकफलप्रधानं, न्यवीविशच्चारुगिरां प्रपंचे ॥ २० ॥

जंबूद्वीपारविन्दे, कनकगिरिरसा-वत्सुमे कर्णिकात्वं
यावद्यावच्च धत्ते, जलनिधिरथवे-ष्टनरीयत्वमुच्चैः ।
यावद्व्योमाध्वयान्तौ, तरणिशशधरौ, आक्रमतस्तावदेतत्
काव्यं नाम्ना शलाका-पुरुषचरितमि-त्यस्तु जैनं धरित्र्याम् ॥ २१ ॥

इति प्रशस्तिः

# शुद्धिपत्रकम्

| पृष्ठम् | पंक्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ४ | ३ | ग्रीष्म॰ | गीष्म॰ |
| ९ | ६ | क्रद्धः | क्रुद्धः |
| १२ | १० | ॰पृष्ठ॰ | पृष्ठा॰ |
| ,, | ११ | अशा॰ | आशा॰ |
| १५ | ७ | चौत्त॰ | चोत्त॰ |
| २० | ८ | क्षम्यतु | क्षाम्यतु |
| २१ | ८ | तीर्थ॰ | तीर्थं॰ |
| २६ | ७ | ॰न्यधात् | ॰न्यधात् |
| ,, | १४ | २ठ्य॰ | ३व्य॰ |
| २८ | ९ | ॰यीक॰ | ॰यिक॰ |
| ४२ | १२ | प्रभो | प्रभौ |
| ६२ | १२ | वत्सा॰ | वत्स॰ |
| ७० | १३ | *इतो | इतो |
| ,, | ,, | मैखो | *मैखो |
| ७४ | १ | मार्ग | मार्गं |
| ८४ | १ | ॰क्षगाभूत्रवात | ॰क्षगोभूत्रवेति |
| ,, | १२ | ॰लाढा | ॰लाढा॰ |
| ,, | १४ | ॰लाटा॰ | ॰लाटा॰ |
| ८६ | ७ | ॰पणात् | ॰पेणान |
| ९१ | ११ | कुंडाकें | ॰कुंडाके |
| ९२ | ४ | ॰दगुरुः | ॰दगुरुः |
| ९४ | ९ | ॰भूञ्त्र | ॰भूम्ञ्त्र |
| ९५ | ९ | कम्पे | चकम्पे |
| ९६ | १ | जगात्त्रा॰ | जगत्त्रा॰ |
| ९८ | १२ | दास्यापि | दास्यामि |
| १०८ | ६ | वेदय॰ | वेद(श)य॰ |
| ११२ | १३ | बालुकाः | बालुकां |
| ११६ | १ | नाम्ना | नाम्ना |

॥ ४१० ॥

| पृष्ठम् | पंक्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १२३ | ११ | बिडोज° | बिडौज° |
| १२७ | १२ | °मिम° | °मभि° |
| १३४ | ६ | चोद्धाघाट° | चोद्धाट° |
| १४० | ८ | नादस | नादेन |
| १४४ | ९ | कञ्च्यते | बञ्च्यते |
| १४५ | ८ | °दीऽता° | °दीता° |
| १४८ | १४ | पुमान् | पुमान् |
| १५१ | १० | ह्युयुप्ते | ह्युप्ते |
| १५२ | ८ | °म्युग्यू° | °म्याग्यू° |
| १५४ | १० | प्रश्न° | प्रश्न° |
| १५६ | ४ | °लिहि° | °चिहि° |
| १६० | ६ | °कीयेयै° | °कीयै° |
| ,, | ८ | °वाऽर° | °वाऽऽर° |
| १७१ | १४ | °वस्र° | °वस्त्र° |

| पृष्ठम् | पंक्ति | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १७६ | १४ | °कमय° | °कर्पय° |
| १८० | ७ | तिमती° | पूतिमती° |
| १८७ | ३ | स्मत्वो° | स्मृत्वो° |
| १८८ | २ | ततच्यु° | ततश्च्यु° |
| ,, | १३ | °मुद्ददधुं | °मुद्धदधुं |
| १८९ | १ | बन्धच्छद | बन्धच्छेदं |
| १८९ | २ | विषं | त्रिषं |
| १८९ | ८ | नीव्र | °नीव्र |
| २०२ | ७ | °दुखा° | °दुःखा° |
| २०६ | ५ | तस्यैवै | तस्यैव |
| २०८ | १३ | °भमं° | °भयमं° |
| २१२ | ४ | सक्रन् स | सक्रन् सक्रन् |
| २१६ | ११ | इभ्यो | इभ्यो (भो) |
| २२३ | ५ | यथाग्न | यथाग्ने |

॥ ४१

| पृष्ठम् | पंक्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २२६ | ५ | °न्मिया° | °न्मिथ्या |
| २२८ | ४ | निमातु | निर्मातुं |
| २३० | ८ | केर्थं | कथं |
| २३२ | ८ | °स्तत्प्रपेदे° | °स्तत्प्रपेद |
| २३२ | १४ | L. L. ॥ | C. L. ॥ |
| २३५ | ८ | स्वच्छ° | स्वेच्छ° |
| २४० | ६ | तस्या | तस्यां |
| २४३ | ७ | आजा° | आजी° |
| २४४ | ७ | °द्भिरि° | °द्रिरि° |
| २४७ | १ | म | मे |
| २४८ | ३ | वधत | वर्धेते |
| २५६ | ६ | सुमगे° | सुमंग° |
| २५९ | १४ | चिह्न° | †चिह्न° |
| २६७ | ६ | विरसेषु | सरसेषु |
| २६७ | १४ | याचर | याचरव |
| २७२ | १२ | नैरकं | नैरके |
| २७५ | ८ | मवेऽपि | सर्वेऽपि |
| २८१ | १० | तल्प | तल्पे |
| २८७ | ४ | त | ते |
| २८८ | १० | स्रग्व | स्रग्वी |
| २९४ | १ | तऽवदन | तेऽवदन् |
| ,, | ६ | पुरुषं | पुरुषं |
| ,, | ११ | प्रखरि° | प्रैखरि° |
| ,, | ,, | श्राणि° | श्रेणि° |
| २९५ | १ | तमथ | तमर्थं |
| ,, | ६ | °कनाथे | °केनाथ |
| ,, | ,, | स्वांक | स्वांके |
| २९६ | ११ | साधि | साधिदं |

| पृष्ठम् | पंक्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २९८ | ७ | सहितौ | °सहितौ |
| ३०३ | १ | ब्रत्य | दुर्भृत्य |
| ,, | ,, | धृतुं | भर्तुं |
| ,, | ४ | धृत° | भृत° |
| ३०७ | १० | °द्रचना° | द्वचना° |
| ३१२ | ३ | चैग्ये | चैत्ये |
| ,, | ४ | °कौशिकी | °कैशिकी° |
| ,, | ९ | मागम: | °समागम: |
| ३१३ | ३ | °तीर्थ्यौना | °तीर्थ्यौनां |
| ३१६ | १४ | भर्त्स्यन्ति C. । | भर्त्स्यन्ति L. । |
| ,, | ,, | मेत्स्य° | भेत्स्य |
| ३१९ | ३ | °तुंक्षम: | °तुंमक्षम: |
| ३१९ | १२ | आरब्ध° | आरब्धे° |
| ३२३ | १३ | मिऽना | मिन्ना |

| पृष्ठम् | पंक्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ३२४ | १३ | पिता° | पित्रा° |
| ३२५ | २ | द्रटो | दृष्टो |
| ३२८ | ११ | द्रगले | गद्गले |
| ३३६ | ११ | द्विजमा | द्विजन्मा |
| ३३७ | १ | रक्ष्यन्त | रक्ष्यन्ते |
| ३३८ | ८ | इत्श्चा° | इतश्चा° |
| ३४१ | १२ | दिव्या° | °दिव्या° |
| ३४३ | ४ | तनश्च | ततश्च |
| ३५१ | ७ | पिता° | पित्रा° |
| ३५३ | ५ | दवं | देवं |
| ३६१ | ६ | व्याजहु | व्याजहरु° |
| ३६६ | ११ | निगृ | निगु |
| ३६७ | १ | युद्ध | युर्द्ध |
| ३६८ | ७ | °भिाव° | °भिर्वि° |

| पृष्ठम् | पंक्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ३६८ | १३ | °सक्षा° | मक्ष |
| ३७१ | १० | °स्त्वकृतं | °स्त्वत्कृते |
| ३७६ | ८ | मर्या | मया |
| ,, | १० | °गति: | °द्रुति: |
| ३७७ | ६ | कुलग्न | कुलग्ने |
| ३७९ | ६ | °क्ष्णिग | °क्ष्णिणि |
| ,, | ७ | त्रलो° | त्रैलो° |
| ३८० | १३ | प्राप्त | प्राप्ते |
| ३८२ | २ | °धरषु | °धरेषु |
| ३८४ | १४ | °पाल | °पाले |
| ३९० | ४ | °ष्यति | °ष्यन्ति |
| ३९१ | ९ | °स्तन | °स्तेन |

| पृष्ठम् | पंक्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ३९२ | ८ | अर्घात | अर्धेति |
| ३९३ | १२ | °नायिलो | °नायलो |
| ३९६ | ४ | °फुला° | फला |
| ३९८ | १३ | °त्युदूधृय | °त्युद्धृत्य |
| ३९९ | १० | °गुरुभा° | गुरुरभा° |
| ४०० | ११ | तुयण | तुर्येण |
| ४०२ | १२ | शक्र | शक्रे |
| ४०३ | ३ | ब्रत | ब्रते |
| ,, | ७ | °न्त | °न्ते |
| ४०४ | ३ | मुनेरध° | मुनेरधी° |
| ४०७ | ३ | °पवाम्र° | °पत्रवान° |

॥ समाप्तमिदं त्रिषष्टिशलाकापुरुषचरितं महाकाव्यम् ॥